[10] Such a sense, 'report of valour' would be in line with Vallabhadeva's standard gloss of *pratāpa*, found, for instance, in his commentary on *Raghuvaṃśa* 4:30: *aribhayajananī vārttā pratāpaḥ*, '*pratāpa* is a piece of news that creates fear in the enemy'. This usage might incidentally also be suspected in verse 8 of the Gaṅgdhār inscription dated to 423 CE:

> *nirbhūṣaṇair avigatāsrajalārdragaṇḍair*
> *vicchinnamaṇḍanatayojjvalanaṣṭaśobhaiḥ*
> *yasyārikāminimukhāmburuhair balasya*
> *pūrvaṃ pratāpacakitaiḥ kriyate praṇāmaḥ*

## Some further thoughts on the 'Relative Priority' of the Raghuvaṃśa and Kumārasambhava

In 1982, Gary TUBB published an intriguing paper on 'The Relative Priority of the Wedding Passages in the Kumārasambhava and the Raghuvaṃśa', in which he explored the possibility that the *Kumārasambhava* might be an earlier composition of Kālidāsa than the *Raghuvaṃśa*, using the evidence of the shared textual elements of each work's seventh chapter, both giving accounts of weddings, that of Śiva and Pārvatī in the *Kumārasambhava* and that of Aja and Indumatī in the *Raghuvaṃśa*. When we first read this article, we had at once the feeling that it was too early for judgments of this kind, because not enough of the transmissional evidence had been consulted. Now that editions of Vallabhadeva's commentaries on both chapters are accessible, our suspicions are confirmed. There seems to be evidence of elements from both chapters having been passed in both directions during the course of their transmission. In other words, it is not just that Kālidāsa reused some of his favourite bits in one wedding description to supplement the other, but transmitters of both texts also did the same, thus conflating the two texts over a period of centuries, long after Kālidāsa's time.

Consider for example *Raghuvaṃśa* 7:14, which appears as *Kumārasambhava* 7:65 in Vallabhadeva's text. It seems ill-suited to the *Kumārasambhava*, for it is hardly appropriate to imply that Brahmā created not only Pārvatī, but also Śiva. Another clear example is *Raghuvaṃśa* 7:24, which does not occur in Vallabhadeva's text of the *Kumārasambhava*, but appears in Mallinātha's text of the *Kumārasambhava* (see our endnote thereon). In other words, there are clearly parts of the *Kumārasambhava*'s wedding description that derive from the *Raghuvaṃśa*'s description, and this conflicts with TUBB's hypothesis that the many shared verses of chapters 7 of the *Kumārasambhava* and *Raghuvaṃśa* were first composed for the *Kumārasambhava*, in which they fit most naturally and form a cogent narrative whole.

At a more granular level too, we find problems with TUBB's stance. TUBB records (1982:311, fn. 3) that JACOBI (1882:152–153), who had before him Mallinātha's readings, regarded *Raghuvaṃśa* 7:23 to be an improved revision by Kālidāsa of *Kumārasambhava* 7:75, but one of the criteria that led him to this judgment was that *Raghuvaṃśa* 7:23 contained °*nivartitāni* in place of °*kātarāṇi*, whereas Vallabhadeva's text here actually has °*kātarāṇi*. It therefore follows that, even if °*nivartitāni* is indeed an 'improvement', it may not have been an improvement that Kālidāsa introduced.

In any case, even now that we do have a better idea of how the earliest surviving commentary read both passages, it remains true that there is a vast amount of evidence about the transmission of both that has not yet been published or examined. We cannot therefore conclude with a clear pronouncement on the relative priority of the two chapters (and therefore of the two poems), but must limit ourselves to observing that the issue is complicated by text-critical uncertainties and thus less clear-cut than TUBB supposed.[11] An intriguing point is that the commentary of Vidyāmādhava, recently edited in an unpublished PhD thesis (PRAJITHA 2010), seems not to attest *Kumārasambhava* 7:63-85. This might however be due to problems in the transmission of the commentary; of PRAJITHA's four Malaiyāḷam-script manuscripts, only one transmits this part of the commentary (PRAJITHA 2010:33).

In the foregoing paragraphs, we have spoken of the poem itself, but it is, incidentally, odd that, as we have noted above (see p. xiii above), few of the glosses used by Vallabhadeva in his *Kumārasambhavaṭīkā* are the same as those used to explain the same expressions in the *Raghupañcikā*.

## Manuscripts not consulted for the first volume

We have been able to collate two Kashmirian manuscripts that we were not aware of while preparing the first volume: E and $L^{M}$. Scans of both have been prepared and made available on archive.org thanks to the tireless efforts of Chetan Pandey, who kindly wrote an email (to Dominic Goodall on 29.xi.2022) to alert us to the presence of the manuscripts there. One contains only the root text, and we have assigned it the siglum $L^{M}$ on the grounds that it is held in Lucknow, according to metadata printed on each image ('CC-0 Sharada Manuscripts at UPSS Lucknow, Digitized by eGangotri'; UPSS stands for Uttar Pradesh Sanskrit Sansthan). It contains the verses 1:1–3:14, 5:33b–7:71, and 9:1–10:54.

The other manuscript transmits part of Vallabhadeva's commentary on the *Raghuvaṃśa*, covering the end of chapter 6 and a large portion of chapter 7. We have assigned it the siglum E just on the grounds that it was digitized by eGangotri, for here the metadata printed on each image is less informative ('CC-0. In Public Domain. Digitized by eGangotri'). E contains folios numbered 58–61 and 64–67. Chapter 7 begins at the top of

[11] TUBB has since reiterated his belief in the relative posteriority of the *Raghuvaṃśa*, asserting (BRONNER, SHULMAN and TUBB 2014:84) that it may be 'justly regarded as the work of a more mature poet'.

f. 59v. It breaks off in the middle of 7:21 at the bottom of f. 61v, and resumes in the commentary on 7:39 on f. 64r. It breaks off finally in the commentary on 7:71, half way down f. 67v, which is half blank, suggesting that no more of the text was copied after this point. The metadata on archive.org (`https://archive.org/details/uyuX_m-14-raghu-panchika-raghuvamsham-tika-by-vallabha-deva-sharada-manuscript-e-gang`, consulted 23.iv.2023) records this information:

> Manuscripts from Various Collections digitized by Egangotri, M14 - Raghu Panchika (Raghuvamsham Tika By Vallabha Deva) Sharada Manuscript - eGangotri Digital Preservation Trust.

In terms of its readings, E seems to be fairly close to $L_2$, with which it shares a few conjunctive errors (*niṣphalāśayatvāt* in the commentary on 7:2; *duṣṭaṃ nimitaṃ* and *gamane* for *galane* in the commentary on 7:10).

## SANSKRIT TEXT

# सप्तमः सर्गः॥

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम्।
स्वसारमादाय विदर्भराजः पुरप्रवेशाभिमुखो बभूव॥ १॥

अनन्तरं ≪क्रथकैशिकेशो≫ नगरसम्मुख आसीत्। इन्दुमतीं गृहीत्वा, पत्या सम्बद्धाम्। अनुरूपेण। उपयच्छति स्वीकरोतीत्युपयन्ता भर्ता। कुमारेण समेन युक्तां देवसेनाख्यां कन्यामिव। देवसेना दैत्यसेना चेति नाम्ना कन्यके प्रजापतेरभूताम्। तयोः पूर्वस्याः पतित्वे कुमारो ऽभिषिक्त इत्यागमः। सुरपृतनामित्येके। सर्गे ऽस्मिन्नपि तदेव वृत्तम्॥ १॥

सेनानिवेशान्पृथिवीभृतो ऽपि जग्मुर्विभातग्रहमन्दभासः।
भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेशेषु च साभ्यसूयाः॥ २॥

---

**1 c.** °राजः ] P$^{pc}$B$^{1}$JD$^{M}$B$_{2}^{M}$B$_{3}^{M}$B$_{5}^{M}$B$_{7}^{M}$L$^{M}$; °राजा UEB$_{4}^{M}$; °नाथः P$^{ac}$L$_{2}$V$^{M}$B$_{1}^{M}$**C** **2 a.** °भृतो ] **V**D$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{3}^{M}$B$_{4}^{M}$B$_{5}^{M}$B$_{7}^{M}$L$^{M}$Hem.; °भुजो V$^{M}$; °क्षितो T$^{M}$Mall.Ar.(?)Nā. Jin.

---

**2** a$^{5}$–b$^{11}$ T$^{M}$

---

**1.1** अनन्तरं ] P; अथानन्तरं UB$^{1}$L$_{2}$EJ **1.1** क्रथकैशिकेशो ] *conj.* (cf. Jin.); विदर्भराजः PB$^{1}$J; विदर्भराजा UE; विदर्भराजाः L$_{2}$ **1.1** नगरसम्मुख आसीत् ] P; पुरप्रवेशे अभिमुखः सम्मुखो (सन्मुखो L$_{2}$) बभूवासीत् UB$^{1}$L$_{2}$EJ **1.1** गृहीत्वा ] *conj.*; स्वसारमादाय U; सुसारमादाय PJ; स्वसारमादाय गृहीत्वा B$^{1}$L$_{2}$E **1.2** पत्या सम्बद्धाम् ] *conj.*; उपयन्त्रा पत्या युक्तां सम्बद्धाम् UPB$^{1}$L$_{2}$J; उपयन्त्रा पत्या युक्तां सम्बन्धां E **1.2** अनुरूपेण ] *conj.*; सदृशेनानुरूपेण Σ **1.2** कुमारेण ] *conj.*; स्कन्देन कुमारेण Σ **1.3** °ख्यां ] Σ; °ख्यं E **1.4** पूर्वस्याः ] UPB$^{1}$L$_{2}$E; पूर्वस्या J **1.4** °भिषिक्त ] UPB$^{1}$L$_{2}$J; °भिषक्त E **1.5** सुरपृतनाम् ] E; देवसेनां सुरपृतनाम् UPB$^{1}$L$_{2}$J **1.5** °स्मिन्नपि तदेव ] PB$^{1}$; °स्मिंस्तदेव UJ; °स्मिन्न तदेव L$_{2}$; °स्मिन्नेतदेव E

© Csaba Dezső, Dominic Goodall and Harunaga Isaacson, 2025 | DOI:10.1163/9789004721746_002
This is an open access chapter distributed under the terms of the CC BY-NC-ND 4.0 license.

अन्ये राजानः स्कन्धावारानगमन्। प्रत्यूषे शश्यादिग्रहवद्विच्छायाः। इन्दुमतीं प्रति निष्फलाशत्वात्। रूपेष्वाकल्पेषु च सरोषाः, किमेभिरनर्थकैः प्रयोजनमिति॥ २॥

**सान्निध्ययोगात्किल तत्र शच्याः**
**स्वयंवरक्षोभकृतामभावः।**
**काकुत्स्थमुद्दिश्य समत्सरो ऽपि**
**शशाम तेन क्षितिपाललोकः॥ ३॥**

तस्मिन्विवाहे इन्द्राण्याः †सान्निध्ययोगेन† ≪स्वयंवरविघ्नविधायिनां नाशो≫ बभूव। केनापि क्षोभो न कृतः। तेन हेतुनाजं प्रति सद्वेषो ऽपि राजलोको ऽक्षमत्। इन्द्राण्याः सन्निधानाद्विवाहे कलहकारिणां विनाशो भवति। किलेत्यागमसूचनार्थः। †शचीसन्निधानाद्विघ्नकारिणो नश्यन्तीति श्रुतिः†॥ ३॥

**तावत्प्रकीर्णाभिनवोपकारम्**
**इन्द्रायुधद्योतनतोरणाङ्कम्।**

---

**4 a.** °पकारम् ] **V**$D^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M L^M$; °पचारम् $V^M$**C**  **4 b.** °द्योतन° ] **V** $D^M B_1^M B_2^M B_3^M B_5^M B_7^M L^M$Hem.; °द्योतित° $V^M$Hem.$^{vl}$Mall.Ar.(?)Nā.Jin.; °ध्योतन° $B_4^M$

---

**3** $c^2$–$c^{11}$, $d^4$–$d^8$ $T^M$

---

**2.1** अन्ये राजानः ] *conj.*; पृथिवीभृतः अन्ये राजानः UP$B^1$J; पृथिवीभृत अन्ये राजानः $L_2$; पृथिवीभृते अन्येपि राजानः E  **2.1** स्कन्धावारान् ] *conj.*; सेनानिवेशान्स्कन्दावारान् Σ  **2.1** अगमन् ] P; जग्मुरगमत् U; जग्मुरगमन् $B^1L_2$EJ  **2.1** प्रत्यूषे शश्यादिग्रहवद् ] *conj.*; विभातग्रहवत् शश्यादिग्रहवन् UE; विभातग्रहवत् प्रत्यूषे शशिवत् P; विभातग्रहवत् शश्यादिग्रहवत् $B^1L_2$; विभातविग्रहवत् शय्यादिग्रहवत् J  **2.1** विच्छायाः ] *conj.*; मन्दभासो विच्छायाः UP$L_2$EJ; मन्दभासो विच्छायः $B^1$  **2.1** इन्दुमतीं ] *conj.*; भोज्यामिन्दुमतीं Σ  **2.2** निष्फलाशत्वात् ] *conj.*; व्यर्थमनोरथत्वान्निष्फलाशत्वात् U$B^1$; निष्फलाशात्वात् P; व्यर्थमनोरथत्वान्निष्फलाशयत्वात् $L_2$E; निष्फलाशयत्वात् J  **2.2** रूपेष्वाकल्पेषु ] *conj.*; रूपेषु वेशेषु आकल्पेषु Σ  **2.2** सरोषाः ] *conj.*; साभ्यसूयाः सरोषाः Σ  **3.1** तस्मिन्विवाहे ] *conj.*; तत्र तस्मिन्विवाहे Σ  **3.1** इन्द्राण्याः ] *conj.*; शच्याः UP$B^1L_2$E; शच्या इन्द्राण्याः J  **3.1** स्वयंवरविघ्नविधायिनां नाशो ] *conj.* (cf. Jin.); स्वयंवरक्षोभकारिणामभावो Σ  **3.2** सद्वेषो ऽपि ] *conj.*; समत्सरो ऽपि सद्वेषो ऽपि Σ  **3.3** राजलोको ऽक्षमत् ] *conj.*; राजलोकः शशाम नाक्षमत् U$B^1L_2$EJ; राजलोकः शशामाक्षमत् P  **3.3** इन्द्राण्याः सन्निधानाद् ] U$B^1$EJ; इन्द्राण्याः सन्निधानसम्बन्धात् P; इन्द्राण्या सन्निधानाद् $L_2$  **3.3** विनाशो ] Σ; अभावो E  **3.4** °सूचनार्थः ] Σ; °सूचकः E  **3.4** विघ्नकारिणो ] U$B^1L_2$EJ; स्वयंवरविघ्नकारिणो P

वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम्॥ ४॥

यावत्ते राजानः स्वकटकबन्धान्याताः तावत्तस्मिन्नवसरे इत्यर्थः। अज इन्दुमत्या सह राजपथमाससाद। ≪विक्षिप्तनूतनपुष्पप्रकरम्। शक्रधनुःशोभमानबहिर्द्वारचिह्नम्। केतुच्छायनिषिद्धघर्मम्≫। ध्वजानां छाया ध्वजच्छायम्। विभाषा सेनासुरेत्यादिना ह्रस्वः॥ ४॥

ततस्तदालोकनसत्वराणां सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि॥ ५॥

अनन्तरं नागरिकस्त्रीणां हर्म्येषु व्यापारा अनेन प्रकारेणासन्। वधूवरदर्शनार्थं

---

**4 d.** प्राप ] ŚHem.Mall.Jin.; प्रापद् Ar.(?)Nā.Hem.$^{vl}$ **5 a.** °सत्वराणां ] **V**$D^M B^M_1 B^M_2 B^M_3 B^M_5 B^M_7 L^M$; °सत्व--- $T^M$; °सत्तरानां $B^M_4$; °तत्पराणां $V^M$**C** **5 d.** त्यक्ता° ] **V**$D^M V^M B^M_1 B^M_4 B^M_5 B^M_7 L^M$Hem.Mall.Ar.Nā.; त्यत्तया° $B^M_2 B^M_3$; मुक्ता° Jin.

---

**4** $d^9$–$d^{11}$ $T^M$ **5** $a^1$–$a^9$ $T^M$

---

**4.4** विभाषा सेनासुराच्छायाशालानिशानाम् *Aṣṭādhyāyī* 2.4.25.

---

**4.1** याताः ] U$B^1L_2$EJ; गताः P **4.2** अज इन्दुमत्या ] *conj.*; स वरो ऽजः वध्वा इन्दुमत्या UP$B^1L_2$J; स वरोजः वध्वा इन्दुपत्या E **4.2** राजपथमाससाद ] *conj.*; राजमार्गं राजपथै प्राप ससाद U; राजमार्गमाससाद P; राजमार्गं राजपथं प्राप ससाद $B^1$; राजमार्गं राजपथं प्रापाससाद $L_2$EJ **4.2** विक्षिप्तनूतनपुष्पप्रकरम् ] *conj.*; प्रकीर्णो विक्षिप्तो ऽभिनवः उपकारः पुष्पप्रकरो (कारो U$B^1$EJ) यत्र UP$B^1L_2$EJ **4.3** शक्रधनुःशोभमानबहिर्द्वारचिह्नम् ] *conj.*; इन्द्रायुधवच्छक्रधनुर्वद् (धनुवद् UJ) द्योतनं शोभमानं तोरणं बहिर्द्वारमेवाङ्कश्चिह्नं यस्य UP$B^1$J; इन्द्रायुधवच्छक्रधनुर्वद्द्योतनं तोरणं बहिर्द्वारमेवाङ्कचिह्नं यस्य $L_2$; इन्द्रायुधवच्छक्रधनुर्वद्द्योतनं तोरणं बहिर्द्वारमेवाङ्कं चिह्नं यस्य E **4.3** केतुच्छायानिषिद्धघर्मम् ] *conj.*; ध्वजानां केतूनां छायया निवारित उष्णो (निवारितोष्णो UPJ; निवारित उष्ण E) घर्मो यत्र सः UP$B^1L_2$EJ **4.3** छाया ध्वजच्छायम् ] P$B^1L_2$J; छाया ध्वजच्छायां U; छायया ध्वजच्छायं E **4.4** विभाषा सेनासुरेत्यादिना ] P$B^1L_2$E; विभाषा सेनास्वरेत्यादिना U; विभाषा सेतास्वरेत्यादिना J **5.1** अनन्तरं ] *conj.*; ततो ऽनन्तरं Σ **5.1** नागरिकस्त्रीणां ] *conj.*; पुरसुन्दरीणां नागरिकस्त्रीणां U$B^1L_2$EJ; पुरसुन्दरीणां P **5.1** हर्म्येषु ] *conj.*; सौधेषु हर्म्येषु U$B^1L_2$EJ; सौधेषु P **5.1** व्यापारा ] *conj.*; विचेष्टितानि व्यापाराः U$B^1L_2$EJ; विचेष्टितानि व्यापारः P **5.1** अनेन प्रकारेणासन् ] *conj.*; इत्थमनेन प्रकारेण बभूवुः U$B^1L_2$EJ; इत्थमनेन प्रकारेण बभूवुरासन् P **5.1** वधूवरदर्शनार्थं ] *conj.*; तदालोकनं वधूवरदर्शनं तदर्थं Σ

शीघ्रगानाम्। कनकगवाक्षयुक्तेषु। उत्सृष्टापरकर्माणः॥ ५॥

आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः।
बन्धुं न सम्भावित एव तावत्
करेण रुद्धो ऽपि न केशपाशः॥ ६॥

कयाचिन्नार्या केशहस्तो ग्रथितुमेव तावन्न शकितः, नापि हस्तेनावष्टब्धो गवाक्षपथं झगिति यान्त्या। ≪उन्मोचनत्यक्तस्रक्≫। तावदेवेति शब्दाभ्यामत्र बन्धस्य दूरावस्था, न नियमस्य क्रमः, प्रतिपाद्यते। यत्र करेण रोधमात्रमपि नास्ति, तत्र बन्धस्तावद्दूरापेत एवेत्यर्थः। हस्तपक्षपाशाः केशप्रशंसार्थाः॥ ६॥

---

**6 c.** बन्धुं ] UPET$^M$V$^M$B$_3^M$B$_5^M$B$_4^M$B$_7^M$L$^M$₵; बद्धुं B$^1$L$_2$B$_1^M$B$_2^M$; बंधं JD$^M$ **6 d.** रुद्धो ऽपि न केशपाशः ] UPL$_2$EJB$_1^M$B$_2^M$L$^M$Hem.; रुद्धो ऽपि न केशहस्तः B$^1$B$_7^M$Ar.$^{vl}$; रुद्धो ऽपि हि केशपाशः D$^M$B$_3^M$B$_4^M$B$_5^M$; रुद्धो ऽपि च केशपाशः V$^M$Mall.Jin.; बद्धो ऽपि हि केशपाशः Hem.$^{vl}$; रुद्धो ऽपि च केशहस्तः Ar.Nā.

---

**6** b$^5$–c$^7$ T$^M$

---

**5.2** शीघ्रगानाम् ] *conj.*; *om.* UJ; सत्वराणां शीघ्रगाणाम् P; सत्वराणां B$^1$E; सत्वरणात् L$_2$ **5.2** कनकगवाक्षयुक्तेषु ] *conj.*; चामीकरजालवत्सु कनकगवाक्षयुक्तेषु Σ **5.2** उत्सृष्टापरकर्माणः ] *conj.*; त्यक्तान्यकार्याणि उत्सृष्ट्वापरकर्माणि U; त्यक्तान्यकार्याणि उत्सृष्टपरकर्माणि P; त्यक्तान्यकार्याणि उत्सृष्टापरकर्माणि B$^1$L$_2$; त्याक्तान्यकार्याणि उत्सृष्टापरकर्माणि E; त्यक्तान्यकार्याणि उत्सृष्टापराकर्माणि J **6.1** केशहस्तो ] *conj.*; केशहस्तः प्रशस्तः केशाः केशहस्तः U; केशपाशः प्रशस्ताः केशाः केशहस्ताः P; केशहस्तः प्रशस्ताः केशाः केशहस्तः B$^1$; केशहस्ता प्रशस्ताः केशः L$_2$; केशहस्तः प्रशस्तः केशः E; केशहस्तः प्रशस्ताकेशः J **6.1** ग्रथितुमेव ] *conj.*; बन्धुं ग्रथितुमेव UPL$_2$E; बद्धं ग्रथितुमेव B$^1$; बद्धुं ग्रथितमेव J **6.1** न शकितः ] *conj.*; न सम्भावितो न शकितः Σ **6.1** हस्तेनावष्टब्धो ] *conj.*; करेण हस्तेन रुद्धो ऽवष्टब्धः UB$^1$EJ; हस्तेन रुद्धो ऽवष्टब्धः P; करेण हस्तेन स्तेन रुद्धः अवष्टब्धः L$_2$ **6.2** गवाक्षपथं ] *conj.*; आलोकमार्गं गवाक्षपथं Σ **6.2** झगिति यान्त्या ] *conj.*; सहसा झगिति व्रजन्त्या यान्त्या UPB$^1$L$_2$J; सहसा झगिति व्रजन्त्या यन्त्या E **6.2** उन्मोचनत्यक्तस्रक् ] *conj.*; उद्वेष्टनेनोन्मोचनेन वान्तं माल्यं स्रग्येन UB$^1$J; उद्वेष्टनेनोन्मोचनेन उन्मुक्तं त्यक्तं माल्यं स्रग्येन P; उद्वेष्टनेनोन्मोचनेन वान्तं माल्यं स्रगेन L$_2$; उद्वेष्टनेनोन्मोचनेन वान्तं माल्यं स्रग्यया E **6.2** तावदेवेति ] UB$^1$L$_2$EJ; तावदेव P **6.3** बन्धस्य ] *conj.* (cf. Hem.); वधूवरस्य UPB$^1$L$_2$EJ **6.4** यत्र करेण रोधमात्रमपि ] *conj.*; यत्र कररोधमात्रमपि UPJ; तत्र करेण रोधनमात्रमपि B$^1$L$_2$E **6.4** तत्र ] UPB$^1$L$_2$J; तन्त्र॰ E$^{pc}$; त⏑ E$^{ac}$ **6.4** ॰पाशाः केशप्रशंसार्थाः ] *em.*; ॰पाशः केशानां प्रशंसार्थः UB$^1$EJ; ॰पाशाः केशप्रशंसार्थाः। आलोक्यते ऽनेनेत्यालोको गवाक्षः P; ॰पाशः केशानां प्रशेसार्थः L$_2$

**प्रासाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव।**
**उत्सृष्टलीलागतिरा गवाक्षादलक्तकाङ्कां पदवीं ततान॥ ७॥**

अन्या नारी यावकचिह्नं मार्गमकरोत्, वातायनं यावत्। सैरन्ध्र्या रागार्थं गृहीतं पादस्याग्रमपहृत्य। ≪आर्द्रलौहित्यम्≫। द्रवतीति द्रवः। प्रसाधयत्यलङ्करोतीति प्रासाधिका। त्यक्तविलासगमना॥ ७॥

**विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा।**
**तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती॥ ८॥**

अन्या गवाक्षसमीपं जगाम। दक्षिणं नेत्रं कज्जलेन संयोज्य ≪वामे तु तददत्त्वैव≫ तथैव—त्यक्तविलासगमनेत्यर्थः—अञ्जनप्रदानार्थं तूलिकामेव दधाना॥ ८॥

---

**7 a.** प्रासाधिका° ] UP$B^1$J$B_1^M B_2^{Mpc} B_3^M B_4^M B_5^M B_7^M L^M$; प्रसाधिका° $L_2$E$V^M B_2^{Mac}$**C**; प्रसादिका° $D^M$ **7 d.** °लक्तकाङ्कां ] UPEJ$T^M D^M V^M B_1^M B_2^M B_4^M B_5^M B_7^M L^M$**C**; °लक्क्तकाङ्क $B^1$; °लाक्तकाङ्कां $B_3^M$ **8** $B_3^M L^M$ add the following verse after verse 8: स्तनन्धयन्तं तनयं विहाय विलोकनाय त्वरया व्रजन्ती ।संप्रस्नुताभ्यां पदवीं स्तनाभ्यां सिषेच काचित्पयसागवाक्षम् ॥ See endnote.

---

**7** $d^3$–$d^{11}$ $T^M$ **8** $a^1$–$a^6$ $T^M$

---

**7.1** अन्या नारी ] *conj.*; काचिदन्या नारी Σ **7.1** यावकचिह्नं मार्गमकरोत् ] *conj.*; अलक्तकाङ्कां यावकचिह्नां पदवीं मार्गं ततानाकरोत् UP$L_2$EJ; अलक्तकाङ्कं यावकचिह्नां पदवीं मार्गं ततानाकरोत् $B^1$ **7.1** वातायनं यावत् ] *conj.*; आ गवाक्षाद्वातायनं यावत् UP$B^1L_2$J; आ गवाक्षात् वातायनसमीपं यावत् E **7.1** सैरन्ध्र्या ] *conj.*; प्रासाधिका सैरन्ध्र्यालम्बितं U; प्रासाधिकया सैरन्ध्र्यालम्बितं P$B^1L_2$; प्रसाधिकया सैरन्ध्र्यालम्बितं E; प्रासाधिकया सैरंध्यालम्बितं J **7.2** पादस्याग्रमपहृत्य ] *conj.*; अग्रपादं पादस्याग्रमाक्षिप्यापहृत्य Σ **7.2** आर्द्रलौहित्यम् ] *conj.*; द्रव आर्द्रो रागो लौहित्यं यस्य UP$L_2$E; द्रव आद्रो रागो लौहित्यं यस्य आन्द्रो (आद्रो J) लौहित्यं यस्य $B^1$J **7.2** द्रवः ] UP$B^1$J; द्रव $L_2$; द्रवं E **7.3** प्रसाधय° ] UP$B^1L_2$; प्रसादय° E; प्रासाधय° J **7.3** त्यक्तविलासगमना ] *conj.*; त्यक्ता लीलागतिर्विलासगमनं यया सा UP; उत्सृष्टा त्यक्ता लीलागतिर्विलासगमनं यया सा $B^1L_2$EJ **8.1** अन्या ] *conj.*; अपरा अन्या $UP^{pc}B^1L_2$EJ; अन्या अपरा $P^{ac}$ **8.1** गवाक्षसमीपं ] *conj.*; वातायनसन्निकर्षं गवाक्षसमीपं Σ **8.1** जगाम ] P; ययौ जगाम U$B^1L_2$EJ **8.1** नेत्रं कज्जलेन ] *conj.*; विलोचनं नेत्रमञ्जनेन U$B^1L_2$; नेत्रमञ्जनेन P; विलोचनं नेत्रं E; विलोचनं नैत्रेतांजनेन J **8.1** संयोज्य ] *conj.*; सम्भाव्य संयोज्य Σ **8.2** वामे तु तददत्त्वैव ] *conj.* (cf. *KuSamPañj*); तेन कज्जलेन वञ्चितं वामं नेत्रं यया (था U$L_2$J); UP$B^1L_2$EJ **8.2** अञ्जनप्रदानार्थं ] *conj.*; शलाकमञ्जनप्रदानार्थं UP$B^1$; शलाकामञ्जनप्रदानार्थं $L_2$; शलाकामञ्जनप्रसादार्थं E; शलाकामंजनप्रधानार्थं J **8.2** तूलिकामेव ] PE; तूलिमेव U$B^1L_2$J **8.3** दधाना ] *conj.*; वहन्ती दधाना सम्भावनमावर्जनं वितरणमेव Σ

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः॥ ९॥

अपरा जघनस्थवासआग्रथनं प्रयाणेनोन्मुक्तं न जग्रन्थ। गवाक्षमध्यनिक्षिप्तचक्षुः। किं तु वस्त्रमवष्टभ्य करेणातिष्ठत्। ≪अत एव नाभिगतालङ्करणदीप्तित्वम्≫।

अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमितं गलन्ती।
कस्याश्चिदासीद्रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा॥ १०॥

अन्यस्यास्तत्कालं मेखला ≪पादाङ्गुष्ठमूलनिहिततन्तुशेषा बभूव≫। अर्धमुम्भिता प्रतिपदं भ्रश्यन्ती। आभरणानां भ्रष्टत्वाद्दुष्टं निमितं निधानं क्षेपो वा यत्र

---

**10 a.** अर्धाचिता ] UPB$^1$L$_2$EJV$^M$B$_1^M$B$_2^M$B$_3^M$B$_5^M$B$_7^M$L$^M$Hem.Ar.Nā.; अर्धाचिन्ता B$_4^M$; अर्धार्चिता D$^M$; अर्धाञ्चिता Mall.Jin. **10 b.** दुर्निमितं गलन्ती ] B$^1$B$_2^M$B$_3^M$B$_4^M$B$_7^M$; दुर्निमिते गलन्ती UEJV$^M$Hem.Ar.Nā.Mall.; दुर्निमितां गलन्ती D$^M$; दुर्निमित्तं गलन्ती PL$_2$B$_1^M$L$^M$; दुर्निमित्तां गलन्ती B$_5^M$; दुर्निमिता जगन्ती Jin.; दुर्निमिता गलन्ती Jin.$^{vl}$ **10 c.** °द्रशना ] ŚMall.Ar.Nā.; °द्रसना Hem.Jin.

---

**9** b$^1$–c$^5$ T$^M$ **10** d$^{10}$–d$^{11}$ T$^M$

---

**9.1** अपरा ] *conj.*; अन्या अपरा Σ **9.1** जघनस्थवासआग्रथनं ] *conj.*; जघनस्थवासआग्रथनं नीवीं तां UJ; जघनस्थवासः आग्रन्थनं नीवी तां P; जघनस्था वासआग्रथनं नीवी तां B$^1$; जघनस्थवासआग्रथनं नीवी तां L$_2$; जघनस्थवासआग्रथननीवीं तां E **9.1** प्रयाणेनोन्मुक्तं ] *conj.*; प्रस्थानभिन्नां प्रयाणेनोन्मुक्तां PB$^1$L$_2$E; प्रस्थानभिन्नां प्रायेणोन्मुक्तां UJ **9.1** न जग्रन्थ ] *conj.*; न बबन्ध न जग्रन्थ Σ **9.2** गवाक्षमध्यनिक्षिप्तचक्षुः ] *conj.*; जालान्तरप्रेषितदृष्टिर्गवाक्षमध्यनिक्षिप्तचक्षुः UPB$^1$L$_2$J; जालान्तरप्रेषितदृष्टिर्गवाक्षनिक्षिप्तचक्षुः E **9.2** °ष्टभ्य ] P; °लम्ब्य UB$^1$L$_2$EJ **9.3** अत एव नाभिगतालङ्करणदीप्तित्वम् ] *conj.* (cf. KuSamPañj); नाभिं प्रविष्टा गता आभरणप्रभा अलङ्करणदीप्तयो यस्य तेन हस्तेन UPJ; नाभिप्रविष्टा गता आभरणप्रभा अलङ्करण(अङ्करण° B$^1$)दीप्तयो यस्य तेन हस्तेन B$^1$L$_2$E **10.1** अन्यस्यास् ] *conj.*; कस्याश्चिदन्यस्यास् UPB$^1$L$_2$; कस्यचिदन्यस्यास् E; कस्याचिदन्यस्यास् J **10.1** तत्कालं ] *conj.*; तदानीं तत्कालं UPB$^{1ac}$L$_2$; तदानीं तत्कालमेव B$^{pc}$EJ **10.1** मेखला ] *conj.*; रशना मेखला UB$^1$L$_2$EJ; रशना P **10.1** पादाङ्गुष्ठमूलनिहिततन्तुशेषा बभूव ] *conj.*; पादाङ्गुष्ठमूले(ल P) अर्पितं निहितं सूत्रं शेषो(सूत्रशेषा P) यस्याः सा तथोक्ता आसीत् UPB$^1$L$_2$J; पदाङ्गुष्ठमूले अर्पितं +निहितं + सूत्रं शेषो यस्यास्सा तथोक्ता आसीत् E **10.2** अर्धमुम्भिता ] *conj.*; अर्धचिता अर्धसम्भाविता U; अर्धाचिता अर्धदुम्बिता P; अर्धाचिता अर्धसुम्भिता B$^1$; अर्धाचिता अर्धमुम्भिता L$_2$E; अर्धाचिता अर्धसंभिता J **10.2** प्रतिपदं ] *conj.*; पदे पदे प्रतिपदं Σ **10.2** भ्रश्यन्ती ] *conj.*; गलन्ती भ्रश्यन्ती UPL$_2$E; गलन्ती भृश्यन्ती B$^1$; गलन्ती भ्रशन्ती J **10.2** भ्रष्टत्वाद् ] UPL$_2$EJ; भृष्टत्वाद् B$^1$ **10.2** निमितं ] U; निमित्तं PB$^1$J; दुष्टं निमितं L$_2$E

गलने। अत एव सूत्रशेषत्वम्॥ १०॥

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्त्राभरणा इवासन्॥ ११॥

नारीणां वक्त्रैर्व्याप्तमध्यानि वातायनानि पुण्डरीकभूषणानीवाभवन्। ≪पानसौरभमध्यैः≫। घनकौतुकानाम्। ≪चटुलनयनषट्पदैः≫॥ ११॥

ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जज्ञुर्विषयान्तराणि।
तदा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥ १२॥

ताः पुरसुन्दर्यः शब्दस्पर्शरसगन्धान्न बुबुधिरे। अजमीक्षणैः सादरमीक्षमाणास्तद्गतमनस्कत्वान्न ताः शृण्वन्ति, स्पर्शान् नानुभवन्ति, नास्वादयन्ति, न जिघ्रन्ति वा। उत्प्रेक्ष्यते—तत्कालं तासां श्रोत्रत्वग्जिह्वाघ्राणानामाकर्णनस्पर्श-

**11 d.** सहस्रपत्त्रा° ] ŚMall.Ar.Nā.Jin.; सहस्रपद्मा° Hem.; प्रफुल्लपद्मा° Hem.$^{vl}$ **12 b.** जज्ञुर्वि° ] $UPB^{1}L_{2}JV^{M}B_{1}^{M}B_{2}^{M}B_{3}^{M}B_{4}^{M}B_{5}^{M}B_{7}^{M}L^{M}$; जज्ञुवि° $D^{M}$; जग्मुर्वि° E𝕮 **12 c.** तदा हि ] Ś; तथा हि $V^{M}$𝕮

**10.3 गलने** ] $UB^{1}J$; गलनेन P; गमने $L_{2}E$ **10.3 °शेषत्वम्** ] Σ; °शेषम् E **11.1 नारीणां वक्त्रैर्व्याप्तमध्यानि वातायनानि पुण्डरीकभूषणानीवाभवन्** ] *em.*; पुण्डरीकभूषणा इवाभवन् नारीणां वक्त्रैर्व्याप्तमध्यानि वातायनानि UJ; नारीणां वक्त्रैर्व्याप्तमध्यानि वातायनानि पुण्डरीकभूषणानीवाभुवन् P; पुण्डरीकभूषणा इवाभवन् $B^{1ac}$; तासां नारीणां मुखैर्व्याप्तान्तरा व्याप्तमध्या गवाक्षास्सहस्रपत्त्राभरणा इवासन् पुण्डरीकभूषणा इवाभवन् $B^{3pc}L_{2}$; तासां नारीणां मुखैर्व्याप्तान्तरा व्याप्तमध्या गवाक्षास्सहस्रपत्त्राभरणा इवासन् पुण्डरीकभूषणा इवासन् E **11.2 पानसौरभमध्यैः** ] *conj.* (cf. Jin. & KuSamPañj); आसवः पानं तस्य गन्धो गर्भो येषां तैः U; आसवः पानं तस्य गन्धो गर्भे मध्ये येषां तैः P; आसवः पानं तस्य गन्धो गर्भे येषां तैः $B^{1}L_{2}EJ$ **11.2 घनकौतुकानाम्** ] P; सान्द्रकुतूहलानां घनकौतुकानां $UB^{1}L_{2}E$; साद्रकुतूहलानां घनकौत्तकान् J **11.2 चटुलनयनषट्पदैः** ] *conj.*; विलोलानि चटुलानि नेत्राण्येव भ्रमरा येषां मुखानां तैः $UB^{1}L_{2}EJ$; विलोलानि नेत्राण्येव भ्रमरा येषां मुखानां तैः P **12.1 शब्दस्पर्श°** ] *conj.*; विषयान्तराणि शब्दस्पर्श° $UP^{pc}B^{1}L_{2}E$; विषयान्तराणि शब्दस्पर्शरूप° $P^{ac}J$ **12.1 बुबुधिरे** ] *conj.*; जज्ञुः न बुबुधिरे $UPL_{2}EJ$; जज्ञः न बुबुधिरे $B^{1}$ **12.1 अजमीक्षणैः** ] *conj.*; राघवमजं दृष्टिभिरेक्षणैः UJ; राघवमजं दृष्टिभिरीक्षणैः $PB^{1}L_{2}E$ **12.2 सादरमीक्षमाणास्** ] *conj.*; आपिबन्त्यः सादरमीक्षमाणाः Σ **12.2 स्पर्शान्** ] PE; स्पर्शं $UL_{2}J$; स्पर्शनं $B^{1}$ **12.2 नास्वादयन्ति** ] $UP^{pc}B^{1}EJ$; नास्वादयन्ति न+ान्यं+पश्यन्ति $P^{ac}$; न स्वादयन्ति $L_{2}$ **12.3 तत्कालं** ] *conj.*; तदा तत्कालं $UB^{1}L_{2}EJ$; यस्मात्तदा तत्कालं P **12.3 तासां** ] *conj.*; तासां शेषेन्द्रियवृत्तिः शेषेन्द्रियाणां Σ **12.3 °घ्राणानाम्** ] $P^{pc}B^{1}L_{2}EJ^{pc}$; °घ्राणनास् U; °चक्षुर्घ्राणानाम् $P^{ac}$; °घ्राणानास् $J^{ac}$

नास्वादनशिङ्घनव्यापाराश्चक्षुषैव कृतपरितोषत्वात्तदाश्रयस्य शून्यकल्पत्वात्सर्वप्रकारेण नेत्रमिव ≪गताः≫॥ १२॥

स्थाने वृता भूपतिभिः परोक्षैः
स्वयंवरं साधुममंस्त बाला।
पद्मेव नारायणमन्यथासौ
लभेत कान्तं कथमात्मतुल्यम्॥ १३॥

चतुर्भिः कलापकम्॥ राजपुत्रः स्यालस्यालयमाप। नागरिकावदनेभ्य एवंविधा निःसृता वाचः कर्णसुखकारिणीराकर्णयन्। कौतुकोपकरणैः शोभमानम्।

कीदृशीर्वाचः? स्थाने इत्यादि। †भूपतिभिः† अदृष्टैरर्थिता सती इन्दुमती स्वयंवरं भद्रं बुबुधे। तद्युक्तम्। अन्यथा स्वयंवरं विना कस्मादात्मानुरूपं

**13 b.** बाला ] **Ś**; भोज्या V$^{M}$**Ꞓ**

**12** After the commentary on 12, **V** have a remark that we have moved to after 7:19 below: see our note on 7:19.3.

**12.4** °स्वादनशिङ्घन° ] UP$^{pc}$B$^{1}$L$_{2}$J; °स्वादनान्यविषयदर्शनशिङ्घन° P$^{ac}$; °स्वादनजिघ्रन° E **12.4** °क्षुषैव ] *conj.*; °क्षुष्येव Σ; °क्षुषेव E **12.5** नेत्रमिव ] P; चक्षुरिव UB$^{1}$L$_{2}$EJ **12.5** गताः ] *conj.* (cf. KuSamPañj); प्रविष्टा Σ **13.1** चतुर्भिः ] PB$^{1}$L$_{2}$E; वृत्तभिः U; वृत्तिभिः J **13.1** राजपुत्रः ] *conj.*; कुमारः राजपुत्रः Σ **13.1** स्यालस्यालयमाप ] *conj.*; सम्बन्धिनः स्यालस्य सद्म आलयं समाससाद आप UL$_{2}$EJ; सम्बन्धिनः स्यालस्य सद्म आलयं समाससाद प्राप P; सम्बन्धिनः स्यालस्य सद्म आससाद आप B$^{1}$ **13.1** नागरिकावदनेभ्य ] *conj.*; पौरवधूमुखेभ्यः नागरिकावक्त्रेभ्य UJ; पौरवधूमुखेभ्यः नागरिकावदनेभ्यः PB$^{1}$L$_{2}$E **13.2** एवंविधा निःसृता वाचः कर्णसुखकारिणीराकर्णयन् ] *conj.*; इत्युद्गताः कथं एवंविधाः U; इत्युद्गताः कथा एवंविधाः निस्सृता वा कर्णसुखकारिणीराकर्णयन् P; इत्युद्गताः कथा एवंविधाः B$^{1}$L$_{2}$J; उद्गताः कथा एवंविधाः E **13.2** कौतुकोपकरणैः शोभमानम् ] *conj.*; कौतुकोपकरणैरुद्भासितं शोभमानम् P; कौतुकसंविधाभिः कौतुकोपकरणैरुद्भाषितं शोभमानम् UB$^{1}$; कौतुकसंविधाभिः। कौतुकोकरणै। उद्भासितं शोभमानम् L$_{2}$; कौतुकसंविधाभिः कौतुकोपकरणैरुद्भासितं शोभमानं E; कौत्तकसंविधाभिः कौत्तकोपकरणैरुद्भाषितं शोभमानम् J **13.3** अदृष्टैरर्थिता सती ] *conj.*; परोक्षैरदृष्टैर्वृता सती अर्थिता सती UPL$_{2}$EJ; परोक्षैरदृष्टैर्वृता सती B$^{1}$ **13.4** इन्दुमती ] *conj.*; बाला इन्दुमती Σ **13.4** स्वयंवरं भद्रं बुबुधे ] *conj.*; स्वयंवरं साधुममंस्त भद्रं बुबुधे UPB$^{1}$L$_{2}$E$^{pc}$J; *om.* E$^{ac}$(eyeskip) **13.4** तद्युक्तम्। अन्यथा ] *conj.*; तत्स्थाने युक्तम् अन्यथा UPB$^{1}$L$_{2}$E$^{pc}$J; *om.* E$^{ac}$(eyeskip) **13.4** कस्मादात्मानुरूपं ] *conj.*; कथं कस्मादात्मतुल्यमात्मानुरूपं Σ

मनोहरं भर्तारमसौ प्राप्नुयात्। लक्ष्मीर्यथा नारायणं कान्तमलभत॥ १३॥

किं च॥

परस्परेण स्पृहणीयरूपं
न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन्द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथो ऽभविष्यत्॥ १४॥

अन्योन्यम् ≪अभिलषणीयकान्ति≫ स्त्रीपुंसयुगलमेतत् स्रष्टा यदि न सङ्घटयेत्, अस्मिन्नुभये शोभानिर्माणप्रयासो विधेर्निष्फलो भवेत्। असदृशसमागमात्॥ १४॥

रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला।
गतेयमात्मप्रतिरूपमेनं मनो हि जात्यन्तरसंगतिज्ञम्॥ १५॥

वधूवरौ निश्चितं रतिस्मरावन्यजन्मन्यास्ताम्। तथा हीन्दुमती †राज्ञां सहस्रे-

---

**14 a.** °रूपं ] Ś; °शोभं $V^M$𝕮 **15 c.** °रूपमेनं ] Ś; °रूपमेव 𝕮 **15 d.** जात्यन्तरसंगतिज्ञम् ] **V**$D^M B_1^M B_2^M B_4^M B_5^M B_7^M$Ar.Nā.; जन्मान्तरसंज्ञितज्ञम् Hem.; जन्मान्तरसंगतिज्ञम् $V^M B_3^M$Mall.Jin.

---

**13.5 मनोहरं** ] UP$B^1$J; मप्रहरं $L_2$; सप्रहरं $E^{ac}$; स्वमनोहरं $E^{pc}$ **13.5 प्राप्नुयात्** ] *conj.*; लभेत प्राप्नुयात् UP$B^1L_2E^{pc}$J; लभेत $E^{ac}$ **13.5 लक्ष्मीर्यथा** ] P; पद्मा U; पद्मा लक्ष्मीर्यथा $B^1L_2E^{pc}$; *om.* $E^{ac}$; पद्मा लक्ष्मीः J **13.5 नारायणं** ] UP$B^1E^{pc}$J; नारायण° $L_2$; *om.* $E^{ac}$ **13.5 कान्तमलभत** ] Σ; *om.* $E^{ac}$ **14.1 अन्योन्यम्** ] *conj.*; परस्परेणान्योन्यं Σ **14.1 अभिलषणीयकान्ति** ] *conj.* (cf. KuSamPañj, ed. Patel); स्पृहणीयं रूपं यस्य तत् U$L_2$J; स्पृहनीयरूपं यस्य तत् P; स्पृहणीयरूपं यस्य तत् $B^1$; स्पृहनीयं रूपं यस्य तत् E **14.1 स्त्रीपुंसयुगलमेतत्** ] *conj.*; *om.* U; इदं द्वन्द्वं स्त्रीपुंसयुगलमेतत् P; द्वन्द्वं युगलं $B^1L_2$EJ **14.2 स्रष्टा यदि न सङ्घटयेत्** ] *conj.*; न योजयेत् U; स्रष्टा यदि नायोजयिष्यत् चेन्न सङ्घटयेत् P; न चेदयोजयिष्यत् न योजयेत् $B^1L_2$J; न चेदयोजयिष्यत् नायोजयेत् E **14.2 अस्मिन्नुभये** ] *conj.*; अस्मिन् द्वये उभये U$B^1L_2$EJ; तदस्मिन्द्वये उभये P **14.2 शोभानिर्माणप्रयासो** ] *conj.*; रूपविधानयत्नः शोभानिर्माणप्रयासः Σ **14.2 विधेर्निष्फलो** ] *conj.*; प्रजानां पत्युर्विधेः वितथो निष्फलः Σ **14.2 भवेत्** ] *conj.*; अभविष्यत् भवेत् U$B^1L_2$EJ; अभविष्यत् P **14.3 असदृशसमागमात्** ] UP$B^1L_2$E; असदृशमागमात् J **15.1 वधूवरौ** ] *conj.*; इमौ वधूवरौ Σ **15.1 निश्चितं** ] P; नूनं निश्चितं Σ **15.1 रतिस्मरावन्यजन्मन्यास्ताम्** ] *conj.*; रतिस्मरौ अभूतामन्यजन्मन्यास्ताम् Σ **15.1 हीन्दुमती** ] *conj.*; हि बाला U$B^1L_2$EJ; हि बाला इन्दुमती P

षु† मध्ये स्वानुरूपमजं वृतवती। यस्मान्मनो ऽन्यजन्मनि सुहृत्संगमं जानाति॥ १५ ॥

एवंविधानि वचांस्याकर्णयन्नसौ राजधानीमवाप।

**इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः।**
**उद्भासितं मङ्गलसंविधाभिः सम्बन्धिनः सद्म समाससाद॥ १६ ॥**

पूर्वं व्याख्यातमेतत्॥ १६ ॥

**ततो ऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः।**
**वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः॥ १७ ॥**

अनन्तरं त्वरया हस्तिन्या अवरुह्य, अजः प्राग्ज्योतिषाधिपवितीर्णकरो भोजेन कथितं चतुःशालमभ्यन्तरं विवेश, ≪स्त्रीचेतांसीवेति≫ सहोक्तिरलङ्कारः॥ १७ ॥

**महार्हशय्यासनसंस्थितो ऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम्।**
**भोजोपनीतं च दुगूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः॥ १८ ॥**

---

**16 b.** श्रोत्र° ] Σ; श्रोतृ° U, शोत्र° $L^{M}$ **16 d.** सम्बन्धिनः ] $UPB^{1}JD^{M}V^{M}B_{1}^{Mpc}B_{2}^{M}B_{3}^{M}B_{4}^{M}B_{5}^{M}B_{7}^{M}L^{M}$**C**; सम्बन्धिना $L_{2}B_{1}^{Mac}$ **17 .** *om.* Mall.Ar.Nā. **17** °मथो ] Σ; °मजो $L^{Mpc}$ **18 .** *om.* Mall.Ar.Nā. **18 a.** °शय्यासनसंस्थितो ] **Ś**; °सिंहासनसंश्रितो Hem.; °सिंहासनसंस्थितो $V^{M}$Pseudo-Mall.Jin. **18 b.** सरत्नमर्घ्यं ] **Ś**Hem.$^{vl}$Pseudo-Mall.EJin.; सरत्नमर्घं Hem. **18 c.** दुगूल° ] **Ś**; दुकूल° Hem.Pseudo-Mall.Jin.

---

**15.2** स्वानुरूपमजं ] *conj.*; आत्मप्रतिरूपमेनमजं $UB^{1}L_{2}EJ$; आत्मप्रतिरूपं स्वानुरूपमेनमजं P **15.2** वृतवती ] *conj.*; गता वृतवती Σ **15.2** मनो ऽन्यजन्मनि ] *conj.*; मनः जात्यन्तरे अन्यजन्मनि Σ **15.2** सुहृत्संगमं ] *conj.*; संगतिज्ञं सुहृत्संगमं Σ **15.3** जानाति ] $UB^{1}L_{2}EJ$; जानातीति P **16.1** पूर्वं व्याख्यातमेतत् ] $UPL_{2}J$; पूर्वं व्याख्यातमेत् $B^{1}$; एवं व्याख्यातमेतत् E **17.1** अनन्तरं त्वरया ] *conj.*; ततो ऽनन्तरमाशु त्वरया Σ **17.1** हस्तिन्या ] *conj.*; करेणुकाया हस्तिन्या $UPB^{1}EJ$ **17.1** अवरुह्य ] *conj.*; अवतीर्यावरुह्य $UB^{1}EJ$; अवतीर्य P **17.1** अजः ] *conj.*; सो ऽजः $UPB^{1}EJ$ **17.1** प्राग्ज्योतिषाधिपवितीर्णकरो ] *conj.*; कामरूपेश्वरस्य प्राग्ज्योतिषाधिपतेः (ते U) दत्तः (दत्त° E) करो येन सः $UB^{1}EJ$; कामरूपेश्वरस्य प्राग्ज्योतिषाधिपस्य दत्तो वितीर्णः करः येन सः P **17.2** भोजेन कथितं ] *conj.*; वैदर्भनिर्दिष्टं (ष्टां J) भोजेन कथितं $UPB^{1}EJ$ **17.2** चतुःशालम् ] *conj.*; चतुष्कं चतुःशालम् $UPB^{1}EJ$ **17.2** स्त्रीचेतांसीवेति ] *conj.* (cf. Jin.); नारीमनांसेवेति U; नारीमनांसीवेति $PB^{1}EJ$

अजः प्रधानयोग्ये सिंहासन उपविष्टो मणियुक्तं पूजार्थमुदकमाददे, माक्षिकघृतदधियुतम्, क्षौमयोः पट्टाम्बरयोर्द्वयं च वैदर्भेण निकटप्रापितम्। एतत्सर्वं नारीणां दृष्टिपातैर्नेत्रत्रिभागजैः सहाग्रहीदिति॥ १८॥

दुगूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः।
वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः॥ १९॥

सितपट्टाम्बरो ऽजः ≪सविनयै≫रन्तःपुरपालकैरिन्दुमतीसकाशं प्रापितः। ≪शशि≫किरणैरब्धिरम्बुविकृतेर्निकटं यथा नीयते, प्रकटदिण्डीरावलिः। प्रत्यग्रोदितैः।

विरलप्रचारा एते श्लोकाः॥ १९॥

---

**19 .** *om.* Mall.Ar.Nā. **19 a.** दुगूल° ] Ś; दुकूल° Hem.Pseudo-Mall.Jin. **19 c.** वेलासकाशं ] ŚPseudo-Mall.Jin.; वेलासमीपं Hem.

---

**19** विरलप्रचारा एते श्लोकाः ] This sentence has been moved here from before verse 13: see endnote.

---

**18.1** अजः ] *conj.*; असावजः UPB$^{1}$L$_{2}$E; असावजः कुमारः J **18.1** प्रधानयोग्ये ] *conj.*; महार्हे प्रधानयोगे UP; महार्हे प्रधानयोग्ये B$^{1}$L$_{2}$EJ **18.1** सिंहासन ] *conj.*; आसने सिंहासने Σ **18.1** पूजार्थमुदकम् ] *conj.*; अर्घ्यं पूजार्थमुदकम् Σ **18.2** माक्षिकघृतदधियुतम् ] *conj.*; मधुपर्कमिश्रं माक्षिके घृतदधियुतम् UB$^{1}$J; मधुपर्कमिश्रं माक्षिकघृतदधियुक्तं PL$_{2}$; मधुपर्कमिश्रम् माक्षिकदधिघृतदधियुक्तम् E **18.2** क्षौमयोः पट्टाम्बरयोर्द्वयं ] *conj.*; दुगूलयोः क्षौमयोः पटाम्बरयोः युग्मं द्वयं UL$_{2}$J; क्षौमयोः पट्टाम्बरयोर्युग्मं द्वयं P; दुगूलयोः क्षौमयोः पट्वम्बरयोर्युग्मं द्वयं B$^{1}$; दुगूलयोः क्षौमयोः पट्टाम्बरयोर्युग्मं द्वयं E **18.2** वैदर्भेण निकटप्रापितम्, एतत्सर्वं ] *conj.*; भोजेन उपनीतम् एतत्सर्वं वैदर्भेण निकटप्रापितं UB$^{1ac}$L$_{2}$J; भोजोपनीतमेतत्सर्वं P; भोजेन उपनीतम् एतत्सर्वं वैदर्भेण निकटमपि प्रापितं B$^{1pc}$; भोजेन उपनीतं एतत्सर्वं वैदर्भेण निकटमप्रापितं E **18.3** नारीणां दृष्टिपातैर्नेत्रत्रिभागजैः ] *conj.*; नारीणां दृष्टिपातैर्नेत्रविभागैः P; वनितानां कटाक्षैः UB$^{1}$L$_{2}$EJ **19.1** सितपट्टाम्बरो ] *conj.* (cf. KuSamPañj); दुगूले सितपटाम्बरे वाससी UJ; दुगूले सितपट्टाम्बरे वाससी यस्य सो PL$_{2}$E; दुगूले सितपटाम्बरे वाससी यस्य सो B$^{1}$ **19.1** ऽजः सविनयैरन्तःपुरपालकैर् ] *conj.*; ऽजः अवरोधरक्षैः अन्तपुररक्षकैः वधूसमीपमिन्दुमतीसकाशं P; ऽजः अवरोधरक्षैरन्तःपुरपालकैः वधूसमीपमिन्दुमतीसकाशं B$^{1}$L$_{2}$E; सकाशं UJ **19.1** प्रापितः ] *conj.*; निन्ये प्रापितः Σ **19.2** शशिकिरणैरब्धिरम्बुविकृतेर्निकटं ] *conj.*; नवैश्चन्द्रस्य किरणैरब्धिः वेलाया अम्बुविकृतेः सकाशं निकटं P; नवैश्चन्द्रपादैश्चन्द्रस्य किर(करि L$_{2}$)णैरुदन्वानब्धिः वेलाया अम्बुविकृतेः (°विकृतः E) सकाशं(सकालं U) निकटं UB$^{1}$L$_{2}$EJ **19.2** प्रकटदिण्डीरावलिः ] *conj.*; स्फुटफेन(ण PL$_{2}$E)राजिः प्रकटदिण्डीरावलिः UPB$^{1}$L$_{2}$EJ **19.3** प्रत्यग्रोदितैः ] *conj.*; नवैः प्रत्यग्रोदितैः UPB$^{1}$EJ; नवै प्रत्यग्रोदितैः L$_{2}$ **19.4** विरलप्रचारा एते ] PB$^{1ac}$L$_{2}$; वेरणप्रचारा एते U; विरलप्रचुरा B$^{3pc}$; विरलप्रचुरा एत E; विरलप्रचार एते J

तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः।
तमेव चाधाय विवाहसाक्ष्ये वधूवरौ सङ्गमयां चकार॥ २०॥

वेश्मनि वैदर्भस्य पुरोहितो ऽग्निं घृतशमीपल्लवादिभिः सन्तर्प्य, तमेवाग्नि-मुद्वाहसाक्षित्वे परिकल्प्य, वधूवरौ समयोजयत्। दानमानादिभिः पूजितः। ईषदसमाप्तो ऽग्निरग्निकल्पः, तेजस्वीत्यर्थः॥ २०॥ 3

हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां बभासे।
अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन॥ २१॥

अजो ऽत्यर्थं शुशुभे, करेणेन्दुमत्याः करमादाय, समीपस्थाया अशोकलतायाः पत्त्रं प्राप्य सहकारतरुरनुरूपकिसलयेन यथा भासते॥ २१॥

आसीद्वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी।
तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन॥ २२॥

---

**20 c.** चाधाय ] $B^1L_1^{pc}JV^M$𝕮; चादाय $UPL_2^{ac}EB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$ **20 d.** चकार ] ŚHem.Mall.Jin.; बभूव Ar.Nā. **21 b.** सुतरां बभासे ] $PB^1L_2JD^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$ Hem.Ar.(?)Nā.Jin.; सुतरां बभाषे U; नितरां --- E; सुतरां चकासे $V^M$Mall. **22 cd.** तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ] Σ; वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य Mall.$^{vl}$

---

**20.1** वेश्मनि ] *conj.*; तत्र वेश्मनि Σ **20.1** वैदर्भस्य ] P; भोजपतेर्वैदर्भस्य $UB^1L_2EJ$ **20.1** पुरोहितो ] *conj.*; पुरोधाः पुरोहिताः U; पुरोधाः पुरोहितः $PB^1L_2EJ$ **20.1** ऽग्निं घृतशमीपल्लवादिभिः ] *conj.*; अग्निमाज्यादिभिर्घृतशमीपल्लवादिभिः Σ **20.1** सन्तर्प्य ] Σ; सन्तर्पि° E **20.2** °ग्निमुद्वाहसाक्षित्वे ] P; °ग्निं विवाहसाक्षित्वे $UB^1L_2J$; °ग्निं विवाहसाक्ष्ये E **20.2** परिकल्प्य ] P; आधाय परिकल्प्य $B^1$; आदाय परिकल्प्य $UL_2EJ$ **20.2** समयोजयत् ] P; सङ्गमयां चकार समयोजयत् $UB^1L_2J$; सङ्गमायां चकार समयोजयत् E **20.2** दानमानादिभिः पूजितः ] *conj.*; अर्चितो दानमानादिना पूजितः $UB^1L_2EJ$; अर्चितो दानमानादिभिः पूजितः P **20.3** °प्तो ऽग्निरग्नि° ] $B^1L_2EJ$; °प्तोरग्नि° U; °प्तः अग्नि° P **21.1** अजो ऽत्यर्थं ] *conj.*; स राजसूनुरजः सुतरां $UB^1L_2$; सो राजसूनुरजः सुतरां P; स राजसूनुः अजकुमारः सुतरां J **21.1** शुशुभे ] P; बभाषे शुशुभे U; बभासे शुशुभे $B^1L_2J$ **21.1** करमादाय ] *conj.*; करं परिगृह्यादाय Σ **21.1** समीपस्थाया ] *conj.*; अनन्तरायाः समीपस्थाया Σ **21.2** °लतायाः ] UPJ; °लतायः $B^1$; °लयाया $L_2$ **21.2** पत्त्रं ] *conj.*; प्रवालं पत्त्रं Σ **21.2** सहकारतरुर् ] P; चूततरुः $UB^1L_2J$ **21.2** अनुरूपकिसलयेन ] P; प्रतिपल्लवेनानुरूपकिसलये(य U)न $UB^1L_2J$

अजो वधूकरसंस्पर्शाद् रोमाञ्चितभुजः, इन्दुमती च वरकरसंस्पर्शाद् घर्मितकरशाखाजनि। कामेन तस्मिन् काले निजो व्यापारस्तस्मिन् मिथुने तुल्यं विभागीकृतेव। कम्पस्वेदादयो हि कामधर्माः सात्त्विका भावा विनानुरागं नाविर्भवन्ति॥ २२॥

तयोरपाङ्गप्रविचारितानि
क्रियासमापत्तिषु कातराणि।
ह्रीयन्त्रणामानशिरे मनोज्ञाम्
अन्योन्यलोलानि विलोचनानि॥ २३॥

वरवध्वोर्नयनानि लज्जासङ्कोचं प्राप्तानि। रमणीयम्। परस्परं दर्शनलम्पटानि। परस्परं साभिलाषत्वान्नेत्रप्रान्तविक्षिप्तानि, ततो दर्शनावाप्तौ सङ्कुचिता-

**23 a.** °प्रविचारितानि ] UPB$^1$L$_2$JD$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$L$^M$Ar.Nā.; °प्रतिचालितानि Hem.; °प्रतिसारितानि V$^M$Mall.Jin. **23 b.** °समापत्तिषु कातराणि ] UPB$^1$L$_2$JD$^M$V$^M$B$_1^M$B$_2^M$B$_3^{Mpc}$B$_4^M$B$_5^M$B$_7^M$Hem.; °समापत्तिषु कन्तराणि L$^M$; °समापत्तिविवर्तितानि B$_3^{Mac}$Hem.$^{vl}$ Ar.Nā.; °समापत्तिनिवर्तितानि Mall.Jin. **23 c.** मनोज्ञाम् ] ŚHem.Mall.Jin.; मनोज्ञान्य् Ar.(?)Nā.

**22.1** अजो ] *conj.*; वरो ऽजः UPB$^1$L$_2$; वरो ऽजकुमारः J **22.1** रोमाञ्चितभुजः ] *conj.* (cf. Jin.); कण्टकितो रोमाञ्चितो ऽभूत् Σ **22.1** इन्दुमती ] *conj.*; कुमारी इन्दुमती Σ **22.1** वरकरसंस्पर्शाद् ] PB$^{pc}$L$_2$; वरकरस्पर्शात् UJ; वरकारस्पर्शात् B$^{ac}$ **22.2** घर्मितकरशाखाजनि ] *conj.*; स्विन्नाङ्गुलिर्घर्मितकरशाखा संववृते अजनि UB$^1$J; स्विन्नाङ्गुलिः घर्मितकरशाखा अजनि P; स्विन्नाङ्गुलि घर्मितकरशाखा संववृते । जनि L$_2$ **22.2** कामेन ] *conj.*; मनोभवेन कामेन Σ **22.2** तस्मिन् काले ] *conj.*; तत्क्षणं तस्मिन्काले Σ **22.2** निजो व्यापार° ] *conj.*; आत्मवृत्तिर्निजो व्यापार° UPJ; आत्मवृत्तिर्निजो व्यापर° B$^1$; आत्मवृत्तिन्निजो व्यापार° L$_2$ **22.2** मिथुने ] *conj.*; द्वये UJ; द्वये मिथुने PL$_2$; द्वये मिथुनं B$^1$ **22.3** तुल्यं विभागीकृतेव ] *em.*; समं तुल्यं विभक्तेव विभागीकृतेव UB$^1$L$_2$J; तुल्यं विभागीकृतैव P **22.3** सात्त्विका भावा ] UPB$^1$L$_2$; सात्विकभाव J **23.1** वरवध्वोर्नयनानि ] *conj.* (cf. KuSamPañj); तयोर्वरवध्वोर्विलोचनानि अपाङ्ग(ङ्गं PB$^1$L$_2$)नेत्रप्रान्तः UPB$^1$L$_2$J **23.1** लज्जासङ्कोचं प्राप्तानि ] *conj.*; ह्रीयन्त्रणां लज्जया सङ्कोचमानशिरे प्राप्तानि UPB$^1$J; *om.* L$_2$ **23.1** रमणीयम् ] *conj.*; मनोज्ञां रमणीयांP; मनोज्ञं रमणीयं UJ; मनोज्ञा रमणीयाम् B$^1$; मनोज्ञां रमणीयां ह्रीयन्त्रणां लज्जया सङ्कोचमानशिरे प्राप्तानि L$_2$ **23.2** परस्परं दर्शनलम्पटानि ] *conj.*; *om.* UJ; कीदृशानि। अन्योन्यलोलानि परस्परं दर्शनल(लु B$^1$)म्पटानि PB$^1$L$_2$ **23.2** परस्परं साभिलाषत्वान् ] *conj.*; कीदृशानि परस्परं साभिलषत्वाद् UP; पुनः कीदृशानि परस्परं साभिलाषत्वाद् B$^1$L$_2$J **23.2** नेत्रप्रान्तविक्षिप्तानि ] *conj.*; अपाङ्गेषु प्रविचारितानि विक्षिप्तानि UB$^1$L$_2$J; अपाङ्गेषु प्रविचारितानि निक्षिप्तानि P **23.2** ततो दर्शनावाप्तौ ] *conj.*; ततः क्रियासमापत्तौ दर्शनावाप्तौ UPB$^1$J; ततः क्रियासमाप्तौ दर्शनावाप्तौ L$_2$

नि। आनशिरे इत्यश्नोतेर्लिट्। यन्त्रणा सङ्कोचनं मीलनं च॥ २३॥

प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं बभासे।
मेरोरिवान्तेषु विवर्तमानमन्योन्यसंसक्तमहस्त्रियामम्॥ २४॥

तद्युग्ममराजत, उद्गतज्वालस्याग्नेः प्रदक्षिणपादविक्षेपात्, परस्परं संलग्नम्, अहोरात्रमितरेतरश्लिष्टं हेमाद्रेर्निकटेषु पर्यटमानं यथा राजते। †प्रक्रमणं प्रारम्भः†। मेरोरुदर्चिष्ट्वं नानारत्ननिधित्वात्॥ २४॥

नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ॥ २५॥

इन्दुमती लाजमोक्षं वह्नावकरोत्। पुरोधसा चोदिता ब्रह्मनिभेन। मत्तो यश्च-

---

**24 b.** बभासे ] **V**D$^{M}$B$_2^{M}$B$_3^{M}$B$_4^{M}$B$_5^{M}$B$_7^{M}$L$^{M}$Ar.(?)Nā.; भबासे B$_1^{M}$; चकासे V$^{M}$Hem.Mall.Jin. **24 c.** मेरोरिवान्तेषु विवर्तमानम् ] UPB$^{1}$L$_2$JD$^{M}$B$_1^{M}$B$_2^{M}$B$_3^{M}$B$_4^{M}$B$_5^{M}$B$_7^{M}$L$^{M}$; मेरोरुपान्तेष्विव वर्तमानम् V$^{M}$Hem.Mall.Jin.; मेरोरिवान्ते परिवर्तमानम् Ar.(?)Nā. **25 c.** मत्त° ] UB$^{1ac}$L$_2$JV$^{M}$B$_1^{M}$B$_3^{M}$B$_4^{M}$B$_5^{M}$B$_7^{M}$L$^{M}$**C**; मत° D$^{M}$; मन्त° PB$^{1pc}$ (B$_2^{M}$ uncertain) **25 d.** °विसर्गमग्नौ ] **Ś**Hem.Mall.Jin.; °विमोक्षमग्नौ Ar.(?)Nā.

---

**23.3** आनशिरे ] UPB$^{1}$J; आनिशिरे L$_2$ **23.3** इत्यश्नोतेर्लिट् ] PJ; त्यश्नोतेर्लिट् U; इत्यशोभेर्लिट् B$^{1}$ **23.3** यन्त्रणा सङ्कोचनं मीलनं च ] *conj.*; यन्त्राणां संकोचं मीलनम् U; यन्त्रणां सङ्कोच×म्×मीलनाम् P; यन्त्राणां सङ्कोचं मीलनं च B$^{1}$; यन्त्रणां सङ्कोचं मीलनम् L$_2$; यंत्रणां संकोचनं मीलनाम् J **24.1** तद्युग्ममराजत ] *conj.*; तन्मिथुनं युग्मं बभासे अराजत Σ **24.1** उद्गतज्वालस्याग्नेः ] *conj.*; उदर्चिष उद्गतज्वालस्य कृशानोरग्नेः UB$^{1}$J; उदर्चिषः उद्गतज्वालस्य कृषाणोरग्नेः P; उदर्चिष उद्गतज्वालस्य। कृषाणोरग्निः L$_2$ **24.1** प्रदक्षिणपादविक्षेपात् ] *conj.*; प्रदक्षिणप्रक्रमणात् UB$^{1pc}$L$_2$J; प्रदक्षिणप्रक्रमणात् प्रदक्षिणपादविक्षेपात् P; प्रदक्षिणप्रक्रमाणात् B$^{1ac}$ **24.2** परस्परं संलग्नम् ] P; *om.* UB$^{1}$L$_2$J **24.2** अहोरात्रम् ] P; अहस्त्रियाममहोरात्रं UL$_2$J; अहस्त्रियाममिवाहोरात्रमिव B$^{1pc}$; अहस्त्रियामहोरात्रम् B$^{1ac}$ **24.2** इतरेतरश्लिष्टं ] *conj.*; अन्योन्यः प्रसंसिक्तमितरेतरश्लिष्टं UJ; अन्योन्यसंसक्तमितरेतरश्लिष्टं PB$^{1ac}$L$_2$; अन्योन्यसंसक्तमितरेतरसंश्लिष्टम् B$^{1pc}$ **24.2** हेमाद्रेर्निकटेषु ] *conj.*; मेरोरन्तेषु निकटेषु UB$^{1}$L$_2$J; मेरोर्हेमाद्रेरन्तेषु निकटेषु P **24.2** पर्यटमानं ] *conj.*; विवर्तमानं पर्यटमानं UB$^{1}$L$_2$J; वर्तमानं P **24.3** प्रक्रमणं प्रारम्भः ] UB$^{1}$L$_2$; प्रदक्षिणप्रक्रमणात् प्रक्रमणं प्रारम्भः प्रदक्षिणप्रारम्भात् P; प्रक्रमं प्रारंभः J **24.3** मेरोरुदर्चिष्ट्वं ] UB$^{1}$L$_2$J; उदर्चिष उद्गतभासः P **25.1** इन्दुमती ] *conj.*; सा वधूः UPB$^{1}$L$_2$; सा वधूरिन्दुमती J **25.1** लाजमोक्षं वह्नावकरोत् ] *conj.*; लाजविसर्गं लाजमोक्षमग्नौ चकार अकरोत् UJ; लज्जविसर्गं लाजमोक्षं अग्नौ अकरोत् P; लाजविसर्गं लाजमोक्षणम्(क्षयम् B$^{1ac}$) अग्नौ चकाराकरोत् B$^{1}$L$_2$ **25.1** पुरोधसा ] *conj.*; गुरुणा पुरोधसा UB$^{1}$L$_2$J; गुरुणा P **25.1** ब्रह्मनिभेन ] *conj.*; विधातृप्रतिमेन ब्रह्मनिभेन Σ **25.1** मत्तो ] *conj.*; मत्तचकोरनेत्रा मत्तो UPJ; मत्तचकोरनेत्रा मतो B$^{1}$; मत्तचकोरत्त्रा मतो L$_2$

कोराख्यः पक्षी तद्वल्लोहिते नेत्रे यस्याः सा। नितम्बमहती विपुलजघना॥ २५॥

हविःशमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे॥ २६॥

अग्नेः सकाशादनलध्वज उज्जगाम। †कीदृशो हविःशमीपल्लवलाजगन्धी हविश्च शमीपल्लवाश्च लाजाश्च तेषां गन्धो विद्यते यस्य स धूमः†। वध्वाः ≪गण्डप्रसरज्ज्वालः≫ क्षणमात्रश्रवणेन्दीवरतां प्राप। शमी वृक्षभेदः॥ २६॥

तदञ्जनक्षोभसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरम्।
वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद्बभूव॥ २७॥

वधूवक्त्रं वेदोदितसद्व्यवहारार्थं धूमादानादेवंविधमभूत्। कज्जलस्य चलनेन विकसनेन व्याकुले नेत्रे यस्य। प्रकर्षेण म्लानो यवप्ररोह एव श्रवणाभरणं यस्य।

---

**26 b.** कृशानोरुदियाय ] $UP^{ac}L_2J^{pc}V^MB_2^MB_4^MB_7^M$ℭ; कृषाणोरुदियाय $P^{pc}B_3^MB_5^ML^M$; कृशानोरुदयाय $B^1J^{ac}$; कृशान्नरुदियाय $D^M$; कृशानोदुदियाय $B_1^M$ **27 a.** °क्षोभ° ] Ś; °क्लेद° ℭ **27 c.** °लेखम् ] ŚHem.Mall.Jin.; °रेखम् Ar.(?)Nā.

---

**25.2** °ख्यः ] $UPL_2J$; °खः $B^1$ **25.2** तद्वल्लोहिते नेत्रे ] $PL_2J$; तद्वल्लोहितनेत्रे U; तद्वल्लोहिते नेत्रै $B^1$ **25.2** नितम्बमहती ] P; नितम्बगुर्वी $UB^{1pc}L_2J$; नितम्बागुर्वी $B^{1ac}$ **25.2** °जघना ] $PB^1L_2J$; °जघान U **26.1** अग्नेः सकाशादनलध्वज ] *conj.*; कृशानोः सकाशाद्धूमो नलध्वजः $UB^1$; कृषाणोस्सकाशात् धूमो ऽनलध्वजः $PL_2$; कृशानोरग्नेः सकाशात् धूमो ऽनलध्वजः J **26.1** उज्जगाम ] *conj.*; उदियायोज्जगाम $UPL_2J$; उदीयायोज्जगाम $B^1$ **26.2** कीदृशो हविःशमीपल्लवलाजगन्धी हविश्च ] $PL_2$; कीदृशं हविश्च UJ; कीदृशं हविःशमीपल्लवलाजगन्धी हविश्च $B^1$ **26.2** लाजाश्च तेषां गन्धो ] $UPL_2$; तेषां गन्धो $B^1$; लाजाश्च तेषां गंडो J **26.2** वध्वाः ] *conj.*; तस्या वध्वाः $UPB^1J$; तस्य वध्वाः $L_2$ **26.3** गण्डप्रसरज्ज्वालः ] *conj.* (cf. KuSamPañj); कपोलसंसर्पिशिखः गण्डौ संस्पृशन्ति याः ता ज्वाला यस्य सः U; कपोलसंसर्पिशिखस्सन् गण्डौ संस्पृशन्ति यास्ताः ज्वाला यस्य सः P; कपोलसंसर्पिशिखः सन् $B^1L_2$; कपोलसंसर्पिशिखा गण्डौ संस्पृशंति याः ता ज्वाला यस्य सः J **26.3** क्षणमात्रश्रवणेन्दीवरतां ] *conj.*; मुहूर्तकर्णोत्पलतां क्षणमात्रश्रवणेन्दीवरतां $UB^1L_2J$; मुहूर्तकर्णोत्पलतां क्षणमात्रं श्रवणेन्दीवरतां P **26.3** प्राप ] *conj.*; प्रपेदे प्राप $UB^1L_2J$; प्राप घ्राणवशात् P **27.1** वधूवक्त्रं वेदोदितसद्व्यवहारार्थं धूमादानादेवंविधमभूत् ] UJ; तद्वधुमुखं आचारधूमग्रहणात् वेदोदितसद्व्यवहारार्थं धूमदानादेवंविधमभूत् P; तद्वधूमुखमाचारधूमग्रहणात्। अञ्जलिना धूममाजिघ्रेदिति (जिघ्रेतिति $L_2$) लोकाचारः। तद्वशादेवंविधमभूत् $B^1L_2$ **27.2** कज्जलस्य चलनेन विकसनेन व्याकुले नेत्रे यस्य ] *conj.*; कज्जलस्य चलनेन विकासेन व्याकुलनेत्रे यस्य UJ; अञ्जनक्षोभेन कज्जलस्य चलनेन विकसनेन समाकुले व्याकुले अक्षिणी नेत्रे यस्य P; अञ्जनक्षोभेन समाकुले अक्षिणी यस्य $B^1L_2$ **27.2** प्रकर्षेण ] $UB^1L_2J$; प्रकर्षे ⌣ P **27.2** एव ] $UPB^1L_2$; इव J **27.2** श्रवणाभरणं ] UPJ; कर्णपूरो $B^1L_2$

रक्ते कपोललेखे यस्य। अञ्जलिना गृहीत्वा धूममाजिघ्रेदिति लोकाचारः॥ २७॥

तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।
कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम्॥ २८॥

तौ वधूवरौ सरसयवानां दानं प्रापतुः। वेदव्रतसमाप्तौ स्नातकैः साङ्गवेदवेदिभिः, तथा बन्धुसहितेन भोजेन च, उत्तमाभिरविधवाभिश्च स्त्रीभिः परिपाट्या दत्तम्। एतैर्दत्तान्यवाञ्जगृहतुरित्यर्थः। एवंविधो ह्येष लोकाचारः॥ २८॥

इति स्वसुर्भोजकुलप्रदीपः सम्पाद्य पाणिग्रहणं स राजा।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः॥ २९॥

विदर्भो भगिन्या अनेन प्रकारेण विवाहकर्म समाप्य प्रत्येकं राज्ञां पूजार्थमधिकारिपुरुषानाज्ञापितवान्। अधिका श्रीर्यस्य॥ २९॥

लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः।
वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाच्छलेन॥ ३०॥

---

**28 b.** प्रयुक्तम् ] Σ; विमुक्तम् P **30 d.** °पदाच्छलेन ] $B_5^M$**C**; °पधाच्छलेन **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_7^M L^M$

---

**27.3** रक्ते कपोललेखे ] *conj.*; रक्तकपोललेखे UJ; पाटले रक्ते कपोललेखे P; पाटला ताम्रा गण्डलेखा $B^1L_2$ **27.3** अञ्जलिना गृहीत्वा धूममाजिघ्रेदिति लोकाचारः ] UP; *om.* $B^1L_2$; अञ्जलिना गृहीत्वा वधू +धूंम+माजिघ्रेदिति लोकाचारः J **28.1** तौ वधूवरौ ] UJ; तौ कन्याकुमारौ वधूवरौ P; तौ कन्याकुमारौ $B^1L_2$ **28.1** सरसयवानां दानं प्रापतुः ] *conj.*; सरसयुवौ नामारोपणं दानं प्रापतुः U; आर्द्राक्षत⸗सरसयवानां आरोपणमाधानमन्वभूतामापतुः P; आर्द्राक्षतानामारोपणमादानमन्वभूतामापतुः $B^1$; आर्द्राक्षतारोपणमादानमन्वभूतामापतुः $L_2$; सरसयवा(वौ $J^{ac}$)नामारोपणं दानं प्रापतुः J **28.2** °वेदिभिः ] $PB^1L_2$; °विदिभिः UJ **28.2** भोजेन ] *conj.*; राज्ञा भोजेन Σ **28.2** उत्तमाभिरविधवाभिश्च ] *conj.*; पुरन्ध्रिभिरुत्तमाभिरविधवाभिश्च Σ **28.2** परिपाट्या ] *conj.*; क्रमशः परिपाट्या Σ **28.3** दत्तम् ] *conj.*; प्रयोक्तं दत्तं U; प्रयुक्तं दत्तम् $PB^1L_2$; प्रयोक्तुं दत्तं J **28.3** एतैर्दत्ता°…लोकाचारः ] P; एवंविधो ह्येष(ह्य+शे+ष B) लोकाचारः एतैर्दत्तान्यवाञ्जगृहतुरित्यर्थः $UB^1J$; एवंविधो हि अशेषलोकाचारः एतैर्दत्तान्यवाञ्जगृहतुरित्यर्थः $L_2$ **29.1** विदर्भो ] *conj.*; स राजा विदर्भो Σ **29.1** भगिन्या अनेन ] *em.*; भगिन्यानेन $UPB^1J$; भगिन्यामनेन $L_2$ **29.1** विवाहकर्म समाप्य ] *conj.*; पाणिग्रहणं विवाहकर्म सम्पाद्य समाप्य $UB^1L_2J$; पाणिग्रहणं विवाहकर्म सम्पाद्य P **29.1** प्रत्येकं ] *conj.*; पृथक्प्रत्येकं $UPB^1L_2$; प्रथक् कृत्य एकं J **29.2** राज्ञां पूजार्थमधिकारिपुरुषान् ] *conj.*; महीपतीनां राज्ञामर्हणार्थं पूजार्थमधिकृतानधिकारिपुरुषान् Σ **29.2** आज्ञापितवान् ] *conj.*; आदिदेश आज्ञापितवान् $UPB^1L_2J$ **29.2** अधिका श्रीर्यस्य ] *conj.*; अधिश्रीः अधिका श्रीर्यस्य $UPB^1J$; अधिश्री। अधिश्रीर्यस्य $L_2$

ते नृपा भोजं ज्योत्कृत्य प्रतस्थिरे। हर्षस्य चिह्नैः कृतकहासादिभिः पिहितक्रोधाः। सुप्तमकरा अगाधजला जलाशया इवाकलुषाः। भोजार्चामुपायनव्याजेन प्रतीपं दत्त्वा॥ ३०॥

भर्तापि तावत्क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः।
सत्त्वानुरूपं हरणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च॥ ३१॥

यावत्ते राजानो गतास्तावद्भोजो ऽप्यजं व्यसर्जयच्चानुययौ च। ≪सम्पादितानुजोद्वाहः≫। औचित्यसदृशं चित्तवृत्त्यनुसारेण सुदायेन दत्ता लक्ष्मीर्येन। हरणं सुदायः॥ ३१॥

---

**31 .** ] *om.* U; placed after 33 in $V^{M}$𝕮 **31 c.** सत्त्वानुरूपं हरणी° ] $B^{1}L_{2}D^{M}V^{M}B_{1}^{Mpc}B_{3}^{M}B_{5}^{M}L^{M}$Ar.(?)Nā.; सत्त्वानुरूपं हरिणी° $PJB_{1}^{Mac}B_{2}^{M}B_{4}^{M}B_{7}^{M}$; सत्त्वानुरूपाहरणी° Hem. Mall.; सत्त्वानुरूपाभरणी° Jin. **31 d.** प्रास्थापयद् ] $V^{M}B_{1}^{Mpc}B_{4}^{M}B_{5}^{M}L^{Mpc}$𝕮; प्रस्थापयद् $PB^{1}L_{2}JD^{M}B_{1}^{Mac}B_{2}^{M}B_{3}^{M}B_{7}^{M}L^{Mac}$

---

**30.1** भोजं ज्योत्कृत्य ] *conj.*; वेदर्भमामन्त्र्य ज्योत्कृत्य U; वैदर्भमामन्त्र्य ज्योत्कृत्य $B^{1}L_{2}J$; भोजमामन्त्र्य ज्योत्कृत्य P **30.1** प्रतस्थिरे ] *conj.*; ययुः प्रतस्थिरे $UPB^{pc}L_{2}J$; ययुः प्रतिस्थिरे $B^{ac}$ **30.1** हर्षस्य चिह्नैः कृतकहासादिभिः ] *conj.*; मुदो हर्षस्य लिङ्गैश्चिह्नैः $UB^{1}L_{2}J$; मुदो हर्षस्य लिङ्गैश्चिह्नैः कृतकहासादिभिः P **30.2** पिहितक्रोधाः ] *conj.*; संहृता पिहिता विक्रिया क्रोधो यैः अथवा कृतकहासादिभिश्च UJ; पिहिताः विक्रियाः क्रोधो यैः P; संवृता पिहिता विक्रिया क्रोधो यः $B^{1}$; सवृता पिहिता विक्रया क्रोधो यै $L_{2}$ **30.2** सुप्तमकरा ] *conj.*; गूढनक्रा सुप्तमकराः U; गूढनक्राः सुप्तमकराः $PB^{1}L_{2}J$ **30.2** अगाधजला जलाशया इवाकलुषाः ] *conj.*; ह्रदा इव $UB^{1}L_{2}J$; ह्रदा इव अगाधजला जलाशया इव अकलुष--- P **30.2** भोजार्चाम् ] *conj.*; तदीयां पूजाम् $UB^{1}L_{2}J$; तदीयां पूजां भोजार्चाम् P **30.2** उपायनव्याजेन ] *conj.*; उपधच्छलेनोपायनव्याजेन U; उपधाच्छलेनोपायनव्याजेन $PB^{1}L_{2}$; उपदच्छलेनोऽपायनव्याजेन J **30.3** प्रतीपं दत्त्वा ] *conj.*; प्रतर्प्य प्रतीपं दत्त्वा UJ; प्रत्यर्प्य प्रतीपं दत्त्वा। मुदो लिङ्गानि कृतकहासादीनि $PB^{1}L_{2}$ **31.1** यावत्ते ] $UPL_{2}J$; यावन्तो $B^{1}$ **31.1** तावद्भोजो ऽप्यजं ] *conj.*; तावत्क्रथकैश(शि $L_{2}$)कानां भर्तापि भोजो ऽपि राघवमजं $UB^{1}L_{2}J$; तावत्क्रथकैशिकानां भर्तापि भोजः राघवमजं P **31.1** व्यसर्जयच्चानुययौ च ] *conj.*; प्रस्थापयद्व्यसर्जयत् अन्वगाच्चानुययौ च Σ **31.2** सम्पादितानुजोद्वाहः ] *conj.*; अनुष्ठितः(अनुष्टितः UJ, अनुष्ठः $B^{1}$) सम्पादितो ऽनन्तरजाया अनुजाया विवाहो येन $UPB^{1}J$; अनुष्ठिता सम्पादि। तो नन्तरजाया अनुजाया विवाहो येन $L_{2}$ **31.2** औचित्यसदृशं ] *conj.*; सत्त्वानुरूपमौचित्यसदृशं $UPB^{1}J$; सत्त्वानुरूपमौचित्यस्वदृशं $L_{2}$ **31.2** चित्तवृत्त्यनुसारेण ] $PL_{2}$; चित्तं वृत्त्यनुसारेण $UB^{1}J$ **31.2** सुदायेन ] *conj.*; हरिणीकृता सुदायेन UJ; हरिणीकृता स्वदायेन P; हरणीकृता सुदायेन $B^{1pc}$; हरणीकृता स्वदायेन $B^{1ac}L_{2}$ **31.2** दत्ता ] $UPL_{2}J$; दत्त्वा $B^{1}$ **31.2** लक्ष्मीर्येन ] UJ; श्रीर्येन $PB^{1}L_{2}$ **31.3** हरणं सुदायः ] $B^{1pc}$; हरिणं स्वदायः UJ; हरणं स्वदायः $PB^{1ac}L_{2}$

तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा।
तस्मादपावर्तत भोजराजः पर्वात्यये सोम इवोष्णरश्मेः॥ ३२॥

ततः कुण्डिनेशो ऽजान्निववृते। पथि तिस्रो वसतीः प्रयाणकानि वसित्वा, त्रिलोकाख्यातेनाजेन सह। पर्वान्ते दिवाकराच्छशी यथा, अमावस्यादिनस्यान्ते प्रतिपदि निवर्तते॥ ३२॥

स राजलोकः कृतपूर्वसंविद्
उदारसिद्धौ समराक्षलभ्यम्।
आदास्यमानः प्रमदामिषं तद्
आवृत्य पन्थानमजस्य तस्थौ॥ ३३॥

स नृपवर्गः कुमारस्य मार्गं रुद्ध्वातिष्ठत्। महती या सिद्धिः कन्याहरणलक्षणा

---

**32 c.** भोजराजः ] $UB^{1ac}JB_3^MB_7^M$; भोजनाथः $PB^{1pc}L_2B_1^MB_2^MB_4^MB_5^ML^M$; भोजनाथ $D^M$; कुण्डिनेशः $V^M$𝕮 **33 .** ] placed after 30 in $V^M$𝕮 **33 ab.** °संविदुदार° ] *conj.*; °संवित्संरम्भ° **V**$D^MB_1^MB_2^MB_4^MB_5^MB_7^ML^M$Vall.$^{vl}$; °संविदारम्भ° $V^M$Hem.Mall.Ar.Nā.; °सन्धिरारम्भ° Jin. **33 b.** समराक्षलभ्यम् ] $UPB^1L_2JD^MB_1^MB_2^MB_4^MB_5^MB_7^ML^M$; समरोपलभ्यम् Hem.Mall.$^{vl}$Jin.; समयोपलभ्यम् $V^M$Hem.$^{vl}$Mall.Ar.Nā.

---

**32** $B_3^M$ gives no testimony for 7:32d through 7:42 because of a missing folio.

---

**32.1** ततः कुण्डिनेशो ऽजान् ] *conj.*; ततो भोजराजः कुण्डिनेश तस्मादजात् U; ततो भोजराजः कुण्डिनेशः तस्मादजात् $PB^{1ac}J$; ततो भोजनाथः कुण्डिनेशस्तस्मादजात् $B^{1pc}$; ततो भोजराजः कुण्डिनेशस्तस्माद् $L_2$ **32.1** निववृते ] *conj.*; अपावर्तत निववृते Σ **32.1** वसतीः ] $UPB^1J$; वातीः $L_2$ **32.1** प्रयाणकानि वसित्वा ] *conj.*; प्रयाणकान्युषित्वा वसित्वा $UPB^1L_2J$ **32.2** त्रिलोकाख्यातेनाजेन ] UJ; त्रिलोकप्रथितेन प्रख्यातेन अजेन P; त्रिलोकप्रथितेन त्रिलोखाख्यातेनाजेन $B^1$; त्रिलोकप्रथितेन त्रिलोकख्यातेनाजेन $L_2$ **32.2** पर्वान्ते ] *conj.*; पर्वात्यये पर्वान्ते $UPB^1J$; पार्वत्यये पर्वान्ते $L_2$ **32.2** दिवाकराच्छशी ] J; दिवाकरात्सोमः शशी U; उष्णरश्मेर्दिवाकरात्सोमः शशी $PB^1L_2$ **32.2** अमावस्या ] P; अमावस्यां $UB^1J$; अमावस्यार् $L_2$ **33.1** नृपवर्गः ] P; राजलोकः $UB^1L_2J$ **33.1** कुमारस्य ] *conj.*; अजस्य $UPB^1L_2$; अजस्याजकुमारस्य J **33.1** मार्गं रुद्ध्वातिष्ठत् ] *conj.*; पन्थानं मार्गमावृत्य रुद्ध्वा (बद्ध्वा $L_2$) तस्थावतिष्ठत् $UB^1L_2J$; पन्थानं मार्गमावृत्त्य रुद्ध्वा अतिष्ठत् P **33.1** महती या सिद्धिः ] *conj.*; संरम्भसिद्धौ उदारा महती या सिद्धिः $UB^1L_2J$; उदारसिद्धौ उदारा महती या सिद्धिः P **33.1** °हरणलक्षणा ] $UPB^1J$; °हरणणेक्षणा $L_2$

तत्र कृतः प्रथममेव ‘न मोक्तव्यो ऽयम्’ इति संकेतो येन। रणमेव द्यूतं तेन प्राप्तव्यम्, प्रमदा नायिका, तदेवामिषं भोज्यं जिघृक्षन्। अक्षैः किलामिषं लभ्यते। संरम्भसिद्धाविति पाठे संरम्भः क्षोभः, तेन या सिद्धिस्तन्निमित्तम्॥ ३३॥

प्रमन्यवः प्रागपि कोसलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः।
अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य॥ ३४॥

एतस्माद्धेतो राजानो मिलिता रघोरात्मजस्याजस्य वरयुवतिप्राप्तिं न सेहिरे। यस्मात्त आदावेव दिग्विजयकालात्प्रभृति रघौ सरोषाः, गृहीतसर्वस्वत्वेन, आसन्॥ ३४॥

तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः।
बलिप्रतिष्ठां श्रियमाददानं त्रैविक्रमं पादमिवेन्द्रशत्रुः॥ ३५॥

---

**35 c.** °प्रतिष्ठां ] UPB$^{1}$L$_{2}$JD$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{4}^{M}$B$_{5}^{M}$B$_{7}^{M}$Hem.$^{vl}$Jin.; °प्रदिष्टां V$^{M}$Ar.Nā.Hem.Mall.
**35 c.** °माददानं ] **V**V$^{M}$B$_{7}^{M}$**C**; °मादधानं D$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{4}^{M}$B$_{5}^{M}$L$^{M}$

---

**33.2 तत्र कृतः प्रथममेव** ] *conj.*; तत्र कृतपूर्वसंवित् कृतपूर्वसंवित्सङ्केतो येन राजलोकेन प्रथममेव U; तत्र कृतः प्रथममेव संवित् P; तत्र कृतपूर्वसंवित् कृतपूर्वा संवित्संकेतो येन राजलोकेन। प्रथममेव B$^{1}$; तत्र कृतपूर्वसंवित् संकेतो येन राजलोकेन प्रथममेव L$_{2}$J **33.2 न मोक्तव्यो** ] PB$^{1}$; मोक्तव्यो U; नं मोक्तव्यो L$_{2}$; सोक्तव्यो J **33.2 इति संकेतो येन** ] *conj.*; इति संकेतः UB$^{1}$L$_{2}$J; इति सङ्केतो येन राजलोकेन प्रथममेव न मोक्तव्यो ऽयम् इति सङ्केतः P **33.3 रणमेव द्यूतं तेन प्राप्तव्यम्** ] *conj.*; समर एवाक्षो द्यूतं तेन लभ्यं प्राप्यं UB$^{1}$L$_{2}$J; समर एव रणमेव अक्षो द्यूतं तेन लभ्यं प्राप्तव्यम् P **33.3 नायिका** ] UPB$^{1}$J; लीयका L$_{2}$ **33.3 जिघृक्षन्** ] *conj.*; आदास्यमानो जिघृक्षन् Σ **33.4 संरम्भसिद्धाविति पाठे** ] *em.*; *om.* B$^{1}$L$_{2}$J; सरम्भसिद्धाविति पाठे P **33.4 क्षोभः** ] UB$^{1}$L$_{2}$J; संक्षोभः P **34.1 एतस्माद्धेतो राजानो** ] *conj.*; अत एतस्माद्धेतोर्नृपा राजानः UB$^{1}$L$_{2}$J; अत एव एतस्माद्धेतोः नृपाः P **34.1 मिलिता** ] *conj.*; समेताः मिलिताः UPL$_{2}$; समेता मिलिता B$^{1}$; समीताः J **34.1 रघोरात्मजस्याजस्य** ] *conj.*; तदात्मजस्य तस्य रघोरात्मजस्याजस्य Σ **34.1 वरयुवतिप्राप्तिं** ] *conj.*; स्त्रीरत्नलाभं वरयुवतिप्राप्तिं UB$^{1ac}$L$_{2}$J; स्त्रीलाभं वरयुवतिप्राप्तिं P; स्त्रीरत्नलाभं वरयुवतिप्राप्तं B$^{1pc}$ **34.1 न सेहिरे** ] *conj.*; न चक्षमिरे न सेहिरे UL$_{2}$J; न चक्षिमिरे न सेहिरे PB$^{1}$ **34.2 यस्मात्त** ] PB$^{1}$L$_{2}$; यावत्ते UJ **34.2 रघौ** ] *conj.*; कोसले रघु U; कोसलेन्द्रे रघौ PB$^{1}$L$_{2}$J **34.2 सरोषाः** ] *conj.*; प्रमन्यवः सरोषाः Σ **34.2 गृहीतसर्वस्वत्वेन** ] *conj.*; आर्तस्वतया गृहीतस्वतस्वत्वेन UL$_{2}$J; आत्तस्व(सु B$^{1ac}$)तया गृहीतसर्वस्वत्वेन B$^{1}$; आत्तस्वतया गृहीतसत्त्वेन P **34.3 आसन्** ] *conj.*; बभूवुरासन् UB$^{1}$L$_{2}$J; बभूवुः P

स नृपपूगो ऽजं मार्गे ऽवेष्टयत्। इन्दुमतीं धारयन्तं, तया सहितमित्यर्थः। अन्योन्यसाहायकाद्दर्पयुक्तः। बलिः प्रतिष्ठा आश्रयो यस्यास्तां लक्ष्मीं गृहाणम्। वैष्णवं चरणं वृत्रो नाम दैत्यविशेषो यथारुणत्॥ ३५॥

तस्याः स रक्षार्थमनल्पयोधम्
आदिश्य पित्र्यं सचिवं कुमारः।
प्रत्यग्रहीत्पार्थिववाहिनीं तां
ज्योतीरथां शोण इवोत्तरङ्गः॥ ३६॥

इन्दुमत्याः पालनार्थं बहुसाधनं मौलममात्यं नियुज्य, अजस्तां राजन्यसेनां प्रत्यैच्छत्। ज्योतीरथां नाम नदीं शोणाख्यो नद उल्लसत्कल्लोलो यथात्मनि लयं नयति॥ ३६॥

---

**36 d.** ज्योतीरथां ] UPB$^1$L$_2$JD$^M$B$_1^M$B$_2^M$B$_4^M$B$_5^M$B$_7^M$L$^M$Hem.Jin.; भागीरथीं V$^M$Mall.(?) Ar.(?)Nā.

---

**35.1 स नृपपूगो ऽजं** ] *conj.*; स राजन्यगणो नृपपूगस्तमजं UPB$^1$L$_2$; स राजन्यगणो नृपपूगस्तमजकुमारं J **35.1 मार्गे ऽवेष्टयत्** ] *conj.*; रुरोध पथि अवेष्टयत् Σ **35.1 इन्दुमतीं धारयन्तं** ] *conj.*; भोजकन्यामिन्दुमतीमुद्वहन्तं धारयन्तं Σ **35.2 अन्योन्यसाहायकाद्दर्पयुक्तः** ] *conj.*; दृप्तः अन्योन्यसहायकाद्दर्पयुक्तः UB$^1$J; दृप्तः अन्योन्यसाहायकाद्दर्पयुक्तः P; दृप्तः अन्योन्यसाहायकादृप्तयुक्तः L$_2$ **35.2 बलिः प्रतिष्ठा** ] UB$^1$; बलिप्रतिष्ठः P; बलिप्रतिष्ठां L$_2$; बलिप्रतिष्ठा J **35.2 लक्ष्मीं** ] *conj.*; श्रियं प्रतिष्ठन्ति अस्मिं प्रतिष्ठा तां श्रियं लक्ष्मीम् U; श्रियं P; श्रियं प्रतिष्ठन्त्यस्मिन्निति प्रतिष्ठा तां श्रियं लक्ष्मीम् B$^1$; श्रियम् प्रतिष्टति अस्मिन्निति प्रतिष्ठा। तां श्रियां लक्ष्मीम् L$_2$; श्रियं प्रतिष्टंत्यस्मिन्प्रतिष्टा तां श्रियं लक्ष्मीम् J **35.2 गृहाणम्** ] *conj.*; आददानं गृह्णन्तं U; आददानं गृहाणं P; आददानं गृह्णानं B$^1$L$_2$J **35.3 वैष्णवं चरणं** ] *conj.*; त्रैविक्रमं वैष्णवचरणं U; त्रैविक्रमं पादं वैष्णवं चरणम् PL$_2$; त्रैविक्रमं पादं वैष्णवं चारणम् B$^1$; त्रैविक्रमं वैष्णवं चरणं J **35.3 वृत्रो** ] *conj.*; इन्द्रशत्रुः वृत्रो UB$^1$L$_2$J; इन्द्रशत्रुः वृत्तो P **35.3 यथारुणत्** ] B$^1$L$_2$; *om.* U; यथा अरुणत् प्रतितिष्ठन्त्यस्मिन्निति प्रतिष्ठः P; यथा अरुणात् J **36.1 इन्दुमत्याः** ] *conj.*; तस्या इन्दुमत्याः Σ **36.1 पालनार्थं बहुसाधनं** ] *conj.*; रक्षार्थमनल्पयोधं बहुसाधनं U; रक्षार्थं पालनार्थमनल्पयोधं बहुसाधनं PL$_2$J; रक्षार्थं पालनार्थमल्पयोधं बहुसाधनं B$^1$ **36.1 मौलममात्यं नियुज्य** ] *conj.*; पित्र्यं सचिवं मौलं मादिश्य नियोज्य U; पित्र्यं सचिवं मौलममात्यमादिश्य नियुज्य PB$^1$L$_2$; पित्र्यं सचिवं मौलमादिश्य नियुज्य J **36.1 अजस्तां राजन्यसेनां** ] *conj.*; सो ऽजः ता पार्थिववाहिनीं राजसेनां U; अजः तां पार्थिववाहिनीं राजन्यसेनां P; सो ऽजः तां पार्थिववाहिनीं राजन्यसेनां B$^1$L$_2$; सः अजकुमारः तां पार्थिववाहिनीं राजसेनां J **36.2 प्रत्यैच्छत्** ] *conj.*; प्रत्यग्रहीत्प्रत्यैच्छत् Σ **36.2 ज्योतीरथां** ] PB$^1$L$_2$; ज्योतीरथा UJ **36.2 नदीं** ] *conj.*; नदीं यथा Σ **36.2 उल्लसत्कल्लोलो** ] *conj.*; उत्तरङ्ग उल्लसत्कल्लोलः Σ **36.3 लयं** ] UPL$_2$J; अयं B$^1$

पत्तिः पदातिं रथिनं रथेशस्तुरङ्गसादी तुरगाधिरूढम्।
यन्ता गजेनाभ्यपतद्गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥ ३७॥

संग्रामः सदृशविपक्ष आसीत्। पत्तिः पदातिमाययौ, अश्वारुढो ऽश्वारोहम्, हस्त्यारोहो हस्तिस्थम्। पततीति पत्तिः, पादाभ्यामततीति पदातिः॥ ३७॥

नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलापदेशान्।
बाणाक्षरैरेव परस्पराय नामोर्जितं चापभृतः शशंसुः॥ ३८॥

धनुर्भृतः प्रतिपत्तिलब्धानि नामकानि नोदघाटयन्। तूर्याख्येषु ध्वनत्स्वलक्ष्यगिरः शरेष्वङ्कावलिरूपैरेव वर्णैस्तेजोयुक्तमभिधानमन्योन्यस्मै अकथयन्॥ ३८॥

उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः।
विस्तारितः कुञ्जरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यम्॥ ३९॥

---

**37 c.** गजेना° ] Σ; गजस्या° 𝕮 **38 b.** कुलापदेशान् ] ŚHem.Ar.Nā.; कुलोपदेशान् $Hem.^{vl}$Mall.Jin. **38 c.** परस्पराय ] $UPB^1L_2^{pc}JD^MB_1^{Mpc}B_2^MB_4^MB_5^MB_7^ML^M$; परस्परायै $L_2^{ac}B_1^{Mac}$; परस्परस्य $V^M$Hem.Mall.Ar.(?)Nā. (Jin. uncertain) **39 b.** °वंश° ] $V^M$𝕮; °नेमि° Σ **39 d.** नेत्रक्रमेणो° ] ŚMall.Ar.Nā.; अनुक्रमेणो° Hem.Jin.

---

**37.1** संग्रामः सदृशविपक्ष आसीत् ] *conj.*; युद्धं संग्रामः तुल्यप्रतिद्वंद्वि सदृश(शं UJ)विपक्षं बभूवासीत् $UBL_2J$; युद्धं संग्रामः तुल्यप्रतिद्वन्द्वि सदृशविपक्षं बभूव P **37.1** °माययौ ] *conj.*; °मभ्यपतदाययौ $UPB^1L_2$; °मभिपतदाययौ J **37.1** अश्वारूढो ऽश्वारोहम् ] *conj.*; तुरङ्गसादी अश्वारोहः तुरगाधिरूढमश्वारोहं $UB^1L_2J$; तुरङ्गसादी अश्वारुढः तुरगाधिरूढम् अश्वारोहम् P **37.2** हस्त्यारोहो हस्तिस्थम् ] *conj.*; यन्ता हस्त्यारोहः गजस्थं हस्तिस्थं UJ; यन्ता हस्त्यारोह गजस्थं हस्तिस्थम् $B^1$; यन्ता रोहो गजस्थं हस्तिस्थं $L_2$; यन्ता हस्त्यारोहः गजस्थं हस्त्यस्थम् P **37.2** पततीति ] *conj.*; पत्तीति $UPB^1L_2J$ **37.2** पादाभ्यामततीति ] *em.*; पादाभ्यां पदतीति UJ; पदाभ्यां पततीति $PL_2$; पादाभ्यां पततीति $B^1$ **38.1** धनुर्भृतः ] UJ; चापभृतः $PB^1L_2$ **38.1** प्रतिपत्तिलब्धानि ] *conj.*; कुलापदेशान्कुलमपदिश्यते कथ्यते यैस्तान् प्रतिपत्तिलब्धानि $PB^1L_2$; कुलमपदिश्यते कथ्यते यैस्तान् प्रतिपत्तिलब्धानि J **38.1** नोदघाटयन् ] *conj.*; नोदीरयन्ति स्म नोदघाट्टयन् $PB^1L_2J$; नोदीरयन्ति स्म नोदघाटयन् U **38.2** तूर्याख्येषु ध्वन° ] U; तूर्येषु नदत्सु ध्वन° $PB^1L_2$; तूर्याख्येषु धुन° J **38.2** अलक्ष्यगिरः ] *conj.*; अविभाव्यवाचः अलक्ष्यगिरः UPJ; अभिभाव्यवाचः अलक्ष्यगिरः $B^1L_2$ **38.2** शरेष्वङ्कावलिरूपैरेव वर्णैस्तेजोयुक्तम् ] *conj.*; शरेष्वंकावलिरूपैरेवाक्षरैर्वर्णैः ऊर्जितं तेजोयुक्तं UJ; बाणाक्षरैः शरेष्वङ्कावलिरूपैरेवाक्षरैर्वर्णैः ऊर्जितं तेजोयुक्तं $PB^1L_2$ **38.2** अभिधानम् ] *conj.*; नाम अभिधानं $PL_2J$; नाम अभिधान $UB^1$ **38.2** अन्योन्यस्मै ] *conj.*; परस्पराय अन्योन्यस्मै $UPL_2$; परस्परयान्योन्यस्मै $B^1J$ **38.2** अकथयन् ] *conj.*; शशंसुरकथयन् Σ

धूली सङ्ग्रामे पूर्वमक्षीण्यावृत्य ततः क्रमाद्रविं पिदधे। पूर्वमश्वैरुद्धूतः, ततो ≪रथसमूहरथाङ्गैः≫र्घनीकृतः, ततः गजश्रवणोत्क्षेपैः प्रसारितः॥ ३९॥

मत्स्यध्वजा वायुवशाद्विदीर्णै-
मुखैः प्रयुद्धध्वजिनीरजांसि।
बभुः पिवन्तः परमार्थमत्स्याः
पर्याबिलानीव नवोदकानि॥ ४०॥

मत्स्याकाराः केतवः प्रवृत्तयुद्धायाः सेनाया रेणून् धयन्तः शुशुभिरे। विदारितैर्विकासितैर्मरुदिच्छात आस्यैः। तत्त्वमीना यथा कलुषाणि नूतनवारीणि पिवन्तः मुखैः शोभन्ते। योद्धुं प्रवृत्ता प्रयुद्धा॥ ४०॥

---

**40 b.** प्रयुद्धध्वजिनी° ] UPL$_2$EJB$_1^M$B$_2^M$B$_5^M$B$_7^M$L$^M$; प्रयुद्धध्वजनी° B$^1$; प्रयोद्धध्वजिनी° B$_4^M$; प्रवृद्धध्वजिनी° V$^M$𝕮 **40 d.** नवोदकानि ] Σ; नदोदकानि L$^M$

---

**39.1** धूली सङ्ग्रामे ] P; रेणुर्धूलिः संयति रणभुवि UB$^1$EJ; रेणुर्धूलिः संयति रेणुरश्वैः। सान्द्रीकृतस्स्यन्दननेमिचक्रैः। विस्तारितः कुञ्जरकर्णतालैः। नेत्रक्रमेणोपरुरोध सूर्यम्। रेणुर्धूलिः संयति रणभुवि L$_2$ **39.1** पूर्वमक्षीण्यावृत्य ] *conj.*; नेत्र(°नेत्रे E)क्रमेण पूर्वमक्षीण्यावृत्य UPB$^1$L$_2^{pc}$EJ; नेत्रक्रमेणोपरुरोधमक्षीण्यावृत्य L$_2^{ac}$ **39.1** क्रमाद्रविं पिदधे ] *conj.*; क्रमाद्रविमुपरुरोध पिदधे UPL$_2$EJ; क्रमादुपरुरोध पिदधे B$^1$ **39.1** °रुद्धूतः ] *conj.*; °रुत्थापितैरुद्धूतः U; °रुत्थापित उद्धूतः PB$^1$L$_2$EJ **39.2** रथसमूहरथाङ्गैर्घनीकृतः ] *conj.*; स्यन्दनानां रथानां ये नेमयो वंशः समूहास्तेन चक्रै रथाङ्गैः सान्द्रीकृतो घनीकृतः UE; स्यन्दनानां रथानां ये नेमयः वंशास्समूहास्तेषां चक्रैः रथाङ्गैः सान्द्रीकृतो घनीकृतः P; स्यन्दनानां रथानां ये नेमयो वंशस्तेन चक्रे रथाङ्गैः सान्द्रीकृतो घनीकृतः B$^1$; स्यन्दनानां रथानां ये नेमयो वंशास्तेषां चक्रैः रथाङ्गैर्नीकृतः L$_2$; स्यन्दनानां रथानां ये नेमंयो वंशः समूहः तेन चक्रै रथाङ्गैः सान्द्रीकृतो घनीकृतः J **39.2** गजश्रवणोत्क्षेपैः प्रसारितः ] *conj.*; कुञ्जरकर्णतालैः गजश्रवणोत्क्षेपैर्विस्तारितः प्रसारितः Σ **40.1** मत्स्याकाराः केतवः ] *conj.*; मत्स्याकाराश्च ते ध्वजाः मत्स्यध्वजाः(जः J) UB$^1$L$_2$EJ; मत्स्याकाराश्च ते ध्वजाः मत्स्यध्वजाः मत्स्याकाराः केतवः P **40.1** प्रवृत्तयुद्धायाः सेनाया रेणून् ] *conj.*; प्रयुद्धा या (यां E) ध्वजिनी सेना तस्या रजांसि UB$^1$L$_2$EJ; प्रयुद्धाः योद्धुं प्रवृत्तः या सेना तस्याः प्रवृत्तयुद्धायाः सेनाया रजांसि रेणून् P **40.1** धयन्तः शुशुभिरे ] *conj.*; पिवन्तः बभुः अशोभन्त UB$^1$L$_2$E; पिवन्तः धयन्तः बभुः शुशुभिरे P; पिवन्तः बभुः अशोबंत J **40.2** विदारितैर्विकासितैर्मरुदिच्छात आस्यैः ] *conj.*; विदीर्णैर्विदारितैः UL$_2$EJ; विदीर्णैर्विदारितैर्विकासितैर्मरुदिच्छात आस्यैः P; विदीर्णैर्विदारितः B$^1$ **40.2** तत्त्वमीना यथा ] *conj.*; यथा परमार्थमत्स्याः तत्तत्त्वमीनाः UJ; परमार्थमत्स्या तत्त्वमीना यथा P; यथा परमार्थमत्स्याः तत्वमीना L$_2$ E; यथा परमार्थमत्स्याः तात्त्विकमीनाः B$^1$ **40.2** कलुषाणि ] P; पार्याबिलानि कलुषाणि UB$^1$EJ; पर्याबिलानि कलषाणि L$_2$ **40.2** नूतनवारीणि ] *conj.*; नवोदकानि UB$^1$L$_2$EJ; नवोदकानि नूतनवारीणि P **40.3** पिवन्तः मुखैः ] P; पिवन्तः UB$^1$L$_2$EJ **40.3** प्रवृत्ता प्रयुद्धा ] B$^1$L$_2$EJ; प्रवृत्ताः प्रयुद्धाः UP

रथो रथाङ्गध्वनिनाधिजज्ञे विलोलघण्टाक्वणितेन नागः।
स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः॥ ४१॥

घने रेणौ रथश्चक्रचीत्कारेण जनेन विज्ञातः। ≪चटुलकिङ्किणीटाङ्कारेण≫ हस्ती विज्ञातः। स्वभोगपतिनामोच्चारणादात्मीयपरकीयविज्ञानमासीत्। आत्मशब्देनात्मीयः, परशब्देन च परकीयो लक्ष्यते॥ ४१॥

आवृण्वतो लोचनमार्गमाजौ रजोन्धकारस्य विजृम्भितस्य।
शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणो ऽभूद्रुधिरप्रवाहः॥ ४२॥

असृक्पूरो रेणोरेव तमसो बालारुणो विनाशको बभूव। बालारुणेन हि तमो विनाश्यते। एवं रुधिरेण रजोविनाशः। नेत्रपथं पिदधतो रणे प्रवृद्धस्य, आयुधहततुरगकरिसुभटसमुत्थः॥ ४२॥

स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः।

---

**41 a.** रथो ] Σ; रथं Ar.Nā. • °धिजज्ञे ] UP$^{pc}$EJV$^{M}$B$_1^{M}$B$_2^{Mpc}$B$_4^{M}$B$_7^{M}$L$^{M}$; च (?) जज्ञे B$_2^{Mac}$; विजज्ञे P$^{ac}$B$^{1}$L$_2$B$_5^{M}$Hem.Mall.Jin.; विजिज्ञे D$^{M}$; विजज्ञुर् Ar.Nā. **41 b.** नागः ] Σ; नागं Ar.Nā.

---

**41.1** घने रेणौ ] *conj.*; सान्द्रे घने रजसि रेणौ UPB$^{1}$L$_2$E; सान्द्रे घने रजसि रवौ रेणौ J **41.1** रथश्चक्रचीत्कारेण ] *conj.* (cf. Jin.); पथः रथाङ्गस्य चक्रस्य ध्वनिना (ध्व U) चीत्कारेण UE; रथः रथाङ्गस्य चक्रस्य ध्वनिना चीत्कारेण PB$^{1}$L$_2$; रथः रथांगस्य चक्रस्य ध्वनिना चेत्कारेण J **41.1** जनेन विज्ञातः ] *conj.*; अधिजज्ञे जनेन विज्ञातः UE; विजज्ञे जनेन विज्ञातः PB$^{1}$L$_2$J **41.1** चटुलकिङ्किणीटाङ्कारेण ] *conj.* (cf. Jin.); विलोलाश्चटुला या घण्तास्तासां क्वणितेन झाङ्कारेण UE; विलोलाश्चटुला (ल B$^{1}$) या घण्टास्तासां क्वणितेन टाङ्कारेण PB$^{1}$J; विलोलाश्चटुला या घण्टास्तासां क्वणितेन रेण L$_2$ **41.1** हस्ती ] *conj.*; नागो हस्ती Σ **41.2** स्वभोगपतिनामोच्चारणाद् ] *conj.*; स्वभर्तृनामग्रहणात्स्वभोगपतिनामोच्चारणात् UPB$^{1}$L$_2$J; स्वभर्तृनामग्रहणात्स्वपतिनामोच्चारणात् E **41.2** आत्मीयपरकीयविज्ञानमासीत् ] *conj.* (cf. Jin.); आत्मपरावबोधः आत्मीयपरकीयविचारणं विज्ञानं बभूवासीत् UB$^{1}$L$_2$E; आत्मपरावबोधः आत्मीयपरकीयं विचारणं विज्ञानं बभूव P; *om.* J **41.3** आत्मशब्देनात्मीयः ] PB$^{1}$; आत्मशब्देनात्राऽत्मीयः UL$_2$EJ **42.1** असृक्पूरो ] *conj.*; रुधिरप्रवाहो ऽसृक्पूरः UP$^{pc}$B$^{1}$L$_2$EJ; रुधिरप्रवाहः असृक्प्रवाहः P$^{ac}$ **42.1** रेणोरेव तमसो ] *conj.*; रजोन्धकारस्य रेणोरेव तमसः Σ **42.2** रुधिरेण ] UB$^{1}$L$_2$EJ; रुधिरेण हि P **42.2** नेत्रपथं ] *conj.*; *om.* UB$^{1}$L$_2$EJ; लोचनमार्गं नेत्रपथं P **42.2** पिदधतो रणे ] *conj.*; आवृण्वतः पिदधतः आजौ रणे UPL$_2$EJ; आवृण्वतः पिदाधतः आजौ रणे B$^{1}$ **42.2** प्रवृद्धस्य ] *conj.*; विजृम्भितस्य प्रवृद्धस्य Σ **42.3** आयुधहततुरगकरिसुभटसमुत्थः ] *conj.* (cf. Jin.); शस्त्राक्षताश्वद्विपवीरजन्मा आयुधहतद्विपतुरगसुभटसमुत्थः U; शस्त्रक्ष (कृ B$^{1}$) ताश्वद्विपवीरजन्मा आयुधहततुरगद्विपसु (स्व E) भट (ट्ट J) समुत्थः PB$^{1}$L$_2$EJ

अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे॥ ४३॥

स रेणुर्बभौ रक्तेन बाधिततलः। रक्तस्य पृष्ठतो वायुप्रसारितः। दग्धदारुखसितस्याग्नेः प्रथममुद्गतो धूमो यथा॥ ४३॥

प्रहारमूर्च्छापगमे रथस्था यन्तॄनुपालभ्य विवर्तिताश्वान्।
यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः॥ ४४॥

रथिकास्तानेव सुभटानताडयन् यैरादौ हताः। कथं तान्परिजानन्तीत्याह, दृष्टप्रथमध्वजान्। शस्त्राघातमोहविरामे सारथीन्निर्भर्त्स्य, अपवाहिततुरगान्। सक्रोधतया॥ ४४॥

अप्यर्धमार्गे परबाणलूना
धनुर्भृतां हस्तवतां पृषत्काः।

---

**44 b.** विवर्तिताश्वान् ] $UPB^1L_2EB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Jin.; विवंतिताश्वान् J; निवर्तिताश्वाः Mall.; निवर्तिताश्वान् $V^M$Ar.Nā. **44 d.** निजघ्नुः ] Σ; विचिक्युः Ar.Nā. **45 b.** पृषत्काः ] $\mathbf{V}B_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; पृषंकाः $D^M$; पृषत्काः $V^M$**C**

---

**43** The testimony of $B_3^M$, missing from 7:32, resumes here, after a missing folio.

---

**43.1** बभौ ] *conj.*; आबभासे बभौ Σ **43.1** रक्तेन बाधिततलः ] *conj.*; क्षतजेन रक्तेन च्छिन्नमूलः बाधिततलः Σ **43.1** रक्तस्य पृष्ठतो ] *conj.*; तस्य रक्तस्योपरिष्टात्पृष्ठतः Σ **43.1** वायुप्रसारितः ] *conj.* (cf. Jin.); पवनेन वायुना अवधूतः प्रसारितः Σ **43.2** दग्धदारुखसितस्याग्नेः ] *conj.*; अङ्गारशेषस्य दग्धदारुखसि(शि $PL_2$)तस्य हुताशनस्याग्नेः Σ **43.2** प्रथममुद्गतो ] *conj.*; पूर्वोत्थितः प्रथममुद्गतो Σ **44.1** रथिकास्तानेव ] *conj.*; रथिका रथस्तास्तानेव U; रथस्था रथिकाः तानेव $PB^1L_2EJ$ **44.1** अताडयन् ] *conj.*; निजघ्नुरताडयन् $UPB^1EJ$; निजघ्नुः रताडयन् $L_2$ **44.1** यैरादौ हताः ] *conj.*; यैः साधिताः आदौ हताः U; यैः सादिता आदौ हताः $PB^1L_2J$; यैः सादिता आदौ हतः E **44.2** दृष्टप्रथमध्वजान् ] *conj.*; लक्षितपूर्वकेतून् लक्षिता दृष्टाः(दृष्टः $L_2$) पूर्वं केतवो ध्वजाः येषां $UB^1L_2EJ$; लक्षितपूर्वकेतून् लक्षिताः दृष्टाः पूर्वं प्रथमं केतवः ध्वजाः येषाम् P **44.2** शस्त्रघातमोहविरामे ] *conj.*; प्रहारमूर्च्छापगमे शस्त्रघातमोहविरामे $UL_2EJ$; प्रहारमूर्छापगमे शस्त्रघातमोहविरमे P; प्रहारमूर्छापगमे शस्त्राघातमोहविरामे $B^1$ **44.2** सारथीन्निर्भर्त्स्य ] *conj.*; यन्तॄन्सारथीनुपालभ्य निरर्भत्स्य U; यन्तॄन्सारथीनुपालभ्य निर्भत्स्य (निर्भर्त्तस्य $L_2$) $PB^1L_2E$; यंतून्सारथीनुपालभ्य निर्भत्स्य J **44.2** अपवाहिततुरगान् ] *conj.*; निवर्तताश्वानपवाहिततुरगान् U; निवर्तिताश्वान् अपवाहिताः पराङ्मुखीकृताः तुरगा यैस् तान् P; विवर्तिताश्वानपराहिततुरगान् $B^1L_2$; विवर्तिताश्वानपवाहिततुरगान् E; विवंतिताश्वानपवाहिततुरगान् J **44.3** सक्रोधतया ] *conj.*; सामर्षतया सक्रोधतया Σ

अवापुरेवात्मजवानुवृत्त्या
पूर्वार्धभागैः फलिभिः शरव्यम्॥ ४५॥

चापधराणां दृढलघुकराणां शराः प्रथमैरंशार्धैः फलसहितैः लक्ष्यमासेदुरेव, न त्वन्यतो ययुः। अर्धश्चासौ भागो ऽर्धभागः, पूर्वश्चासावर्धभागश्च। मार्गमध्ये विपक्षशरक्षता अपि, स्ववेगयुक्तत्वेन। तस्य हि मुखभागस्य जवसंस्कारो नोपशान्तः। अत्र च लघुहस्तता कारणम्। †वेगातिशयसंस्कारात्पुनः† संयुक्तपूर्वापरवेगाल्लक्ष्यं प्राप्ता एव, न त्वर्धपथे पतिता इत्यर्थः॥ ४५॥

शिलीमुखोत्कृत्तशिरःफलाढ्या
च्युतैः शिरस्त्रैश्चषकोत्तरेव।
रणक्षितिः शोणितमद्यकुल्या
रराज मृत्योरिव पानभूमिः॥ ४६॥

युद्धभूमिर्बभौ, अन्तकस्य पानमहीव। शरलूनैः शिरोभिरेव बीजपूरादिभिः

---

**45 c. अवापुरेवा॰** ] $UB^1EJB_7^M$; संप्रापुरेवा॰ $PL_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^ML^M$𝕮 **46 .** ] appears after 49 in 𝕮, and is omitted in $V^M$.

---

**45.1 चापधराणां** ] *conj.*; धनुर्भृतां $UPB^1L_2EJ$ **45.1 दृढलघुकराणां** ] *conj.*; हस्तवतां लघुहस्तानां $UB^1L_2EJ$; हस्तवतां दृढलघुकराणां P **45.1 शराः** ] *conj.*; पृषत्काः शराः Σ **45.1 प्रथमैरंशार्धैः** ] *conj.*; पूर्वार्धभागैः U; पूर्वार्धभागैः पूर्वैर्भागार्धैः $B^1L_2EJ$; पूर्वार्धभागैः प्रथमैः अंशार्धैः P **45.1 फलसहितैः** ] *conj.*; फलिभिः फलसहितैः Σ **45.1 लक्ष्यमासेदुरेव** ] *conj.*; शरव्यं लक्ष्यं सम्प्रापुरेवासेदुरेव Σ **45.2 मार्गमध्ये** ] *conj.*; अर्धमार्गे मार्गमध्ये Σ **45.3 विपक्षशरक्षता अपि** ] *conj.*; परबाणलूनापि विपक्षशरहता अपि U; परबाणलूना अपि विपक्षशरक्षता अपि $PB^1L_2EJ$ **45.3 स्ववेगयुक्तत्वेन** ] *conj.*; आत्मजवानुवृत्त्या $UL_2EJ$; आत्मजवानुवृत्त्या स्ववेगयुक्तत्वेन P; आत्मजवानुवर्त्या $B^1$ **45.3 जवसंस्कारो** ] $UB^1L_2EJ$; जवस्संस्कारो P **45.4 लघुहस्तता कारणम्** ] $PB^{1pc}L_2$; लघुहस्ताकारणं UJ; लघुहस्तकारणम् $B^{1ac}$; लघुहस्ता एव कारणम् E **45.4 पुनः** ] $UPB^1EJ$; पुन $L_2$ **45.5 पतिता** ] $UPB^1EJ$; पतित $L_2$ **46.1 युद्धभूमिर्बभौ** ] *conj.*; रणक्षितिर्युद्धभूमिर्बभौ $UPB^1EJ$; रणभूमिर्युद्धक्षितिर्बभौ $L_2$ **46.1 अन्तकस्य पानमहीव** ] P; मृत्योरन्तकस्य पानभूमिरिव U $B^1L_2EJ$ **46.1 शरलूनैः** ] *conj.* (cf. Jin.); शिलीमुखैः शरैरुत्कृत्तैः $UB^1L_2EJ$; शिलीमुखैः शरैरुत्कृत्तैर्लूनैः P

पूर्णा। भ्रष्टैर्मूर्धत्राणैः पानपात्रप्रधानेव। रुधिरमेव मदिरा, तत्कृताल्पा कृत्रिमा सरिद्यत्र॥ ४६॥

आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितक्षुरान्तैः।
कृत्तान्यपि श्येननखाग्रकोटि-
व्यासक्तकेशानि चिरेण पेतुः॥ ४७॥

†शिरांसि† हृतान्यपि बहुकालेनापतन्। गजानां संमिलने। द्विपारोहाणाम्। तीक्ष्णक्षुरवद्धारा येषां तैश्चक्राख्यैरायुधैः। प्राजिकनखमुखप्रान्तलग्नकचानि। नखकोटीनामग्रत्वं शितायतत्वात्॥ ४७॥

---

**47 .** ] placed after 45 in $\mathfrak{C}$. **47 b.** °शितक्षुरान्तैः ] $\mathrm{UPB^1EV^MB_2^MB_3^MB_4^MB_7^ML^M}$; °शितैः क्षुरान्तैः $\mathrm{L_2B_1^M}$; °शितै क्षरांतैः J; °शत क्षुरप्रैः (uncertain) $\mathrm{D^M}$; °शितक्षुरप्रैः $\mathrm{B_5^M}$; °शितैः क्षुरप्रैः Hem.Ar.(?)Nā.; °शितैः क्षुराग्रैः Mall.; °शिताग्रधारैः Jin. **47 c.** कृत्तान्यपि ] $\mathrm{PB^1L_2EJD^MB_1^MB_2^MB_3^MB_5^MB_7^ML^M}$Hem.; कृतान्यपि $\mathrm{UB_4^M}$; हृतान्यपि Mall.Ar.Nā.; हतान्यपि $\mathrm{V^M}$Jin. **47 d.** °केशानि चिरेण ] $\mathrm{UPL_2EV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M}\mathfrak{C}$; °केशान्यचिरेण $\mathrm{B^1}$; °केशानि चरेण J

---

**46.2** बीजपूरादिभिः पूर्णा ] *conj.*; फलैराढ्या पूर्वा फलिनी बाजपूरादीनि U; फलैर्बीजबूरादिभिः आढ्या पूर्णा P; फलैराढ्या पूर्णा फलानि बीजपूरादीनि $\mathrm{B^1L_2}$; फलैराढ्या पूर्वा फलानि बीजपूरादीनि E; फलैराढ्य पूर्वा फलानि बीजपूरादीनि J **46.2** भ्रष्टैर्मूर्धत्राणैः ] *conj.*; च्युतैर्भ्रष्टैः शिरस्त्रैर्मूर्धत्राणैः Σ **46.2** पानपात्रप्रधानेव ] *conj.*; चषकोत्तरेव पानपात्रप्रधानेव Σ **46.2** रुधिरमेव मदिरा ] *conj.*; शोणितं रुधिरमेव मद्यं मदिरा $\mathrm{UB^1L_2EJ}$; शोणितं रुधिरमेव मदिरं मद्यं P **46.2** तत्कृताल्पा ] *conj.*; तत्कृता कुल्या अल्पा Σ **47.1** हृतान्यपि ] $\mathrm{UB^1L_2EJ}$; कृत्तान्यपि हृतान्यपि P **47.1** बहुकालेनापतन् ] *conj.*; चिरेण पेतुः UEJ; चिरेण बहुकालेन पेतुरपतन् P; चिरेण पेतुरपतन् $\mathrm{B^1L_2}$ **47.1** संमिलने ] *conj.*; सन्निपाते सम्मिलने Σ **47.1** द्विपारोहाणाम् ] *conj.*; आधोरणानां द्विपारोहाणां $\mathrm{UB^1L_2EJ}$; आधोरणानां हस्त्यारोहाणां P **47.2** तीक्ष्णक्षुरवद्धारा येषां ] *conj.*; निशतक्षुरान्तैः तीक्ष्णाः क्षुरवद्धारा येषां U; निशितक्षुरान्तैः तीक्ष्णक्षुरवदन्ताः धाराः येषां चक्राणां $\mathrm{PB^1L_2}$; निशितक्षुरान्तैस्तीक्ष्णः क्षुरवद्धारा येषां E; निशितक्षुरांतैः तीक्ष्णाः क्षुरवद्धारा येषां J **47.2** तैश्चक्राख्यैरायुधैः ] P; तैः $\mathrm{UB^1L_2EJ}$ **47.2** प्राजिकनखमुखप्रान्तलग्नकचानि ] UEJ; श्येनाः प्राणिकाः कोटिः प्रान्तः व्यासक्ताः संसक्ताः प्राजिकनखमुखप्रान्तलग्नकचानि P; श्येनाः प्राजिकाः कोटिः प्रान्तः व्यासक्तास्संसक्ताः $\mathrm{B^1}$; श्येनाः प्राजिकाः कोटिः प्रन्तः व्यासक्ताः संसक्तः $\mathrm{L_2}$ **47.3** नखकोटीनामग्रत्वं शितायतत्वात् ] $\mathrm{B^1L_2}$; नखोग्रकोटीनामुग्रत्वं शितायुतात् U; नखकोटीनामुग्रत्वं शितत्वात् P; नखोग्रकोटीनामुग्रत्वं शितायत्वात् EJ

पूर्वप्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष॥ ४८॥

प्रथमप्रहन्ता अश्ववारः शत्रुं पुनर्न जघ्निवान्। प्रतिघातासमर्थम्, अश्वांसार्पितकायम्। किन्तु पुनर्जीवन्तमचकमत, येन पुनरायोधनं भवति॥ ४८॥

तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः।
उद्यन्तमग्निं शमयां बभूवुर्गजा विविग्नाः करशीकरेण॥ ४९॥

हस्तिनो भीता दन्तेषूत्थितमग्निं निरवापयन्, वमथुना। देहमुत्सृज्य गजैर्युद्धानां कवचधराणाम् उत्खातैरपरिवारैः खड्गैः पतद्भिरुत्थितम्॥ ४९॥

उपान्तयोर्निष्कुषितं विहङ्गैराक्षिप्य तेभ्यः पिशितप्रियापि।
केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार॥ ५०॥

---

**48 a.** पूर्वप्रहर्ता ] UPB[1]$L_2$ED$^M$V$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$L$^M$ ; पूर्वप्रहंता J ; पूर्वं प्रहर्ता 𝕮 **48 b.** °श्वसादी ] Σ ; °श्ववारः Jin. **48 c.** °स्कन्धनिषण्ण° ] B[1]V$^M$B$_2^M$Hem.Mall.Ar.Nā. ; °स्कन्दनिषण्ण° UP$L_2$EJD$^M$B$_1^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$L$^M$ ; °स्कन्धनिषक्त° Jin. **49 d.** °शीकरेण ] ŚMall.Ar.(?)Nā. ; °सीकरेण Hem.Jin. **50 b.** तेभ्यः ] ŚHem.Mall.Ar.$^{vl}$Nā.Jin. ; तेषां Vall.$^{vl}$Ar.

---

**48.1** प्रथमप्रहन्ता ] *conj.* ; पूर्वप्रहन्ता प्रथमप्रहन्ता U$L_2$J ; पूर्वप्रहर्ता प्रथमप्रहर्ता PB[1]E **48.1** अश्ववारः ] *conj.* ; अश्वसादी अश्ववारः Σ **48.1** शत्रुं ] *conj.* ; रिपुं शत्रुं Σ **48.1** पुनर्न जघ्निवान् ] *conj.* ; भूयः पुनः न जघान न जघ्निवान् Σ **48.1** प्रतिघातासमर्थम् ] *conj.* ; प्रतिप्रहाराक्षमं प्रतिघातासम (मा B$^{1ac}$) र्थम् UPB[1]$L_2$E ; प्रतिप्रहारक्षमं प्रतिघातसमर्थं J **48.2** अश्वांसार्पितकायम् ] *conj.* ; तुरङ्गमस्कन्दे अश्वांसे निषण्णदेहमर्पितकायं UP$L_2$EJ ; तुरङ्गमस्कन्धे अश्वांसे निषण्णदेहमर्पितकायम् B[1] **48.2** पुनर्जीवन्तमचकमत ] *conj.* ; प्रत्याश्वसन्तं पुनर्जीवन्तमाचकाङ्क्ष अचकमत UB[1]$L_2$E ; प्रत्याश्वसन्तं पुनर्जीवन्तं आचकाङ्क्ष P ; प्रत्याश्वसंतं पुनर्जीवंतमाचकांक्ष आचकमत J **48.2** भवति ] PB[1] ; न भवति UJ ; भवतीति $L_2$E **49.1** हस्तिनो भीता ] *conj.* (cf. Jin.) ; गजा विविघ्नाः भीताः UP ; गजा विविग्ना भीताः B[1]$L_2$EJ **49.1** दन्तेषूत्थितम् ] *conj.* ; दन्तेषु उद्यन्तमुत्थितम् Σ **49.1** निरवापयन् ] *conj.* ; शमयां बभूवुः निवारयन् UEJ ; शमयां बभूवुः निरवापयन् PB[1] ; शमयां बभूवु ×⏑̄ ⏑̄ ⏑̄×निरावापयन् $L_2$ **49.1** वमथुना ] *conj.* ; करशीकरेण वमथुना UPEJ ; करशीकरेण वायुना B[1] ; करशीकरेणेवमध्वना $L_2$ **49.1** देहमुत्सृज्य ] *conj.* ; तनुत्यज्यां देहमुत्सृज्य UPEJ ; तनुत्यजां देहमप्युत्सृज्य B[1]$L_2$ **49.2** °युद्धानां ] PB[1]$L_2$ ; °योधानां E ; °योद्धानां UJ **49.2** कवचधराणाम् ] *conj.* ; वर्मभृतां कवचधारिणां U$L_2$EJ$^{pc}$ ; वर्मभृतां कवचधराणां PB$^{1ac}$ ; वर्मभृतां कवचधाराणां B$^{1pc}$J$^{ac}$ **49.2** उत्खातैरपरिवारैः खड्गैः ] *conj.* ; विशोकैः उत्खातैरसिभिः खड्गैः UE ; विकोशैरुत्खातैरसिभिः खड्गैः B[1]J ; निखातैर्विकोशैरपरिवारैरसिभिः खड्गैः P ; विकोशैरुत्खातैरसभिः खड्गै $L_2$

शृगाली मांसप्रियापि बाहुखण्डं चिक्षेप। ≪अङ्गदप्रान्तविद्धतालुदेशा≫। गृध्रादिभिः पक्षिभिः प्रान्तयोर्निःसारीकृतं कृष्टमांसम्। तेभ्यः पक्षिभ्यो हृत्वापि। तेषामिति पाठे सम्बन्धमात्रे षष्ठी॥ ५०॥

**कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य।**
**वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श॥ ५१॥**

कश्चित्सुभटस्तत्क्षणमेव दिव्यां गतिमवाप्य निजं नाट्यं कुर्वन्तं शिरोहीनं सचेष्टं कायमद्राक्षीत्। ≪रिपुखड्गच्छिन्नमस्तकम्≫। ≪दक्षिणेतरपार्श्वोपविष्टाप्सराः≫। प्रियाणां हि वामो भागः स्थानम्॥ ५१॥

**अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित्।**
**व्यश्वौ गदाव्यायतसम्प्रहारौ भग्नायुधौ बाहुविमर्दनिष्ठौ॥ ५२॥**

कौचिद्रथिनौ सन्तौ, परस्परहतसारथित्वात्तावेव सारथी रथिकौ च बभूव-

---

**51 a.** °खड्गहृतोत्तमांगं ] $UL_2JB_2^MB_4^M$; °खड्गधहृतोत्तमाङ्गस् P(unmetrical); °खण्डहृतोत्तमाङ्गं $B^1$; °खड्गाहृतोत्तमाङ्गं E(unmetrical); °ग ⏑तोत्तमाङ्गः $D^M$; °खड्गहृतोत्तमाङ्गः $V^MB_1^MB_3^MB_5^MB_7^M$Hem.Mall.Ar.(?)Nā.; °खड्गाहृतोत्तमाङ्गः $L^M$; °खड्गहृतोत्तमाङ्गः Jin.

---

**50.1** शृगाली मांसप्रियापि ] *conj.*; शिवा शृगाली पिशितप्रिया मांसप्रियापि $UPB^1L_2J$; शिवा सृगाली पिशितप्रियापि मांसप्रियापि E **50.1** बाहुखण्डं चिक्षेप ] *conj.*; भुजच्छेदं बाहुखण्डमपाचकार चिक्षेप Σ **50.1** अङ्गदप्रान्तविद्धतालुदेशा ] *conj.* (cf. Jin.); यतः केयूरकोट्या अङ्गदप्रान्तेन क्षतस्तालुदेशो यस्यास्सा तथोक्ता Σ **50.2** गृध्रादिभिः पक्षिभिः ] *conj.*; विहङ्गैः गृद्ध्रादिभिः पक्षिभिर् $UPL_2EJ$; विहङ्गैर्गृद्ध्रादिपक्षिभिर् $B^1$ **50.2** प्रान्तयोर्निःसारीकृतं कृष्टमांसम् ] P; उपान्तयोः प्रान्तयोर्निष्कुषितं निस्सारीकृत UJ; उपान्तयोः प्रान्तयोर्निष्कुषितं निस्सारीकृतं $B^1L_2E$ **50.2** पक्षिभ्यो हृत्वापि ] *conj.*; पक्षिभ्य आक्षिप्य हृत्वापि Σ **50.3** तेषामिति पाठे सम्बन्धमात्रे षष्ठी ] P; *om.* $UB^1L_2EJ$ **51.1** तत्क्षणमेव ] *conj.*; सद्यस्तत्क्षणमेव Σ **51.1** दिव्यां गतिमवाप्य ] *conj.*; विमानप्रभुतां दिव्यां रीतिमुपेत्य प्राप्य $UB^1L_2^{ac}J$; विमानप्रभुतां दिव्या रीतिमुपत्य प्राप्य E; विमानप्रभुतां दिव्यां गतिमवाप्य P; विमानप्रभुतां दिव्यां गतिमुपेत्य प्राप्य $L_2^{pc}$ **51.1** निजं नाट्यं कुर्वन्तं ] *conj.*; स्वं निजं नृत्यत् $UB^1L_2EJ$; स्वं निजं नृत्यत् नाट्यं कुर्वन्तम् P **51.1** शिरोहीनं सचेष्टं कायम् ] *conj.*; °कबन्धं शिरोहीनः सचेष्टः कायः कबन्धः तं नृत्यन्तं $UL_2E$; कबन्धं शिरोहीनम् सचेष्टं कायं P; °कबन्धं शिरोहीनस्सुचेष्टः कायः कबन्धः तं नृत्यन्तं $B^1$; °कबंधं शिरोहीनः सचेष्टा कायः कबंधः तं नृत्यंतं J **51.2** अद्राक्षीत् ] *conj.*; ददर्शाद्राक्षीत् Σ **51.2** रिपुखड्गच्छिन्नमस्तकम् ] *conj.* (cf. Jin.); *om.* Σ **51.2** दक्षिणेतरपार्श्वोपविष्टाप्सराः ] *conj.*; वामाङ्गे संसक्तोपविष्टा सुराङ्गना यस्य Σ **51.3** भागः ] $UB^1L_2EJ$; भागो P **52.1** परस्परहतसारथित्वात्तावेव सारथी ] *conj.*; तावेव सारथी $UB^1L_2EJ$(eyeskip); परस्परहतसारथित्वात्तावेव सारथिनौ P

तुः। ततो हतहयौ। हताश्वत्वात्, ≪गदाख्यायुधातिदीर्घयुद्धौ≫। गदे गृहीत्वा युयुधाते इत्यर्थः। ततश्चूर्णितगदौ। चूर्णितगदत्वात्, भुजयुद्धपरायणावास्ताम्॥ ५२॥

परस्परेण क्षतयोः प्रहर्त्रो-
व्युत्क्रान्तवाय्वोः समकालमेव।
अमर्त्यभावे ऽपि कयोश्चिदासीद्
एकाप्सरःप्रार्थितयोर्विवादः॥ ५३॥

कयोश्चित्सुभटयोर्दिव्यत्वे ऽपि कलह आसीत्। आहतयोर्विप्राणयोर्युगपद् एकयाप्सरसा वृतयोः। सा ह्येकतरजिघृक्षयागतासीत्। एककालमरणादेकमङ्गीकुरुताम्॥ ५३॥

---

**53 b.** °र्व्युत्क्रान्त° ] $UB^1L_2EJ$ ($B_1^M$ uncertain) $B_7^M$; °व्युत्क्रान्त° $D^MB_2^MB_4^M$; °रुत्क्रान्त° $PV^MB_3^MB_5^ML^M$**C**  **53 c.** अमर्त्यभावे ऽपि ] $UPB^1L_2EV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$ $L^M$**C**; अमर्त्यभावेन J; अमर्तिभावे ऽपि $D^M$

---

**52.2** रथिकौ च बभूवतुः ] *conj.*; रथिनौ चाभूतां बभूवतुः $UB^1L_2EJ$; रथिकौ चाभूताम् बभूवतुः P  **52.2** ततो हतहयौ। हताश्वत्वात् ] *conj.*; व्यश्वौ हताश्वत्वात् ततो $UB^1L_2E$ J; ततो व्यश्वौ हतहयौ हताश्वत्वात् P  **52.2** गदाख्यायुधातिदीर्घयुद्धौ ] *conj.*; गदाभ्यां व्यायतो दीर्घः (र्घ U) सम्प्रहारो युद्धं ययोस्तौ $UB^1L_2EJ$; गदाभ्यां गदाख्याभ्यामायुधाभ्यां व्यायतो तिदीर्घः संप्रहारो युद्धं ययोस्तौ P  **52.2** गदे ] $PB^1L_2EJ$; गदी U  **52.3** ततश्चूर्णितगदौ। चूर्णितगदत्वात् ] *conj.*; यतो भग्नायुधौ चूर्णितगधत्वात् UJ; ततो भग्नायुधौ चूर्णितगदौ चूर्णितगदत्वात् P; यतो भग्नायुधो चूर्णितगदत्वाद् $B^1$; यतो भग्नायुधौ चूर्णितगदात्वाद्वा $L_2$; यतो भग्नायुधौ चूर्णितगदात्वाद् E  **52.4** भुजयुद्धपरायणावास्ताम् ] *conj.*; बाहुविमर्दयुद्धौ भुजयुद्धपरायणावभूताम् $UB^1EJ$; बाहुविमर्दनिष्ठौ भुजयुद्धपरायणौ आस्ताम् P; बाहुविमर्दनिष्ठौ युद्धौ भुजयुद्धपरायणावभूताम् $L_2$  **53.1** कयोश्चित्सुभटयोर्दिव्यत्वे ऽपि ] *conj.*; कयोश्चित्प्रहर्त्त्रोस्सुभटयोः अमर्त्यभावे ऽपि दिव्यत्वे ऽपि $UB^1L_2E$; कयोश्चित्प्रहर्त्रोः सुभटयोरमर्त्यभावे दिव्यत्वेपि P; कयोश्चित्प्रहर्त्रोः सुरभयोः अमर्त्यभावेपि दिव्येत्वपि J **53.1** कलह ] *conj.*; विवादः कलह Σ  **53.1** आहतयोर्विप्राणयोर्युगपद् ] *conj.*; क्षतयोः आहतयोः तयोः U; क्षतयोराह (कृ J) तयोः व्युत्क्रान्तवाय्वोर्विप्राणयोः समकाले (लं $L_2$) युगपत् $PB^1L_2EJ$  **53.2** एकयाप्सरसा वृतयोः ] *conj.*; प्रार्थितयोर्वृतयोः U; एकया अप्सरसा प्रार्थितयोः वृतयोः $PL_2$; एकया अप्सरस प्रार्थितयोर्वृतयोः $B^1$; क्षतयोराहतयोस्तयोः प्रार्थितयोर्वृतयोः E; क्षतयोराहतयोः प्रार्थितयोः वृतयोः J  **53.2** ह्येकतर° ] $B^1L_2E$; ह्येकतरणि° UJ; ह्यप्सरा एकतर° P  **53.3** एककालमरणादेकमङ्गीकुरुताम् ] *conj.*; समकालमेककालमरणादेकमङ्गीकुरुताम् UE; समकालमेककालम्तुरणादेकमेकमङ्गीकुरुताम् P; समकालमेककालमरणादेकमेकमङ्गीकुरुताम् (तम् $L_2$) $B^1L_2$; समकालमेककालममरणादेकमंगीकुरुताम् J

व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थम्।
पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी॥ ५४॥

तौ सेनासन्निवेशौ परस्परस्माद् †भङ्गं जयं† चानियतमासेदतुः। यथा उदधिकल्लोलौ प्रवर्धने पाश्चात्यपौरस्त्ययोर्वाय्वोः क्रमवहनेनाप्लुतः। पश्चाद्वाते प्रवृद्धे पूर्वोर्मेर्जयः, पूर्ववाते तु पश्चादूर्मेः॥ ५४॥

परेण भग्ने ऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव।
धूमो निवर्त्येत समीरणेन यतो हि कक्ष्यस्तत एव वह्निः॥ ५५॥

रिपुसेनासम्मुखमेव कुमारो ऽधावत्। न त्वन्यतो ययौ। अन्येन शत्रुणा सैन्ये पराजिते ऽपि सति। बृहदोजाः। वायुना हेतुना धूमो निवर्तयितुं शक्यते। यत्र पुनस्तृणं तत्र वह्निर्जाज्वलतीति सैन्यस्य तृणौपम्येनाजस्य महाशक्तित्वमुक्तम्॥ ५५॥

---

**55 c.** निवर्त्येत ] $V^{M}$**C**; निवर्तेत UPB$^{3}$L$_{2}$EJD$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{3}^{M}$B$_{4}^{M}$B$_{5}^{M}$B$_{7}^{M}$L$^{M}$ **55 d.** कक्ष्यस्तत ] UPB$^{1}$L$_{2}$EJB$_{1}^{M}$B$_{2}^{M}$B$_{3}^{Mpc}$B$_{7}^{M}$L$^{M}$; कस्तत D$^{Mac}$B$_{3}^{Mac}$; कक्षस्तत D$^{Mpc}$V$^{M}$B$_{4}^{M}$B$_{5}^{M}$**C**

---

**54.1** तौ सेनासन्निवेशौ ] *conj.*; तौ व्यूहौ सेनासन्निवेशौ UPB$^{1}$J; तौ व्यूहौ सेनानिवेशौ E; सेनासन्निवेशौ L$_{2}$ **54.1** परस्परस्माद् ] *conj.*; इतरेतरस्मात्परस्परा UE; ⌣तरेतरस्मादन्योन्यस्माद् P; इतरेतरस्मात्परस्परस्माद् B$^{1}$L$_{2}$; इतरेतरस्मात्परंपरा J **54.1** चानियतमासेदतुः ] *conj.*; चाव्यवस्थमनियतमापतुरासेदतुः UPB$^{1}$L$_{2}$E; चाव्यवस्थमनियतमापत्तरासेदतुः J **54.2** उदधिकल्लोलौ ] *conj.*; महार्णवोर्मी उदधिकल्लोलौ UPB$^{1}$L$_{2}$E; महार्णवोर्मी तदधिकल्लोलौ J **54.2** प्रवर्धने ] *conj.*; प्रवृद्धौ UB$^{1}$L$_{2}$EJ; प्रवृद्धौ प्रवर्धने P **54.2** पाश्चात्यपौरस्त्ययोर्वाय्वोः ] *conj.*; पश्चात्पुरोमारुतयोः (यो L$_{2}$) पाश्चात्यपौरस्त्ययोर्वातयोः UB$^{1}$L$_{2}$EJ; पश्चात्पुरोमारुतयोः पाश्चात्यपौरस्त्ययोः वाय्वोः P **54.2** क्रमवहनेनाप्लुतः ] *conj.*; पर्यायवृत्त्या क्रमवहनेनाप्लुतः Σ **54.3** पश्चाद्वाते प्रवृद्धे पूर्वोर्मेर्जयः, पूर्ववाते तु पश्चादूर्मेः ] P; *om.* UB$^{1}$L$_{2}$EJ **55.1** रिपुसेनासम्मुखमेव कुमारो ऽधावत् ] *conj.*; अरिसैन्यमेव प्रति रिपुसेनासम्मुखमेवाजो ययावधावत् UPB$^{1}$L$_{2}$E; अरिसैन्यमेव प्रति रिपुसेनासंमुखमेव अजकुमरो ययावऽधावत् J **55.2** न त्वन्यतो ययौ। अन्येन शत्रुणा सैन्ये पराजिते ऽपि सति। बृहदोजाः ] *conj.*; न तु अन्येन परेण शत्रुणा सैन्ये (सैन्य E) पराजिते ऽपि सति महौजा बृहदोजाः न त्वन्यतो ययौ UB$^{1}$EJ; न त्वन्यतो ययौ अन्येन परेण शत्रुणा सैन्ये पराजिते पि सति महौजाः बृहदोजाः P; न तु परेणान्येन शत्रुणा सैन्ये पराजितेपि सति महौजाः बृहदोजा न त्वन्यतो ययौ L$_{2}$ **55.2** वायुना हेतुना धूमो निवर्तयितुं शक्यते ] *conj.*; समीरणेन वायुना हेतुना धूमो निवर्त्तते (निवर्त्तेत L$_{2}$E) निवर्त्तयितुं शक्यते Σ **55.3** पुनस्तृणं ] *conj.*; पुनः कक्ष्यस्तृणं Σ **55.3** वह्निर्जाज्वलतीति ] B$^{1}$L$_{2}$; वह्निर्ज्वलति इति U; वह्निर्जाज्वल्यतीति PE; वह्निर्ज्वाज्वलतीति J

**रथी निषङ्गी कवची धनुष्मान्दृप्तं स राजन्यकमेकवीरः।**
**विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः॥ ५६॥**

अजो ऽसहाय एव शूरो नृपवर्गं दर्पयुक्तमाकुलमकार्षीत्। स्यन्दनवान् तूणवान् कङ्कटवान् चापवान्। आदिवराहो यथा कल्पान्तोल्लसितमब्धिजलमालोडयामास॥ ५६॥

**न दक्षिणं तूणमुखे न वामं व्यापारयन्हस्तमलक्ष्यतासौ।**
**आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान्॥ ५७॥**

अजो न दक्षिणं हस्तं नापि वामं निषङ्गवदने निक्षिपन्नदृश्यत। लाघवादस्य ज्येव बाणान् प्रासोष्ट, सकृत् ≪श्रोत्रपर्यन्तविकृष्टा≫। शत्रुघातिनः॥ ५७॥

---

**56 .** ] placed after 57 in UB$^1$EJB$_2^M$. In L$_2$, the verse comes here in the *mūlapāṭha*, but its commentary is placed after that of 57. **56 b. दृप्तं** ] UPEB$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_7^M$L$^M$Hem.Jin.; दृप्तः B$^1$L$_2$JV$^M$B$_5^M$Mall.Ar.Nā.; क्षप्तं D$^M$ **56 c. विलोडयामास** ] UB$^1$L$_2$EJB$_2^M$B$_3^M$B$_4^M$B$_5^M$ B$_7^M$L$^M$Hem.Jin.; आलोढयामास P; विलोकयामास D$^M$; (illegible) B$_1^M$; निवारयामास V$^M$Mall.; विलोळयामास Ar.(?)Nā. **57 .** ] placed after 55 in UB$^1$EJ. **57 a. न दक्षिणं तूणमुखे न** ] ŚJin.; स दक्षिणं तूणमुखे च Hem.; स दक्षिणं तूणमुखेन Mall.; स दक्षिणं तूणिमुखे न Ar.Nā. **57 b. °लक्ष्यतासौ** ] Ś; °लक्ष्यताजौ Hem.Mall.Ar.(?)Nā.Jin.

---

**56.1 अजो ऽसहाय एव शूरो** ] P; स एकवीरः एक एव कुमारो वीरत्वात् UEJ; स एक एव वीरः एक एव कुमारो वीरत्वात् B$^1$L$_2$ **56.1 नृपवर्गं दर्पयुक्तं** ] P; दृप्तो दर्पयुक्तः U; दर्पो दर्पयुक्तः E; राजन्यकं नृपसमूहं दृप्तो दर्पयुक्तः B$^1$L$_2$; दर्पो दर्पयुक्तत्वात् J **56.1 आकुलमकार्षीत्** ] P; विलोडयामास आकुलमकार्षीत् UB$^1$L$_2$EJ **56.2 स्यन्दनवान् तूणवान् कङ्कटवान् चापवान्** ] P; स्यन्दनवांस्तूपवांश्चापवान् UE; निषङ्गस्तूणः B$^1$L$_2$; स्यंदनवान् तूणवान् चापवान् J **56.2 आदिवराहो यथा** ] UPE; *om.* B$^1$L$_2$; महावराहो J **56.3 कल्पान्तोल्लसितमब्धिजलमालोडयामास** ] P; कल्पान्तोल्लसितंमङ्घिजलं विलोडयामास एतच्छ्लोकद्वयं पौरापर्ययेण गतम् U; कल्पक्षयोद्वृत्तं कल्पान्तोल्लसितम्। अर्णवाम्भो ऽब्धिजलम्। महावराह आदिवराह। एतच्छ्लोकद्वयं पौर्वापर्यविपर्ययेण गतम् B$^1$; कल्पक्षयोद्वृत्तं कल्पान्तोल्लसितं अर्णवाम्भो ब्धिजलम्। महावराह आदिवराहः॥ ५७॥ एत श्लोकद्वयं पौर्वापविपर्ययेन गतम् L$_2$; कल्पांतोल्लसितं अब्धिजलं विलोडयामास एतत् श्लोकद्वयं पौरपर्ययेण गतम् J; कल्पान्तोल्लसितं अब्धिजलं विलोडयामास एतच्छोकद्वयं पौर्वापर्यायेण गतम् E **57.1 अजो** ] *conj.*; असावजः UPB$^1$L$_2$E; असौ अजकुमारः J **57.1 दक्षिणं हस्तं** ] PL$_2$E; दक्षिणं हस्ते U; दक्षिणं हस्तो B$^1$; दक्षणं हस्ते J **57.1 निषङ्गवदने** ] *conj.*; तूणमुखे निषङ्गवदने Σ **57.1 निक्षिपन्नदृश्यत** ] *conj.*; व्यापारयन्निक्षिपन् अलक्ष्यतादृश्यत UPB$^1$L$_2$J; व्यापारयन्निक्षिपयन् अलक्ष्यतादृश्यत E **57.1 °दस्य** ] *conj.*; °दस्य योद्धुः Σ **57.2 ज्येव** ] *conj.*; मौर्वीव UJ; मौर्वी इव E; मौर्वी इव ज्या इव PB$^1$L$_2$ **57.2 प्रासोष्ट** ] *conj.*; सुषुवे प्रासोष्ट Σ **57.2 श्रोत्रपर्यन्तविकृष्टा** ] *conj.*; *om.* Σ **57.2 शत्रुघातिनः** ] *conj.*; योद्धुः शत्रुघातिनः Σ

स रोषदष्टाधिकलोहितौष्ठैर्व्यक्तोर्ध्वराजीर्भ्रुकुटीर्वहद्भिः।
तस्तार गां भल्लनिकृत्तकण्ठैर्हुङ्कारगर्भैर्द्विषतां शिरोभिः॥ ५८॥

अजः शत्रूणां मूर्धभिर्भूमिमूर्णुनाव। †रोषेण दष्टः अत एवाधिकलोहितोष्ठो बहलरक्तो ऽधरो यैर्येषां वा†। प्रकटितत्रिशिखान् भ्रूभङ्गान् बिभ्राणैः। ≪खड्गाकारमुखशरलूनगलैः≫। घण्टाह्रादवद्धुङ्कारो गर्भे छिन्नानामपि येषां तैः॥ ५८॥

सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कटभेदिभिश्च।
सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव॥ ५९॥

†सर्व एव भूमिपाला† एकीभूय ≪सङ्ग्रामे≫ऽजे प्रहृतवन्तः। सकलैः सैन्यावयवैर्हस्त्यश्वरथपदातिभिः, समग्रप्रहरणैः खड्गतोमरादिभिः सन्नाहच्छेदिभिश्च, अशेषकष्टेन च॥ ५९॥

सो ऽस्त्रव्रजैश्छन्नरथः परेषां
ध्वजाग्रमात्रेण बभूव लक्ष्यः।

---

**58 a.** ॰दष्टाधिकलोहितौष्ठै॰ ] $UP^{pc}B^1L_2EB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$; ॰दष्टाधरलोहितौष्ठै॰ $P^{ac}$; ॰दष्टाधिकलोहितौष्टै॰ J; ॰दष्टाधिकलोहितोष्ठै॰ $V^M$Mall.Ar.(?)Nā.Jin.; ॰दष्टाधरलोहिताक्षै॰ Hem. **58 b.** ॰राजीर्भ्रुकुटी॰ ] $UPB^1L_2EJD^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$; ॰रेखा भृकुटी॰ Hem.; ॰रेखा भ्रुकुटी॰ $V^M$Mall.Ar.Nā.Jin.

---

**58.1** अजः शत्रूणां मूर्धभिर्भूमिमूर्णुनाव ] *conj.*; सो ऽजः द्विषतां शिरोभिः गां भूमिं तस्तार ऊर्णुनाव $UB^1L_2EJ$; सः अजः द्विषतां शिरोभिः शत्रूणां मूर्धभिः गां भूमिं तस्तार ऊर्णुनाव P **58.1** ॰लोहितोष्ठो ] $UPB^1EJ$; ॰लोहित ऊर्ध्वष्ठो $L_2$ **58.2** बहलरक्तो ऽधरो यैर्येषां वा ] P; येषां $UB^1L_2J$; येषां तैः E **58.2** प्रकटितत्रिशिखान् भ्रूभङ्गान् ] *conj.*; व्यक्ता ऊर्ध्वराजी (जीः $L_2$) त्रिशिखा यासां भ्रुकुटीनां ता $UB^1L_2EJ$; व्यक्ताः प्रकटिताः ऊर्ध्वराजीः त्रिशिखा यासां भ्रुकुटीनां ताः भ्रुकुटीः भूभङ्गान् P **58.2** बिभ्राणैः ] *conj.*; वहद्भिः बिभ्राणैः $UPB^1L_2J$; वहोद्भिः बिभ्राणैः E **58.3** खड्गाकारमुखशरलूनगलैः ] *conj.*; भल्लाः (ल्ला $UL_2$) शरविशेषास्तैर्निकृत्ताः कण्ठा गला येषं तैः $UB^1L_2EJ$; भल्लाः शरविशेषाः तैर्निकृत्ताः लूनाः गलाः कण्ठा येषां तैः P **58.3** घण्टाह्राद॰ ] UPEJ; घण्टाह्रद॰ $B^1$; घट्टाह्राद॰ $L_2$ **59.1** सङ्ग्रामे ऽजे ] *conj.*; तस्मिन्कुमारे $UB^1L_2EJ$; तस्मिन् कुमारे अजे P **59.1** प्रहृतवन्तः ] *conj.*; प्रजह्रुः प्रहृतवन्तः Σ **59.1** सकलैः सैन्यावयवै॰ ] P; बलाङ्गै॰ $UB^1L_2EJ$ **59.2** समग्रप्रहरणैः खड्गतोमरादिभिः सन्नाहच्छेदिभिश्च ] *conj.*; कङ्कटभेदिभिस्सन्नाहच्छे (भे $L_2$) दिभिश्च सर्वायुधैः खड्गतोमरादिभिः $UB^1L_2EJ$; समग्रप्रहरणैः खड्गतोमरादिभिः कङ्कटभेदिभिः सन्नाहच्छेदिभिश्च P **59.3** अशेषकष्टेन च ] *conj.*; सर्वप्रयत्नेनाशेषेण बलेन च $UB^1L_2EJ$; सर्वप्रयत्नेन अशेषकष्टेन च P

नीहारमग्नोदितपूर्वभागः
किञ्चित्प्रकाशेन यथा विवस्वान्॥ ६०॥

अजः शत्रूणामायुधपूगैः पिहितरथश्चिह्नान्तमात्रेण दृश्यो बभूव। धूमिकायां ब्रुडितस्तत उदितः प्रथमांशो यस्य स रविर्यथा लक्ष्यो भवति, किञ्चिन्मात्रेण प्रकाशेन लक्ष्यत इति॥ ६०॥

प्रियंवदात्प्राप्तमथ प्रियार्हः
प्रायुङ्क्त राजस्वधिराजसूनुः।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः
प्रस्वापनं स्वप्ननिवृत्तलौल्यः॥ ६१॥

अनन्तरमजः प्रस्वापनाख्यमस्त्रं प्रियंवदाख्याद्गन्धर्वराजसुताल्लब्धं नृपेषु प्रयुयुजे। हितयोग्यः। †अधिको राजा अधिराजः तस्य सूनुः†। कामवन्मनोहरः।

---

**60 c.** ॰मग्नोदितपूर्वभागः ] U$P^{pc}B^1L_2ED^M$ ( ॰भाग $D^M$ ) $B_1^MB_3^MB_4^MB_5^MB_7^ML^M$; ॰मग्नोदितपूर्वकायः $P^{ac}$; ॰मग्नोदितपूर्वकाशः J; ॰मग्नौदितपूर्वकायः $B_2^M$; ॰मग्नो दिनपूर्वभागः $V^M$Hem.Mall.Jin.; ॰मग्ने दिनपूर्वभागे $Ar.^{vl}$Nā. **60 d.** यथा विवस्वान् ] Ś$Ar.^{vl}$Nā.; विवस्वतेव $V^M$Hem.Mall.Jin. **61 a.** प्राप्तमथ प्रियार्हः ] **V**$B_1^MB_2^MB_3^MB_5^ML^M$Jin.; प्रामथ प्रयार्ह $D^M$; प्राप्तमपि प्रियार्हः $B_4^M$; प्राप्तमथो कुमारः Hem.Ar.(?)Nā.; प्राप्तमसौ कुमारः $V^M$Mall. **61 c.** कुसुमास्त्रकान्तः ] Σ; कुसुमास्त्रकान्तं $Vall.^{vl}$

---

**60.1** अजः ] *conj.*; सो ऽजः $UPB^1L_2E$; सो ऽजकुमारः J **60.1** शत्रूणामायुधपूगैः ] *conj.*; परेषामस्त्रव्रजैरायुधपूगैः $UB^1L_2EJ$; परेषां शत्रूणामस्त्रव्रजैः आयुधपूगैः P **60.1** पिहितरथश्चिह्नान्तमात्रेण ] *conj.*; च्छन्नरथः पिहितरथः ध्वजाग्रमात्रेण चिह्नान्तमात्रेण Σ **60.1** दृश्यो ] *conj.*; लक्ष्यो दृश्यो $UPB^1L_2J$; लक्ष्यो दृशो E **60.2** धूमिकायां ब्रुडितस्तत उदितः प्रथमांशो यस्य स ] *conj.*; नीहारे मग्नः तत उदितः पूर्वभागो यस्य विवस्वतः स नीहारमग्नोदितपूर्वभागो $UB^1L_2EJ$; नीहारे धूमिकायां मग्नो ब्रुडितः ततः उदितः पूर्वभाः प्रथमांशः यस्य विवस्वतः स नीहारमग्नोदितपूर्वभागः P **61.1** अनन्तरमजः ] UE; अथानन्तरं कुमारः अजः P; अथानन्तरं कुमारो $B^1L_2$; अथानन्तरम् अजकुमारः J **61.1** प्रस्वापनाख्यमस्त्रं प्रियंवदाख्याद्गन्धर्वराजसुताल्लब्धं ] UEJ; गान्धर्वमस्त्रं प्रस्वापनाख्यं $PB^1$; गान्धर्वमस्त्रं प्रस्वपनाख्यं $L_2$ **61.1** नृपेषु ] *conj.* (cf. Jin.); राजसु $UPB^1EJ$; राजस्व $L_2$ **61.2** प्रयुयुजे ] UEJ; प्रायुङ्क्त प्रयुयुजे $PL_2$; प्रायुङ्क्त प्रायुयुजे $B^1$ **61.2** हितयोग्यः ] UEJ; *om.* $PB^1L_2$ **61.2** अधिको राजा अधिराजः तस्य सूनुः ] $PB^1L_2$; अधिको राजाधिराजः UEJ

कान्तमिति पाठे कुसुममयास्त्रवदपीडाकरमस्त्रम्। निद्रायाश्चलितो ऽभिलाषो यस्य सः। परं न सुष्वापेत्यर्थः॥ ६१॥

ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम्।
तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम्॥ ६२॥

अनन्तरं नृपबलमस्त्रवशात् स्वप्नवश्यमतिष्ठत्। कार्मुकाकृष्टौ जडकरम्, ≪एकस्कन्धपतितमूर्धत्राणसमूहम्, केतुदण्डलग्नशरीरम्≫॥ ६२॥

ततः प्रियोपात्तरसे ऽधरौष्ठे निवेश्य दध्मौ जलजं कुमारः।
तेन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे॥ ६३॥

अनन्तरमजः शङ्खं मुखवातेनापूरयत्, अधररदनच्छदे स्थापयित्वा, जय-

---

**62 b.** °शिरस्त्रजालम् ] Σ; °शिरस्त्रवृन्दम् Hem. **63 a.** °धरौष्ठे ] $UPL_2ED^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; °धरोष्ठे $B^1$𝕮; °धरौष्टे J

---

**61.3** कामवन्मनोहरः। कान्तमिति पाठे कुसुममयास्त्रवदपीडाकरमस्त्रम् ] EJ; कामवन्मनोहरः कान्तमिति पाठे कुसुममयास्त्रवदपीडाकारमस्त्रम् U; कुसुमास्त्रः कामः तद्वत्कान्तो रम्यः प्रियंवदाख्यात् गन्धर्वराजसुताल्लब्धम् प्रियार्हः हितयोग्यः P; कुसुमास्त्रः कामस्तद्वत्कान्तो रम्यः $B^1$; कुसुमास्त्रः कामः (शुः $L_2^{ac}$) तावत्कान्तो रम्यः $L_2$ **61.4** निद्रायाश्चलितो ऽभिलाषो यस्य सः ] UEJ; यथा स्वप्ननिवृत्तलौल्यः निद्रायाश्चलितो ऽभिलाषः यस्य सः P; स्वप्ननिवृत्तलौल्यः $B^1L_2$ **61.4** परं न सुष्वापेत्यर्थः ] UEJ; परं न सुष्वापेत्यर्थः कान्तमिति पाठे कुसुममयास्त्रवदपीडकरमस्त्रम् P; परं मनसस्वापेत्यर्थः $B^1$; परं मनसुष्वापेत्यर्थः $L_2$ **62.1** अनन्तरं ] UE; ततो ऽनन्तरं $PB^1L_2J$ **62.1** नृपबलमस्त्रवशात् स्वप्नवश्यमतिष्ठत् ] *conj.*; नरदेवसैन्यं नृपतिबलवशान्निद्राविधेयं तस्थावतिष्ठत् U; नरदेवसैन्यं नृपतिबलमस्त्रवशान्निद्राविधेयं तस्थौ अतिष्ठत् $B^1L_2EJ$; नरदेवसैन्यं नृपबलं अस्त्रवशान्निद्राविधेयं स्वप्नवश्यं तस्थावतिष्ठत् P **62.1** कार्मुकाकृष्टौ ] *conj.*; धनुष्कर्षणे कार्मुकाकृष्टौ $UPL_2EJ$; धनुष्कर्षणे कार्मुककृष्टौ $B^1$ **62.1** जडकरम् ] *conj.* (cf. Jin.); मूढहस्तं जडीभूतकरं $UB^1L_2EJ$; मूढहस्तं जडकरम् P **62.2** एकस्कन्धपतितमूर्धत्राणसमूहम् ] *conj.*; एकस्मिन्नंसे स्कन्धे (स्कन्दे $UL_2EJ$) पर्यस्तं (पर्यन्तं E) पतितं शिरस्त्रजालं यस्य $UB^1L_2EJ$; एकस्मिन्नंसे स्कन्दे पर्यस्तं पतितं शिरस्त्रजालं मूर्धत्राणसमूहो यस्य P **62.2** केतुदण्डलग्नशरीरम् ] *conj.*; ध्वजस्तम्भे ध्वजदण्डे निषण्णं (ण्णो $L_2E$) लग्नो देहो (देहे E) यस्य $UB^1L_2EJ$; ध्वजस्तम्भे केतुदण्डे निषण्णं लग्नो देहो यस्य P **63.1** अनन्तरमजः ] *conj.*; ततः कुमारः $UPB^1E$; ततभक्तप्रियः $L_2$; ततोजकुमारः J **63.1** शङ्खं मुखवातेनापूरयत् ] *conj.*; जलजं शङ्खं दध्मौ वातेनापूरयत् $UB^1EJ$; जलजशङ्खो द्मौ (?) वाते पूरयत् $L_2$; जलजं शङ्खं दध्मौ मुखवातेनापूरय--- P **63.1** अधररदनच्छदे ] P; अधरौष्ठे UE; अधरोष्ठे $B^1$; अधरौष्टे $L_2J$ **63.1** स्थापयित्वा ] *conj.*; निवेश्य स्थापयित्वा Σ

सूचनाय। भार्यागृहीतरसे। तेन शङ्खेन स्वकरार्जितं मूर्तवद्यशः पिबन्निव रेजे। नन्वधुनैव विवाहविधानात्कुतो ऽधरपानम्? त्र्यहातिक्रमे ऽपि त्र्यहं सप्तरात्रं ब्रह्मचर्यचोदना। तदसम्भवि विशेषतो ऽप्रगल्भानां नवानाम्। एवं तर्हि बलवत्कारणाल्लोकेनाभूतमप्युपादानं भूतत्वेन कथितम्। यथा

वृष्टश्चेद्देवः सम्पन्नाः शालय इति।

जयावाप्त्या सुखित्वेनाधररसः पीत इव भवति। यदि वान्या काचिद्भूतपूर्वा प्रिया बोद्धव्या॥ ६३॥

शङ्खस्वनाभिज्ञतया निवृत्ता-
स्तं सन्नशत्रुं ददृशुः स्वयोधाः।
निमीलितानामिव पङ्कजानां

**63** From the middle of the gloss on *priyopāttarase* and up to the word *kathitam*, a gap left on the page by the scribe $B^1$, as well as a following damaged section, has been patched and filled in by subsequent hands. Note that the text of this same unit in $L_2$, where there is no sign of physical damage, seems particularly poor. **63 विशेषतो ऽप्रगल्भानां नवानाम्। एवं तर्हि बलवत्कारणाल्लोकेनाभूतम्** ] विशेषभूतम् E(eyeskip)

**63.6 वृष्टश्चेद्देवः सम्पन्नाः शालयः** Exactly this formulation is found in Abhinavagupta's *Īśvarapratyabhijñāvivṛtivimarśinī* vol. 1, p. 23. Cf., however, *Mahābhāṣya* ad *Vārttika* 2 on *Aṣṭādhyāyī* 3.3.133, where it is formulated thus: **देवश्चेद्वृष्टो निष्पन्नाः शालयः।**

**63.2 भार्यागृहीतरसे** ] *conj.*; प्रियया गृहीतो रसो यस्य तस्मिन्नधरौष्ठे (ष्टे J) UEJ; प्रियया भार्यया उपात्तो गृहीतो रसो यस्य तस्मिन् अधरौष्ठे P; प्रियया उपात्तो गृहीतो रसो यस्य +तस्मिन्नधरौष्टे+ $B^1$ (+$B^3$+); प्रियया उपात्तो गृहीतो रसो यस्मिन्नधरौष्ठे $L_2$ **63.2 शङ्खेन स्वकरार्जितं मूर्तवद्यशः पिबन्निव रेजे** ] *conj.*; शङ्खेनास्य हस्तेनोर्जितं मूर्तं यशः पिबन्निवाबभासे रेजे ×⏑̲ ⏑̲× U; शङ्केनात्सुकरेणार्जितं मूर्त्तं यशः पिबन्निवाबभासे रजे P; शङ्खेन स्वहस्तेनार्जितं मूर्तं यशः पिबन्निवान्निवन्निवाबभासे रेजे $B^3$; शङ्खेन स्वहन्तेनार्जितं मूर्तं यशः पिबन्निवाबभासे रेजे $L_2$; शङ्खेनास्य हस्तेनार्जितं मूर्त्तं यशः पिबन्निवाबभासे रेजे E; शंखेनास्य हस्तेनार्जितं यशः पिबन्निवाऽवभासे रेजे J **63.3 °पानम्** ] UPE; °पानं तु $B^3L_2$; °पारं J **63.4 °पि त्र्यहं सप्तरात्रं** ] $UPB^3EJ$; त्र्यहं सप्त $L_2$ **63.4 °चर्यचोदना** ] UEJ; °चर्यचोदनाम् P; °चर्यो चोदना $B^2L_2$ **63.4 तदसम्भवि** ] $UPB^2L_2$; तदसंभावि EJ **63.4 नवानाम्** ] $UB^2L_2J$; नवानौ P **63.5 भूतत्वेन** ] $UPB^3L_2$; भूतत्त्वेन E; भूतत्वे J **63.6 वृष्टश्चेद्देवः** ] *em.* (cf. Hem.); वृद्धश्चेद्देव UJ; धृष्टश्चेद्देवस् P; वृद्धश्चेद्देवस् $B^1L_2$; वृद्धाश्चेद्देव E **63.7 जयावाप्त्या** ] UPEJ; जयावाप्त्या हि $B^1L_2$ **63.7 सुखित्वे°** ] $UB^1EJ$; सुखितत्वे° P; सुखितद्वे° $L_2$ **63.7 इव** ] J; एव $UPB^1L_2E$ **63.7 यदि वान्या** ] $UPL_2EJ$; अदि वा अन्या $B^{1pc}$; अदि वा अन्य $B^{1ac}$

मध्ये स्फुरन्तं प्रतिमाशशाङ्कम्॥ ६४ ॥

निजभटा अजं शायितरिपुमुल्लसन्तमैक्षन्त। कम्बुध्वनिपरिज्ञत्वात् प्रत्यागताः। सङ्कुचितानां पद्मानामन्तः प्रतिबिम्बचन्द्रमिव चलन्तम्॥ ६४ ॥

सशोणितैस्तेन शिलीमुखाग्रै-
निक्षेपिताः केतुषु पार्थिवानाम्।
यशो हृतं संयति राघवेण
न जीवितं वः कृपयेति वर्णाः॥ ६५ ॥

अजेन राज्ञां ध्वजेष्वक्षराणि रुधिरलिप्तैः शरान्तैरलिख्यन्त, यथा ‘दययाजेन रणे युष्माकं यशो नीतं, न तु जीवितम्’ इति।

तेषामजः केतुषु लोहिता≪क्तैर्नि≫धापयामास शिलीमुखाग्रैः।
इति पाठान्तरम्॥ ६५ ॥

---

**65 b.** °क्षेपिताः ] $B^1L_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^ML^M$**C**; °वेशिताः UPEJ$B_7^M$ **65 c.** संयति ] Σ; सम्प्रति Mall.

---

**65** $L_2$ leaves a blank space in lieu of commentary on verse 65.

---

**64.1** निजभटा अजं ] *conj.*; स्वयोधा निजभटाः तमजं UP$B^1L_2$E; स्वयोधाः निजभटाः तमजकुमारं J **64.1** शायितरिपुमुल्लसन्तमैक्षन्त ] *conj.* (cf. Jin.); सन्नरिपुं शायितशत्रुं स्फुरन्तं ददृशुरैक्षन्त UEJ; सन्नशत्रुम् शायितरिपुं ददृशुरैक्षन्त कीदृशं मध्ये रिप्वन्तरे स्फुरन्तं लसन्तं P; सन्नशत्रुं शयितरिपुं स्फुरन्तं ददृशुरैक्षन्त $B^1L_2$ **64.1** कम्बुध्वनिपरिज्ञत्वात् प्रत्यागताः ] *conj.*; शङ्खस्वनाभिज्ञत्वान्निवृत्ताः प्रत्यागताः U$B^1L_2$EJ; शङ्खस्वनाभिज्ञत्वात्कम्बुध्वनिपरिज्ञत्वात् निवृत्ताः प्रत्यागताः P **64.2** सङ्कुचितानां पद्मानामन्तः ] *conj.*; निमीलितानां सङ्कटानां मध्यं U; निमीलितानां सङ्कुचितानाम् पङ्कजानां मध्ये पद्मानामन्तः P; निमीलितानां सङ्कुचितानां पङ्कजानां पद्मानां मध्ये $B^1L_2$; निमीलितानां पंकजानां मध्ये EJ **64.2** प्रतिबिम्बचन्द्रमिव ] *conj.*; प्रतिमाशशाङ्कं प्रतिबिम्बचन्द्रमिव Σ **64.2** चलन्तम् ] UEJ; स्फुरन्तं चलन्तम् P$B^1L_2$ **65.1** अजेन राज्ञां ध्वजेष्वक्षराणि रुधिरलिप्तैः शरान्तैरलिख्यन्त ] *conj.*; अजेन राज्ञां ध्वजेष्वक्षराणि रुधिरलिप्तैः शरान्तैर्निवेशिताः अलिख्यन्त UE; ततो रुधिरलिप्तैः शरान्तैः तेन राज्ञा केतुषु ध्वजेष्ववर्णाः अक्षराणि निक्षेपिता अलिख्यन्त यथा P; ततो ऽनन्तरं रुधिरलिप्तैः शरन्तैस्तेन राज्ञां केतुषु अक्षराणि अलिख्यन्त यथा $B^1$; अजकुमारेण राज्ञां ध्वजेष्वऽक्षराणि रुधिरलिप्तैः शरांतैर्निवेशिता अलिख्यंत J **65.2** युष्माकं ] UPEJ; वो युष्माकं $B^1$ **65.2** नीतं ] UEJ; हृतं P$B^1$ **65.2** न तु जीवितम् इति ] P$B^1$; न जीव इति U; जीवितमिति E; न तु जीवितमित्यर्थः J **65.3** तेषामजः केतुषु लोहिताक्तैर्निधापयामास शिलीमुखाग्रैः। इति पाठान्तरम् ] *conj.* (cf. Śrīnātha); तेषामजः केतु+षु+ लोहितान्तन्निधापयामास शिलीमुखाग्रैरिति पाठान्तरम् $B^1$; तेषामजः केतुलोहितान्तन्निधापयामास शिलीमुखाग्रः इति पाठान्तरम् P; *om.* UEJ

स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे॥ ६६॥

अज आगत्य त्रस्तां दयितां वचनमुवाच। कार्मुकप्रान्ते निक्षिप्त एको वामो भुजो येन। मूर्धत्राणस्योद्धरणेनापासनेन लुलिताः कचा यस्य। अलिकलग्न-खेदजलकणः। लौकिके शब्दव्यवहारे लाघवस्यानादर इति वचोग्रहणम्॥ ६६॥

इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयैतान्।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः॥ ६७॥

हे इन्दुमति, अस्माद्देशादिह वा, इमानरातीन् मयानुज्ञाता सती ईक्षस्व, ≪शिशुग्रहणयोग्यायुधान्≫। रणपौरुषेणेदृशेनाभिलष्यसे मम करप्राप्ता त्वमे-

---

**66 a.** ॰निहितैक॰ ] $\Sigma$; ॰निमितैक॰ Ar.Nā. **66 b.** शिरस्त्रनिष्कर्षण॰ ] $\Sigma$; शिरस्त्रसंक-र्षण॰ Jin. **67 a.** ॰शस्त्रान् ] $\Sigma$; ॰वस्त्रान् $B^3$ **67 b.** मयैतान् ] $UPB^3JB_2^MB_3^MB_4^MB_7^ML^M$; मयेतान् E; न्मयैतान् $L_2B_1^MB_5^M$; मयैवं $D^M$; मयासि $V^M\mathfrak{C}$ **67 c.** ॰विधेनाहव॰ ] $UPL_2EV^MB_1^MB_2^MB_4^MB_5^{Mpc}B_7^ML^M\mathfrak{C}$; ॰विधेनाहवि॰ $B^3B_3^MB_5^{Mac}$; ॰विधानेहव॰ J; ॰विधेनाह॰ $D^M$

---

**59.3** पश्चान्मृतेव न न ज्ञायते, अपि तु ज्ञायत एव] *conj.*; न पश्चान्मृतेवापि तु पश्चामृतेव ज्ञायते $G_{1}J$; न न पश्चान्मृतेवापि तु पश्चान्मृतेव ज्ञायते U; पश्चान्मृतेव न न लक्ष्यते ज्ञायते अपि तु लक्ष्यते एव $PB^{1}L_{2}$ **61.1** युगलकम्] $G_{1}B^{1}L_{2}J$; युग्मम् UP **61.1** स्वर्गसम्मुखयापि] *conj.*; स्वर्गोन्मुखयापि $G_{1}UJ$; त्रिदिवोन्मुखया स्वर्गसम्मुखयापि $PB^{1}L_{2}$ **61.1** मां प्रेक्ष्य] $G_{1}UJ$; मामवेक्ष्य P; मामवेक्ष्य प्रेक्ष्य $B^{1}L_{2}$ **61.1** °श्वासायेमे] Σ; °श्वासायामी U **61.2** भाषितादयस्तथ्यतया] *conj.*; भाषिता तदस्ततथ्यं $G_{1}$; भाषिताः तत्तथ्यं U; भाषितादयः सत्यं तथ्यतया $PB^{1}L_{2}$; भाषिता तदस्तत्यं J **61.2** क्षिप्ताः] P; निक्षिप्ताः $G_{1}UJ$; निहिता निक्षिप्ता $B^{1}$; निहिता क्षिप्ताः $L_{2}$ **61.2** न पुनः—यतस्तव] $G_{1}UJ$; तथापि तव $PB^{1}L_{2}$ **61.3** वियोगे मम चेतो नितान्तास्वस्थमतः] *conj.*; वियोगे मम चेतो नितान्तस्वस्थमतः $G_{1}J$; वियोगे मम चेतो नितान्तमस्वस्थम् अतः U; विरहे गुरुव्यथं नितान्ता (नितान्त° P) स्वस्थं मम हृदयं चेतः $PB^{1}L_{2}$ **61.3** सन्धारयितुं] $G_{1}UJ$; अवलम्बितुं सन्धारयितुं समाश्वासयितुं $PB^{1}L_{2}$ **61.3** समर्थाः] $G_{1}UJ$; क्षमास्समर्थाः न भवन्ति P; क्षमस्समर्था न सन्ति $B^{1}L_{2}$ **61.3** परपुष्टासु] $G_{1}UJ$; अन्यभृतासु कोकिलासु $PB^{1}$; अन्यभृतासकोकिलासु $L_{2}$ **61.3** मन्द्रं] $G_{1}UJ$; कलं मन्द्रं $PB^{1}L_{2}$ **61.3** रुतं] $G_{1}UJ$; भाषितं रुतं $PB^{1}L_{2}$ **61.3** गमनं ललितं] U; गमनललितं $G_{1}J$; गतं (गत° $B^{1}$) गमनं मनोहरं ललितं $PB^{1}L_{2}$ **61.4** कादम्बरीषु] $G_{1}UJ$; कादम्बीषु $PB^{1}$; कादम्बीष्व $L_{2}$ **61.4** कृष्णशारीषु] $G_{1}UJ$; पृषतासु कृष्णशारीषु $PL_{2}$; पृषतासु कृष्णशरीरेषु $B^{1}$ **61.4** चटुलमीक्षणं] $G_{1}U$; विलोलं चटुलं ईक्षितं ईक्षणे P; विलोलचटुलमीक्षितमीक्षणं $B^{1}$; विलोलं चटुलं मीक्षितमीक्षणं $L_{2}$; चटुमीक्षणं J **61.4** शाखासु] $G_{1}UJ$; लतासु P; लतासु शाखासु $B^{1}L_{2}$ **61.4** विलासाः] $G_{1}UPJ$; विभ्रमा विलासाः $B^{1}L_{2}$

अत्र च सादृश्यादित्थमूहः। पृषतेषु कृष्णसारङ्गेष्विति केचित्॥ ६०–१॥

मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्॥ ६२॥

सहकाराख्यस्तरुर्गन्धप्रियङ्गुलता चेमौ त्वया युग्मं दम्पतित्वेन चिकीर्षितम्, अतश्च तयोः परिणयसंस्कारमकृत्वा व्रज्यत इति महदयुक्तम्। नन्वितीष्टप्रश्ने॥ ६२॥

कुसुमं कृतदोहदस्त्वया यदशोको ऽयमुदीरयिष्यति।
अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम्॥ ६३॥

अशोकाख्यस्तरुस्त्वया सम्पादितैकरूपाभिलाषो यत्कुसुमं प्रपोष्यते तच्चूर्णकुन्तलालङ्करणमुचितं सत्केन प्रकारेण नु त और्ध्वदैहिकमालाकुसुमत्वं प्रापयिष्यामि॥ ६३॥

स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम्।
अमुना कुसुमास्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे॥ ६४॥

---

**63 cd.** नु तत्तव ] $G_1UB^1L_2JV^MB_3^MB_5^MB_7^M$**Ꞓ**; नु ते तव $P_MB_1^M$; नु त तव $B_2^M$; नवं तव $B_4^M$ **64 .** *om.* Ar. **64 c.** कुसुमास्रु° ] $G_1UP_MB^1L_2JV^MB_2^MB_3^MB_4^MB_5^MB_7^M$; कुसुमस्रु° $B_1^M$; कुसुमाश्रु° Hem.Mall.Jin.

---

**61.5** च सादृश्यादित्थमूहः ] Σ; सादृशा ⏑̄ मित्थ ⁻⁻ मित्थमूहः U **61.5** कृष्णसारङ्गेष्विति ] $G_1B^1L_2J$; कृष्णसारसारङ्गेष्विति U; कृष्णशारेष्विति P **62.1** °स्तरुर्गन्धप्रियङ्गु° ] $PL_2$; °स्तरुगन्धप्रियङ्ग° $G_1$; °स्तरुः गन्धाप्रियङ्गु° U; °स्तरुगन्धप्रियङ्गु° $B^1$; °: तरुः गंधप्रियंग° J **62.1** युग्मं ] $G_1UJ$; मिथुनं युग्मं कल्पितं $PB^1L_2$ **62.2** चिकीर्षितम्, अतश्च ] UP; चिकीर्षितमतश्चे $G_1$; चिकीर्षितमेतैश्च $B^1$; किंचिकीर्षत। मतैश्च $L_2$; चिकीर्षितमरुतश्चै° J **62.2** परिणयसंस्कारमकृत्वा ] *conj.*; परिणये संस्कारमकृत्वा $G_1UJ$; विवाहसत्क्रियाम् परिणयसंस्कारं अविधायाकृत्वा $PB^1L_2$ **62.2** व्रज्यत इति महदयुक्तम् ] $G_1U$; गम्यते व्रज्यते इत्यसाम्प्रतम् महदयुक्तम् $PB^1$; गम्यते व्रजते इति असम्प्रतम्। महदयुक्तम् $L_2$; व्रज्यत इति ×त्वेन चिकीरिषितयोः परिणये×महदयुक्तम् J **62.3** नन्विती° ] Σ; नन्विते° $L_2$ **63.1** सम्पादितैकरूपाभिलाषो ] *conj.*; सम्पादितमेकरूपाभिलाषो $G_1J$; सम्पादित एकरूपाभिलाषो U; कृतदोहदः सम्पादितमेकरूपाभिलाषः $PB^1L_2$ **63.1** प्रपोष्यते ] $G_1UJ$; उदीरयिष्यति प्रपोष्यते $PB^1L_2$ **63.2** तच्चूर्णकुन्तलालङ्करणमुचितं ] *conj.*; तच्चूर्णकेशेष्वलङ्करणमुचितं $G_1UJ$; तदलकाभरणं चूर्णकुन्तलालङ्करणं उचितं $PB^1L_2$ **63.2** नु त और्ध्वदैहिकमालाकुसुमत्वं ] $G_1J$; ते और्ध्वदैहिकमालकुसुमत्व U; नु ते निवापमाल्यतामौर्ध्वदै(°दे° P)हिकमालाकुसुमत्वं $PB^1L_2$ **63.3** प्रापयिष्यामि ] P; प्रापयिष्यामि। नु प्रश्ने $G_1UJ$; नेष्यामि प्रापयिष्यामि $B^1$; नेष्यामि। प्रापयिष्यामि। नु प्रश्ने $L_2$

अनेनाशोकेन पुष्पवाष्पवर्षुकेण रम्यशरीरे त्वं रुद्यस इव। इवशब्दो ऽत्र भिन्न-क्रमः, क्रियापदात्परो बोद्धव्यः। पादेन प्रसादं प्रहारसरावमञ्जीरं चिन्तयता परस्याः सकाशाद्दुष्प्राप्यम्। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। यदि वा परेण वृक्षेण दुर्लभम्। अत एवानुग्रहत्वम्॥ ६४॥

तव निःश्वसितानुकारिभिर्ग्रथितार्धा बकुलैः समं मया।
असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि सुप्यते॥ ६५॥

किम्पुरुषस्येव माधुर्याद्गलो यस्याः, मया सह विभ्रमरशनां बकुलाख्यैः कुसुमैरुम्भितार्धामनिष्पाद्य कस्मादेतच्छय्यते। सुगन्धित्वात्त्वदीयनिःश्वासनिभैः॥ ६५॥

समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभो ऽयमात्मजः।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः॥ ६६॥

---

**65 a.** **°नुकारि°** ] Σ; °नुवादि° Ar. **65 b.** **ग्रथितार्धा बकुलैः** ] $UB^1L_2V^MB^M_3B^M_4B^M_5B^M_7$; ग्रथितार्धं बकुलैः $G_1JB^M_2$; ग्रथितार्धा बकुलैस् $P_M$; ग्रथितावां बकुलेस् $B^M_1$; बकुलैरर्धचितां 𝕮 **65 c.** **विलास°** ] $G_1UP_MB^1L_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Hem.Mall.Jin.; विकल्प° $Hem.^{vl}$Ar. **65 d.** **सुप्यते** ] $V^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$𝕮; शय्यते $G_1UB^1L_2J$; सुप्यसे $P_M$ **66 .** ] Jin. gives a *pratīka* for this verse (*sameti*), but does not comment on it. **66 b.** **°यमात्मजः** ] Σ; °यमर्भकः Hem.

---

**64 सर्वनाम्नो …वृक्षेण दुर्लभम्** ] *om.* $L_2$

---

**64.1 अनेनाशोकेन** ] $G_1J$; अनेन U; अमुनाशोकेन $PB^1L_2$ **64.1 पुष्पवाष्पवर्षुकेण** ] *conj.*; पुष्पवाष्पवर्षकेण $G_1J$; पुष्पवाष्पवार्षिकेन U; कुसुमास्रुवर्षिणा पुष्पवाष्पवार्षुकेण $PB^1L_2^{pc}$; कुसुमास्रुवर्षिणा ×त्वमशोक× पुष्पवार्षुकेण $L_2$ **64.1 रम्यशरीरे** ] $G_1UJ$; हे सुगात्रि $PB^1L_2$ **64.1 रुद्यस इव** ] $G_1PJ$; रुध्यसे इव U; शोच्यसे इव $B^1L_2$ **64.2 पादेन** ] $G_1UJ$; चरणानुग्रहं पादेन $PB^1L_2$ **64.2 प्रहारसरावमञ्जीरं** ] $G_1$; सरावमञ्जीरं Uस(सु° $L_2$)शब्दनूपुरं प्रहारसाराव(प्रहारसराव° P)मञ्जीरं $PB^1L_2$; प्रहारसवारमंजीरं J **64.3 चिन्तयता परस्याः** ] $G_1UJ$; स्मरता अन्यस्यास् $PB^1L_2$ **64.3 दुष्प्राप्यम्** ] $G_1UJ$; दुर्लभं दुष्प्रापं $PB^1L_2$ **64.4 परेण वृक्षेण दुर्लभम्** ] $G_1UJ$; अन्येन वृक्षेण दुष्प्रापं P; अन्येन वृक्षेण दुर्लभम् $B^1$ **64.4 °ग्रहत्वम्** ] $G_1UPJ$; °ग्रहम् $B^1L_2$ **65.1 किम्पुरुषस्येव माधुर्याद्गलो** ] $G_1UJ$; किन्नरस्येव माधुर्यं कण्ठो P; किन्नरस्येव माधुर्यात्कण्ठो $B^1L_2$ **65.1 सह** ] $G_1UPJ$; समं सह $B^1L_2$ **65.1 विभ्रमरशनां** ] $G_1UJ$; विलासमेखलां विभ्रमरशनां $PB^1L_2$ **65.2 कुसुमैरुम्भितार्धामनिष्पाद्य** ] $G_1UJ$; कुसुमैर्ग्रथितार्धामुरितार्धामसमाप्यानिष्पाद्य $PB^1$; कुसुमैर्ग्रथितार्धाम्वम्भितार्धामसमायानिष्पाद्य $L_2$ **65.2 कस्मादेतच्छय्यते** ] $G_1J$; कस्मादेश्शय्यते U; किं कस्मादिदं एतच्छय्यते $PB^1L_2$ **65.3 °त्वात्त्वदीय°** ] $G_1UJ$; °त्वात्तव $PB^1L_2$

वयस्यालोकः सदृशसुखदुःखः, प्रतिपद्यपूर्णचन्द्रसदृशो ऽसौ तनूजः, अहमेकरागी, तथापि तव दुर्ग्रहविषम इदमेव मयावश्यं कार्यमित्यभ्युपगमेन क्रूरो मरणनिश्चयः॥ ६६॥

धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः।
गतमाभरणप्रयोजनं चिरशून्यं शयनीयमद्य मे॥ ६७॥

अतश्चेदानीं मम धैर्यं सुखं वा नष्टम्, प्रीतिः पतिता रमणं वा गतम्, गीतादि समाप्तम्, वसन्तादिक ऋतुरुत्सववर्जितः, अलङ्कारव्यापारो ऽस्तमितः, शयनं च बहुकालेन शून्यं गतम्॥ ६७॥

गृहिणी सचिवः सखा मिथः प्रियशिष्या ललिते कलाविधौ।
करुणारहितेन वेधसा हरता त्वां वत किं न मे हृतम्॥ ६८॥

---

**67 a.** धृति° ] Σ; द्युति° Jin. **67 c.** चिर° ] ŚJin.; परि° Hem.Mall.Ar. (?) **68 a.** सखा ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Ar.Jin.; सखी Mall. **68 b.** ललिते कला° ] $G_1UB^1JB_1^MB_3^MB_4^MB_5^MB_7^M$𝕮; कलिते कला° $P_M$; ललिते क्रिया° $L_2V^MB_2^M$ **68 c.** °रहितेन वेधसा ] $G_1UB^1L_2JB_3^MB_5^MB_7^M$; °विमुखेन मृत्युना $P_MV^MB_1^M$𝕮; °विमुखेन वेधसा $B_2^M$; °रहितेन वेदसा $B_4^M$ **68 d.** वत ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; वद 𝕮 • किं न मे हृतम् ] $G_1UP_MB^1L_2V^MB_1^MB_3^MB_4^MB_7^M$; वत किं नु मे $JB_5^M$; मे न किं हृतम् $B_2^M$

---

**66.1 वयस्यालोकः** ] $G_1UJ$; सखीजनो वयस्यालोकः $PB^1L_2$ **66.1 सदृशसुखदुःखः** ] U; सदृशदुःखसुखा बहु $G_1J$; समदुःखसुखः तथा बहुल° P; समदुःखसुखः तथा $B^1$; समदुःखसुखः तथापि $L_2$ **66.1 प्रतिपद्यपूर्णचन्द्रसदृशो ऽसौ तनूजः** ] P; प्रतिपदि पूर्णचन्द्रसदृशो ऽसौ सुतः $G_1UJ$; अपूर्णचन्द्रनिभो सौ तनूजः $B^1L_2$ **66.2 °रागी** ] $G_1UPB^{1ac}J$; °रागी च $B^{3pc}L_2$ **66.2 दुर्ग्रहविषम** ] $G_1UJ$; व्यवसायो दुर्ग्रहो विषमः $PB^1L_2$ **66.2 मयावश्यं** ] Σ; यावश्यं $L_2$ **66.2 कार्यमित्यभ्युपगमेन** ] *conj.*; कार्यमित्युपगमने $G_1U$; कार्यमिति प्रतिपत्त्या अभ्युपगमेन (°मेने $B^{1ac}$) निष्ठुरः $PB^1L_2$ **66.2 क्रूरो** ] Σ; क्रमो $L_2$ **67.1 अतश्चेदानीं** ] Σ; अश्चेदानीं U **67.1 धैर्यं सुखं वा नष्टं** ] $G_1UJ$; धृतिर्धैर्यमस्तमिता न(नि $P^{ac}$)ष्टा $PB^1L_2$ **67.1 प्रीतिः पतिता रमणं वा गतं** ] $G_1U$; रतिः प्रीतिः च्युता पतितं वा रमणं गतं P; रतिः प्रीतिः च्युता पतिता रमणं वा गतं $B^1L_2$; प्रीतिः पतिता मरणं वा गतं J **67.2 गीतादि समाप्तम्** ] $G_1UJ$; गेयं गेयादि विरतं समाप्तं P; गेयं गीतादि विरतं समाप्तो $B^1$; गेयं गीतादि विरतमाप्तं $L_2$ **67.2 वसन्तादिक** ] Σ; वसन्तादि J **67.2 ऋतुरुत्सववर्जितः** ] $G_1J$; ऋतुर्निरुत्सवो U; ऋतुर्निरुत्सवः उत्सववर्जितः $PB^1$; ऋतुर्निरुत्सवः उत्सवरहितः $L_2$ **67.2 अलङ्कारव्यापारो ऽस्तमितः** ] $G_1UJ$; आभरणप्रयोजनमलङ्कारव्यापारो गतमस्तमितं $PB^1L_2$ **67.3 शयनं** ] $G_1UJ$; शयनीयं शयनं $PB^1L_2$ **67.3 बहुकालेन** ] $G_1UJ$; चिरशून्यं बहुकालेन $PB^1L_2$

निष्करुणेनान्तकेन त्वां नयता किं न मे नीतम्। तथा च त्वमेव भार्या मन्त्री वयस्यो रहसि रम्ये कलाविधाने चतुष्षष्टिकलासु निधुवनरूपे वेष्टान्तेवासिनी च। वताश्चर्ये॥ ६८॥

मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे।
अनुपास्यसि वाष्पदूषितं परलोकोपनतं जलाञ्जलिम्॥ ६९॥

मदिरा दृष्टिविशेषस्तद्युक्ते नेत्रे यस्याः, यद्वा रक्तत्वान्मनोहारित्वाच्च मदिरातुल्ये अक्षिणी यस्याः। अस्मद्वदननिहितं मद्यं सुस्वाद्वास्वाद्य केन प्रकारेण नु मदीयं वार्यञ्जलिं रोदननिन्दितमन्यलोकप्राप्तं धास्यसि॥ ६९॥

विभवे ऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम्।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः॥ ७०॥

समृद्धावपि सत्यां ममाजस्य त्वां वर्जयित्वा त्वज्जीवितावधि सुखं ज्ञायताम्।

---

**69 c.** अनुपास्यसि ] $G_1UP_MB^1JV^MB^M_1B^M_2B^M_3B^M_5B^M_7$Hem.Mall.Jin.; अनुपास्यति $L_2B^M_4$ Ar. (?) **69 d.** °पनतं ] Σ; °पहृतं $V^M$

---

**69** यद्वा रक्तत्वान् ··· अक्षिणी यस्याः ] *om.* $B^1L_2$

---

**68.1** निष्करुणेनान्तकेन ] $G_1UJ$; करुणारहितेन निष्करुणेन वेधसा अन्तकेन $PB^1L_2$ **68.1** नयता किं न मे नीतम् ] $G_1UJ$; हरता मे किं न हृतम् अपि तु सर्वमेव हृतम् $PB^1L_2$ **68.1** भार्या ] $G_1UJ$; गृहिणी भार्या $PB^1L_2$ **68.1** मन्त्री ] $G_1UJ$; सचिवो मन्त्री $PB^1L_2$ **68.2** वयस्यो ] $G_1UJ$; सखा वयस्यः $PB^1L_2$ **68.2** रहसि ] *conj.*; मिथो रहसि Σ **68.2** रम्ये ] $G_1UJ^{pc}$; ललिते रम्ये $PB^1L_2$; वाष्पदूषितं परलोकोपनतं जलाञ्जलिम् रमे $J^{ac}$ **68.2** कलाविधाने ] $G_1UJ$; कलाविधौ कलाविधाने $PB^1L_2$ **68.2** वेष्टान्तेवासिनी ] $G_1UJ^{pc}$; वा इष्टा शिष्या अन्ते (अन्ती° $L_2$) वासिनी $PB^1L_2$; वेष्टांतीवसिनी $J^{ac}$ **68.3** वताश्चर्ये ] Σ; वताच्चर्ये J **69.1** मदिरा दृष्टिविशेषस्तद्युक्ते ] $UB^1L_2J$; मदिरा दृष्टिविशेषस्तदुक्ते $G_1$; मदिराक्षि दृष्तिविशेषः तद्युक्ते P **69.1** °हारित्वाच्च ] UPJ; °हारित्वाच्च अ $G_1$ **69.2** अक्षिणी ] $G_1UJ$; अक्षिणी नेत्रे P **69.2** अस्मद्वदननिहितं ] $PB^1L_2J$; अस्मद्वदनं निहितं $G_1$; अस्मद्वदने निहितं U **69.2** मद्यं सुस्वाद्वास्वाद्य ] *conj.*; मद्यं सुस्वाद्य $G_1J$; मद्यमास्वाद्य U; मद्यं रसवत्सुस्वादु पीत्वा आस्वाद्य $PB^1L_2$ **69.3** केन प्रकारेण नु मदीयं ] *em.*; केन प्रकारेण न मदीयं $G_1UJ$; कथं नु मदीयं $PB^1$; कथं न मुदीयं $L_2$ **69.3** वार्यञ्जलिं ] $G_1UJ$; जलाञ्जलिं $PB^1L_2$ **69.3** रोदननिन्दितमन्यलोकप्राप्तं धास्यसि ] *em.*; रोदननिर्मितमन्यलोकप्राप्तं धास्यसि $G_1J$; रोदननिर्मितमन्यलोकनिर्मितं धास्यति U; वाष्पदूषितं (°त° P) परलोकप्राप्तमनुपास्यसि $PB^1L_2$ **70.1** समृद्धावपि ] $G_1UJ$; विभवे समृद्धावपि $PB^1L_2$ **70.1** सत्यां ममाजस्य ] P; सत्यामजस्य $G_1UJ$; सति ममाजस्य $B^1L_2$ **70.1** त्वां वर्जयित्वा ] $G_1UJ$; त्वया विना $PB^1L_2$ **70.1** त्वज्जीवितावधि ] $G_1J$; त्वज्जीवतावधि U; एतावत्त्वज्जीवितावधि $PB^1L_2$ **70.1** ज्ञायताम् ] $G_1UJ$; त्वया गण्यतां ज्ञायतां $PB^1$; त्वया गण्यताम् $L_2$

यस्मान्मे ऽखिला उपभोगास्त्वदधीना अन्याभिर्वनिताभिरनीतस्य। न ह्यन्या
कापि मे प्रीतिकारिणीत्यर्थः॥ ७०॥ 3

विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसवाष्पदुर्दिनान्॥ ७१॥

राजा भार्यां प्रति दीनार्थसम्बद्धमित्थं परिदेवयन् वृक्षानपि च्युतः स्कन्धरस एवास्रुवर्षो येषां तानेवंविधान्व्यधात्। अचेतनानप्यरोदयदित्यर्थः॥ ७१॥

अथ तस्य कथञ्चिदङ्कतः स्वजनस्तामपनीय सुन्दरीम्।
विससर्ज तदन्तमण्डनामनलायागुरुचन्दनैधसे॥ ७२॥

अनन्तरं राज्ञ उत्सङ्गाद् बान्धवलोक इन्दुमतीं केनापि प्रकारेणापहृत्य धूप-

---

**71 b.** °ग्रथितं ] $G_1UP_MB^1JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Hem.Mall.Ar.; °ग्रथितां $L_2$Jin. **71 d.** स्रुत° ] $G_1UB^1L_2JB^M_3B^M_4B^M_5B^M_7$**C**; च्युत° $P_MV^MB^M_1B^M_2$ • °दुर्दिनान् ] $G_1UP_MV^MB^M_2B^M_3B^M_7$Hem.Mall.Jin.; °दुर्दिनाम् $B^1L_2JB^M_1B^M_4B^M_5$; °दूषितान् Ar. (?) **72 .** U gives 72ab, but skips then to 74cd, omitting all text and commentary in between (eyeskip from *sundarīm* in 72b to *sundarīm* in 74b). **72 c.** तदन्त° ] $G_1P_MB^1L_2JB^M_1B^M_3B^M_4B^M_5B^M_7$; कृतान्त्य° $V^M$Hem.Mall.; तदन्त्य° $B^M_2$Ar.Jin.

---

**70.2** ऽखिला उपभोगास्त्वदधीना ] UJ; खिला उपभोगस्त्वदधीना $G_1$; सर्वे उपभोगास्त्वदाश्रयाः त्वदधीनाः P; सर्वे विषया उपभोगास्त्वदाश्रयास्त्वदधीनाः $B^1$; सर्वे विषया उपयोगास्त्वदाधीनाः $L_2$ **70.2** अन्याभिर्वनिताभिरनीतस्य ] $G_1$UJ; विषयान्तरैरन्याभिर्वनिताभिरहृतस्य (°स्या $L_2$) वशीकृतस्य $PB^1L_2$ **70.3** कापि मे प्रीतिकारिणीत्यर्थः ] $PB^1L_2$; मे प्रीतिकारिणी UJ; मे प्रतिकारिणी $G_1$ **71.1** राजा ] $G_1$UJ; कोसलाधिपो ऽजः $PB^1L_2$ **71.1** भार्यां ] $G_1$UJ; प्रियां भार्यां $PB^1$; प्रियां भार्यं $L_2$ **71.1** दीनार्थसम्बद्धम् ] $G_1$J; दीनार्थसम्बद्धाम् U; करुणार्थग्रथितम् दीनार्थसम्बद्धं $PB^1L_2$ **71.1** परिदेवयन् ] *em.*; परिदीव्यन् $G_1PB^1L_2J$; परिदेव्यन् U **71.1** वृक्षानपि ] $G_1$UJ; पृथिवीरुहान्वृक्षानपि $PB^1L_2$ **71.1** च्युतः ] $G_1$UJ; स्रुतः च्युतः $PB^1$; स्रुच्च्युतः $L_2$ **71.1** स्कन्धरस ] *em.*; स्कन्दरस $G_1$UJ; शाखारस $PB^1L_2$ **71.2** एवास्रुवर्षो येषां ] $G_1$UJ; एव वाष्पदुर्दिनमस्रुवर्षं येषां (एषां P) $PB^1L_2$ **71.2** तानेवं° ] Σ; तान्येवं° J **71.2** व्यधात् ] $G_1$UJ; अकरोत् $PB^1L_2$ **71.2** °रोदयदित्यर्थः ] $G_1B^1L_2J$; °रोदयत् इति वाक्यार्थः U; °रोधयदित्यर्थः P **72.1** अनन्तरं ] $G_1$; अथानन्तरं $PB^1L_2J$ **72.1** राज्ञ ] $G_1$J; तस्य राज्ञः $PB^1L_2$ **72.1** उत्सङ्गाद् ] $G_1$J; अङ्कतः उत्सङ्गात् $PB^1L_2$ **72.1** बान्धवलोक ] $G_1$J; स्वजनो बान्धववर्गः P; स्वजनो बान्धव (बान्धवो $B^{1ac}$) लोकः $B^1L_2$ **72.1** इन्दुमतीं ] $G_1$J; तां सुन्दरीं इन्दुमतीं $PB^1L_2$ **72.1** केनापि ] $G_1^{pc}$J; नापि $G_1^{ac}$; कथंचित् केनापि $PB^1L_2$

चन्दने इन्धनं यस्य तस्मा अग्नये प्राहिणोत्। तदेव पूर्वकृतं मरणालङ्करणं यस्याः॥ ७२॥

प्रमदामनु संस्थितः शुचा क्षितिपः सन्निति वाच्यदर्शनात्।
न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया॥ ७३॥

सार्वभौमो राजापि सञ्शोकेन कान्तामनु मृत इति निन्दावलोकनादेवंविधोऽपवादो मे लोके मा भूदित्यतो हेतोर्भार्यया सह देहं वह्निरूपं न विदधे, न पुनर्जीविततृष्णया॥ ७३॥

अथ तेन दशाहतः परे गुणशेषामपदिश्य सुन्दरीम्।
विदुषा विधयो महर्द्धयः पुर एवोपवने वितेनिरे॥ ७४॥

अनन्तरं तेन राज्ञा स्थितिज्ञेन विधिविशेषादन्या यशोवशेषां प्रियामुद्दिश्य

---

**73 b.** क्षितिपः ] Ś; नृपतिः C **73 d.** जीविताशया ] $G_1PB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^M$ Hem.Mall.Jin.; जीविताशयः $JB_7^M$; जीवितेच्छया Ar. (?) **74 ab.** *om.* U; अपदिश्य दिवं गतां प्रियां गृहिणा तेन दशाहतः परे $B_4^M$ **74 b.** सुन्दरीम् ] $G_1P_MB^1L_2JV^MB_1^MB_2^M$ $B_7^M$; सुन्दरी $B_3^M$; भामिनीम् Hem.Mall.Ar.; गेहिनीम् Jin. **74 cd.** ] *om.* U; विदुषा विधयः समापिताः पुर एवोपवने महर्द्धयः $B_4^M$ **74 d.** वितेनिरे ] $G_1UP_MB^1L_2JV^MB_1^MB_2^M$ $B_3^MB_5^MB_7^M$Jin.; समापिताः Hem. ? Mall.Ar.

---

**73** U omits both this verse and the commentary thereon.

---

**72.2** प्रकारेणापहृत्य धूपचन्दने ] J; प्रकारेणागुरुचन्दने $G_1$; प्रकारेणापहृत्यागुरुधूपचन्दने $PB^1L_2$ **72.2** इन्धनं ] $P^{pc}B^1L_2$; इन्दनं $G_1P^{ac}J$ **72.2** तस्मा अग्नये ] *em.*; तस्मान्नग्नये $G_1$; तस्मै अनलायाग्नये $PB^1L_2$; तस्मावग्नये J **72.2** प्राहिणोत् ] $G_1J$; विससर्ज प्राहिणोत् $PB^1L_2$ **72.2** पूर्वकृतं मरणालङ्करणं ] J; पूर्वकृतलङ्करणं $G_1$; पूर्वकृतमलङ्करणं अन्तमण्डनं मरणालङ्कारो $PB^1L_2$ **72.3** यस्याः ] $G_1PB^{1ac}J$; यस्याः ता $B^{3pc}$; यस्यास्ताम् $L_2$ **73.1** सार्वभौमो ] $G_1J$; क्षितिपः सार्वभौमो $PB^1L_2$ **73.1** शोकेन ] $G_1J$; शुचा शोकेन $PB^1L_2$ **73.1** कान्तामनु मृत ] $G_1$; प्रमदां कान्तामनु संस्थितः अनु मृत $PB^1L_2$; कातामनुमृत J **73.1** निन्दावलोकनाद् ] $G_1J$; वाच्यदर्शनात् निन्दावलोकनात् (°लोकतान् $B^1$) $PB^1L_2$ **73.2** °दित्यतो ] $G_1PB^1J$; °दिति। अहो $L_2$ **73.2** हेतोर्भार्यया ] $G_1J$; हेतोः देव्या भार्यया $PB^1$; हेतो व्याभार्यया $L_2$ **73.2** देहं वह्निरूपं न विदधे न ] $G_1$; शरीरमग्निसाद्वह्निरूपं न चकार P; शरीरं अग्निसाद्वह्निरूपं न चकार न विदधे न $B^1L_2$; देहं वह्निरूपं न विदधे J **74.1** अनन्तरं ] $G_1$; *om.* U; अथानन्तरं $PB^1L_2J$ **74.1** स्थितिज्ञेन ] UJ; स्थित्यज्ञेन $G_1$; विदुषा स्थितिज्ञेन $PB^1L_2$ **74.1** विधिविशेषादन्या ] *conj.*; विधिविशेषादन्ये $G_1J$; विशेषादन्ये U; दशाहविशेषादन्ये विधयः P; दशाहविधिविशेषादन्ये विधयः $B^1L_2$ **74.1** यशोवशेषां ] $G_1J$; यशोविशेषां U; गुणशेषां यशोवशेषां $PB^1L_2$ **74.1** प्रियामुद्दिश्य ] UJ; प्रियामुद्दि $G_1$; सुन्दरीं प्रियामुद्दिश्य उपदिश्य P; सुन्दरीं प्रियामपदिश्योद्दिश्य $B^1L_2$

महारम्भाः क्रियाः श्राद्धादिकाश्चक्रिरे नगरस्योद्यान एव। दशाहो ऽत्र विधिविशेष उच्यते। न तु दश दिनानि, क्षत्रियस्य द्वादशाहेनाशौचशुद्धेः॥ ७४॥

स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः।
परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखास्रुषु॥ ७५॥

स राजा भार्यारहितो नगरीमविशत्। विच्छायत्वान्निशावसानशशिनिभः, नगरवनितावदनवाष्पेषु निजशोकस्य जलोच्छ्वासं स्रोत इव पश्यन्, तच्छोकस्य तत्र भागीकृतत्वात्।

परिवाहांस्तु सरसामुच्छ्वासान्पण्डिता विदुः॥ ७५॥

तमवेक्ष्य मखाय दीक्षितः प्रणिधानाद्गुरुराश्रमाश्रयः।
अभिषङ्गिणमीश्वरं विशामिति शिष्येण किलान्वबोधयत्॥ ७६॥

---

**76 a. तमवेक्ष्य मखाय** ] $G_1UP_MJV^MB_1^MB_2^MB_5^MB_7^M$Hem.Jin.; तमवीक्ष्य मखाय $B^1L_2$; तमवेक्ष्य मुखायय $B_3^M$; अथ तं स मुखाय $B_4^M$; अथ तं सवनाय Mall.Ar. **76 b. °श्रमाश्रयः** ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_5^MB_7^M$Hem.Jin.; °श्रमाश्रितः $B_4^M$Mall.; °श्रमस्थितः $B_4^M$ Ar.(?) **76 c. अभिषङ्गिणमीश्वरं विशामिति** ] $G_1P_MB^1L_2JV^MB_1^MB_3^MB_5^MB_7^M$Jin.; अभिषङ्गिनमीश्वरं विशामिति U; अभिषङ्गनमीश्वरंकितेरिति $B_2^M$; अभिषिङ्गिनदं विजिङ्गिवानिति $B_4^M$; अभिषङ्गजडं विजङ्गिवानिति Hem.Mall.Ar.

---

**75.4** परिवाहांस्तु सरसामुच्छ्वासान्पण्डिता विदुः Source unknown.

---

**74.2 महारम्भाः** ] *conj.*; महासंरम्भाः $G_1UJ$; महर्द्धयः महारम्भाः $PB^1L_2$ **74.2 क्रियाः श्राद्धादिकाश्चक्रिरे** ] UJ; श्राद्धादिकाश्चक्रिरे $G_1$; क्रियाः श्राद्धादिकाः वितेनिरे चक्रिरे P; श्राद्धदयो वितेनिरे चक्रिरे $B^1L_2$ **74.2 नगरस्योद्यान** ] UJ; नागरस्योद्यान $G_1$; पुरो नगर्या एवोपवने उद्याने $PB^1L_2$ **74.3 दशाहो ऽत्र विधिविशेष** ] Σ; दशाहत अत्र विशेष U **74.3 °दशाहेनाशौचशुद्धेः** ] $G_1J$; °दशाहेन शौचशुद्धेः U; °दशाहेनाशौचशुद्धिः P; °दशेनाशौचशुद्धेः $B^1$; °दशाहेनाशौचशुद्धे $L_2$ **75.1 भार्यारहितो** ] $G_1UJ$; तया विना भार्यारहितः $PB^1L_2$ **75.1 नगरीमविशत्** ] $G_1UJ$; पूरीं विवेश $PB^1L_2$ **75.1 विच्छायत्वान्निशावसानशशिनिभः** ] $G_1U$; विच्छायत्वात् क्ष(क°$L_2$)णदापायशशाङ्कदर्शनः निशावसानशशिनिभः $PB^1L_2$; विच्छयत्वान्निशावसानशीशनिभः J **75.2 नगरवनितावदनवाष्पेषु** ] $G_1UJ$; पौरवधूनां मुखास्रुषु वदनवाष्पेषु $PB^1L_2$ **75.2 निजशोकस्य** ] $G_1UJ$; स्वशुचो निजशोकस्य $PB^1L_2$ **75.2 जलोच्छ्वासं स्रोत** ] $G_1$; जलोच्छ्वासं शोक U; परिवाहं जलोच्छ्वासं स्रोत $PB^1L_2$; जलोच्छ्वासं स्रो J **75.2 पश्यन्** ] $G_1J$; अवलोकयन् पश्यन् $PB^1L_2$ **75.3 तच्छोकस्य तत्र** ] $G_1PB^1J$; तच्छोकस्य तस्य U; तत्र तच्छोकस्य $L_2$ **75.3 भागीकृतत्वात्** ] Σ; भागीर्हतत्वात् $L_2$ **75.4 परिवाहांस्तु सरसामुच्छ्वासान्पण्डिता विदुः** ] $G_1J$; परिवाहंस्तु पण्डिताः सरसामुच्छान्विताः U(unmetrical); परिवाहांस्तु सरसानुच्छ्वासान्पण्डिता विदुः P; परिवाहास्तु(°हंस्तु $P^{ac}$?) सरसामुच्छासान्पण्डिता विदुः $B^1$; परिवाहांस्तु सरसाच्छ्वासान्पण्डिता विदु $L_2$

राजानं दुःखितं वसिष्ठः समाधिना ज्ञात्वेत्थं वक्ष्यमाणमन्तेवासिना समाश्वासयत्। यज्ञाय गृहीतनियमः, अत एव निजाश्रमस्थः॥ ७६॥

असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम्।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः॥ ७७॥

ऋषिरात्मना त्वां समाश्वासयितुं नागच्छत्तव शोकहेतुं जानन्नपि, यतो ऽसमाप्तयज्ञः। विहितमर्यादः। दीक्षितेन किल न गन्तव्यमिति तेनैव व्यवस्था कृता। यदि वा दुःखित आश्वासनीय इति कृताचारः, तत्प्रणीतत्वादाचाराणाम्॥ ७७॥

मयि तस्य सुवृत्त वर्तते लघुसन्देशपदा सरस्वती।
शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि॥ ७८॥

---

**77 a.** °विधिर्यतो मुनिस् ] $G_1UP_MB^1L_2JV^MB_1^MB_3^MB_4^MB_5^MB_7^M$Mall.Ar. (?) Jin.; °विधिर्मुनिर्यतो $B_2^M$; °विधिस्तपोनिधिस् Hem. **77 d.** कृतस्थितिः ] $G_1UP_MB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Ar.; कृतः स्थितिः J; ततश्च्युतम् Mall.; स्वतश्च्युतम् Jin. **78 b.** लघुसन्देशपदा ] $UP_MB^1L_2B_1^MB_2^MB_3^MB_5^MB_7^M$Mall.Ar.Jin.; लघुसन्देशपरा $G_1JV^MB_4^M$; स्फुटसन्देशपदा Hem.

---

**77** नागच्छत्तव …गन्तव्यमिति ] नागच्छव्यमिति J(eyeskip)

---

**76.1** राजानं दुःखितं ] *conj.*; तं राजानं दुःखितं $G_1U$; तं राजानमभिषङ्गिणं दुःखितं $PB^1L_2$; तं राजानमऽजं दुःखितं J **76.1** वसिष्ठः ] $G_1U$; गुरुर्वसिष्ठः $PB^1L_2$; वसिष्टः J **76.1** समाधिना ज्ञात्वेत्थं ] $G_1UJ$; प्रणिधानात्समाधिनाऽवेक्ष्य ज्ञात्वा इतीत्थं $PB^1L_2$ **76.1** °णमन्तेवासिना ] UJ; °णमन्त्येवासिना $G_1$; °णं शिष्येणान्तेवासिना $PB^1L_2$ **76.2** समाश्वासयत् ] $G_1UJ$; अन्वबोधयत्समाश्वासयत् $PB^1L_2$ **76.2** यज्ञाय ] $G_1UPJ$; मखाय यज्ञाय $B^1L_2$ **76.2** गृहीतनियमः ] $G_1J$; दीक्षितो गृहीतनियमः $PB^1L_2$ **76.2** एव निजाश्रमस्थः ] $G_1UJ$; एवाश्रमाश्रयो निजाश्रमस्थः $PB^1L_2$ **77.1** ऋषिरात्मना ] $G_1UJ$; मुनिस्स्वयमात्मना $PB^1L_2$ **77.1** त्वां ] $G_1UJ$; भवन्तं $PB^1L_2$ **77.1** समाश्वासयितुं ] $G_1UJ$; प्रकृतौ स्थापयितुं समाश्वासयितुं $PB^1L_2$ **77.1** नागच्छत्तव ] U; न गच्छत्तव $G_1$; नाजगाम तव $PB^1$; नोपस्थितः न जगाम तव $L_2$; नागच्छ J **77.1** शोकहेतुं ] $G_1U$; तापकारणं शोकहेतुं $PB^1L_2$ **77.1** जानन्नपि ] $G_1U$; विद्वन्नपि जानन्नपि $PL_2$; विद्वानपि जान्नपि $B^1$ **77.2** °यज्ञः ] $G_1U$; °यज्ञविधिः $PB^1L_2$ **77.2** विहितमर्यादः ] $G_1U$; कृतस्थितिः विहितमर्यादः $PB^1L_2$ **77.2** तेनैव व्यवस्था ] $G_1J$; तेनैव्यवस्था U; व्यवस्था तेनैव $PB^1L_2$ **77.3** आश्वासनीय इति ] UPJ; आश्वासनीय इदि $G_1$; आसनीय इति $B^1$; आमनीय इति $L_2$

हे सदाचार, तस्य गुरोर्वाक्—अल्पानि पदानि यस्याः सेत्यर्थः, महत्त्वं ध्वनितम्—मयि वर्तते। तामाकर्णय, श्रुत्वा च वाचं चेतसि कर्तुं योग्यो भवसि। ≪हे ख्यातसत्त्वोत्कर्ष≫। सात्त्विका हि स्वप्ने ऽपि न खिद्यन्ते। सन्दिश्यन्त इति सन्देशाः, ते च तानि पदानि सन्देशपदानि॥ ७८॥

कथं कार्यान्तरव्यग्रेण गुरुणा मद्दुःखकारणमज्ञायीत्याह

**त्रिषु धामसु शार्ङ्गधन्वनः समतीतं च भवच्च भावि च।**
**स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति॥ ७९॥**

वसिष्ठो यस्माद्विष्णोस्त्रिषु पदेषु भूर्भुवःस्वर्लक्षणेषु वेदमयेन नेत्रेण समतिक्रान्तं वर्तमानं भविष्यच्चेति त्रयं पश्यति। निरावरणेन निष्प्रतिबन्धेन। प्रतिघो वा

---

**79 a.** त्रिषु धामसु शार्ङ्गधन्वनः ] Σ; पुरुषस्य पदेष्वजन्मनः **C**  **79 c.** स हि ] $G_1P_MB^1L_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Hem.Mall.Ar. (?); स ह U (Jin. uncertain)

---

**78.1** सदाचार ] $G_1J$; विश्रुतसत्वसार U; सुवृत्त शोभनाचार $PB^1L_2$  **78.1** गुरोर्वाक् ] $G_1UJ$; मुनेर्वसिष्ठस्य गुरोर्वाक् सरस्वती P; मुनेर्वसिष्ठस्य सरस्वती वाक् $B^1L_2$  **78.1** अल्पानि पदानि ] $G_1UJ$; लघूनि अल्पानि सन्देशपदानि P; लघूनि सन्देशपदानि $B^1L_2$  **78.1** सेत्यर्थः ] $G_1UPJ$; सेत्यर्थ $B^1$; सा इत्यर्थ $L_2$  **78.2** तामाकर्णय ] UJ; तामकर्णय $G_1$; तां शृणु $PB^1L_2$  **78.3** कर्तुं योग्यो भवसि ] *conj.*; कर्तुमनुष्ठातुं योग्यो भवसि $G_1$; कर्तुमनुष्ठातुं योग्यो सि U; कर्तुमनुष्ठातुमर्हसि P; कर्तुमनुष्ठातुमर्हसि योग्योभवसि $B^1L_2$; किंतुमनुष्टातुं योग्यो भवसि J  **78.3** ख्यातसत्त्वोत्कर्ष ] *conj.* (cf. Jin.); ख्यातः सत्त्वोत्कार्यो यस्य तस्यामन्त्रणम् $G_1$; ख्यातः सत्त्वोत्कर्षो यस्य तस्यामन्त्रणम् UJ; विश्रुतः ख्यातः सत्त्वसारः सत्त्वोत्कर्षः यस्य तस्यामन्त्रणम् P; श्रुतः ख्यातस्सत्त्वसारः सत्त्वोत्कर्षः यस्य तस्यामन्त्रण $B^1$; श्रुतः ख्यातस्सत्त्वसारः सत्त्वोत्कर्षः यस्य तस्यामन्त्रणम् $L_2$  **78.3** सात्त्विका हि ] $PB^1$; सात्त्विकश्च $G_1J$; सात्विकाश्च U  **78.3** स्वप्ने ऽपि ] U; स्वप्ने $G_1PB^1J$; स्वप्नोपि $L_2$  **78.3** खिद्यन्ते ] $G_1UPL_2$; खिद्यन्ति $B^1$; खिद्यते J  **78.4** सन्दिश्यन्त ] $UB^1L_2J$; सन्दिश्यत $G_1$; न सन्दिश्यन्ते P  **78.4** सन्देशाः, ते च तानि पदानि सन्देशपदानि ] $PB^1L_2$; सन्देशानि च तानि $G_1J$; सन्देशानि तानि U  **78.5** कथं ] $G_1UJ$; *om.* $PB^1L_2$  **78.5** °व्यग्रेण ] Σ; °व्याग्रेण $G_1$  **78.5** गुरुणा ] $G_1UJ$; गुरुणा कथं $PB^1L_2$  **78.5** मद्दुःख° ] Σ; सत् दुःख° U  **79.1** वसिष्ठो ] U; वसिष्ठे $G_1$; स वसिष्ठो $PB^1L_2$; वसिष्टो J  **79.1** यस्माद्विष्णोस्त्रिषु पदेषु ] $G_1UJ$; हि यस्मात् शार्ङ्गधन्वनो (°ने $B^1$) विष्णोस्त्रिषु धामसु पदेषु स्थानेषु $PB^1L_2$  **79.1** °र्लक्षणेषु वेदमयेन नेत्रेण ] $G_1J$; °र्लणेषु वेदमयेन नेत्रेण U; °र्लक्षणेष्वप्रतिघेन निरर्गलेन चक्षुषा वेदमयेन नेत्रेण अथवा निष्प्रतिघेन निरावरणेन निष्प्रतिबन्धेन P; °र्लक्षणेषु निष्प्रतिघेन निरर्गलेन चक्षुषा वेदमयेन नेत्रेण अथवा निष्प्रतिघेन निरावरणेन $B^1L_2$  **79.1** समतिक्रान्तं ] $G_1UJ$; समतीतं समतिक्रान्तं $PB^1L_2$  **79.2** वर्तमानं ] $G_1UJ$; भवद्वर्तमानं $PB^1L_2$  **79.2** भविष्यच्चेति ] $G_1U$; भावि भविष्यच्च इति $PB^1L_2$; भविष्यश्चेति J  **79.2** त्रयं ] $G_1$; त्रितयं $UB^1L_2J$; त्रि+त+यं P  **79.2** निरावरणेन निष्प्रतिबन्धेन ] $G_1UJ$; *om.* $PB^1L_2$

क्रोधः। कामक्रोधादिरहितेन॥ ७९॥

चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम्॥ ८०॥

पूर्वमिन्द्रस्तृणबिन्दुनाम्नो राजर्षेः कष्टं तपो विदधतः स्वराज्यहरणशङ्कितस्तृणबिन्दवे ध्याननाशिनीं हरिणीं नामाप्सरसं प्राहिणोत्। किलेत्यागमे॥ ८०॥

स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुदर्शनाम्।
अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा मुनिः॥ ८१॥

तृणबिन्दुरग्रे दर्शितं रम्यं रूपं यया तां मनुष्या सम्पद्यस्वेति शशाप, तपोविघ्नरोषेण। शम एवाब्धिमर्यादा तस्याः कल्पान्ततरङ्गनिभेन। प्रलयोर्मिर्यथा मर्यादामास्कन्दति तथा कोपः प्रशान्तिम्॥ ८१॥

भगवन्परवानयं जनः प्रतिकूलाचरणं क्षमस्व मे।

---

**81 a.** °प्रतिबन्ध° ] $G_1UP_MB^1L_2V^MB_2^MB_3^MB_4^MB_5^MB_7^M$Mall.Ar.; °प्रतिबन्धु° $B_1^M$; °प्रतिघात° Hem.Jin. **81 b.** °विष्कृतचारुदर्शनाम् ] $UB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; °विष्ठितचारुदर्शनाम् $P_M$; °विष्कृतचारुदर्शनम् $G_1J$; °विष्कृतचारुविभ्रमाम् ℭ **82 b.** °चरणं ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_7^M$; °चरितं $B_5^M$ℭ

---

**79.3** प्रतिघो वा क्रोधः ] $G_1UPJ$; क्रोधो वा प्रतिघः $B^1L_2$ **80.1** पूर्वमिन्द्रस् ] $G_1UJ$; पुरा पूर्वं हरिरिन्द्रः $PB^1L_2$ **80.1** कष्टं ] $G_1UJ$; दुश्चरं कष्टं $PB^1L_2$ **80.1** तपो विदधतः ] $G_1UJ$; तपः चरतः कुर्वतः $PB^1L_2$ **80.2** स्वराज्यहरणशङ्कितस्तृणबिन्दवे ] UJ; स्वाराज्यहरणशङ्कितस्तृणबिन्दवे $G_1$; स्व (स्वा° $B^1$) राज्यहरणशङ्कितः अस्मै तृणबिन्दवे $PB^1$; स्वाराज्यहरणबिन्दुशङ्कितः अस्मै तृणबिन्दवे $L_2$ **80.2** ध्याननाशिनीं ] $G_1UJ$; समाधिभेदिनीं ध्याननाशिनीं $PB^1L_2$ **80.2** नामाप्सरसं ] $G_1UB^1J$; नाम सुराङ्गनां अप्सरसं P; नामप्सरसं $L_2$ **80.2** प्राहिणोत् ] $G_1UJ$; प्रजिघाय प्राहिणोत् $PB^1L_2$ **81.1** तृणबिन्दुरग्रे दर्शितं ] $G_1$; तृणबिन्दोरग्रे दर्शितं UJ; स तृणबिन्दुः प्रमुखे अग्रे आविष्कृतं दर्शितं $PB^1$; स तृणबिन्दुः प्रमुखे अग्रे आविष्कृतं $L_2$ **81.1** रम्यं रूपं ] J; रूपं रम्यं $G_1$; रूपं U; चारु रम्यं दर्शनरूपं $PB^1$; चारु रम्यं दर्शनं रूपं $L_2$ **81.1** मनुष्या सम्पद्यस्वेति ] $G_1UJ$; मानुषी भवेति $PB^1L_2$ **81.2** तपोविघ्नरोषेण ] $G_1UJ$; तमसः प्रतिबन्धो विघ्नस्तत्प्रभवेन मन्युना रोषेण P; तपसः प्रतिबन्धो (°बन्धनो $B^{1ac}$) विघ्नस्तत्प्रभवेण मन्युना रोषेण $B^1L_2$ **81.2** एवाब्धिमर्यादा ] $G_1J$; एवाब्धिर्मर्यादा U; एव वेला अब्धिमर्यादा $PL_2$; एवावेला अब्धिमार्यादा $B^1$ **81.2** कल्पान्ततरङ्गनिभेन ] UJ; कल्पान्तराङ्गनिभेन $G_1$; प्रलयान्तोर्मिणा कल्पान्तरङ्गनिभेन P; प्रलयोर्मिणा कल्पान्ततरङ्गनिभेन $B^1L_2$ **81.3** कोपः ] $\Sigma$; शोक U **81.3** प्रशान्तिम् ] $\Sigma$; प्रशांतितम् J

इति चोपनतां क्षितिस्पृशं कृतवाना सुरमाल्यदर्शनात्॥ ८२॥

इत्थं प्रणतामनुनयवतीं तामप्सरसं तृणबिन्दुर्दिव्यकुसुमावलोकनावधि पृथ्वीपृष्ठस्पृशं मानुषीं विहितवान्। तावदवनिमवतर यावत्सुरकुसुमदर्शनं ते सम्पन्नमिति शापान्तमस्याः स दयया चकारेत्यर्थः। परायत्तः। अतश्च परवशत्वाद्विप्रियकरणं तत्क्षमस्व॥ ८२॥

क्रथकैशिकवंशसम्भवा तव भूत्वा महिषी चिराय सा।
मुनिशापनिवृत्तिकारणं ध्रुवमापाशु यतस्तनुं जहौ॥ ८३॥

सा ते भार्या चिरमासित्वा निश्चितमृषिशापविनाशहेतुं सुरपुष्पेक्षणलक्षणं प्राप यतः शीघ्रं व्याधिं विना देहमत्यजत्॥ ८३॥

तदलं तदपायचिन्तया विपदुत्पत्तिमतामवस्थिता।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः॥ ८४॥

---

**82 d.** कृतवाना सुरमाल्य° ] $P_MB^1L_2V^MB_3^MB_5^MB_7^M$Jin.; कृतवानम्बरमाल्य° $G_1$; कृतवानुम्बरमाल्य° U; कृतवानास्वरमाल्य° $JB_2^MB_4^{Mpc}$; कृतवानसुरमाल्य° $B_1^M$; कृतवानस्वरमाल्य° $B_4^{Mac}$; कृतवाना सुरपुष्प° Hem.Mall.Ar. **83 cd.** ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ℭ **83 c.** °निवृत्ति° ] $UB^1L_2V^MB_3^MB_5^M$; °निवृत्त° $G_1P_MJB_1^MB_2^MB_4^MB_7^M$ **83 d.** ध्रुवमापाशु यतस्तनुं ] $G_1UB^1L_2JB_2^MB_3^MB_5^MB_7^M$; ध्रुवमाप्ताशु यतस्तनुं $P_M$; ध्रुवमापाशु ततस्तनुं $V^M$; ध्रुवमप्तास्त यतस्तनु $B_1^M$; ध्रुवमप्ताप यतः तनुं $B_4^M$ **84 b.** °मवस्थिता ] $G_1P_MB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Ar.Jin.; °मुपस्थिता UHem.Mall.

---

**82.1** इत्थं ] $G_1$UJ; इतीत्थम् $PB^1L_2$ **82.1** प्रणतामनुनय° ] $G_1$UJ; उपनतां प्रणतामनुनय° $PB^1$; उपनतां प्रणतामनुनाय° $L_2$ **82.1** तृणबिन्दुर् ] $G_1$UP; स तृणबिन्दुर् $B^1L_2$; तृणबिंदु J **82.1** दिव्यकुसुमावलोकनावधि ] $G_1$UJ; आ सुरमाल्यदर्शनात् दिव्यकुसुमदर्शनावधि $PB^1L_2$ **82.2** पृथ्वीपृष्ठ° ] *conj.*; पृष्ठ° $G_1$; पृ। थ्वी° U; क्षिति° $PB^1L_2$; पृष्टी° J **82.2** विहितवान् ] $G_1$UJ; विहितवान् अकरोत् P; कृतवानकरोत् $B^1$; कृतवाकरोत् $L_2$ **82.2** °दर्शनं ] Σ; °दर्शिनं J **82.3** स दयया ] $G_1$UJ; दयया स $PB^1L_2$ **82.3** परायत्तः ] *conj.*; *om.* $G_1$UJ; परवान् परायत्तः $PB^1L_2$ **82.4** अतश्च परवशत्वाद्विप्रियकरणं ] *conj.*; *om.* $G_1$UJ; अतश्च परवशत्वात्प्रतिकूलत्वाचरणम् (°कूलाचरणं $B^1$) विप्रियकरणम् $PB^1$; अतश्च परवत्वात्प्रतिकूलाचरणं विप्रियकरणं $L_2$ **82.4** तत्क्षमस्व ] $PB^1L_2$; *om.* $G_1$UJ **83.1** ते भार्या ] $G_1$J; ते U; तव भार्या $PB^1L_2$ **83.1** चिरमासित्वा ] $G_1$UJ; भूत्वा चिरमासित्वा $PB^1L_2$ **83.1** निश्चितम् ] $G_1$UJ; ध्रुवं निश्चितं $PL_2$; ध्रुवं निश्छितम् $B^1$ **83.1** °विनाशहेतुं ] $G_1$UPJ; °निवृत्तिकारणं मुनिशापविनाशहेतुं $B^1L_2$ **83.1** °पुष्पेक्षणलक्षणं ] Σ; °पुष्पेक्षण $L_2$ **83.2** यतः शीघ्रं ] $G_1$UJ; यत आशु शीघ्रं $PB^1L_2$ **83.2** व्याधिं ] $G_1$UJ; तनुं जहौ व्याधिं $PB^1L_2$

तस्मात्तद्विनाशशोकेन तूष्णीम्, यतो जन्मवतां विपत्तिर्विनाशलक्षणा नित्या। तथा चोक्तम्— ‘जातस्य हि ध्रुवो मृत्युः’ इति। अतः कारणात्त्वया भूमिरियं पाल्यताम्, यस्माद्भुवा राजानः सदाराः, भूपतिमहीपत्यादिशब्दधारणात्॥ ८४॥

प्रसङ्गाच्छान्तरसविवर्णयिषयाह

उदये यदवाप्यमुज्झता श्रुतमाविष्कृतमात्मनस्त्वया।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीवतया प्रकाश्यताम्॥ ८५॥

अभ्युदयकाले राज्यलाभे प्राप्यं प्रहर्षं मदं वा त्यजता त्वया यत्स्वस्य शा-

---

**85 a. यदवाप्य॰** ] Ś; यदवाच्य॰ Hem.; मदवाच्य॰ Mall.Ar.; यदकार्य॰ Jin. **85 b. ॰त्मनस्त्वया** ] ŚHem.Jin.; ॰त्मवत्तया Mall.Ar. (?) **85 c. मनसस्तदुपस्थिते** ] ŚHem.Ar.; मनसः समुपस्थिते Mall. (Jin. uncertain)

---

**84.2** जातस्य हि ध्रुवो मृत्युः *Mahābhārata* 6.24:27a (*Bhagavadgītā*).

---

**84.1 तस्मात्तद्विनाशशोकेन तूष्णीम्** ] $G_1$UJ; तत् तस्मात् तस्याः अपायो विनाशः तस्य चिन्तया शोकेनालं तूष्णीं P; तत्तस्मात् तस्या अपायो विनाशस्तस्य चिन्तया अलं तूष्णीम् $B^1L_2$ **84.1 यतो जन्मवतां** ] $G_1$UJ; यत उत्पत्तिमतां जन्मवतां $PB^{3pc}L_2$; यत उत्पत्तिमतां ×⏑̲ ⏑̲×वतां $B^{1ac}$ **84.1 विपत्तिर्विनाशलक्षणा नित्या** ] *conj.*; विपत्तिविनाशलक्षणावस्थिता नित्या $G_1$UJ; विपत् मरणलक्षणा अवस्थिता नित्या भवति $PB^1L_2$ **84.2 तथा चोक्तम्** ] $G_1$U; *om.* $PB^1L_2$; तथा चोक्तं भगवता J **84.2 मृत्युः इति** ] $G_1$U; मृत्युः इत्युक्तत्वात् $PB^1L_2$; मृत्युर्ध्रुवं जन्म मृतस्य चेति J **84.3 कारणात्त्वया भूमिरियं** ] $G_1$J; कारणत्वात्त्वयेयं भूमिः U; कारणात्त्वया भूमिः P; कारणात् इयं +त्वया+ वसुधा भूमिः $B^1$ ($+B^3$); कारणात् त्वया इयं वसुधा भूमिः $L_2$ **84.3 यस्माद्भुवा राजानः** ] J; यस्माद्भुवा राजानाः $G_1$; यस्माद्राजानः भुवः U; यस्माद्राजानो वसुमत्या भूम्यैव $PB^1L_2$ **84.3 सदाराः** ] *em.*; सदाचाराः $G_1$J; सदादाराः U; कलत्त्रिणः सदाराः $PB^1L_2$ **84.4 भूपतिमहीपत्यादिशब्दधारणात्** ] $PB^1L_2$; भूपतिमहीपत्यादिशब्दप्रयोगात् $G_1$; भूपतिर्महीपतिरित्यादिशब्दप्रयोगात् U; भूपतिर्महीपत्यादिशब्दप्रयोगात् J **84.5 प्रसङ्गाच्छान्तरसविवर्णयिषयाह** ] P; प्रसङ्गाच्छान्तरसविवर्णयिषमाह $G_1$; *om.* U; प्रसङ्गाच्छान्तरसविवर्णिषयाह $B^1L_2$; प्रसंगाच्छापांतरसविवर्णयिष्यमाह J **85.1 अभ्युदयकाले राज्यलाभे** ] $G_1$UJ; उदये अभ्युदयकाले राज्यलाभे P; उदये राज्यलाभकाले $B^1L_2$ **85.1 प्राप्यं प्रहर्षं** ] $G_1$UJ; अप्राप्यं प्राप्यं हर्षं P; अवाप्यं प्राप्यं हर्षं $B^1$; अवप्यं हर्षं $L_2$ **85.1 मदं** ] $G_1PL_2$J; पदं U; मुदं $B^1$ **85.1 त्यजता** ] $PB^1L_2$; त्याज्यता $G_1$; त्यज्यतां U; त्याजता J **85.1 त्वया** ] Σ; तुया $G_1$

स्त्रं प्रकटितं तदिदानीं चित्तस्य दुःखे समुत्पन्ने भूयो ऽदैन्येनाविष्क्रियताम्। श्रुतवन्तो हि सम्पदापदोर्न हृष्यन्ति, न तप्यन्ते च॥ ८५॥

किञ्च दुःखे शोको निरर्थक इति वक्तुमाह—

रुदता कुत एव सा पुनर्भवता नानुमृतेरवाप्यते।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथाः शरीरिणाम्॥ ८६॥

त्वया पश्चान्मरणेनापि सा न प्राप्यते। अस्रु विमुञ्चता तु कुत एव, यतः परलोकगामिनां निजैः शुभाशुभैः कर्मभिर्गमनानि विलक्षणमार्गाणि। यादृशं हि यः कर्म कुरुते, तादृशेन पथा स याति॥ ८६॥

अपशोकमतः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः।
स्वजनास्रु किलातिसन्ततं दहति प्रेतमिति प्रचक्षते॥ ८७॥

---

**86 b.** नानुमृतेरवाप्यते ] $G_1JB_1^{Mpc}B_3^MB_7^M$; नानुमृतो न वाप्यते U; नानुमृतेन वाप्यते $P_MB^1L_2V^MB_1^{Mac}B_4^M$; ननुमृतेर्न वापिते $B_2^M$; नानुमृतेन याप्यते $B_5^M$; नानुमृतापि लभ्यते Hem.Mall.Ar.; नानुमृतेन लभ्यते Jin. **86 d.** °पथाः शरीरिणाम् ] $G_1B^1L_2L_2V^MB_1^MB_2^M B_3^MB_5^MB_7^M$; °पथः शरीरिणां $UP_MB_4^M$; °पथा हि देहिनाम् **C** **87 .** ] placed between 90 and 91 in $B_4^M$; *om.* $G_1J$ **87 a.** अपशोकमतः ] $UP_MB^1L_2V^MB_1^MB_3^MB_4^MB_5^MB_7^M$; अपशोकमनाः $B_2^M$**C**

---

**85.2** यत्स्वस्य शास्त्रं ] $G_1J$; यत्स्वस्य शास्त्रस्य U; यदात्मनः स्वस्य श्रुतं शास्त्रम् $PB^1L_2$ **85.2** प्रकटितं ] $G_1UJ$; आविष्कृतं दर्शितम् $PB^{3pc}L_2$; आविकृतं दर्शितं $B^{1ac}$ **85.2** चित्तस्य ] $G_1UJ$; मनसो $PB^1L_2$ **85.2** दुःखे ] $G_1UJ$; ज्वरे दुःखे $PB^1L_2$ **85.2** समुत्पन्ने ] $G_1UJ$; उपस्थिते सति $PB^1L_2$ **85.2** ऽदैन्येनाविष्क्रियताम् ] $G_1UJ$; °क्लीवतयाऽदैन्येनाविष्क्रियतां प्रकटीक्रियतां P; अक्लीवतया दैन्यराहित्येन प्रकाश्यतां प्रकटीक्रियतां $B^1L_2$ **85.3** सम्पदापदो° ] Σ; विपदापदो° U **85.3** न तप्यन्ते च ] $PB^1L_2$; तप्यन्ते $G_1UJ$ **85.4** दुःखे शोको निरर्थक ] Σ; दुःखशोका निरर्थका U **86.1** त्वया पश्चान्मरणेनापि ] $G_1$ UJ; भवता अनुमृतेनापि पश्चन्मरणेनापि P; भवता अनुमृतेनापि $B^1L_2$ **86.1** अस्रु विमुञ्चता तु ] $G_1UJ$; रुदता अस्रु विमुञ्चता पुन+ः+ P; रुदता पुनः $B^1L_2$ **86.2** परलोकगामिनां ] $G_1L_2J$; परलोकगामिनां प्राणिनां $UPB^1$ **86.2** निजैः शुभाशुभैः कर्मभिर् ] *conj.*; निजैः शुभाशुभैर् $G_1UJ$; स्वकर्मभिः निजैः शुभाशुभैः कर्मभिः $PB^1L_2$ **86.2** गमनानि ] $G_1UJ$; गतयो गमनानि $PB^1L_2$ **86.2** विलक्षणमार्गाणि ] $G_1UJ$; भिन्न (विभिन्न° P) पथा विलक्षणमार्गा भवन्ति $PB^1L_2$ **86.3** यः कर्म ] Σ; कर्म U **86.3** तादृशेन ] $G_1PJ$; तादृशेनैव $UB^1L_2$

एतस्मात्कारणाद्दुःखं नियम्यौर्ध्वदैहिकस्य श्राद्धस्य दानैः पत्नीमुद्धरस्व। यस्मादतिप्रबन्धेन प्रवृत्तमात्मबन्धुनेत्राम्बु मृतं क्षपयतीत्याहुः। यदुक्तम्—

श्लेष्मास्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतो ऽवशः।
तस्मान्न रोदितव्यं हि क्रिया कार्या प्रयत्नतः॥ ॥ ८७॥

**मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।**
**क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ॥ ८८॥**

प्राणिनां मृतिः स्वभावो नित्यत्वादवश्यंभावित्वात्पण्डितैः कथ्यते। जीवनं तु विकारः, कादाचित्कत्वात्। जन्मसहस्रैर्हि मानुष्यकमाप्यते न वा। अतः शरीरी क्षणमपि यदि जीवन्संतिष्ठते, तत्सो ऽस्य लाभः। एतद्विनाशित्वं पिण्डस्याभिमतम्। न त्वीश्वरस्यात्मनः, नित्यत्वात्॥ ८८॥

किञ्च

---

**88 .** ] placed between 85 and 86 in $P_M B_1^M B_2^M$; *om.* $V^M B_4^M$

---

**87.3** श्लेष्मास्रु ⋯ कार्या प्रयत्नतः *Yājñavalkyasmṛti* 3:11.

---

**87.1** एतस्मात्कारणाद्दुःखं ] $G_1$UJ; अत एतस्मात्कारणात् अपशोकं दुःखं $PB^{1pc}L_2$; अत एव तस्मात्कारणादपशोकं दुःखं $B^{1ac}$ **87.1** नियम्यौर्ध्वदैहिकस्य ] J; नियम्योर्ध्वदैहिकस्य $G_1$; नियम्य आउर्ध्वदौहिकस्य U; नियम्य निवापस्य और्ध्वदैहिक° $PB^1L_2$ **87.1** दानैः ] $G_1$UJ; दन्तिभिः दानैः P; दत्तिभिर्दानैः $B^1$; दत्तिभिर्दानै $L_2$ **87.1** पत्नीमुद्धरस्व ] $G_1$J; पत्नीमुद्धस्व U; कुटुम्बिनीं पत्नीमनुगृह्णीष्व उद्धर(उद्धरस्व $P^{ac}$) $PB^1L_2$ **87.2** यस्मादतिप्रबन्धेन ] U; यस्मादतिप्रबन्धे $G_1$; यस्मादतिसन्ततमतिप्रबन्धेन $PB^1L_2$; यस्मादतिप्रतिबंधे J **87.2** प्रवृत्तमात्मबन्धुनेत्राम्बु ] $G_1$J; प्रवृत्तमात्मबन्धनेत्राम्बु U; प्रवृत्तं स्वजनानां बन्धूनां अस्रु नेत्राम्बु कर्तृ $PB^1L_2$ **87.2** मृतं क्षपयतीत्याहुः ] $G_1$J; मृतं क्षपयन्तीत्याहुः U; प्रेतं मृतम् नरं दहति क्षपयतीति प्रचक्षते विद्वांस आहुः(आहु $L_2$) $PB^1L_2$ **87.3** °र्मुक्तं ] Σ; °र्मुक्तो P **87.4** प्रयत्नतः ] $G_1$UPJ; प्रयत्नत इति $B^1L_2$ **88.1** प्राणिनां ] $G_1$UJ; शरीरिणां प्राणिनां $PB^1L_2$ **88.1** मृतिः ] $G_1$UJ; मरणं $PB^1L_2$ **88.1** स्वभावो ] $G_1$UJ; प्रकृतिः स्वभावो $PB^1L_2$ **88.1** पण्डितैः ] Σ; बुधैः पण्डितैः J **88.1** कथ्यते ] Σ; कथं U **88.2** जीवनं तु ] $G_1$J; जीवनं U; जीवितं जीवनं हि P; जीवितं जीवनं तु $B^1L_2$ **88.2** विकारः ] $G_1$J; विकृतिः U; विक्षतिः विकारः P; विकृतिर्विकारः $B^1L_2$ **88.2** कादाचित्कत्वात् ] *em.*; कदाचित्कर्मत्वात् $G_1$; कदाचित्कर्मकारत्वात् U; कदाचित्कत्वात् $PB^1L_2$J **88.2** °सहस्रैर्हि ] Σ; °सहस्रकैर्हि U **88.3** अतः शरीरी क्षणमपि यदि जीवन्संतिष्ठते, तत्सो ऽस्य लाभः ] $G_1$UJ; अतो ऽसौ शरीरी यदि श्वसंज्ञीवंस्तिष्ठति (जीवं तिष्ठति $B^1$) स तेन लाभवान् सो ऽस्य लाभः $PB^1L_2$ **88.3** °नाशित्वं ] Σ; °नाशत्वं J **88.4** पिण्डस्याभिमतम् ] $G_1$UPJ; पिण्डस्य $B^1L_2$ **88.4** त्वीश्वरस्यात्मनः ] $B^1L_2$; त्वीश्वरस्य $G_1$UPJ

अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
इतरस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ ८९ ॥

मन्दबुद्धिरिष्टमरणं मनसि निखातमायुधं पीडाकरत्वादवबुध्यते। प्राज्ञः पुनः शल्यमेवोत्खातं कलयति, मोक्षोपायत्वेन। स्नेहक्षयात्किल निरपायपदावाप्तिः॥ ८९ ॥

स्वशरीरशरीरिणावपि स्मृतसंयोगविपर्ययौ यदा।
विरहः कमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम्॥ ९० ॥

अतिनेदीयांसौ निजदेहदेहेश्वरावपि कथितौ सङ्गमवियोगौ ययोस्तथोक्तौ यदा मरणकाले विरहिणौ स्मृतौ, तदा बहिरङ्गैर्विषयैः कलत्रादिभिर्वियोगः पण्डितं कमिव दुःखयेत्। कः सन्तप्यत इत्यर्थः। एतत्कथय। शरीर्यात्मा॥ ९० ॥

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि।
द्रुमसानुमतोः किमन्तरं यदि वायौ द्वितये ऽपि ते चलाः॥ ९१ ॥

---

**89 c.** इतरस्तु ] $G_1UB^1L_2JB_2^MB_3^MB_4^MB_5^MB_7^M$; अपरस्तु $P_MV^MB_1^M$; स्थिरधीस्तु **C** **90 b.** स्मृत° ] ŚAr.Jin.; क्षण° Hem.; श्रुत° Mall. • यदा ] Σ; यदि Ar. **90 c.** कमिवा° ] $G_1UB^1L_2JV^MB_3^MB_4^MB_5^MB_7^M$Hem.; किमिवा° $P_MB_1^MB_2^M$Mall.Ar.Jin. **91 c.** द्रुमसानुमतोः ] $G_1UB^1L_2JV^MB_2^MB_3^MB_5^MB_7^M$; द्रुमसानमतोः $B_4^M$; द्रुमसानुमतां $P_M$**C**; श्रुमसानुमतां $B_1^M$

---

**89.1** मन्दबुद्धिरिष्टमरणं ] $G_1UJ$; मूढचेतनो मन्दबुद्धिः प्रियनाशमिष्टमरणं $PB^1L_2$ **89.1** मनसि ] $G_1UJ$; हृदि मनसि $PB^1L_2$ **89.1** निखातमायुधं ] *conj.*; खातमायुधं $G_1UJ$; अर्पितं निखातं शल्यमायुधं $PB^1L_2$ **89.1** पीडाकरत्वादवबुध्यते ] $G_1$; प्रीत्याकारत्वादवबुध्यते U; पीडाकरत्वादवगच्छति मन्यते $PB^1L_2$; पीत्वाकरत्वादवबुध्यते J **89.1** प्राज्ञः पुनः ] $G_1UJ$; इतरः प्राज्ञः पुनस्तदेव $PB^1L_2$ **89.2** शल्यमेवोत्खातं ] $G_1UJ$; शल्यमेव समुद्धृतमु ⏑ ⏑ P; शल्यमेव समुद्धृतमुत्खातं $B^1L_2$ **89.2** कलयति ] $G_1J$; कालयति U; जानाति $PB^1L_2$ **89.2** मोक्षोपायत्वेन ] $G_1UJ$; कुशलद्वारतया मोक्षोपायत्वेन $PB^1L_2$ **89.3** °पदावाप्तिः ] Σ; °पदाव्याप्तिः U **90.1** अतिनेदीयांसौ ] $PB^1$; अतिनेदीयासौ $G_1$; अतिनेदेयांसौ U; अतिनीदीयांसौ $L_2$; अतिनेचीयासौ J **90.1** निजदेहदेहे° ] P; निजदेहे देहे° $G_1J$; निजदेहे° U; स्वदेहदेहे° $B^1L_2$ **90.1** कथितौ ] $G_1UJ$; स्मृतौ कथितौ P; स्मृतौ $B^1L_2$ **90.1** सङ्गमवियोगौ ] $G_1UJ$; संयोगवियोगावपि $PB^1$; संयोगवियोगौ $L_2$ **90.1** ययोस्तथोक्तौ ] *conj.*; तथोक्तौ $G_1UJ$; ययोस्तौ तथोक्तौ $PB^1L_2$ **90.1** यदा ] $G_1UJ$; यदा भवतः $PB^1L_2$ **90.2** मरणकाले ] Σ; मरणकाले पि U **90.2** बहिरङ्गै° ] $G_1UPJ$; बाह्यैर्बहिरङ्गै° $B^1L_2$ **90.2** °भिर्वियोगः ] $G_1UJ$; °भिः विरहो वियोगो P; °भिर्विरहो $B^1L_2$ **90.2** पण्डितं ] $G_1J$; *om.* U; विपश्चितं पण्डितं $PB^1$; विपश्चितं $L_2$ **90.3** शरीर्यात्मा ] Σ; शरी - - - - - J

तस्मात्प्राकृतलोकवच्छोकस्याधीनत्वं यातुं न योग्यो भवसि, यतो हर्षशोकादीनुत्पन्नमात्रानपि ये निगृह्णन्ति तेषां प्रधान। द्वावपि तौ वातेन यदि चाल्येते, तत्को विशेषस्तरोः पर्वतस्य च। यदि च त्वमपि प्राकृतवच्छोकाधीनो भवसि, तत्तव तस्य च को विशेषः॥ ९१॥

स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम्।
तदलब्धपदं हृदि शोकघने
प्रतियातमिवान्तिकमस्य गुरोः॥ ९२॥

राजा गुरोर् ≪उत्कृष्टबुद्धे≫र्वचनमोमित्यङ्गीकृत्यर्षिं व्यसर्जयत्। अजस्य चे-

---

**92 a.** °दारमतेः ] $P_M$**C**; °दारामतिः $G_1$; °दारमति $UB_1^M$; °दारमतिः $B^1L_2JV^MB_2^M B_3^MB_4^MB_5^MB_7^M$

---

**91** यतो हर्षशोकादी° …तेषां प्रधान ] *om.* $B^1L_2$

---

**91.1** तस्मात्प्राकृतलोकवच्छोकस्याधीनत्वं ] *conj.*; तस्मात्प्राकृतच्छोकस्याधीनत्वं $G_1$; तस्मात्प्राकृतवच्छोकस्या U; तस्मात्पृथग्जनवत् प्राकृतलोकवत् हे वशिनां जितसुखदुःखानां उत्तम प्रधान(सप्रधान $L_2$) हे राजन् शुचः शोकस्य वशमधीनत्वं $PB^1L_2$; तस्मात् प्राकृतवच्छोकस्याधीनत्वं J **91.1** यातुं न योग्यो भवसि ] $G_1J$; *om.* U; गन्तुं नार्हसि न योग्यो सि P; गन्तुं नार्हसि न योग्यो भवसि $B^1L_2$ **91.2** यतो हर्षशोकादीनु° ] $G_1PJ$; दीनु° U **91.2** प्रधान।] *conj.*; प्रधान। तरुपर्वतानां को विशेषः पवनविषय उभये ऽपि ते चेदस्थिराः $G_1J$; तरुपर्वतानां को विशेषः U; तरुपर्वतानां को विशेषः वायौ पवनविषये यदि ते उभये अपि तरवः पर्वताश्च यदि चलाश्चाल्यन्ते P; तरुपर्वतयोः को विशेषः वायौ पवनविषये यदि ते उभये अपि तरवः पर्वताश्च यदि चलाश्चाल्यन्ते $B^1$; तरुपर्वतयो को विशेषः वायौ पवनविषये यदि ते उभये। उरवः पर्वताश्च। यदि चलाश्चाल्यन्ते $L_2$ **91.2** द्वावपि तौ वातेन यदि चाल्येते ] $G_1J$; *om.* U; यदि तौ द्वावपि वातेन चाल्येते (चाल्यते P) $PB^1$; यदि तौ त्वावपि वातेन चाल्येते $L_2$ **91.3** तत्को विशेषस्तरोः पर्वतस्य च ] $G_1J$; तरोः पर्वतस्य च U; तदा तयोः को विशेष इत्यर्थः $PB^1L_2$ **91.3** त्वमपि ] $UPB^1L_2$; त्वमसि $G_1J$ **91.3** प्राकृतवच्छोकाधीनो भवसि ] *em.*; प्राकृतवच्छोकादीनो भवसि $G_1J$; प्राकृतवच्छोचनीयो भवसि U; प्राकृतवच्छोकस्याधीनो सि P; प्राकृतवच्छोकस्याधीनो भवसि $B^1L_2$ **91.4** तस्य ] $G_1UJ$; प्राकृतस्य $PB^1L_2$ **91.4** विशेषः ] $G_1UPJ$; विशेष इति $B^1L_2$ **92.1** राजा ] $G_1UJ$; स राजा $PB^1L_2$ **92.1** गुरोरुत्कृष्टबुद्धेर्वचनमोमित्यङ्गीकृत्यर्षिं ] *conj.* (cf. Jin.); गुरो वचनमोमित्यङ्गीकृत्यर्षिं $G_1$; गुरोर्वचनमोमित्यङ्गीकृत्यर्षिं U; विनेतुर्गुरोर्वचस्तथेत्योमिति अङ्गीकृत्य मुनिं $PB^1L_2$; गुरोर्वसिष्टस्य वचनमोमित्यंगीकृत्य मुनिं J **92.1** व्यसर्जयत् ] $G_1U^{pc}B^1L_2J$; विसर्जयत् $U^{ac}P$ **92.1** अजस्य ] $G_1UJ$; अस्याजस्य $PL_2$; अस्याजस्या $B^1$

तसि दुःखाक्रान्ते ऽप्राप्तावकाशमिव तदुपदेशवचनं वसिष्ठस्य सकाशं प्रतीपं गतम्। तथाप्यसौ न समाश्वसदित्यर्थः। तोटकवृत्तम्॥ ९२॥

तेनाष्टौ परिगमिताः समाः कथञ्चिद्
बालत्वादवितथसूनृतेन सूनोः।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च॥ ९३॥

अननृतं प्रियसत्यवाक्कं यस्य तेनाजेन पुत्रस्याप्राप्त≪यौवन≫त्वात्कृच्छ्रेणाष्टौ वर्षाण्यतिवाहितानि, भार्यायाः सादृश्यस्य सदृशवनितान्तरस्य चन्द्रादिगस्य वा तेन वा तथा प्रतिकृतेश्चित्रादौ प्रतिबिम्बस्यावलोकनैरुपायैर्निद्रासु क्षणमात्रभवैः सङ्गमैरेवोत्सवैरपि। यद्यपि सूनृत एवावितथार्थे ऽस्ति, तथापि सूनृ-

---

**93 a.** परिगमिताः ] $G_1P_MB^1L_2JB_1^{Mpc}B_2^MB_3^MB_4^MB_5^MB_7^M$**C**; परिगणिताः $UV^M$; परिगम्यताः $B_1^{Mac}$

---

**92.2** चेतसि ] UP; चेतस्य° $G_1J$; हृदि चेतसि $B^1L_2$ **92.2** दुःखाक्रान्ते ] $G_1U^{pc}J$; दुःखाक्रान्दे $U^{ac}$; शोकघने दुःखक्रान्ते $PL_2$; शोकघने दुःखाक्रा ⏑̱ $B^1$ **92.2** ऽप्राप्तावकाशमिव ] UJ; ऽप्राप्तवकाशमिव $G_1$; अलब्धपदमप्राप्तावकाशमिव $PB^1L_2$ **92.2** तदुपदेश° ] Σ; तद्वुपदेश° $G_1$ **92.2** वसिष्ठस्य सकाशं ] $G_1$; वसिष्ठसकाशं U; गुरोर्वसिष्ठस्यान्तिके सकाशं $PB^1$; गुरोर्वसिष्ठस्यान्तिकं सकाशं $L_2$; वसिष्टस्य सकाशं J **92.3** प्रतीपं गतम् ] $G_1UJ$; प्रतियातं प्रतीपं गतमिव $PL_2$; प्रतियातं प्रतीपं गत--- $B^1$ **92.3** तथाप्यसौ ] Σ; तस्याप्यसौ P **92.3** न समाश्वसदित्यर्थः ] $G_1UPL_2J$; +न+ समाश्व+ा+सदित्यर्थः $B^1$ (+$B^3$) **92.3** तोटकवृत्तम् ] $G_1UJ$; दोषकवृत्तम् $PB^1$; दोठकवृत्तम् $L_2$ **93.1** अननृतं ] U; अनुनृतं $G_1J$; अवितथं सत्यं सूनृतं $PB^1J$ **93.1** प्रियसत्य° ] Σ; प्रियं सत्य° J **93.1** यस्य ] Σ; *om.* U **93.1** तेनाजेन ] Σ; तेन अजराजेन J **93.1** पुत्रस्याप्राप्तयौवनत्वात्कृच्छ्रेणाष्टौ ] *conj.*; पुत्रस्याप्राप्तत्वात्कृच्छ्रेणाष्टौ $G_1UJ$; बालत्वात्पुत्रस्याप्राप्तत्वात्कथञ्चित्कृच्छ्रेणाष्टौ $PB^1L_2$ **93.2** वर्षाण्यतिवाहितानि ] $G_1J$; परिवाहितानि $U^{pc}$; परिगणितानि $U^{ac}$; समाः वर्षाणि परिगमितानि अतिवाहितानि $PB^1L_2$ **93.2** भार्यायाः ] $G_1UJ$; प्रियायाः P; प्रियाया भार्यायाः $B^1L_2$ **93.2** सादृश्यस्य ] Σ; सादृश्य° U **93.2** चन्द्रादिगस्य ] Σ; चन्द्रादिकस्य U **93.3** वा तेन वा तथा ] $G_1PJ$; वा तेनाजेन पुत्रस्याप्राप्तत्वात् कृच्छ्रेणाष्टौ वर्षाणि परिवाहितानि भार्यायाः सादृश्यसदृशवनितान्तरस्य चन्द्रादिकस्य वा तेन तथा U(eyeskip); वा तथा $B^1L_2$ **93.3** °लोकनैरुपायैर्निद्रासु ] *conj.*; °लोकनैर्हेतुभिरुपायैर्निद्रासु $G_1UJ$; °लोकनैर्हेतुभिरुपायैस्स्वप्नेषु निद्रासु $PB^1L_2$ **93.4** क्षणमात्रभवैः ] $G_1U$; क्षणिकैः क्षणमात्रभवैस् $PB^1L_2$ **93.4** सङ्गमैरेवोत्सवैरपि ] $G_1$; सङ्गमैश्चरवोत्सवैरपि U; समागमैरेव उत्सवैरपि $PB^1L_2$; संगशैरेवोत्सवैरपि J **93.4** एवावितथार्थे ] $UPB^1L_2$; एवापि तथार्थो $G_1$; एवावितथार्थो J

तत्वस्य तात्त्विकत्वप्रतिपादनार्थं विशेषणोपादानम्। कस्यापि हि कृत्रिममपि प्रियसत्यवाक्कं भवति, न त्वा हृदयात्। प्रहर्षिणीवृत्तम्॥ ९३॥

तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमनत्वरया स मेने॥ ९४॥

अजस्य दुःखमेव कीलको बलाच्चेतो ऽभाङ्क्षीत्। न्यग्रोधाङ्कुरो यथा हर्म्यपृष्ठं भिनत्ति। प्रियादुःखेनासावाक्रान्त एवेत्यर्थः। भेदो ऽत्राक्रान्तिर्न तु स्फोटः, न तावत्तस्य मृतत्वात्। अजः शोकशङ्कुं जीवितावसानकारणमपि वैद्यानामजय्यं भार्यानुसरणरभसेन प्राप्तिमज्ञासीत्। मृतः किल कदाचित् तामाप्स्यामीति। वसन्ततिलकम्॥ ९४॥

सम्यग्विनीतमथ वर्महरं कुमारम्
आदिश्य रक्षणविधौ विधिवत्प्रजानाम्।

---

**94 b.** बिभेद ] Σ; बबाधे Ar. **94 d.** प्रियानुगमन° ] $G_1UP_MB^1L_2JV^MB_1^MB_2^MB_3^MB_5^MB_7^M$ Mall.Jin.; प्रियानुगमनं $B_4^M$; प्रियानुगमने Hem.Ar. • स मेने ] Σ; °नुमेने $Ar.^{vl}$

---

**93.5** तात्त्विकत्व° ] $G_1UB^1L_2$; तत्त्विकत्व° P; त्वार्त्विकत्व° J **93.5** विशेषणो° ] $G_1PB^1J$; विशेषेणो° $UL_2$ **93.5** कृत्रिममपि ] Σ; कृत्रिमस्यापि P **93.6** न त्वा हृदयात् ] $PB^1L_2$; न त्वा हृदयत्वात् $G_1J$; *om.* U **94.1** अजस्य ] $G_1U$; तस्याजस्य $PB^1L_2$; अजराजस्य J **94.1** दुःखमेव कीलको ] $G_1UJ$; शोक एव शङ्कुः कीलकः $PB^1L_2$ **94.1** बलाच्चेतो ] U; बलाच्चे $G_1$; प्रसह्य बलात् हृदयं $PB^1L_2$; बलाश्चेतो J **94.1** ऽभाङ्क्षीत् ] $G_1UJ$; बिभेदाभाङ्क्षीत् $PB^1L_2$ **94.1** न्यग्रोधाङ्कुरो ] $G_1UJ$; प्लक्षस्य न्यग्रोधस्य प्ररोहोङ्कुरो (प्ररोहाङ्कुरो P) $PB^1L_2$ **94.1** यथा हर्म्यपृष्ठं ] *em.*; हर्म्यतलं यथा U; यथा हर्म्यपृष्ठ $G_1$; यथा सौधतलं हर्म्यतलं $PB^1$; यथा सौधतलं हर्म्यपृष्ठं $L_2$; यथा हर्म्यपृष्ट J **94.2** भिनत्ति ] $B^1$; भिन्नति $G_1PJ$; भिन्नत्ति U; भवति $L_2$ **94.2** °सावाक्रान्त एवेत्यर्थः ] $PB^1L_2$; °सौवाक्रम्यतेत्यर्थः $G_1$; °सावाक्रम्यतेत्यर्थः UJ **94.2** °त्राक्रान्तिर्न ] $PB^1$; °त्राक्रान्तिं न $G_1$; °त्र क्रान्ति न U; °त्राक्रान्तिन्न $L_2$; °त्राक्रांति न J **94.3** अजः शोकशङ्कुं ] $G_1UJ$; सो ऽजस्तं शोकशङ्कुं $PB^1L_2$ **94.3** जीवितावसानकारणमपि ] $G_1UJ$; प्राणान्तहेतुं जीवितावसानकारणमपि $PB^1L_2$ **94.3** वैद्यानामजय्यं ] $G_1UJ$; भिषजां वैद्यानां असाध्यमजय्यं $PL_2$; भिषजां वैद्यान+ा+मासाध्यमजय्यं $B^1$ **94.4** भार्यानुसरणरभसेन ] $G_1$; भार्यानुमरणरभसेन UJ; प्रियाया भार्याया अनुगमनस्य त्वरया संरम्भेन $PB^1L_2$ **94.4** प्राप्तिमज्ञासीत् ] $G_1UJ$; लाभां मेने ऽज्ञासीत् $PB^1L_2$ **94.4** कदाचित् ] $G_1PB^1L_2$; *om.* U **94.5** वसन्ततिलकम् ] $G_1UPJ$; वसन्ततिलकं वृत्तम् $B^1L_2$

रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव॥ ९५॥

अनन्तरं लोकानां पालनविधाने दशरथं विधिवच्छिक्षितं कवचहरं शास्त्रोक्तेन विधानेनाज्ञाप्य राजानाशनेन जलप्रवेशे बुद्धिर्यस्य स तथोक्त आसीत्। देहशुद्धये जलप्रवेशमभिललाष तदङ्गमुपवासमादादित्यर्थः। रोगेण वियोगजेन व्याधिना रागेण वोपद्रुतं शरीरमेव दुष्टस्थानं त्यक्तुमिच्छुः। वसन्ततिलकम्॥ ९५॥

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः।
पूर्वाकाराधिकतररुचा सङ्गतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु॥ ९६॥

---

**95 c.** रोगो° ] $UPP_MB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^M$ **C**; रागो° $G_1JB_7^M$ **96 c.** °काराधिकतररुचा ] $G_1UB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_7^M$Hem.Mall.Jin.; °काराधिकतररुचः $P_M$; °काराधिकतररु $B_5^M$; °काराधिकचतुरया Ar. • सङ्गतः कान्तयासौ ] $G_1UP_MB^1JV^MB_1^MB_2^MB_3^MB_4^MB_7^M$Hem.Mall.Ar.; कान्तया सङ्गतो सौ $L_2B_5^M$ (Jin. uncertain) **96 d.** लीला° ] Σ; दोला° $V^M$

---

**95.1** अनन्तरं ] $G_1U$; अथानन्तरं $PB^1L_2J$ **95.1** लोकानां ] $G_1UJ$; प्रजानां $PB^1L_2$ **95.2** पालनविधाने दशरथं विधिवच्छिक्षितं कवचहरं शास्त्रोक्तेन विधानेनाज्ञाप्य ] U; पालनविधानेनाज्ञाप्य $G_1J$(eyeskip); पालनविधौ सम्यग्विधिवद्विनीतं शिक्षितं कुमारं दशरथं कवचहरं विधिवच्छास्त्रेणोक्तेन विधिना आदिश्याज्ञाप्य P; पालनविधाने सम्यग्विधिवद्विनीतं शिक्षितं कुमारं दशरथं वर्महरं कवचहरं विधिवच्छास्त्रोक्तेन विधानेनादिश्याज्ञाप्य $B^1L_2$ **95.2** राजानाशनेन ] *conj.*; राजानशासनेन $G_1J$; राजानुशासनेन U; नृपतिः राजा प्रायोपवेशनेनानाशनेन P; नृपतिः राजा प्रायोपवेशनेन $B^1L_2$ **95.2** बुद्धिर्यस्य ] $G_1J$; मतिर्बुद्धिर्यस्य $UB^1L_2$; मतिर्यस्य P **95.2** तथोक्त आसीत् ] $G_1UJ$; तथोक्तो बभूव P; तथोक्तो बभूवासीत् $B^1L_2$ **95.3** देहशुद्धये जलप्रवेशमभिललाष तदङ्गम् ] $PB^1$; देहशुद्धये ⁻⁻⁻⁻⁻शाङ्गम् $G_1$; देहशुद्धये साङ्गम् U; देहशुद्धये जलप्रवेशमभिर्जलाश उदङ्गम् $L_2$; देहशुद्धये ⁻⁻⁻शार्ङ्गम् J **95.3** °मादादित्यर्थः ] *conj.*; °मदादित्यर्थः $G_1UPJ$; °मग्रहीदित्यर्थः $B^1L_2$ **95.3** रोगेण ] $PB^1L_2$; रोगेन $G_1UJ$ **95.3** वियोगजेन ] $G_1UPJ$; *om.* $B^1L_2$ **95.4** रागेण ] Σ; रागेन U **95.4** वोपद्रुतं शरीरमेव दुष्टस्थानं ] $G_1U$; वा उपसृष्टा उपद्रुता या तनुः शरीरं सैव दुर्वसतिः कुगृहं (°गृह° P) तां $PB^1$; वा उपसृष्टा उपद्रुता तनुश्शरीरं सैव दुर्वतिः कुगृहतां $L_2$; वोपद्रुतं शरीरमेव दुष्टस्थान J **95.4** त्यक्तुमिच्छुः ] $G_1UJ$; मुमुक्षुः त्यक्तुमिच्छुः $PB^1$; मुमुक्षस्त्यक्तुमिच्छुः $L_2$

अजो नन्दनाख्यदेवोद्यानमध्यरचितेषु विलासवेश्मसु व्याजहार, प्रियया पुनः समागतः। प्रथमाया आकृतेरतिविशिष्टं मनोहरं रूपं यस्याः। गङ्गासरय्वाख्यनद्योर्जलमिश्रीभावप्रभवे सङ्गमे कायन्यासात् सुरमध्ये देवो ऽयमिति संख्यानं तदर्थं लेख्यं च तुल्यकालं प्राप्य दिव्यत्वमाप्येत्यर्थः। तदा ह्यसौ देवमध्ये गणित आलिखितश्च। मन्दाक्रान्ता वृत्तम्॥ ९६॥

इति रघुवंशे महाकाव्ये ऽष्टमः सर्गः॥

---

**96.1** अजो ] G$_1$U; असावजः PB$^1$L$_2$; अजराजो J **96.1** विलासवेश्मसु ] G$_1$U; लीलागारेषु विलासमन्दिरेषु PB$^1$; लीलागारेषु विलसमन्दिरेषु L$_2$; नंदनाख्यदेवोद्यानमध्यमरचितेषु विलासवेश्मसु J **96.1** व्याजहार ] U; विजहार G$_1$PJ; अरमत विजहार B$^1$L$_2$ **96.2** प्रियया पुनः समागतः ] G$_1$UJ; कान्तया पुनस्सङ्गतः PB$^1$L$_2$ **96.2** प्रथमाया ] G$_1$UJ; कीदृश्या पूर्वाकारात्प्रथमाया PB$^1$L$_2$ **96.2** आकृतेरतिविशिष्टं मनोहरं रूपं यस्याः ] G$_1$UJ; आकृतेरधिकतरा (°धिकततरा L$_2$) अतिविशिष्टा रुक् कान्तिः रूपं वा यस्यास्तया PB$^1$L$_2$ **96.3** गङ्गासरय्वाख्यनद्योर्जलमिश्रीभावप्रभवे ] G$_1$UJ; जह्नुकन्या गङ्गा तया सरय्वाख्यायाश्च नद्याः तोयव्यतिकरे भावे जलमिश्रीभावप्रभवे P; जह्नुकन्या गङ्गा तस्यास्सरव्याख्याया नद्याश्च तोयव्यतिकरभवे (°भावे B$^{1ac}$) जलमिश्रीभावप्रभवे B$^1$L$_2$ **96.3** सङ्गमे ] *conj.*; तीर्थे सङ्गमे Σ **96.3** कायन्यासात् ] G$_1$UJ; देहत्यागात् शरीरन्यासात् PB$^1$L$_2$ **96.3** सुरमध्ये देवो ऽयमिति ] *conj.*; सुरमध्ये गणना देवो ऽयमिति G$_1$UJ; अमराणां देवानां मध्ये गणनायमिति P; अमरणां देवानां मध्ये गणना देवोयमिति B$^1$L$_2$ **96.4** तुल्यकालं प्राप्य ] G$_1$UJ; सद्यस्तुल्यकालमासाद्य P; सद्यस्तुल्यकालमासाद्य प्राप्य B$^1$L$_2$ **96.4** ह्यसौ देवमध्ये ] G$_1$UPJ; हि देवमध्येसौ B$^1$L$_2$ **96.5** गणित आलिखितश्च ] G$_1$UJ; गणितो लेखितश्च P; गणितो लिखितश्च B$^1$L$_2$ **96.5** मन्दाक्रान्ता ] PB$^1$L$_2$; मन्दाक्रान्त G$_1$UJ **96.6** इति रघुवंशे महाकाव्ये ऽष्टमः सर्गः॥] सर्गः॥ ऽ॥ शुभं॥ शुभम्॥ शुभम्॥ शुभं॥ G$_1$; श्रीरघुवंशे महाकाव्ये वल्लभदेवविरचितायां टीकायामष्टमः सर्गः ॥ ८ ॥ U; इति श्रीरघुवंशे महाकाव्ये सटीके ऽष्टमः सर्गः॥ P; इति रघुवंशे महाकाव्ये सटीके अष्टमस्सर्गः ॥ श्रीगणेशाय नमः B$^1$; इति रघुवंशे महाकाव्ये कालिदासरचिते सटीके ऽष्टमस्सर्गः॥ शुभम्॥ L$_2$; इति श्रीरघुवंशे महाकाव्ये लोष्टकपंडितविरचितायामजराजविलापो नामाष्टमः सर्गः॥ ८॥ J; इति श्रीरघुवंशे महाकाव्ये अष्टमः सर्गः॥ ८॥ B$_1^M$B$_2^M$; इति रघुवंशे महाकावे अष्टमः सर्गः॥ ८॥ B$_3^M$; इति श्रीरघुवंशे महाकाव्ये अष्टमः सर्गः॥ B$_4^M$; इति श्रीरघुवंशे महाकाव्ये जनिर्वाणं नामाष्टमः सर्गः॥ B$_4^M$; इति श्रीरघुवंशे महाकाव्ये ऽष्टमः सर्गः॥ ८॥ V$^M$B$_7^M$

# नवमः सर्गः॥

पितुरनन्तरमुत्तरकोसलान्
समधिगम्य समाधिजितेन्द्रियः।
दशरथः प्रशशास महारथो
यमवतामवतां च धुरि स्थितः॥ १॥

जनकात्पश्चाद्दशरथ उत्तरकोसलान्प्राप्य ररक्ष। लब्धपालनं हि राजधर्मः। एकरूपतया संयमेन जितानीन्द्रियाणि येन। निखिलयोधगुणयुक्तः। तथा, अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहवतां रक्षतां च भूपानामग्रणीः। द्रुतविलम्बितं वृत्तम्। एकदेशजवक्त्रं नाम यमकम्॥ १॥

अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितम्।
अभवदस्य ततो गुणतत्परं सनगरं नगरन्ध्रकरौजसः॥ २॥

यस्मात्प्राप्तमसौ किञ्चिदरिपुरादिकं विधिवद्ररक्ष तस्माद्धेतोर्दशरथस्यामात्यच-

---

**2 c.** गुणतत्परं ] $G_1PB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_7^ML^M$Hem.Ar.Nā.; गुणवत्तरं UHem.$^{vl}$Mall. (?) Jin.

---

**1.3** Cf. *Yogasūtra* 2.30: अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।

---

**1.1** जनकात्पश्चाद् ] $G_1$UJ; पितुरनन्तरं जनकादुत्तरकालं $PB^1$ **1.1** दशरथ ] $G_1UPB^1$; दशरथस्तस्य सुतः J **1.1** प्राप्य ] $G_1$UJ; समधिगम्यासाद्य P; समधिगम्यासाद्य प्रशशास $B^1$ **1.2** एकरूपतया ] $G_1$UJ; समाधिना एकरूपतया $PB^1$ **1.2** संयमेन ] $G_1$UJ; संयमेन वा $PB^1$ **1.2** जितानीन्द्रियाणि ] $PB^1$; जितेन्द्रियाणि $G_1$UJ **1.2** येन ] $G_1$UJ; येन महारथो $PB^1$ **1.2** तथा ] $PB^1$; तथा हि $G_1$UJ **1.3** अहिंसासत्यास्तेय° ] *em.*; अहिंसासत्यस्तेय° $G_1$; अहिंसा सत्यमस्तेय° U; अहिंसास्तेय° $PB^1$; अहिंसा सत्यमक्रोध° J **1.3** °परिग्रहवतां ] $G_1$UJ; °परिग्रहवतां यमवत्तांमवतां P; °परिग्रहवतां यमवतामवतां $B^1$ **1.3** रक्षतां च भूपानामग्रणीः ] $G_1$UJ; रक्षकानाम्भूपानां च धुरि स्थितो ग्रणीः $PB^1$ **1.4** वृत्तम् ] $G_1$J; वृत्तम्॥ १॥ U; वृत्तम् द्रुतविलम्बितमाह नभौ भरौ P; वृत्तं द्रुतविलम्बितमाह नभौ भारौ $B^1$ **1.4** एकदेशजवक्त्रं ] $G_1B^1$J; एकदेशवक्त्रजं UP **2.1** यस्मात्प्राप्तमसौ ] $G_1$UJ; यद्यस्मादधिगतं प्राप्तं $PB^1$ **2.1** °पुरादिकं ] $G_1UPB^1$; °पुराधिकं J **2.1** विधिवद्ररक्ष ] $G_1$UJ; असौ विधिवदपालयत् ररक्ष P; विधिवदपालयत् $B^1$ **2.1** तस्माद्धेतोर्द° ] $G_1$J; ततो तस्माद्धेतोरस्य द° P; ततो हेतोरस्य द° $B^1$; तस्माद्धोतोः द° U

© CSABA DEZSŐ, DOMINIC GOODALL AND HARUNAGA ISAACSON, 2025 | DOI:10.1163/9789004721746_004
This is an open access chapter distributed under the terms of the CC BY-NC-ND 4.0 license.

क्रं हितैकनिष्ठमासीत्। स्ववंशयोग्यं राष्ट्रसहितम्। सावधाने हि प्रभौ सर्व एवानुरागात्प्रियकारिणो भवन्ति। प्रकृतिशब्देनात्र प्राधान्यान्मन्त्रिण एवोच्यन्ते पुनर्नगरग्रहणात्। कौञ्चक्रौञ्चाख्यपर्वतोश्छिद्रकरौ भार्गवकुमारौ तयोरिव तेजो यस्य। अधिगमो ऽत्र प्राप्तमात्रस्य प्रकृतीनां वा॥ २॥

**उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम्।**
**बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम्॥ ३॥**

पण्डितास्तं राजानं बलाख्यासुरान्तकमिन्द्रं च विहितकार्याणामवसरप्रदानेन हेतुना खेदापहं द्वयमेव कथयन्ति। राजा हि कृतकार्यस्य भृत्यस्यावसरे ऽर्थं ददत्खेदं निरस्यति। शक्रो ऽपि कालवर्षणात्कार्षिकादेः। मनुश्चासौ दण्डधरश्च तद्वंशो यस्य तम्। दण्डधरो दण्डकृद्राजा। मनुना प्रोक्तो यो दण्डस्तद्धरो ऽन्वयो यस्येति वा॥ ३॥

---

**3 b.** °वर्षितया ] $PB^1B_1^M L^M V^M$ 𝕮; °वर्षतया $G_1UJD^M B_2^M B_3^M B_4^M B_7^M$ **3 c.** बलनिषू° ] $B^1$ 𝕮; बल+नि+सू° $G_1$; बलिनिषू° U; बलनिसू° $PJD^M V^M B_1^M B_2^M B_3^M B_4^M B_7^M L^M$

---

**2.2** °स्यामात्यचक्रं हितैकनिष्ठमासीत्। स्ववंशयोग्यं राष्ट्रसहितम्।] UJ; स्यामात्यचक्रं हितैकनिष्ठमासीत्। स्ववंशयोग्यम् राष्टसहितम् $G_1$; °स्यात्मकुलोचितं प्रकृतिमण्डलं स्ववंशयोग्यममात्यचक्रं सनगरं पुरसहितं गुणतत्परं हितैकनिष्ठमासीत् $PB^1$ **2.3** एवानुरागा° ] $G_1PB^1J$; एव हि अनुरागा° U **2.3** °शब्देनात्र ] $G_1PB^1J$; °शब्देन हि अत्र U **2.3** प्राधान्यान् ] $G_1B^1J$; प्राधान् U **2.4** °ग्रहणात् ] $G_1UJ$; °ग्रहणात् कीदृशस्य नगरन्ध्रकरौजसः नगौ $PB^1$ **2.4** कौञ्चक्रौञ्चाख्यपर्वतोश्छिद्रकरौ ] *em.*; कौञ्चक्रौञ्चाख्यपर्वतयोच्छिद्रकरौ $G_1$; कौञ्चक्रौञ्चाख्यपर्वतोपच्छिद्रकरौ U; काञ्जक्रौञ्चौ पर्वतौ तयो रन्ध्रकरौ च्छिद्रकरौ P; कौञ्जक्रौञ्चौ पर्वतौ तद्रन्ध्रकरौ $B^1$; कौञ्जक्रौञ्चाख्यपर्वतयोच्छिद्रकरौ J **2.4** तयोरिव ] $G_1UPJ$; तयोरिवौजस् $B^1$ **2.5** प्रकृतीनां ] $UPB^1J$; प्राकृतीनां $G_1$ **3.1** पण्डितास्तं ] $UPB^1$; पण्डितास्ते $G_1$; मणीषिणः पंडिताः तं दशरथाख्यं J **3.1** बलाख्यासुरान्तकमिन्द्रं ] $G_1U$; बलनिसूदनं बलाख्यासुरान्तकमिन्द्रं P; बलनिषूदन+बलाख्यसुरान्तक+मिन्द्रं $B^1$; बलांतसुरांतकं इन्द्रं J **3.1** विहितकार्याणामवसरप्रदानेन ] $G_1UJ$; कृतकर्मणां विहितकार्याणां समयवर्षितया अवसरप्रदानेन P; कृतकर्मणां कृतकार्याणां समयवर्षितया अवसारप्रदानेन $B^1$ **3.2** खेदापहं द्वयमेव कथयन्ति ] U; खेदापहं द्वयमिव कथयन्ति $G_1J$; श्रमनुदं खेदापहमुभयमेव कथयन्ति P; स्रमनुदं खेदापहं अभयमेव वदन्ति कथयन्ति $B^1$ **3.2** भृत्यस्यावसरे ] $UPB^1J$; भृत्यस्यवसरे $G_1$ **3.3** ऽर्थं ददत्खेदं ] $G_1UJ$; हृदयात्खेदं $PB^{pc}$; ह्यदयात्खेदं $B^{ac}$ **3.3** शक्रो ऽपि कालवर्षणात्कार्षिकादेः ] *om.* P **3.3** ऽपि ] $G_1UJ$; हि $B^1$ **3.3** कार्षिकादेः ] $UB^1$; कार्षकादेः $G_1J$ **3.4** तद्वंशो ] *em.*; स वंशो Σ **3.4** प्रोक्तो यो दण्डस्तद्धरो ] U; प्रयुक्तो यो दण्डस्तद्धरो $G_1PJ$; प्रयुक्तो ये दण्डः तद्धरो $B^1$ **3.5** वा ] $G_1UJ$; वा। श्रमनुदमिति क्विप् $PB^1$

जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः।
क्षितिरभूत्फलवत्यजनन्दने शमरते ऽमरतेजसि पार्थिवे॥ ४॥

सुरतुल्यतेजसि दशरथे प्रशान्ते पृथ्वीं शासति सति व्याधिर्लोके पदं न चकार। लोकं नाक्रामत। दैविकाभिभवाभावे रिपुकृतः परिभवो दूरापेत एव। अत एव †क्षितिः कृषिः† फलयुक्तासीदिति दैवानुकूल्यकथनम्॥ ४॥

दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम्।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम्॥ ५॥

भूमिर्यथा सार्वभौमेन रघुणा तदनु चाजेन लक्ष्मीं पुपोष, स्फीता, तथैव तमिनं पतिमखण्डपौरुषमासाद्य भूयो न न बभौ, अपि तु सम्पन्नत्वाद्रेजे॥ ५॥

समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः।
अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा॥ ६॥

स राजा समवर्तितया यममनुचकार, धनवर्षक्षेपैर्वैश्रवणं, दुराचाराणां निग्र-

---

**4 a.** पदमादधावभिभवः ] $B^1D^MV^MB_1^MB_2^MB_7^ML^M$𝕮; पदमाददावभिभवः $G_1PB_3^MB_4^M$; प-दमाययौ ददौ अभिभवः U(unmetrical); पदमाददावविभवः J **4 b.** सपत्नजः ] Σ; सपत्नतः $Ar.^{vl}$ **4 c.** क्षिति° ] $G_1UPB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_7^ML^M$Mall.; कृषि° Hem.Ar.Nā. (Jin. uncertain) **5 a** रघुणा ] 𝕮; रघुना Ś

---

**4** शासति सति···°कथनम् ] शा--- U U leaves the rest of this (unnumbered) folio blank and begins verse 5 on a fresh recto.

---

**4.1** सुरतुल्यतेजसि दशरथे ] $G_1UPB^1$; अजनंदने दशरथे सुरतुल्यतेजसि J **4.1** प्रशान्ते ] *conj.*; शमरते प्रशान्ते $G_1UPB^1J$ **4.1** पृथ्वीं ] *conj.*; पार्थिवे पृथ्वीं $G_1UPB^1J$ **4.1** व्याधिर्लोके पदं ] *conj.*; गदो व्याधिर्लोकापदं $G_1J$; गदो व्याधिर्लोके पदं $PB^1$ **4.2** नाक्रामत ] $G_1P$; नाक्रमत $B^1$; नाक्रम J **4.2** दैविका° ] $G_1B^1J$; अतश्च दैवा° P **4.2** परिभवो दूरापेत ] $PB^1$; परिभवदूरापेत $G_1J$ **4.3** फलयुक्ता° ] $G_1B^1J$; बहुफलयुक्ता° P **4.3** °कूल्य° ] $G_1PB$; °कूल° J **5.1** भूमिर्यथा ] *conj.*; भूमिस् $G_1UJ$; मही भूमिः P; मही यथा $B^1$ **5.1** रघुणा ] PJ; रघुना $G_1UB^1$ **5.1** तदनु चाजेन ] $G_1UPB^1$; तनुचाजराजेन J **5.1** लक्ष्मीं पुपोष स्फीता ] P; स्फीता $G_1UB^1J$ **5.2** °साद्य ] $G_1UPJ$; °साद्यः $B^1$ **5.2** भूयो न न बभौ ] P; पुनर्न बभौ $G_1U$; पुनः न न बभौ $B^1J$ **5.2** अपि तु ] $G_1UPB^1$; अपि J **6.1** स राजा ] $G_1UPB^1$; स दशरथो राजा J **6.1** समवर्तितया ] *conj.*; समतया समवर्तितया $G_1UPB^1J$ **6.1** यममनुचकार ] $UPB^1J$; यमनुचकार $G_1$ **6.1** धन° ] *conj.*; वसुवृष्टिविसर्जनैर्धन° $G_1UPB^1J$ **6.1** °पैर्वैश्रवणं ] $UPB^1J$; °पैवैश्रवणम् $G_1$ **6.1** दुराचाराणां ] P; दुराचार° $B^1$; दूराचार° $G_1UJ$

हाच्च वरुणं, रविं च कान्त्या। यक्षराक्षसानामधिपो धनदः, स च सर्वस्मा एव धनं ददाति, शक्रस्तु हरतीत्यागमः। वरुणो ऽपि नागपाशसहस्रेण पापान्नियमयतीति श्रुतिः॥ ६॥

न मृगदावरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु।
तमुदयाय न वा नवयौवनाः प्रियतमा यतमानमपाहरन्॥ ७॥

तं दशरथमुदयार्थं राज्यार्थं यत्नं कुर्वाणं हरिणप्रधाने वने प्रीतिः, मृगयाव्यसनं, न जहार। न च द्यूतं, न च मद्यं चन्द्रबिम्बालङ्करणं, मद्यस्य प्रायेण निशायां पानसेवनात्। ≪नूतनतारुण्या वल्लभा≫ अपि तं न जह्रुः। मृगयाद्यूतपानस्त्रीव्यसनानि कामजातानि तं न जह्रुरित्यर्थः॥ ७॥

न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि।
अपि सपत्नजने न च तेन वागपरुषा परुषाक्षरमीरिता॥ ८॥

इन्द्रे ऽपि प्रभवति दशरथेन—अपरुषापगता रुट् क्रोधो यस्य—अक्रोधनेन

---

**7 a.** मृगदावरतिर्न दुरोदरं ] $\mathrm{G_1UPB^1JB^M_2B^M_3B^M_4B^M_5B^M_7L^M}$; मृगदावरतिर्न दुरोधरं $\mathrm{D^M B^M_1}$; मृगयाभिरतिर्न दुरोदरं $\mathrm{V^M}$Hem.Mall.Jin.; मृगयाभिरतिर्न दरोदरं Ar.Nā. **7 c.** °यौवनाः ] $\mathrm{G_1UPB^1JD^MV^MB^{Mpc}_1B^M_2B^M_3B^M_4B^M_5B^M_7L^M}$; °यौवना $\mathrm{B^{Mac}_1}$Hem.Mall.Jin.; °यौवनं Ar.Nā. **7 d.** °पाहरन् ] $\mathrm{G_1UPB^1JV^MB^M_1B^M_3B^M_4B^M_7L^M}$; °पाहरत् $\mathrm{B^M_2B^M_5}$**C**; °पाहत् $\mathrm{D^M}$(unmetrical) **8 c.** अपि सपत्नजने न च ] $\mathrm{UPB^1JD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7L^M}$ Jin.; अपि सपत्नजने न $\mathrm{G_1}$(unmetrical); न च सपत्नजनेष्वपि Hem.Mall.Ar.(?)Nā.

---

**6.2** वरुणं, रविं च कान्त्या ] $\mathrm{G_1UB^1J}$; वरुणं कान्त्या रविं P **6.2** यक्ष° ] *conj.*; पुण्यजनानां यक्ष° $\mathrm{G_1UPB^1J}$ **6.2** धनदः ] $\mathrm{G_1UB^1J}$; राजा धनदः P **6.3** °सहस्रेण ] $\mathrm{UPB^1J}$; °सहसहस्रेण $\mathrm{G_1}$ **6.4** °न्नियमयतीति ] $\mathrm{UPB^1J}$; °न्नियतीति $\mathrm{G_1}$ **7.1** दशरथमुदयार्थं राज्यार्थं ] *conj.*; दशरथमुदयायोदयार्थं $\mathrm{G_1UB^1J}$; दशरथमुदयायोदयार्थं राज्यार्थं P **7.1** यत्नं कुर्वाणं ] *conj.*; यतमानं यत्नं कुर्वाणं $\mathrm{G_1UPB^1J}$ **7.1** हरिणप्रधाने वने ] *conj.*; मृगदावरतिर्मृगप्रधानो दावो वनं मृगदावः $\mathrm{UB^1}$; मृगदावरतिमृगप्रधानो दावो वनं मृगदावः $\mathrm{G_1}$; मृगदावरतिः हरिणप्रधाने वने P; मृगदावरतिमृगप्रयानो दावो वनं मृगदावः J **7.1** प्रीतिः ] *conj.*; तत्र रतिः प्रीतिः $\mathrm{UG_1B^1J}$; रतिः प्रीतिः P **7.2** न जहार ] J; तं न जहार $\mathrm{G_1UB^1}$; तं न जहार नाहरत् P **7.2** द्यूतं ] *conj.*; दुरोदरं द्यूतं $\mathrm{G_1UPB^1J}$ **7.2** मद्यं ] *conj.*; मधु मद्यं शशिप्रतिमाभरणं $\mathrm{G_1UPB^1J}$ **7.2** °बिम्बालङ्करणं ] $\mathrm{G_1UJ}$; °बिम्बाफरणं शशिप्रतिमायुक्तत्वम् P; °बिम्बालङ्कार+ण+म् $\mathrm{B^1}$ **7.3** नूतनतारुण्या वल्लभा ] *conj.*; नवयौवनाः प्रियतमा $\mathrm{G_1UPB^1J}$ **7.4** °द्यूत° ] $\mathrm{G_1UPB^1}$; °द्यूतन° J **7.4** कामजातानि ] P; कायजातानि $\mathrm{G_1UB^1J}$ **8.1** इन्द्रे ] $\mathrm{G_1UPB^1}$; इन्द्रो J **8.1** दशरथेन ] *conj.*; तेन दशरथेन $\mathrm{G_1UPB^1J}$ **8.1** रुट् ] $\mathrm{G_1UB^1J}$; रुक् P

दीना गीर्नोक्ता। नर्मोक्तिष्वपि नासत्या वागीरिता। रिपुलोके ऽपि न दुष्टवर्णा वागीरिता। परुषाक्षरं क्रियाविशेषणत्वात्॥ ८॥

**उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः।**
**स हि निदेशमलङ्घयतामभूत्सुहृदयोहृदयः प्रतिगर्जताम्॥ ९॥**

तस्माद्रघुधुरन्धराद् दशरथादन्ये नृपा वृद्धिं नाशं चेत्युभयं प्रापुः, यस्मादाज्ञामनुतिष्ठतामसौ शोभनचेता अभूत्। स्पर्धमानानां तु शस्त्रखरचेताः॥ ९॥

क्षेपको ऽपि। निजदेशसमृद्धिं चाभिधाय लाघवाद्दिग्विजयमाह

**अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः।**
**जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः॥ १०॥**

---

**10** ] *om.* Ar.Nā.; placed after 12 in Hem.Jin. Note that the sequence of verses in this chapter varies considerably from this point on in the various commentators. Given the number of differences in verse-order, it would be confusing to present them in this apparatus: see instead the table in our notes. **10 a. स मेदिनीम्** ] $G_1UJB_1^MB_2^MB_3^MB_4^MB_7^M$Hem.Mall.; स मेधिनीम् $PD^MV^MB_5^ML^M$; वरूथिनीम् $B^1$ **10 c. हि** ] $G_1UPB^1JD^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Jin.; तु Mall.

---

**8.2 अक्रोधनेन दीना गीर्नोक्ता** ] *conj.*; वो कृपणा दिना वागीरिता $G_1$; नो कृपना दिना वागीरिता UJ; अक्रोधनेन कृपणा दीना गीः नोक्ता P; न कृपणा दीना वागीरिता $B^1$ **8.2 नर्मोक्तिष्वपि** ] *conj.*; परिहासकथासु नर्मोक्तिष्वपि $G_1UB^1J$; परिहासकथास्वपि नर्मोक्तिष्वपि P **8.2 नासत्या** ] *conj.*; न वितथा असत्या $G_1UPB^1J$ **8.2 रिपुलोके ऽपि** ] *conj.*; सपत्नजने रिपुलोके ऽपि $G_1PB^1J$; सपत्नजने रिपुलोके U **8.3 न दुष्टवर्णा वागीरिता। परुषाक्षरं** ] *conj.*; न च परुषाक्षरं $G_1B^1J$; न च परुषाक्षरमिति U; न परुषाक्षरं दुष्टवर्णा वागीरिता परुषाक्षरं P **8.3 क्रियाविशेषणत्वात्** ] *conj.*; क्रियाविशेषणत्वात् परुषाक्षरा वागीरिता $G_1UB^1J$; क्रियाविशेषणत्वात् परुषाक्षरा वाक् न ईरिता P **9.1 तस्माद्रघुधुरन्धराद्** ] *conj.*; तस्माद्रघूद्वहाद्रघुधुरबन्धनाद् $G_1U$; तस्माद्रघूद्वहाद्रघुधुरन्धराद् $PB^1$; तस्माद्रघोः ⁻⁻⁻ हाद्र(?)घुधुरोबंधनात् J **9.1 वृद्धिं नाशं चेत्युभयं प्रापुः** ] *conj.*; उदयमस्तमयं चेत्युभयमानशिरे प्रापुः $G_1UB^1J$; उदयमस्तमयं च वृद्धिं नाशं चेत्युभयमानशिरे प्रापुः P **9.2 यस्मादाज्ञामनुतिष्ठतामसौ शोभनचेता अभूत्** ] *conj.*; यस्मादाज्ञामनुतिष्ठतामसौ सुहृत् शोभनचेता अभूत् $B^1$; *om.* $G_1UJ$; यस्माद्दशरथ आज्ञामनुतिष्ठतां सुहृच्छोभनचेताः अभूत् P **9.2 स्पर्धमानानां** ] *conj.*; प्रतिगर्जतां स्पर्धमानानां $G_1UPB^1J$ **9.2 तु शस्त्रखरचेताः** ] *conj.*; त्वयोहृदयः शस्त्रखरचेताः $G_1UPB^1J$ **9.3 क्षेपको ऽपि** ] *conj.*; क्षपको पि $G_1UPB^1J$ **9.3 °द्धिं चाभिधाय** ] P; °द्धिमादाय $G_1UB^1J$ **9.3 लाघवाद्दि°** ] $UPB^1J$; लाघवान्दि° $G_1$

अधिज्यमारूढगुणं धनुर्यस्य सः, धनुरादायेत्यर्थः। दशरथ एकेनैव स्यन्दनेनाब्धिपर्यन्तां भुवं ≪जिगाय≫। किमर्थं सेनामग्रहीदित्याह यस्मात्केवलं चमू राजा जयतीति वाक्यमवोचत्। ≪हस्तिवती≫ तथा वेगेन खरा अश्वा यस्याः॥ १०॥

जघननिर्विषयीकृतमेखलाननुचितास्रुविलुप्तविशेषकान्।
स रिपुदारगणानकरोद्बलादनलकानलकाधिपविक्रमः॥ ११॥

दशरथो ≪वैश्रवणतुल्यपराक्रमः≫ शत्रुवनितासमूहान् शौर्यात् पतिवधादेवंविधान् ≪व्यधात्≫। कटिषु निवारिता रशना येषाम्, तथायोग्यनेत्राम्बुना क्षालितास्तिलका येषाम्, तथा न विद्यन्ते चूर्णकेशा येषां तान्॥ ११॥

---

**11 .** ] *om.* Mall.Ar.Nā.

---

**10.1** अधिज्यमारूढगुणं धनुर्यस्य सः ] P; *om.* $G_1UB^1J$ **10.1** धनुरादायेत्यर्थः ] *conj.*; धनुरादाय $G_1UB^1J$; धनुराधायेत्यर्थः P **10.1** दशरथ एकेनैव ] *conj.*; स एकेन $G_1UB^1J$; स दशरथ एकेनैव P **10.2** स्यन्दनेनाब्धिपर्यन्तां ] P; रथेनाब्धिपर्यन्तां $G_1UB^1J$ **10.2** जिगाय ] *conj.*; भुवमजयत् P; पृथिवीमजयत् $G_1UB^1J$ **10.2** सेनामग्रही° ] $UPB^1$; सेनामनुग्रही° $G_1J$ **10.2** केवलं ] $UPB^1$; केवल $G_1J$ **10.3** चमू ] *conj.*; चमूर्जयमघोषयत्° $G_1UPB^1$; चमू जयमघोषयत् J **10.3** जयतीति वाक्यमवोचत् ] P; जयतीति $G_1UB^1$जवतीति J **10.3** हस्तिवती ] *conj.* (cf. Jin.); कीदृशी चमूः गजवती गजा विद्यन्ते यस्याः $G_1B^1J$; कीदृशी चमूः गजवत् गजा विद्यन्ते यस्याः U; *om.* P **10.3** वेगेन खरा अश्वा ] *conj.* (cf. Jin.); जवेन तीव्राः खरा अश्वा $G_1UJ$; जवेन ⏑⏑गेन तीव्राः खरा हया P; जवेन तीव्राः खरा हया $B^1$ **11.1** दशरथो वैश्रवणतुल्यपराक्रमः ] *conj.*; स दशरथरलकाधिपो वैश्रवणस्तत्तुल्यो विक्रमः पराक्रमो यस्य सस्तथोक्तः $G_1$; स दशरथः अलकाधिपो वैश्रवणस्तत्तुल्यो विक्रमः पराक्रमो यस्य स(सः P) तथोक्तः $UPB^1J$ **11.1** शत्रुवनितासमूहान् ] *conj.*; रिपुदारगणाञ्शत्रुवनितासमूहान् $G_1UPB^1J$ **11.1** शौर्यात् ] *conj.*; बलाच्छौर्यात् $G_1UPB^1$; बलाः शौर्यात् J **11.1** पतिवधाद् ] $G_1UB^{pc}$; पतिवधेन P; प्रतिवधाद् $B^{ac}$; पत्तिवधाद् J **11.2** °विधान् व्यधात् ] *conj.*; °विधानकरोत् $UPB^1J$; °विधंनकरोत् $G_1$ **11.2** कटिषु ] *conj.*; कीदृशान् जघनेषु कटीषु $G_1^{pc}B^1J$; कीदृशान् जगनेषु कटिषु $G_1^{ac}$; कीदृशान् जघनेषु कटिषु $U^{pc}P$; कीदृशान् जघनेषु कटेषु $U^{ac}$ **11.2** निवारिता ] *conj.*; निर्विषयीकृता निवारिता $G_1UPB^1$; निर्विषयीकृता निर्यारिता J **11.2** रशना ] *conj.*; मेखला $G_1UB^1J$; मेखला रशना P **11.2** तथायोग्यनेत्राम्बुना ] *conj.*; अचेतनास्रुणा शोकवाष्पेण $G_1U$; तथानुचितेनास्रूणा अयोग्यनेत्राम्बुना P; तथा अचितेनास्रूणा शोकवाष्पेण $B^1$; *om.* J **11.3** क्षालितास्तिलका ] P; विलुप्ताः क्षालिता विशेषका $G_1U$; विलुप्ताः क्षालिता विशेषकास्तिलका $B^1$; *om.* J **11.3** तथा न विद्यन्ते चूर्णकेशा ] *conj.*; अविद्यमाना अलका $G_1UJ$; तथा अविद्यमाना न विद्यन्ते अलकाः चूर्णकेशाः P; तथा अविद्यमाना अलका $B^1$ **11.3** तान् ] *conj.*; ताननलकान् $G_1UPB^1J$

अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः ।
विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसम्पदः ॥ १२ ॥

रथगुप्तिमता सन्नद्धैकस्यन्दनेन महीं †तस्य धनुर्धरस्य जितवतः† समुद्रा एव विजयभेरीतां जग्मुः, यतो महाघोषाः। स चैकाकी। वैश्रवणतुल्याः सम्पदो यस्य। नरवाहनो राजविशेष इति केचित्॥ १२ ॥

स्फुरितकोटिसहस्रमरीचिना समचिनोत्कुलिशेन हरिर्यशः ।
स धनुषा युधि सायकवर्षिणा स्वनवता नवतामरसाननः ॥ १३ ॥

दशरथः सरसकमलवदनः सङ्ग्रामे चापेन यशः सञ्चिकाय, शरवर्षिणा सनादेन। इन्द्रो यथा वज्रेण यशः समचिनोत्। दीप्ता धाराणां सहस्रस्य भासो यस्य तेन, स्वनवता च। वज्रं केचिच्छतकोटि प्रपन्नाः, अन्ये सहस्रकोटि। अत्र पाठान्तरम्

---

**13 abc.** ] $G_1$UP$B^1$J$D^M$$V^M$$B_1^M$$B_2^M$$B_3^M$$B_4^M$$B_5^M$$B_7^M$$L^M$; शमितपक्षबलः (क्षपितपक्षबलः Jin.) शतकोटिना शिखरिणां कुलिशेन पुरन्दरः (हरिर्यथा $B_5^M$) । स शरवृष्टिमुचा धनुषा द्विषां $B_5^{Mvl}$**C** (in $B_5^M$ the alternative reading in the margin is introduced with यथा पाठं)

---

**12.1 रथगुप्तिमता** ] *conj.*; वरूथिना $G_1$U$B^1$J; वरूथिना रथगुप्तमतेन P **12.1 सन्नद्धैकस्यन्दनेन** ] *conj.*; सन्नद्धैकरथेन $G_1$UP$B^{1ac}$; सन्नद्धैकरथेन एकस्यन्दनेन $B^{3pc}$; सन्नद्धैकरथं न J **12.1 समुद्रा** ] *conj.* (cf. Jin.); अर्णवा $G_1$UP$B^1$; अर्णव J **12.2 विजयभेरीतां** ] *conj.*; विजयदुन्दुभितां $G_1$U$B^1$; विजयदुन्दुभितं विजयभीरितां P; वेजयदुंःदुभितां J **12.2 जग्मुः** ] UP$B^{1ac}$J; ययुः $G_1^{pc}$; ययुरर्णवा घ $G_1^{ac}$; +ययुः+ जग्मुः $B^{3pc}$ **12.2 महाघोषाः** ] *conj.*; घनरवाः महाघोषाः $G_1$UP$B^1$; घनरवाः महाघोषः J **12.3 वैश्रवणतुल्याः सम्पदो यस्य। नरवाहनो राजविशेष इति केचित्** ] *em.*; नरवाहनो राजराजस्तस्येव सम्पद्यस्य $G_1$U$B^1$J; वैश्रवणतुल्याः सम्पदो यस्य नरवाहनो राजविशेषा इति केचित् P **13.1 दशरथः** ] *conj.*; स दशरथः $G_1$UP$B^1$J **13.1 सरसकमलवदनः** ] $G_1$UP$B^1$; सुरसकलमलावदनः J **13.1 सङ्ग्रामे** ] *conj.*; युधि सङ्ग्रामे $G_1$UP$B^1$J **13.1 चापेन** ] *conj.*; धनुषा चापेन $G_1$P; धनुषा U$B^{1ac}$J; धनुषा +चापेन+ $B^{3pc}$ **13.1 सञ्चिकाय** ] *conj.*; समचिनोत् सञ्चिकाय $G_1$P$B^1$J; समचिनो सञ्चिकाय U **13.1 शरवर्षिणा** ] *conj.*; सायकवर्षिणा $G_1$J; सायकवता Uसायकवर्षिणा शरवर्षिणा P$B^1$ **13.2 सनादेन** ] *conj.*; स्वनवता सनादेन $G_1$UP$B^1$; सुनवता सनादेव J **13.2 इन्द्रो** ] *conj.*; हरिरिन्द्रो $G_1$UP$B^1$J **13.2 वज्रेण** ] *conj.*; कुलिशेन वज्रेण $G_1$UP$B^1$J **13.2 दीप्ता धाराणां सहस्रस्य भासो** ] *conj.*; वज्रेण स्फुरिताः दीप्ताः कोटीनां धाराणां सहस्रस्य मरीचयो भासो $G_1$U; वज्रेण स्फुरितकोटिसहस्रमरीचिना स्फुरिताः दीप्ताः कोटीनां धाराणां सहस्रस्य मरीचयो भासो P$B^1$; वज्रेण स्फुरिता दीप्तः कोटीनां धाराणां सहस्रस्य मरीचयो भासः J **13.3 वज्रं केचिच्छतकोटि प्रपन्नाः, अन्ये सहस्रकोटि** ] *em.*; वज्रं केचिच्छतकोटि प्रपन्ना अन्ये सहस्रकोटिम् P; *om.* $G_1$U$B^1$J

शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरन्दरः।
स शरमुष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः॥ 6
नवेत्यनेनास्य भयाभाव उक्तः॥ १३॥

चरणयोर्नखरागसमृद्धिभि-
मुकुटरत्नमरीचिभिरस्पृशन्।
नृपतयः शतशो मरुतो यथा
शतमखं तमखण्डितपौरुषम्॥ १४॥

मुकुटमणिमयूखैः सहस्रसङ्ख्या नृपास्तं पादयोरस्प्राक्षुः। देवा इव वासवम्। चरणजरक्तत्वतुल्यकान्तिभिः। अहीनविक्रमम्॥ १४॥

निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन्।
समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीम्॥ १५॥

अथ दशरथो बृहत्समुद्रतटपर्यन्तान् नगरीं प्रत्याययौ, रिपुदारगणान् चूर्ण-

---

**14 d.** शतमखं ] $G_1UPJV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$𝕮; शतमुखं $B^1L^M$; शतं मुखं $D^M$(unmetrical) • °पौरुषम् ] $G_1UB^1JD^MB_1^MB_3^MB_5^MB_7^ML^M$Hem.Mall.Ar.Nā.; °विक्रमम् P $V^MB_2^MB_4^M$Jin. **15 d.** °नलकानलकान° ] $G_1UPB^1D^MV^MB_1^MB_2^MB_3^{Mpc}B_4^MB_5^MB_7^{Mpc}L^M$𝕮; °नलकानकान° $B_3^{Mac}$; °नकानलकान° $B_7^{Mac}$; °नकलानकलान° J

---

**13.5** शमितपक्षबलः शत° ] $G_1PB^1$; शमितपक्षज्वलच्छत° U; शसितपक्षबलः शत° J **13.5** पुरन्दरः ] $G_1^{pc}UPB^1J$; पुरन्दराः $G_1^{ac}$ **13.6** °मुष्टिमुचा ] $G_1PB^1$; °मष्टिमुचा U; °मुष्टिसुचा J **13.6** °तामरसाननः ] $G_1U$; °तामरसाननः। इति $PB^1$; °तामुरसाननः J **13.7** नवेत्यनेनास्य भया° ] $G_1PB^1$; नवेत्यनेनास्योभया° U; नवेद्यतेनास्य भया° J **14.1** पादयोरस्प्राक्षुः ] $G_1UB^1J$; पादयोर्विषये अस्प्राक्षुः P **14.1** इव वासवम् ] $G_1PB^1J$; इवासवम् U **14.2** चरणजरक्तत्वतुल्यकान्तिभिः ] *conj.*; नखानां रागो (रागं UJ) रक्तत्वं तत्समा ऋद्धिः कान्ति (कान्तिः U) सम्पत् येषां तैः $G_1UB^1J$; नखानां रागो रक्तत्वम् तत्समा ऋद्धिः कान्तिः सम्पत् येषां तैः करणजरक्तत्वतुल्यकान्तिभिः इ(?)त्यर्थः P **14.2** अहीनविक्रमम् ] *conj.*; अखण्डितपौरुषमहीनविक्रमम् $G_1B^1J$; अखण्डितपौरुषमहीनपराक्रमम् U; अखण्डितपौरुषं अहीनं पौरुषं विक्रमं यस्य सः P **15.1** दशरथो ] U; स दशरथः $G_1PB^1J$ **15.1** बृहत्समुद्रतटपर्यन्तान् ] *conj.*; महार्णवरोधसः समुद्रतटपर्यन्तात् $G_1B^1J$; महार्णवरोधसः बृहत्समुद्रतटपर्यन्तात् P **15.1** नगरीं प्रत्याययौ ] *conj.*; पुरीं नगरी नववृते प्रत्याययौ $G_1$; पुरीं नगरीं निववृते प्रत्याययौ $UPB^1J$ **15.1** रिपुदारगणान् ] *conj.*; सपत्नपरिग्रहान्रिपुदारान् $G_1UB^1J$; सपत्नपरिग्रहान्रिपुदारगणान् P

केशरहितान् दयित्वा। सहायैर्विधापिताः शिशूनां पुत्राणामञ्जलयो येषां तान्। चरणगतान् प्रणमतः शिशून्दृष्ट्वेत्यर्थः। ≪धनदपुरीवद्≫ उत्कृष्टाम्। जघननिर्विषयीकृतेत्यनेन यमकसारूप्याद् विरलो ऽस्य पाठः॥ १५॥

उपगतो ऽपि च मण्डलनाभितामनुचितान्यसितातपवारणः।
श्रियमवेक्ष्य स रन्ध्रचलामभूदनलसोऽनलसोमसमद्युतिः॥ १६

दशरथ एवंविधो ऽपि श्रियं छिद्रेष्वस्थिरामालोक्य जागरूको ऽभूत्, उद्युक्तो ऽभूत्, विजिगीषुत्वात्। द्वादशराजात्मकस्य चक्रस्य नाभिस्थानीयत्वं प्राप्तो ऽपि। यदुक्तम्

नेमिमेकान्तरान् राज्ञः कृत्वा राष्ट्रान्तरे पुरीम्।
नाभिमात्मानमायच्छेद्राजा प्रकृतिमण्डले॥ इति।

अत एवा≪योग्य≫मन्येषां श्वेतच्छत्त्रं यस्मिन्। †अनलसोमसमा द्युतिर्यस्य†।

---

**16 b.** °नुचिता° ] $G_1UPB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Jin.; °नुदिता° Hem.Mall. Ar.Nā. **16 c.** ] $G_1UPB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Jin.; अजितमस्ति नृपास्पदमित्यभूद् Hem.Mall.; न जितमस्ति नृपास्पदमित्यभूद् Ar.Nā.

---

**15.4** जघननिर्विषयीकृतेत्यनेन *Raghuvaṃśa* 9:11.

**16.5** Cf. *Arthaśāstra* 6.2.39: नेमिमेकान्तरान् राज्ञः कृत्वा चानन्तरान् अरान्। नाभिमात्मानमायच्छेन् नेता प्रकृतिमण्डले॥

---

**15.2 चूर्णकेशरहितान्** ] *conj.*; अनलकान्मुक्तकेशरहितान् $G_1UB^1J$; अनलकान् चूर्णकेशरहितान् P **15.2 दयित्वा** ] *conj.*; समनुकम्प्य अनुकम्पित्वा $G_1UB^1J$; समनुकम्प्य दयित्वा P **15.2 सहायैर्विधापिताः** ] *conj.*; सचिवैः कारिता $G_1U$; सचिवैसहायैः कारिताः विधायिताः P; सचिवैः कारित $B^1$; सचिवैः कारित्वा J **15.2 शिशूनां पुत्राणामञ्जलयो** ] P; बालसुताञ्जलयो $G_1UB^1J$ **15.3 चरणगतान्** ] $G_1UPB^1$; रचनतान् J **15.3 प्रणमतः** ] $PB^1$; प्रणतश् $G_1J$; प्रणताञ् U **15.3 धनदपुरीवद् उत्कृष्टाम्** ] *conj.*; पुरीं कीदृशीम् अलकानवमाम् अलका धनदपुरी तद्वदनवमामुत्कृष्टाम् $G_1UB^1JP$ **15.4 जघननिर्विषयीकृतेत्यनेन** ] $UPB^1J$; जगननिर्विषयीकृतेद्यनेन $G_1$ **15.4 यमक°** ] $G_1PB^1J$; यम° U **16.1 दशरथ** ] *conj.*; स दशरथः $G_1UPB^1J$ **16.1 छिद्रेष्वस्थिरामालोक्य** ] *conj.*; रन्ध्रेषु छिद्रेषु चलामस्थिरामालोक्य $G_1UPB^1J$ **16.1 जागरूको ऽभूत्** ] *conj.*; अनलसो जागरूकः अभूत् $G_1UPB^1$; अनलसो जागरूपः अभूत् J **16.2 उद्युक्तो ऽभूत्** ] P; *om.* $G_1UB^1J$ **16.2 विजिगीषुत्वात्** ] $G_1PB^1J$; जिगीषुत्वात् U **16.2 द्वादशराजात्मकस्य** ] *conj.*; मण्डलस्य द्वादशराजात्मकस्य $G_1UPB^1J$ **16.4 °कान्तरान्** ] *em.*; °कान्तरं $UPB^1$; °कान्तरा $G_1J$ **16.4 राष्ट्रान्तरे** ] P; राष्ट्रे ऽन्तरे $G_1UB^1J$ **16.5 °मण्डले** ] $G_1^{pc}UB^1J$; °मण्डलै $G_1^{ac}$; °मण्डल P **16.6 °योग्यम्** ] *conj.*; °नुचितम् $G_1UB^1PJ$ **16.6 °च्छत्त्रं** ] *conj.* (cf. Jin.); सितातपवारणं श्वेतपत्त्रं $G_1UB^1PJ$ **16.6 °सोमसमा** ] $B^1$; °सोमसम° $G_1UPJ$

रिपूणामसावग्निवद्दीप्रः, अन्येषां तु शशिनिभकान्तिः। राजचक्रस्य त्वयं विभागः—

अरिर्मित्रमरेर्मित्रं मित्रामित्रमतः परम्।
तथारिमित्रमित्रं च विजिगीषोः पुरः स्थिताः॥
पार्ष्णिग्राहो मतः पश्चादाक्रन्दस्तदनन्तरम्।
आसारः पार्श्वयोश्चैव विजिगीषोस्तु मण्डले॥
अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः।
अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे॥
मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः।
अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः॥

तत्र नाभिस्थानीयो विजिगीषुः। तस्याग्रतो ऽरिः। मित्रमरिमित्रं मित्रमित्रमरिमित्रमित्रं च। पृष्ठे त्वस्य पार्ष्णिग्राहः पार्ष्णिग्राहासार आक्रन्द आक्रन्दासारः। अरिविजिगीषोस्तु भूम्यन्तरः संहतयोरनुग्रहे व्यस्तयोर्वधे समर्थो मध्यमः। यस्त्वरिविजिगीषुमध्यमानां मण्डलाद्बहिर्बली संहतानामनुग्रहे व्यस्तानां च वधे समर्थः स उदासीन इति। अत एव नाभिस्थानीयत्वादनुचितान्यसितातपवारण इत्युक्तम्॥ १६॥

---

**16** **अनुग्रहे संहतयोः ··· बलाधिकः** ] *om.* P(eyeskip)

---

**16.16** **अरिर्मित्रम्··· वधे प्रभुः** *Kāmandakīyanītisāra* 8:16–19.

---

**16.7** **°मसावग्निवद्दीप्रः** ] UP; °मसावग्निवद्दीप्तः $G_1B^1$; °मग्निवद्दीप्रः J **16.7** **शशिनिभकान्तिः** ] P; शशिनिभः $G_1B^1J$; शशिप्रभः निभः U **16.8** **राजचक्रस्य त्वयं विभागः** ] $PB^1$; *om.* $G_1UJ$ **16.10** **स्थिताः** ] *em.*; स्थितः $G_1UB^1J$; स्मृतः P **16.11** **°ग्राहो मतः** ] $B^1$; °ग्राहमतः $G_1UJ$; °ग्राहस्ततः P **16.12** **आसारः** ] $G_1UB^1J$; आसारो P **16.13** **मध्यमो** ] $G_1PJ$; मध्यस्थो U; मध्यमे $B^1$ **16.14** **अनुग्रहे संहतयोः समर्थो** ] $G_1UJ$; ग्रहे संहतरोधोः समर्थ° $B^1$(unmetrical) **16.16** **संहतानां** ] $PB^1$; संह्रतानां $G_1UJ$ **16.16** **च** ] $G_1PB^1J$; *om.* U(unmetrical) **16.17** **नाभिस्थानीयो** ] $G_1UPJ$; नाभस्थानीयो $B^1$ **16.17** **मित्रमरिमित्रं** ] $G_1PB^1J$; *om.* U **16.18** **मित्रमित्रमरिमित्रमित्रं च** ] $B^1$; मित्रमित्रमरिमित्रं च $G_1J$; मित्रं मित्रमरिमित्रं च U; मित्रामित्रमरिमित्रमित्रं च P **16.18** **पृष्ठे** ] $G_1PB^1$; पृष्ठ U; पृष्टे J **16.20** **अरिविजिगीषोस्तु भूम्यन्तरः संहतयोरनुग्रहे व्यस्तयोर्वधे समर्थो मध्यमः। यस्त्वरिविजिगीषुमध्यमानां** ] *em.*; अरिविजिगीषुमध्यमानां $G_1UB^1$; अरिविजिगीष्वोस्तु भूम्यन्तरः संहतयोरनुग्रहे व्यस्तयोर्वधे समर्थो मध्यमः यस्त्वरिविजिगीषुमध्यमानां P; अरिविजिगीषु मंध्यमानां J **16.20** **°हिर्बली** ] $G_1UPJ$; °हिर्बलीं $B^1$ **16.20** **संहतानामनुग्रहे** ] $G_1PB^1$; संहतानामग्रहे U; असंहतानामनुग्रहे J **16.21** **च वधे** ] $UB^1$; च वधेस् $G_1J$; तु वधे P **16.22** **°स्थानीयत्वाद्** ] $G_1UB^1$; °स्थापनीयत्वाद् P; °स्थानीयत्वात् द् J **16.22** **°वारण** ] $UB^1$; °वार $G_1J$; °वारणम् P

तमलभन्त पतिं पतिदेवताः
शिखरिणामिव सागरमापगाः ।
मलयकोसलकेकयशासिनां
दुहितरो ऽहितरोपितमार्गणम् ॥ १७ ॥

मलयाख्यो ऽद्रिः, कोसलकेकयास्तु जनपदविशेषाः। तेषामधिपानां सुताः सुमित्राकौसल्याकैकेय्यो नृपं भर्तारं प्रापुः। नगनद्य इवार्णवम्। ≪अरिनिखातशरम्≫। तास्तु साध्व्यः॥ १७॥

प्रियतमाभिरसौ तिसृभिर्बभौ
तिसृभिरेव भुवं सह शक्तिभिः ।
उपगतो विनिनीषुरिव प्रजा
हरिहयो ऽरिहयोगविचक्षणः॥ १८ ॥

दशरथस्तिसृभिर्वल्लभाभिर्बभासे। उत्प्रेक्ष्यते—शक्र इव तिसृभिः शक्तिभिः प्रभुमन्त्रोत्साहरूपाभिरेव सह, प्रजा विनेतुं पालयितुमिच्छुः, भूमिं प्राप्तः। यतो ऽसौ विपक्षक्षपकेषूपायेषु प्रवीणः। अरिहेति क्विप्॥ १८॥

---

**17 c.** मलय° ] ŚJin.; मगध° Hem.Mall.Ar.Nā.

---

**17.1** मलयाख्यो ऽद्रिः ] $G_1PB^1J$; मलख्योद्रि U **17.1** तेषाम् ] $G_1B^3J$; तेषाम् तेषाम् U; तेषां शासिनो ऽधिपाः P **17.1** सुताः ] *conj.*; दुहितरः $G_1^{ac}UB^{3ac}J$; दुहितराः $G_1^{pc}$; दुहितरः सुताः $PB^{3pc}$ **17.2** सुमित्राकौसल्याकैकेय्यो ] $PB^{3ac}J$; सुमित्राकैकेय्याः $G_1U$; --- सल्याकैकेय्यः $B^1$; सुमित्राः कौसल्याकैकेय्यः $B^{3pc}$ **17.2** नृपं ] *conj.*; तं नृपं $G_1UP^{ac}B^{1ac}J$; तं नृपं +---+ $P^{pc}$; तं नृपं दशरथं $B^{3pc}$ **17.3** अरिनिखातशरम् ] *conj.*; अहितानामरीणां रोपितमार्गणाः शराः येन तम् $G_1UJ$; अहितानामरीणां रोपिताः निखाताः मार्गणाः शराः येन तम् P; अहितानामरीणां रोपिता +मा+र्गणाः शराः येन तम् $B^3$ **17.3** साध्व्यः ] *conj.*; पतिदेवताः साध्व्यः $G_1UPB^3J$ **18.1** दशरथस् ] $B^{1ac}$?; असौ दशरथस् $G_1PJ$; असौ दशः U; +असौ+ दशरथः $B^{3pc}$ **18.1** तिसृभिर्वल्लभाभिर्बभासे ] *conj.*; तिसृभिः प्रियतमाभिर्बभौ $G_1UPB^1J$ **18.1** शक्र ] *conj.*; हरिहयः शक्र $G_1UPB^1J$ **18.2** °मन्त्रोत्साह° ] $UPB^1J$; °मन्त्रोत्सह° $G_1$ **18.2** विनेतुं ] *conj.*; विनिनीषुः विनेतुं $G_1UB^1J$; विनिनेषुः विनेतुं P **18.2** भूमिं प्राप्तः ] *conj.*; भुवं भूमिमुपगतः $G_1UB^1J$; भुवं भूमिमुपगतः प्राप्तः P **18.3** यतो ऽसौ ] *conj.*; यतो सौ इहयोगविचक्षणः $G_1$; यतो सावरिहयोगविचक्षणः UPBJ **18.3** विपक्षक्षपकेषूपायेषु प्रवीणः ] *conj.*; अरिहेषु विपक्षक्षपकेषु योगेषु उपायेषु विचक्षणः प्रवीणः $G_1UPB^1J$

क्रतुषु तेन विसर्जितमौलिना
भुजसमाहृतदिग्वसुना कृताः।
कनकयूपसमुच्छ्रितिशोभिनो
वितमसा तमसासरयूतटाः॥ १९ ॥

दशरथेन कृतदारेणाध्वरेषु तमसासरय्वोर्नद्योस्तटाः, सुवर्णेन च्छुरिता यज्ञपशुबन्धनकाष्ठास्तेषां समुच्छ्रायेण रम्या विहिताः। ≪कल्पितकेशेन≫। दीक्षितेन हि मुण्डितेन भाव्यम्। भुजाभ्यां ढौकितं दिग्भ्यो धनं येन। तथा विगतं तमः, अज्ञानं लोभो वा, यस्य॥ १९ ॥

अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम्।
अधिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः॥ २० ॥

अष्टमूर्तिरीशो यज्ञाय गृहीतनियमं ≪दशरथशरीरम्≫ अधितिष्ठन्, तदेवादी-

---

**19 b.** °समाहृत° ] ŚHem.Mall.Ar.Nā.; °समाहित° $B_1^{Mac}$Jin. **19 c.** °समुच्छ्रिति° ] $G_1^{pc}B^1V^MB_1^{Mpc}B_3^MB_5^{Mpc}$; °समुच्छ्रित° $G_1^{ac}UPJD^MB_1^{Mac}B_2^MB_4^MB_5^{Mac}B_7^ML^M$; °समुच्छ्र-य° $\mathfrak{C}$

---

**19.1** दशरथेन ] *conj.*; तेन दशरथेन $G_1$UPBJ **19.1** कृतदारेणाध्वरेषु ] *conj.*; कृतदारेण क्रतुष्वध्वरेषु $G_1$UPB **19.1** तमसासरय्वोर्नद्योस्तटाः ] *conj.*; तमसासरयूतटाः तमसासरय्वोर्नद्योस्तटाः $PB^1$; तमसासरयूतटाः तमसासरय्वोनद्योस्तटाः $G_1$J; तमसासरयूतटाः तमसासरय्वोर्नदीस्तटाः U **19.1** सुवर्णेन ] P; कनकेन सुवर्णेन $G_1UB^1J$ **19.2** यज्ञपशुबन्धनकाष्ठास्तेषां ] *conj.*; यूपाः कनकयूपाः तेषां $G_1UB^1J$; यूपाः कनकयूपाः यज्ञपशुबन्धनकाष्ठास्तेषाम् P **19.2** समुच्छ्रायेण ] *conj.*; समुच्छ्रतिस्समुच्छ्रायः तेन $G_1$; समुच्छ्रितिः समुच्छ्रायः तेन $UB^1J$; समुच्छ्रायेन $P^{pc}$; समुच्छ्रायेने $P^{ac}$ **19.2** रम्या विहिताः ] P; शोभिनो रम्याः कृताः विहिताः $G_1^{pc}$UJ; शोभिनो रम्याकृताः विहिताः $G_1^{ac}B^1$ **19.2** कल्पितकेशेन ] *conj.* (cf. Jin.); विसर्जिताः कल्पिताः मौलयः केशाः येन $G_1UPB^1J$ **19.3** ढौकितं ] *conj.*; समाहृतं ढौकितं $PB^{1pc}$; समाहृते ढौकितं $G_1$UJ; समाहृतो ढौकितं $B^{1ac}$ **19.3** दिग्भ्यो ] $G_1UB^1J$; दिद्ब्ये (?) P **19.3** धनं ] *conj.*; वसु धनं $G_1UPB^1J$ **19.3** येन ] $G_1PB^1J$; *om.* U **19.3** विगतं ] *conj.*; वितमसा विगतं $G_1UPB^1J$ **19.4** अज्ञानं ] $G_1UB^1J$; अज्ञानो P **19.4** यस्य ] $G_1UB^1J$; यस्य तेन P **20.1** अष्टमूर्तिरीशो ] *conj.*; ईश्वरो ऽष्टमूर्तिर् $G_1UB^3$J; ईश्वरो ऽष्टमूर्तिः ईशो P **20.1** यज्ञाय गृहीतनियमं ] *conj.*; अध्वरदीक्षितां $G_1UB^3J^{pc}$; ऽध्वरदीक्षितां यज्ञाय गृहीतनियमं P; अध्वरदीक्षितां ×मसमभास ×J **20.1** दशरथशरीरम् ] *conj.* (cf. corrupt text of Jin.); नृपतनुम् $G_1UPB^3J$ **20.1** अधितिष्ठन् ] *conj.*; अधिवसन् $G_1UB^1J$; अधिवसन् अधितिष्ठन् P

दिपत्। दीक्षितं ह्युग्रः प्रविशतीत्यागमः। मृगचर्म वैशाखं च दधत्। दर्भरशनम् वाचंयमम्। †मृगशृङ्गस्य हरिणविषाणस्य तत्र वा स्वीकरणं यस्यास्ताम्†। तथोत्कृष्टकान्ति॥ २०॥

अवभृथप्रयतं नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः।
नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः॥ २१॥

दशरथः केवलं शक्राय यज्ञसमागताय प्रीतिवशादुच्चं मस्तकं यज्ञान्ताभिषेकेण शान्तमपि अनीनमत्। प्रशान्तः, ≪देवसमूहसमागमयोग्यः। तोयवर्षिणे≫॥ २१॥

---

**21 a.** °प्रयतं नियतेन्द्रियः ] $G_1UPB^1JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$; °प्रयतां नियतेन्द्रियस् $D^M$; °प्रयतो नियतेन्द्रियः Hem.Mall.Jin.; °प्रयतो निभृतेन्द्रियः Ar.(?)Nā.

---

**20** मृगशृङ्गस्य ··· यस्यास्ताम् ] *om.* $B^1$; added in margin by $B^3$

---

**20.2** दीक्षितं ह्युग्रः प्रविशतीत्यागमः cf. Vallabha ad 5:4.

---

**20.2** तदेवादीदिपत् ] *conj.*; अभासयददीदिपत् $G_1$; अभासयददिदीपत् $UB^1$; तेदेवाभासयददीदिपत् P; आमासयत् अदीदिपत् J **20.2** दीक्षितं ह्युग्रः प्रविशतीत्यागमः ] $G_1UB^1J$; ईश्वरस्योग्राख्या तनुर्यजमानमाविशति इत्यागमः P **20.2** मृगचर्म वैशाखं च दधत् ] *conj.*; कीदृशीम् मृगचर्म वैशाखं च दधतीम् $G_1UPBJ$ **20.3** दर्भरशनं ] *conj.*; कुशैर्मेखला यस्यास्ताम् $G_1UJ$; कुशैः दर्भैः मेखला रशना यस्य तम्P; कुशमेखला यस्यास्ताम् $B^1$ **20.3** वाचंयमम् ] *conj.* (cf. comJ); यता संयुता वाग्यस्यास्ताम् $G_1B^1$; यता संयता वाग्यस्यास्ताम् UPJ **20.3** तत्र वा स्वीकरणं ] $UB^1$; त ⏑̱ ⏑̱ स्वीकरणं $G_1$; तत्र वा परिग्रहं स्वीकरणं P; तत्रावा स्वीकरणं J **20.4** तथोत्कृष्टकान्ति ] *conj.*; तथा असमभासमुत्कृष्टकान्तिम् $G_1UPBJ$ **21.1** दशरथः ] *conj.*; स दशरथः $G_1UPB^1J$ **21.1** शक्राय ] *conj.*; नमुचेररये शक्राय $G_1UPB^1J$ **21.1** यज्ञसमा° ] *conj.*; यज्ञैस्समा $G_1UJ$; यज्ञमा° P; ज्ञसमा° $B^3$ **21.1** उच्चं मस्तकं ] *conj.*; उन्नतं शिरः $G_1UB^1J$; उन्नतं शिरः उच्चं मस्तकं P **21.2** यज्ञान्ताभिषेकेण शान्तमपि ] $G_1UJ$; अवभृथप्रयतमपि यज्ञान्ताभिषेकेण शान्तमपि P; अवभृथप्रयतमपि $B^1$ **21.2** अनीनमत् ] *conj.*; नमयति स्म अनेनमत् $G_1J$; नमयति स्म अनीनमत् U; नमयति स्म P; नमयति स्म अनीनमत् (अनेनमत् $B^{1ac}$) यज्ञान्ते भिषेकोऽवभृथः तेन प्रयतम् B **21.2** प्रशान्तः ] *conj.*; कीदृशो राजा नियतेन्द्रियः प्रशान्तः $G_1UPB^1J$ **21.2** देवसमूहसमागमयोग्यः ] *conj.*; सुरसमाजः सुरसमूहः तस्य समाक्रमणे योग्यः $G_1UB^1J$; सुरसमाजः सुरसमूहः तस्य समाक्रमणं समागमस्तेन P **21.3** तोयवर्षिणे ] *conj.*; कीदृशाय वनमुचे। तोयं मुञ्चति वर्षतीति तस्मै $G_1J$; कीदृशाय वनमुचे। वनं तोयं मुञ्चतीति तस्मै U; कीदृशाय शक्राय वनं तोयं मुञ्चति वर्षतीति तस्मै $PB^1$; कीदृशाय वनमुचे तोयं मुञ्चति वर्षतीति स्मै J

**तमपहाय ककुत्स्थकुलोद्वहं पुरुषमात्मभुवं च सतीव्रता।**
**नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु॥ २२॥**

†कमलेन सह पाणिपद्मो वर्तते यस्याः देवतायाः सा सकमला। सह कमलेन पाणिगतेन पद्मेन वर्तते या सेति वा देवता श्रीः।† दशरथं विष्णुं च वर्जयित्वा ≪अपरं≫ कं पार्थिवमभजत। न कंचिदित्यर्थः। साध्व्या इव व्रतं यस्याः। साध्वी किल नान्यं कामयते। ≪याचकेषु≫ अविद्यमानं कार्पण्यं यस्य यस्माद्वा॥ २२॥

**स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य नराधिपः।**
**स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः॥ २३॥**

दशरथः शक्रस्य रणशिरसि साहायकमासाद्य, अप्सरस उन्नतं निजदोष्णोर्बलमजीगपत्। ≪बाणै≫रपनीतासुरत्रासाः। गायतेरुभयकर्मता। किलेत्याग-

---

**22 a.** ककुत्स्थ° ] $PV^MB_2^MB_4^MB_5^ML^M$**℄**; ककुस्थ° $G_1B^1JB_1^MB_3^MB_7^M$; कुकुत्स्थ° U; ककुत्स° $D^M$ • °कुलोद्वहं ] Ś; °कुलोद्भवं **℄** **22 b.** °भुवं च सतीव्रता ] $G_1^{pc}UPB^{1pc}J$ $D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$; °भुवं च सतीव्रिता? $G_1^{ac}$; °भुवं च सतीव्रतां $B^{ac}$; °भुवं च पतिव्रता **℄** **23 b.** नराधिपः ] Σ; महारथः **℄** **23 c.** °च्छ्रितं ] Σ; °द्धृतं Jin.

---

**22.1** पाणिपद्मो ] $G_1PB^1J$; पद्मो U **22.1** सा ] $U^{pc}PB^{1pc}$; स $G_1U^{ac}B^{1ac}J$ **22.2** पाणिगतेन ] $G_1^{pc}PB^3J$; पाणि×पद्मो×गतेन $G_1$ **22.2** सेति वा ] $G_1B^1J$; सा इति व U; सेति वा सकमला P **22.3** दशरथं विष्णुं च वर्जयित्वा ] *conj.*; तं ककुस्थकुलोद्वहं दशरथमात्मभुवं पुरुषं विष्णुं चापहाय वर्जयित्वा $G_1B^1J$; तं कुकुत्स्थकुलोद्वहं दशरथमात्मभुवं पुरुषं विष्णुं चापहाय वर्जयित्वा U; तं ककुत्स्थकुलोद्वहं दशरथमात्मभुवं पुरुषं विष्णुं चापहाय वर्जयित्वा P **22.3** अपरं कं पार्थिवमभजत ] *conj.*; अन्यं कं नृपमसेवत $G_1UPB^1J$ **22.3** न कंचिदित्यर्थः ] P; नान्यं पार्थिवमभजतेत्यर्थः $G_1UB^1J$ **22.3** साध्व्या इव ] *conj.*; सतीव्रता सत्या इव $G_1UBJ$; सतीव्रता सत्या इव साध्व्या इव P **22.4** कामयते ] $G_1UPB^1$; कामयत J **22.5** याचकेषु अविद्यमानं कार्पण्यं यस्य यस्माद्वा ] *conj.*; कीदृशं दशरथमर्थिष्वलाघवमविद्यमानं लाघवं कार्पण्यं यस्य यस्माद्वा $G_1UPB^1J$ **23.1** दशरथः ] *conj.*; स नराधिपो दशरथः $G_1UPB^1$; स नराधिपो J **23.1** शक्रस्य ] *conj.*; मघवतः शक्रस्य $G_1UB^1J$; मघवतः इन्द्रस्य P **23.1** रणशिरसि ] *conj.*; संयुगमूर्ध्नि रणशिरसि $G_1UPBJ$ **23.1** साहायकमासाद्य ] *em.*; सहायतां साहायकं प्रतिपद्यासाद्य $G_1B^1J$; सहायतां सहायकं प्रतिपद्यास्वाद्य U; सहायकमासाद्य P **23.1** अप्सरस उन्नतं ] *conj.*; सुरवधूरप्सरसः उच्छ्रितमुन्नतं $G_1UPB^1$; सुरवधूः अप्सरसः उच्छ्रतमुन्नतं J **23.2** निजदोष्णोर्बलमजीगपत् ] *conj.*; स्वभुजवीर्यं निजदोष्णोर्बलमगापयत् अजीगपत्(°यत् $B^1$) $G_1UPB^1$; सुभुजवीर्यं निजदोष्णोन्वलमगापयत् J **23.2** बाणैरपनीतासुरत्रासाः ] *conj.* (cf. Jin.); शरैरवधूतभयाः अपनीतासुरत्रासाः $G_1UPBJ$

मे॥ २३॥

कथमवधूतभया इत्याह—

**असकृदेव हि तेन तरस्विना हरिहयाग्रसरेण धनुर्भृता।**
**दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम्॥ २४॥**

हि यस्मादर्थे। राज्ञेन्द्रपुरोयायिना चापधरेण सूर्याच्छादिकाः सङ्ग्रामधूलयो बहुश एव दैत्यानामसृजा शमिताः। बलवता॥ २४॥

अवधूतभयत्वहेतोरेव राज्ञो महिमानं प्रतिपाद्याधुना ऋतुराजवर्णनप्रसङ्गदानायाह—

**अथ महेन्द्रसमं कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम्।**
**उपययौ भुजगेन महीभृता समधुरं मधुरञ्चितविक्रमम्॥ २५॥**

अनन्तरं वसन्त आजगाम। उत्प्रेक्ष्यते—तं नृपश्रेष्ठं †नवैः कुसुमैः सेवितुमिव†। यतः शक्रतुल्यं तथा पृथिवीभृता नागेन, शेषेण वासुकिना वा, तुल्यभारम्,

---

**24 a.** असकृदेव हि तेन ] $G_1UPB^3JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Ar.(?)Nā.Jin.; असिकृदेव हि तेन $L^M$; असकृदेकरथेन Mall. **25 a.** महेन्द्रसमं ] Σ; समाववृते ℭ **25 c.** उपययौ भुजगेन महीभृता ] Σ; यमकुबेरजलेश्वरवज्रिणां ℭ

---

**25 a.** $B_5^M$ breaks off here after reading कुसुमैर्नवैः and resumes at 9:76b.

---

**23.4** कथमवधूतभया ] *conj.*; कथमित्यवधूतभया $G_1UPJ$; कथमित्यवधूतभय $B^1$ **24.1** हि यस्मादर्थे ] $G_1UPJ$; हिर्यस्मादर्थे $B^1$ **24.1** राज्ञेन्द्रपुरोयायिना ] *conj.* (cf. Jin.); तेन राज्ञा हरिहयस्येन्द्रस्याग्रसरेण पुरोयायिना $G_1UPB^1J$ **24.1** चापधरेण ] *conj.*; धनुर्भृता चापधरेण $G_1UPB^3J$ **24.1** सूर्याच्छादिकाः ] *conj.*; दिनकराभिमुखाः $G_1UB^1J$; दिनकराभिमुखाः सूर्याच्छादिकाः P **24.1** सङ्ग्रामधूलयो ] *conj.*; रणरेणवः सङ्ग्रामधूलयः $G_1B^1J$; रणरेणवः णवः सङ्ग्रामधूलयः U; रणरेणवः समरधूलयः P **24.2** बहुश एव ] *conj.*; असकृदेव बहुश एव $G_1UPB^1J$ **24.2** दैत्यानामसृजा ] *conj.*; सुरद्विषां रुधिरेण दैत्यानामसृजा $G_1UPBJ$ **24.2** शमिताः ] *conj.*; रुरुधिरे शमिताः $G_1UPB^1J$ **24.2** बलवता ] *conj.*; तरस्विना बलवतः $G_1$; तरस्विना बलवता $UPB^1$; तरस्विनः बलवतः J **24.3** प्रतिपाद्या° ] $G_1UB^1$; प्रतिपद्या° PJ **24.4** ऋतुराजवर्णनप्रसङ्ग° ] $B^1$; वसन्तवर्णनप्रसङ्ग° $G_1UJ$; ऋतुराजप्रसङ्गवर्णन° P **25.1** अनन्तरं ] *conj.*; *om.* $G_1UJ$; अथानन्तरं PB **25.1** वसन्त ] *conj.*; मधुर्वसन्तम् $G_1J$; मधुर्वसन्त $UPB^1$ **25.1** आजगाम ] *conj.*; उपययौ आजगाम $G_1UPB^1J$ **25.1** उत्प्रेक्ष्यते तं नृपश्रेष्ठं नवैः कुसुमैः सेवितुमिव ] *om.* P(eyeskip) **25.1** सेवितुमिव ] $G_1UJ$; सेवितुमिव वसन्त आजगाम B **25.2** यतः शक्रतुल्यं ] *conj.*; यतो महेन्द्रसमं शक्रतुल्यं $G_1UPB^1J$ **25.2** नागेन ] *conj.*; भुजगेन नागेन $G_1UPB^1J$ **25.2** वा ] $G_1PB^1J$; *om.* U **25.2** तुल्यभारम् ] *conj.*; समधुरं तुल्यभारम् $G_1UPB^1J$

तेनापि क्ष्माधारणात्। प्रशस्यपौरुषम्। अत एव †राजोरगत्वम् †। मधुश्चैत्रः, तेन वसन्तो लक्ष्यते॥ २५ ॥

कार्यानुमेयत्वादृतूनां तानेव वसन्तधर्मान्विस्तरेणाह—

हिमविवर्णितचन्दनपल्लवं विरहयन्मलयाद्रिमुदङ्मुखः।
विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः॥ २६ ॥

उत्तराभिमुखो रविर्मलयशैलं त्यजन् मन्थरं जगाम। दक्षिणायने हि भानुः शीघ्रगामी भवति। शकुन्तयोश्चक्रवाकयोर्दययेव शनैर्ययौ। दिनान्त आवश्यको वियोगो ययोः। उत्तरायणे हि रात्रिसङ्क्षेपान्नातिपीडितौ तावनुकम्पिताविव भवतः। यदि ह्यसौ क्षिप्रं यायात्, तद्दिनसमाप्त्या निशि तयोर्विरहो भवेत्। तुषारपाण्डूकृतमलयजकिसलयम्। अह्नो विरहो ऽहर्विरहः।

अत्र पाठान्तरम्।

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्॥

रथयुजा सारथिना हिमक्षपणाद्दिनमुखानि विमलीकुर्वन्॥ २६ ॥

---

**26 abcd.** ] ŚHem.Jin.; जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः। दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्॥ Vall.$^{vl}$ ℭ (Hem.Jin. give both verses without presenting one as the variant of the other).

---

**25.3 तेनापि** ] P$B^1$; तेन $G_1$UJ **25.3 प्रशस्यपौरुषम्** ] *conj.*; अञ्चितविक्रमं प्रशस्यपौरुषम् $G_1$U$B^1$J; अञ्चितविक्रमं प्रशस्यविक्रमम् P **25.3 राजोरगत्वम्** ] $G_1$UPJ; रजोरगत्वम् B **25.5 कार्यानु॰** ] $G_1$U$B^1$J; कलानु॰ P **26.1 उत्तराभिमुखो** ] *conj.*; उदङ्मुख उत्तराभिमुखो $G_1$UP$B^1$J **26.1 त्यजन्** ] *conj.*; विरहयंस्त्यजन् $G_1$UPBJ **26.1 मन्थरं जगाम** ] *conj.*; शनैर्मन्थरं ययौ जगाम $G_1$U$B^3$J; शनैर्जगाम P **26.2 शकुन्तयोश्चक्रवाकयोर्** ] *conj.*; विहगयोः शकुन्तयोश्चक्रवाकयोः $G_1$P$B^3$J; विहगयो शकुन्तयोः चक्रवाकयो U **26.2 दययेव** ] *conj.*; कृपया इव $G_1$UJ; कृपया दयया एव P; कृपया दययेव $B^3$ **26.2 दिनान्त** ] *conj.*; अहर्विरहे दिनान्ते $G_1$UP$B^3$J **26.2 आवश्यको** ] *conj.*; ध्रुव आवश्यको $G_1$UP$B^3$J **26.3 वियोगो ययोः** ] *conj.*; भेदो वियोगो ययोः $G_1$$B^3$J; भेदवियोगयोः U; भेदो वियोगो ययोस्तयोः पक्षिणोः चक्रवाकयोः दययेव मन्थरं जगाम P **26.4 उत्तरायणे हि रात्रिसङ्क्षेपान्नातिपीडितौ तावनुकम्पिताविव भवतः** ] P; *om.* $G_1$UP$B^1$J **26.4 यदि ह्यसौ** ] P; यद्यसौ $G_1$U$B^3$J **26.5 अह्नो** ] P$B^3$; अह्नौ $G_1$UJ **26.7 परिवर्तित॰** ] $G_1$PJ; परिवर्तत॰ U; परिवर्हित॰ $B^3$ **26.8 ॰निग्रहैर्विमलयन्** ] $G_1$P$B^1$; ॰विग्रहैर्विमलयं U; ॰विग्रहैर्विमलयन् J **26.9 हिमक्षपणाद्दिनमुखानि** ] $B^1$; हिमक्ष(क्षि $G_1^{ac}$)पणाद्रिमुखानि $G_1$U; निमनिग्रहैः हिमक्षपणाद्दिनमुखानि P; हिमक्षपणाद्रिमुखानि J **26.9 विमलीकुर्वन्** ] $G_1$UP; विशलीकुर्वन् $B^1$; विमुलीकुर्वन् J

कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् ।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् ॥ २७ ॥

वसन्तो वनभुवं ≪वृक्ष≫वतीमध्यास्येत्थं यथापरिपाटि प्रादुर्बभूव। प्रथमं पुष्पोत्पत्तिस्ततः सरसपर्णानि तत्पश्चाद्भ्रमरपिकरुतम्। प्रायेण हि तरूणां पुष्पोत्पत्तेरनन्तरं पल्लवसामग्री दृश्यते। तत आगन्तुकविहगपङ्क्त्याविर्भावः॥ २७॥

व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमम् ॥ २८ ॥

सूर्यः शीतं तुहिनं वा समस्तं निवारयितुं न खलु तावच्छक्तः। अतः स्वल्पं तद्विहितवान्। दशनक्षतैर्महद्भिर्ललनोष्ठैरसह्यम्। तथा कटिपूर्वभागेषु निवारिता रशना येन, आभरणानामतिशीतलत्वात्॥ २८॥

परभृता मदनक्षतचेतसः प्रियसखी लघुवागिव योषिताम् ।

---

**29 .** ] *om.* Mall.Ar.Nā. **29 a.** °चेतसः ] $G_1$UPV$^M$B$^1$B$_1^{Mpc}$B$_2^M$B$_3^M$B$_4^M$B$_7^M$L$^M$ (?); °चेतसा J; °चेतसाः D$^M$; °चेतसो B$_1^{Mac}$; °चेतसां L$^{Mpc}$Hem.Jin.

---

**27.1** वसन्तो ] *conj.*; मधुर् $G_1$UB$^1$J; मधुर्वसन्तो P **27.1** वनभुवं ] *conj.*; वनस्थलीं वनभूतं $G_1$; वनस्थलीं वनभुवं UPBJ **27.1** वृक्षवतीमध्यास्ये° ] *conj.* (cf. Jin.); द्रुमवतीमवतीर्य $G_1$UB$^1$J; द्रुमवतीमध्यास्य P **27.1** °त्थं यथापरिपाटि प्रादुर्बभूव ] *conj.*; इति यथाक्रमाविरभूत्प्रादुर्बभूव $G_1$B$^{1ac}$J; इति यथाक्रममाविरभूत् प्रादुर्बभूव UB$^{3pc}$; इति यथाक्रमं इत्थं यथापरिपाटि आविर्भूत्प्रादुर्बभूव P **27.2** पुष्पोत्पत्तिस्ततः ] *conj.*; कुसुमजन्म ततो $G_1$UB$^1$J; कुसुमजन्म पुष्पोत्पत्तिः ततो P **27.2** सरसपर्णानि ] *conj.*; नवपल्लवाः $G_1$ UB; नवपल्लवाः सरसपर्णानि P; वनपल्लवाः J **27.2** तत्पश्चाद् ] *conj.*; तदनु च $G_1$B$^1$J; तदनु U; तदनु तत्पश्चात् P **27.2** भ्रमरपिकरुतम् ] $G_1$UJ; षट्पदकोकिलकूजितम् भ्रमरपिकरुतम् P; षट्पदकोकिलकूजितम् B$^1$ **27.3** पुष्पोत्पत्तेरनन्तरं ] $G_1$UB$^1$J; पुष्पोत्पत्ते अनन्तरं P **27.3** पल्लव° ] $G_1$PB$^1$J; पल्ल° U **27.3** °विहग° ] $G_1$UPB$^1$; °विहंग° J **28.1** सूर्यः शीतं तुहिनं वा ] *conj.*; रविर्हिमशीतम् $G_1$J; रविर्हिमं शीतम् UB; सूर्यो हिमं शीतं तुहिनं वा P **28.1** समस्तं निवारयितुं ] *conj.*; अशेषमपोहितुं $G_1$UB$^1$; अशेषमपोहितुं समस्तं निवारयितुं P; अशेषमुपोहितुं J **28.1** तावच्छक्तः ] *conj.*; तावदलं शक्तः $G_1$UPB$^1$J **28.2** अतः स्वल्पं तद्विहितवान् ] *em.*; ततो विरल उत्पतवान् $G_1$J; ततो विरलं तत्कृतवान् UB$^1$; अ---स्वल्पं तद्विहितवान् P **28.2** दशनक्षतैर्महद्भिर्ललनोष्ठैरसह्यम् ] *conj.*; कीदृशं हिमम्। व्रणैर्दन्तक्षतैर्गुरवो ये प्रमदाधरास्तैर्दुःसहम् $G_1$UJ; कीदृशं हिमम्। व्रणैर्दशनक्षतैर्गुरवो ये प्रमदाधरास्तैर्दुःसहम् B; कीदृशं हिमम्। व्रणैर्दशनक्षतैः गुरवो महान्तो ये प्रमदाधरास्ते दशनेन्धैर्महद्भिर्ललनोष्ठैर्दुस्सहं P **28.2** कटिपूर्वभागेषु ] *conj.*; जगनेषु $G_1$; जघनेषु UB$^1$J; जघनेषु कटिपूर्वभागेषु P **28.2** निवारिता ] *conj.*; निर्विषयीकृता निवारिता $G_1$UPB$^1$J **28.3** रशना ] *conj.*; मेखला $G_1$UB$^1$J; मेखला रशना P

प्रियतमानकरोत्कलहान्तरे मृदुरवादुरवापसमागमान्॥ २९ ॥

कोमलध्वनिः कोकिला प्रणयरोषकृते व्यवधाने सति भर्तॄन् प्रियाणां सुलभसङ्गमान्व्यधात्। अनङ्गेन बाधितं मनो येषां तान्। न हि कामार्तेन विरहिणा कोमलकोकिलकूजितं सुसहम्। प्रियवचना प्रियवयस्या यथा। इष्टसखी हि विरहे समागमं कुरुते॥ २९ ॥

अभिनयान्परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा।
अमदयत्सहकारलता मनः
सकलिका कलिकामजितामपि॥ ३० ॥

आम्रमञ्जरी कोरकयुक्ता निर्द्वेषरागाणामपि ≪चेतो≫ व्यचीकरत्। कलेः कालविशेषस्य वा कामो ऽभिलाषो रागमयं जगदस्त्विति। ≪दक्षिणानिलघू-

**30** आम्रमञ्जरी ⋯ कलिकामजितामपि ] *om.* B$^{1ac}$

**29.1** कोमलध्वनिः कोकिला ] *conj.* (cf. Jin.); मृदुरवा कलरवा G$_1$UB$^1$J; मृदुरवा कोमलरवा कोकिला P **29.1** प्रणयरोषकृते व्यवधाने सति ] *conj.*; कलहान्तरे रतिकलहेन कृतान्तरे कृते व्यवधाने G$_1$B$^1$J; कलहान्तरे रतिकलहेन कृतान्तरे व्यवधा U; कलहान्तरे रतिकल--- कृतान्तरे रतिप्रणयरोषकृते व्यवधाने सति P **29.1** भर्तॄन् ] *conj.*; प्रियतमान् G$_1$UB$^1$J; प्रियतमान् भर्तॄन् P **29.1** प्रियाणां ] *conj.*; योषितां प्रियाणाम् G$_1$UPB$^1$J **29.2** सुलभसङ्गमान्व्यधात् ] *conj.*; अदुरवापसमागमान्सुलभसङ्गमानकरोत् G$_1$UB$^1$J; अदुरवापसमागमानकरोत् P **29.2** अनङ्गेन बाधितं मनो येषां तान् ] P; मदनक्षतकामेन क्षतं चेतो येषां तान् G$_1$J; मदनक्षतचेतसः कामेन क्षतं चेतो येषां तान् U; *om.* B$^1$ **29.2** कामार्तेन ] UPB$^1$; कामान्तेन G$_1$J **29.3** प्रियवचना प्रियवयस्या यथा ] *conj.*; लघुवाक्प्रियवचना प्रियवयस्या G$_1$UB$^3$J; लघुवाक् प्रियवचना प्रियवयस्या यथा P **29.4** इष्टसखी हि विरहे ] *em.*; इष्टसखी सा हि विरहे G$_1$B$^3$J; इष्टसखी सा हि विरहे सति U; इष्टसखी हि वि--- P **30.1** आम्रमञ्जरी ] *conj.*; सहकारलता आम्रमञ्जरी G$_1$UB$^3$J; सहक---लता आम्रमञ्जरी P **30.1** कोरकयुक्ता ] *conj.*; सकोरका कलिकामजितामपि कलिर्वैरं (कलिवैरं G$_1$) द्वेषः कामो रागः तौ जितौ यैस्तेषां G$_1$UB$^1$J; कोरकयुक्ता कलिकामजितामपि कलिर्वैरं द्वेषः कामो रागस्त---जयन्ति ये तेषां P **30.1** निर्द्वेषरागणामपि ] B$^3$; निर्द्वेषरागिणामपि G$_1^{pc}$J; निर्द्वेषरागिनामपि G$_1^{ac}$?; निर्देषरागिर(?)णामपि U; मुनीनामपि P **30.1** चेतो ] *conj.*; मनो ऽमदयद् G$_1$UPJ; मन अमदयद् B **30.2** व्यचीकरत्। कलेः कालविशेषस्य वा कामो ऽभिलाषो रागमयं जगदस्त्विति ] *conj.*; उन्मनीचकार G$_1$UB$^1$J; चेतो व्यचीकरत् कलेः कालविशेष---वा कामो ऽभिलाषो रागमयं जगदस्त्विति P

र्णितकिसलया≫। अतश्च हस्तान्—अभिनयार्थानि नाट्यानि—परिचितान् कर्तुमभ्यसितुं कृतप्रयत्नेव॥ ३०॥

नयगुणोपचितामिव भूपतेः
सदुपकारफलां श्रियमर्थिनः।
अभिययुः सरसो मधुसम्भृतां
कमलिनीमलिनीरपतत्रिणः॥ ३१॥

भ्रमरा जलशकुनयो हंसाद्याश्च सरसः पद्मिनीमाजग्मुः। किञ्जल्कपूर्णाम्। सरोग्रहणं स्थलनिवृत्त्यर्थम्। यादृशी हि जलकमलिनी स्फीता भवति, न तादृशी स्थलकमलिनी। यदि वा सरसः सकाशात् कमलिनीमुपययुरिति योज्यम्। यथा राज्ञो नीतिगुणैः स्फीतां श्रियं याचका आयान्ति, यतः साधूपकृतिरेव फलं यस्यास्ताम्॥ ३१॥

कुसुममेव न केवलमार्तवं
नवमशोकतरोः स्मरदीपनम्।
किसलयप्रसवो ऽपि विलासिनां

---

**31 c.** सरसो ] Σ; सरसां Jin. **31 d.** °नीर° ] ℭ; °नील° Ś

---

**30.3** दक्षिणानिलघूर्णितकिसलया ] *conj.* (cf. Jin.); कीदृशी। मलयमारुतेन कम्पितानि पल्लवानि यस्याः $G_1$UPBJ **30.3** अतश्च हस्तानभिनयार्थानि नाट्यानि ] *conj.*; अतश्चाभिनयान्हस्ताभिनयान् $G_1$BJ; अतश्च अभिनयान् U; अतश्चाभिनयान्हस्तानभिनयार्थानि नाट्यानि P **30.4** परिचितान् कर्तुमभ्यसितुं ] *conj.*; परिचेतुमभिसितुम् $G_1$; परिचेतुमव्यसिताम् U; परिचेतुमभ्यसितुम् $B^1$J; परिचेतुं परिचितान् कर्तुं अभ्यसितुं P **30.4** कृतप्रयत्नेव ] *conj.*; उद्यकृतप्रयत्ना $G_1$J; उदयमकृतप्रयत्ना U; उद्यता कृतप्रयत्ना इव P; उद्यता कृतप्रयत्ना $B^1$ **31.1** भ्रमरा ] *conj.*; अलयो भ्रमरा $G_1$UP$B^1$J **31.1** जलशकुनयो ] *conj.*; नीलपतत्त्रिणो जलशकुनयो $G_1$UP$B^1$J **31.1** हंसाद्याश्च ] $G_1$UJ; हंसाद्यश्च P; हंसास् $B^1$ **31.1** सरसः ] P; सरस $G_1$U; सुमनसः $B^3$; सरससंबंधिनीं J **31.1** पद्मिनीमाजग्मुः ] *conj.*; कमलिनीमभिययुराजग्मुः $G_1$U$B^1$J; पद्मिनीमभिययुः आजग्मुः P **31.1** किञ्जल्कपूर्णाम् ] *conj.*; मधुसम्भृतां किञ्जल्कपूर्णाम् $G_1$UP$B^1$J **31.3** सरसः ] U$B^3$J; सरस $G_1$; सरस--- P **31.3** कमलिनी° ] $G_1$U$B^3$J; पद्मिनी° P **31.4** राज्ञो ] *conj.*; भूपते राज्ञो $G_1$UP$B^1$J **31.4** नीतिगुणैः स्फीतां ] *conj.*; नयगुणैरुपचितां स्फीतां $G_1$P; नयगुणैर्नीतज्ञैर्गुणैरुपचितां स्फीतां U; नयगुणैर्नीतिगुणैरुपचितां स्फीतां BJ **31.4** श्रियं याचका ] P; श्रियमर्थिन $G_1$U $B^1$J **31.4** आयान्ति ] P$B^1$; आनयन्ति $G_1$UJ **31.4** साधूपकृतिरेव ] *conj.*; सदुपकृतिरेव $G_1$UJ; सदुपकारफलां साद्वूपकृतिरेव P; सदुपकारफलां सदुपकृतिरेव $B^1$

मदयिता दयिताश्रवणार्पितः॥ ३२॥

अशोकाख्यवृक्षस्य सम्बन्धि न केवलमृतुभवमनुपहतं सरसं पुष्पमेव कामाधिक्यकारकम्, यावत् प्रियायाः कर्णपूरीकृता पत्त्रोत्पत्तिरपि कामिनां मदकृत्॥ ३२॥

विरचिता मधुनोपवनश्रियामभिनवा इव पत्त्रविशेषकाः।
मधुलिहां मधुदानविशारदाः कुरवका रवकारणतां ययुः॥ ३३॥

कुरवकाख्यास्तरवो भ्रमराणां शब्दस्य हेतुभावं प्रापुः। यतो मकरन्दरसवितरणे चतुराः। मकरन्दरसं पीत्वा षट्पदा गुञ्जन्ति। तथा वसन्तनायकेनोद्यानलक्ष्मीणां प्रियतमानां नूतनाः पत्त्रमयास्तिलका इव कृताः। पुष्पधर्मा अत्र तरोरारोपिताः॥ ३३॥

दशनचन्द्रिकया व्यवभासितं
हसितमासवगन्धि मधोरिव।

**33 c.** मधुलिहां ] ŚMall.Jin.; मधुकृतां Hem.Ar.Nā. **34 .** ] *om.* Mall.Ar.Nā.

**32** Folio 99 of $G_1$ is missing, with the result that its text breaks off here at the end of the commentary on 9:32 and resumes at the end of the commentary on 9:39 below.

**66.3** कटितटसम्बद्धेषु ] P; जघ(जग $G_1^{ac}$)नाश्रयेषु कटितसम्बद्धेषु $G_1J$; जघनाश्रयेषु कटिसम्बन्धेषु U; जघनाश्रयेषु कटितटसम्बद्धेषु $B^1$ **66.3** तरुषु ] P; वृक्षेषु $G_1UB^1$; मृक्षेषु J **66.3** दशरथस्य बाणैः ] P; अस्य इषुभिः शरैः $G_1UB^1J$ **66.3** शीघ्रं ] P; सहसा शीघ्रं $G_1UB^1J$ **66.3** स्यूतं ] P; बद्धं स्यूतं $G_1UB^1J$ **66.3** लङ्घितं ] *conj.*; *om.* $G_1UB^1J$; लंघिनं P **66.3** स्वं ] P; आत्मानं $G_1UB^1J$ **66.4** नाज्ञासिषुरिति ] P; न विविदुः नाज्ञासिषुरिति $G_1UB^1J$ **67.1** दशरथेन ] *conj.*; तेन राज्ञा $G_1UB^1J$; दशरथः P **67.1** काननभवस्य सैरिभस्य ] P; वन्यस्य महिषस्य काननभवस्य सैर(सैरि $B^{1pc}$)भस्य $G_1UB^1J$ **67.1** धावन औत्सुक्यं ] P; अतिपाते धावने रभस औत्सुक्यं $G_1UB^1J$ **67.1** नयनरन्ध्र ] P; नेत्ररन्ध्रे $G_1B^1J$; नेत्ररन्ध्रेषु U **67.2** शरः क्षिप्तः ] P; शरो मुक्तः $G_1UB^1J$ **67.2** शीघ्रनिर्याणान्न रुधिरेण लिप्तं फलं यस्य सः ] *conj.*; न शोणितेन लिप्तं शल्यं फलं यस्य स शरः शीघ्रनिर्याणात् $G_1B^1$; न शोणितेन लिप्तं शल्यं फलं यस्य शरः स शीघ्रनिर्याणात् U; शीघ्रनिर्याणान्न रुधिरेण लिप्तं शल्यं यस्य सः P; न शोणितेन लिप्तं शल्यं फलं यस्य स शिरः शीघ्रनियणात् J **67.3** महिषं विदारितशरीरं ] P; तं महिषं निर्भिन्नविग्रहं विदारितशरीरं $G_1UB^1J$ **67.3** पूर्वं ] P; प्रथमं $G_1UB^1J$ **67.3** पश्चात्तु स्वयमपतदिति ] P; स्वयं तु पश्चात्पपातेति $G_1UB^1J$ **67.3** वेगवत्त्वोक्तिः ] $G_1PB^1J$; वेगत्वोक्तिः U **67.4** °नुप्रयोगस्य ] $G_1UPJ$; °नु+यो+गस्य $B^1$ **67.4** न्याय्यः ] $B^1J$; न्यायः $G_1UP$

शृङ्गं स दृप्तविनयाधिकृतः परेषाम्
अत्युच्छ्रितं न ममृषे न तु दीर्घमायुः॥ ६८॥

दशरथस्तीक्ष्णैरर्धचन्द्राकृतिभिः शरैर्गण्डकाख्यानुच्चशृङ्गान्मृगविशेषान् बाहुल्येन शृङ्गच्छेदेनागुरूणि शिरांसि येषां तथाविधानकरोत्। अत्युन्नतं गर्वमन्येषां न चक्षमे सः। यतः समददर्पनिवारणप्रस्तुतः। न पुनरायतं जीवितं न चक्षमे, अपि तु चक्षमे। परेषां समुच्छ्राये ऽस्य वैरम्, न तु जीवित इत्यर्थः॥ ६८॥

व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः
फुल्लासनाग्रविटपानिव वातरुग्णान्।
शिक्षाविशेषलघुहस्ततया निमेषात्
तूणीचकार शरपूरितवक्त्ररन्ध्रान्॥ ६९॥

---

**68 d.** °त्युच्छ्रितं ] $\mathrm{PD^{M}B_3^{M}B_4^{M}}$Mall.Ar.(?)Nā.; °त्युन्नतं $\mathrm{G_1JV^{M}B_1^{M}B_2^{M}B_7^{M}}$; °भ्युन्नतं $\mathrm{B^1L^{M}}$; °भ्युच्छ्रितं Jin.Hem. • न तु ] $\mathrm{G_1PB^1JD^{M}V^{M}B_1^{M}B_2^{M}B_4^{M}B_7^{M}L^{M}}$Mall.Hem. Ar.(?)Nā.; न च $\mathrm{UB_3^{M}}$Jin. **69 b.** वातरुग्णान् ] ŚJin.; वायुभग्नान् Hem.; वायुरुग्णान् Mall.Ar.(?)Nā. **69 c.** शिक्षाविशेष° ] $\mathrm{PB^3V^{M}B_1^{Mpc}B_2^{M}B_3^{M}}$Mall.Jin.Hem.Ar.Nā.; शिक्षावशेन $\mathrm{G_1UJB_4^{M}B_7^{M}}$; शिक्ष्याविशैष° $\mathrm{B_1^{Mac}}$; शिक्षाविवेश $\mathrm{D^{M}L^{M}}$

---

**68.1** दशरथस् ] P; नरपतिः $\mathrm{G_1UB^1}$; स नरपतिः J **68.1** तीक्ष्णैरर्धचन्द्राकृतिभिः ] *conj.*; निशितैस्तीक्ष्णैः क्षुरप्रैरर्धचन्द्राकृतिभिः $\mathrm{G_1UB^1}$; तीक्ष्णैः U; तीक्ष्णैः क्षुरमैरर्धचन्द्राकृतिभिः J **68.1** शरैर्गण्डकाख्यानुच्चशृङ्गान्मृगविशेषान् ] *conj.*; शरैः खड्गान् गण्डकाख्यान् उच्चशृङ्गान्मृगविशेषान् $\mathrm{G_1UJ}$; शरैरुच्चशिरान्मृगान्गाङ्गाकाख्यान् P; शरैः खड्गान् गण्डकापरनाम्न उच्चशृङ्गान्मृगविशेषान् $\mathrm{B^1}$ **68.2** बाहुल्येन ] P; प्रायो बाहुल्येन $\mathrm{G_1UB^1J}$ **68.2** शृङ्गच्छेदेनागुरूणि ] P; विषाणपरिमोषेण शृङ्गच्छेदेनालघूनि $\mathrm{G_1J}$; विषाणपरिमोषेण शृङ्गच्छेदेन लघूनि $\mathrm{UB^{3pc}}$; ⊔ नि $\mathrm{B^{1ac}}$ **68.2** शिरांसि ] P; उत्तमाङ्गानि शिरांसि $\mathrm{G_1UB^1J}$ **68.2** तथाविधानकरोत् ] $\mathrm{G_1UB^1J}$; तांस्तथाविधांश्चकार P **68.4** अत्युन्नतं गर्वमन्येषां … जीवित इत्यर्थः ] We have adopted P's text; $\mathrm{G_1UB^1J}$ continue differently: न तु प्राणरहितान्। यतो ऽसौ दृप्तानां सदर्पाणां (सदर्पाणां $\mathrm{G_1B^1J}$, सददर्पाणां U) विनये नियमने (नियमने $\mathrm{G_1^{pc}J^{pc}}$, नियमेने $\mathrm{G_1^{ac}J^{ac}}$, नियमे $\mathrm{B^{1pc}}$, नियमेन $\mathrm{B^{1ac}}$) अधिकृतः प्रस्तुतः। अतः अत्युन्नतं शृङ्गं गर्वं (गर्वं $\mathrm{B^1J}$, गवं $\mathrm{G_1}$, गवलं U) परेषामन्येषां न चक्षमे। परेषां समुच्छ्रायो (समुच्छ्रायो $\mathrm{G_1UJ}$, समु ⏑ स्य $\mathrm{B^{1ac}}$, समु +मुच्छ्रा+ + गर्वस्य+ स्य $\mathrm{B^{3pc}}$) वैरं न तु जीवितमित्यर्थः (जीवितमि° $\mathrm{G_1J}$, जीविते इ° $\mathrm{B^1}$)। अत उक्तं न तु दीर्घमायुरिति। शृङ्गं विषाणं गर्वश्च (शृङ्गं विषाणं गर्वश्च $\mathrm{B^{3pc}J}$, शृङ्गविषाणगर्वश्च $\mathrm{G_1U}$, विषाणं गर्वश्च $\mathrm{B^{1ac}}$) **68.4** न चक्षमे, अपि ] *conj.*; चक्षमे नापि P

दशरथो निर्भयः शार्दूलान् दरीभ्यः सम्मुखमागतानभ्यासाधिक्येन चतुरकरभावेन क्षणेन निषङ्गान्व्यधात्। यतो बाणैर्भरितान्यास्यविवराणि येषां तान्। गुहाभ्यो ऽभिमुखनिस्सरणादिषुभरितास्यत्वात्पीनसटत्वाच्चोपमा। विकसितस्यासनवृक्षस्य प्रान्तशाखासञ्चयान् पवनभग्नान् यथा॥ ६९॥

निर्घातोग्रैः कुञ्जलीनाञ्जिघांसुर्
ज्यानिर्घोषैः क्षोभयामास सिंहान्।
नूनं तेषामभ्यसूयापरो ऽसौ
वीर्योदग्रे राजशब्दे मृगाणाम्॥ ७०॥

दशरथः, निर्घातः खादुत्थितः शब्दविशेषः, तद्वद्घोरैर्मौर्वीविस्फारैः, गहनेषु लतादिपिहितोदरेषु प्रदेशेष्वासीनान् सिंहान् हन्तुमिच्छुः क्षुभितानकरोत्।

---

**70 c.** °परो ऽसौ ] Σ; °परो ऽभूत् ℭ **70 d.** मृगाणाम् ] $G_1UPB^1JV^MB_1^MB_2^MB_3^MB_4^MB_7^M$ $L^M$Hem.Jin.Ar.(?)Nā.; मृगनामं $D^M$(unmetrical); मृगेषु Mall.

---

**69.1 दशरथो निर्भयः** ] P; अभीः निर्भयः $G_1UB^1J$ **69.1 शार्दूलान्** ] *em.*; शर्दूलान् P; व्याघ्रान् $G_1UB^1J$ **69.1 दरीभ्यः** ] P; गुहाभ्यो दरीभ्यः $G_1UB^1J$ **69.1 अभ्यासाधिक्येन** ] P; शिक्षावशेनाभ्यासाधिक्येन $G_1UB^1J$ **69.2 चतुरकरभावेन** ] P; लघुहस्ततया चतुरकत्वेन $G_1U$; लघुहस्ततया चतुरकरत्वेन $B^1J$ **69.2 क्षणेन** ] P; निमेषात्क्षणेन $G_1UB^1J$ **69.2 निषङ्गान्व्यधात्** ] P; तूणीचकार निषङ्गान्व्यधात् $G_1UB^1J$ **69.2 यतो बाणैर्भरितान्यास्यविवराणि** ] P; यतः शरैः पूरितानि मुखरन्ध्राणि(नि $G_1$) $G_1UB^1J$ **69.3 गुहाभ्यो ऽभिमुखनिस्सरणादिषुभरितास्यत्वात्पीनसटत्वाच्चोपमा** ] P; पीनस(म)टत्वादभिमुखाभि(भिः J)स्मरणादिषुपूर्णास्यत्वाच्चोपमा $G_1UJ$; पीनसटत्वा(पीनसधन्वा $B^{1ac}$)दभिमुखनिस्मरणादिषुपूर्णास्यत्वाच्चोपमा $B^1$ **69.4 विकसितस्यासनवृक्षस्य प्रान्तशाखासञ्चयान्** ] P; यथा फुल्लस्य(फल्लस्य U) निकटस्य तस्यासनवृक्षस्याग्रशाखानिचयानिव $G_1UJ$; यथा फुल्लस्य विकष्य तस्यासनवृक्षस्याद्रशाखासञ्चयानिव $B^{1ac}$; यथा फुल्लस्य विकसितस्यासनवृक्षस्याद्रशाखासञ्चयानिव $B^{3pc}$ **69.4 पवनभग्नान् यथा** ] P; वातेन रुग्णान् भग्नान् $G_1UB^1$; वाततरुग्णान् भग्नान् J **70.1 दशरथः** ] P; असौ $G_1UB^1$; असौ दशरथः J **70.1 निर्घातः खादुत्थितः** ] *conj.*; निर्घातोग्रैः निर्घातः खादुत्थित° $G_1J$; निर्घातोग्रैः निर्घातः खादुत्थितः $UP^{pc}$; निर्घातोग्रैः निर्घातः खादु×त्प×त्थितः P; निर्घातोग्रैः निर्घा +तः+दुत्थितश् $B^1$ **70.1 शब्दविशेषः** ] $UPB^1J$; °शब्दविशेषैः $G_1$ **70.1 तद्वद्घोरैर्मौर्वीविस्फारैः** ] *conj.*; तद्वदुदग्रैर्घोरैः ज्यानिर्घोषैर्मौर्वीविस्फारैः $G_1$; तदुग्रैर्घोरैः ज्यानिर्घोषैर्मौर्वीविस्फारैः $B^1$; तद्वदुग्रैः घोरैः ज्यानिर्घोषैर्मौर्वीविस्फारैः UPJ **70.2 गहनेषु लतादिपिहितोदरेषु प्रदेशेष्वासीनान्** ] *conj.*; कुञ्जलीनान्गहनेष्वासीनान् $G_1UB^{3pc}J$; कुञ्जलीनान् गहनेषु लतादिपिहितोदरेषु प्रदेशेषु लीनानासीनान् P; कुञ्जलीनान्गहासीनान् $B^{1ac}$ **70.2 हन्तुमिच्छुः** ] *conj.*; जिघांसुर्हन्तुमिच्छुः $G_1UPB^1J$ **70.2 क्षुभितानकरोत्** ] *conj.*; क्षोभयामास क्षुभितानकरोत् $G_1UB^1J$; क्षोभयामास क्षोभितानकरोत् P

उत्प्रेक्ष्यते, निश्चितं तेषां सिंहानां सम्बन्धिनि मृगराजशब्दे पराक्रमोद्भटे ऽक्षमावान् पौरुषयुक्तत्वात्। स राजा ते ऽपि मृगराजाः। यदि चास्य रोषो न स्यात्, तत्किमिति निजे गुहास्थाने स्थितान् तानसौ कोपयेत्। न हि सिंहा अन्यनादं सहन्ते। शालिनी वृत्तम्॥

निर्घातः प्रोच्यते सद्भिरान्तरिक्षे महान्स्वनः॥ ७०॥

तान्हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखाग्रमुक्तमुक्तान्।
आत्मानं रणकृतकर्मणां द्विपानाम्
आनृण्यं गतमिव मार्गणैरमंस्त॥ ७१॥

दशरथः केसरिणो बाणैर्हत्वा द्विपानां ≪समरोपयोगिनां≫ स्वमनृणत्वं गतं कृतप्रत्युपकारमिवाबुद्ध। यतो हस्तिसमूहैः सह †बद्धं तीव्रं वैरं यैस्तान्†। अत

---

**71 b.** °मुक्तमुक्तान् ] Σ; °लग्नमुक्तान् $\mathfrak{C}$ **71 c.** द्विपानाम् ] $G_1UPB^1JD^MV^MB_2^MB_3^MB_4^MB_7^ML^M$; गजानाम् $B_1^M$Hem.Mall.Jin.Ar.Nā.

---

**70.7** निर्घातः प्रोच्यते सद्भिरान्तरिक्षे महान्स्वनः। Source unknown.

---

**70.3** निश्चितं ] *conj.*; नूनं निश्चितं $G_1UPB^1J$ **70.3** पराक्रमोद्भटे ] P; वीर्योर्णोदग्रे उद्धते राजशब्दे $G_1$; वीर्येणोदग्रे उद्धते राजशब्दे $UB^1J$ **70.4** ऽक्षमावान् ] *conj.*; अभ्यसूयापरः अक्षमावान् पौरुषयुक्तत्वात् $G_1UPB^{3pc}J$; अभ्यसूयापरः अक्षमावयुक्तत्वात् $B^{1ac}$ **70.4** °राजाः ] $G_1UPJ$; °राजानः $B^3$ **70.5** निजे ] $G_1UB^3J$; निज° P **70.5** तानसौ ] $G_1UB^3J$; तान P **70.6** शालिनी ] *em.*; मालिनी $G_1UPB^3J$ **70.7** °रान्तरिक्षे महान्स्वनः ] $G_1$; °रन्तरिक्षो महान्स्वनः U; °रान्तरिक्षो महान्ध्वनिः P; °रान्तरिक्षे महान्ध्वनिः $B^{3pc}$; °रान्तरिक्षे महाहा $B^{1ac}$(unmetrical); °रान्तरिक्षो महान्स्वन इति J **71.1** दशरथः ] *conj.*; काकुस्थः $G_1B^{1ac}$; काकुत्स्थः $UB^{3pc}$; काकुत्स्थो दशरथः PJ **71.1** केसरिणो बाणैर् ] *conj.*; तान्मार्गणैर् $G_1UB^1J$; ता न्क स रि ण मा र्ग ण र् P (tops missing) **71.1** समरोपयोगिनां ] *conj.* (cf. Jin.); समरे कृतकर्मणां $G_1UPB^1J$ **71.2** स्वमनृणत्वं गतं कृतप्रत्युपकारमिवाबुद्ध ] *conj.*; आत्मानमनृणत्वगतमिवामंस्ताबुद्ध $G_1$; आत्मानमनृणत्वं गतमिवामंस्ताबुद्ध $UB^1J$; आत्मानं स्वमनृणत्वं गतम् कृत्युपकारमिवामंस्ताबुद्ध P **71.2** हस्तिसमूहैः सह ] *conj.*; गजकुलैर्हस्तिसमूहैस्सह $G_1UPB^1J$ **71.2** बद्धं ] $UPB^1J$; बद्ध $G_1$

एव ≪तद्विदारणादनृजुकरजप्रान्तमुक्तमुक्ताफलान्≫। प्रहर्षिणी वृत्तम्॥ ७१॥

दृतमन्वपतत्क्वचिच्च यूथं
चमराणां शरलग्नवालधीनाम्।
नृपतीनिव ताञ्जगाम शान्तिं
सितवालव्यजनैर्वियोज्य सद्यः॥ ७२॥

क्वचिद्देशे स राजा चमराख्यानां प्राणिविशेषाणां कुलं ≪शीघ्रम्≫ अनुययौ। तांश्च श्वेतपुच्छचामरैर्विवर्ज्य तत्क्षणाज्जिघांसानिवृत्तिमगमत्। क्रोधं मुमोच। राज्ञो यथा। राजान्तराणामसौ किल धवले च्छत्रचामरे न सेहे। ननु चमरा वेगवाहिनः। कथं तेनासादिता इत्याह। काण्डगहनेषु लग्नाः पुच्छा येषाम्, प्रियवालत्वाच्च ते मरणमप्यूरीकुर्वते, न तु वालमुत्त्रोत्य पलायन्ते। औपच्छन्दसं वृत्तम्॥ ७२॥

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार।

---

**72 ab.** ] Σ; चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी C **72 cd.** ताञ्जगाम शान्तिं सितवालव्यजनैर्वियोज्य सद्यः ] Ś; तान्वियोज्य सद्यः सितवालव्यजनैर्जगाम शान्तिम् Hem.Mall.Ar.(?)Nā. (Jin. unclear) **73 b.** °लक्ष्यी° ] $G_1$UP$B^1$J$D^M$$V^M$$B_2^M$$B_3^M$ $B_4^M$$B_7^M$$L^M$Mall.; °लक्षी° $B_1^M$Hem.Ar.(?)Nā.Jin.

---

**71.3** अत एव ] $G_1$UJ; अतस् P$B^1$ **71.3** तद्विदारणादनृजुकरजप्रान्तमुक्तमुक्ताफलान् ] *conj.*; तद्विदारणादनृजूनां करजप्रान्तानां मुक्तानि मुक्ताफलानि येषां कुटिलनखाग्रेभ्यो मुक्तानि मुक्ताफलानि यैस्तान् $G_1$; तद्विदारणादनृजूनां करजप्रान्तानां मुक्तानि मुक्ताफलानि येषां कुटिलनखाग्रेभ्यो मुक्तानि मुक्ताफलानि वा यैस्तान् U; तद्विदारणादनृजूनां करजप्रान्तानां मुक्तानि मुक्ताफलानि वा यैस्तान् P; तद्विदारणात् कुलनखाग्रेभ्यो मुक्तानि मुक्ताफलानि येषां $B^1$; तद्विदारणादनृजूनां करजप्रान्तानां मुक्तानि मुक्ताफलानि येषां कुटिलनखाग्रे मुक्तानि मुक्ताफलानि वा यैस्तान् J **72.1** प्राणिविशेषाणां ] $G_1$U$B^1$J; प्राणिनां P **72.1** कुलं शीघ्रमनुययौ ] *conj.*; यूथमन्वपतत् अनुययौ $G_1$U$B^1$J; कुलमन्वपतत् अनुययौ P **72.2** श्वेतपुच्छचामरैर्विवर्ज्य ] *conj.*; सितवालव्यजनैर्वियोज्य U$B^1$J; सितव्यालव्यजनैर्वियोज्य $G_1$; सितवालव्यजनैर्वियोज्य श्वेतैर्वालव्यजनैर्वियोज्य विवर्ज्य P **72.2** तत्क्षणाज्जिघांसा° ] *conj.*; शान्तिं सद्यो जिघांसाया (जिघांसया U) $G_1$U$B^1$J; सद्यः शान्तिं तत्क्षणात् जिघांसा° P **72.4** चमरा ] $G_1$P$B^1$J; चामरा U **72.4** तेनासादिता ] UP$B^1$J; तेनासिता $G_1$ **72.4** काण्डगहनेषु ] *conj.*; शरेषु काण्डगहनेषु $G_1$UP$B^1$J **72.4** लग्नाः पुच्छा ] *conj.*; लग्ना वाल (वालु $G_1$) धयः पुच्छा $G_1$UP$B^1$J **72.5** °त्वाच्च ते ] $G_1$UJ; °त्वान्ते $B^1$ **72.5** वालमुत्त्रोत्य ] P; वालत्रुटनभयात् $G_1$U$B^1$J

सपदि गतमनस्कश्छिन्नमाल्यानुकीर्णे
रतिविलुलितबन्धे केशपाशे प्रियायाः॥ ७३॥

राजाश्वनिकटादपि पलायमानं रम्यपक्षपूगं केकिनं शरस्य शरव्यं नाकरोत्। न विव्याधेत्यर्थः। यतो ऽसौ सादृश्येन निधुवनाकुलितरचने त्रुटितापीडपुष्पव्याप्ते कान्तायाः केशकलापे तत्कालं गतचित्तः। अतस्तदनुकारो ऽप्यस्य प्रिय एव। मालिनी वृत्तम्॥ ७३॥

तस्य कर्कशविहारसम्भवं स्वेदमाननविलग्नजालकम्।
आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः॥ ७४॥

दशरथस्य घर्मजलं कठिनखेटकक्रीडासमुत्थं काननवातो व्यनाशयत्। ≪मुखश्लिष्टकणसमूहम्≫। शीतजलकणयुक्तः। भग्नाः पत्रपूगानां संश्लेषाः कवाटा येनेति सौरभमार्दवोक्तिः। रथोद्धता वृत्तम्॥ ७४॥

इति विस्मृतान्यकरणीयमात्मनः

---

**73 c.** °छिन्न° ] ŚAr.Nā.; °चित्र° Hem.Mall.Jin. **73 d.** °विलुलितबन्धे केशपाशे ] G$_1$UB$^1$JD$^M$V$^M$B$_1^M$B$_3^M$B$_7^M$; °विललितबन्धे केशपाशे B$_2^M$; °विलुलितबन्धे केशहस्ते PB$_4^M$; °विगलितबन्धे केशपाशे L$^M$Hem.Mall.Jin.; °विगलितबन्धे केशहस्ते Ar.(?)Nā. • प्रियायाः ] Ś𝔆; सुकेश्याः Hem.$^{vl}$ **74 c.** आचचाम सतुषारशीकरो ] G$_1$UPB$^1$JV$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_7^M$L$^M$Mall.Ar.$^{vl}$; आचचास मतुषारशीकरो D$^M$; आचचाम सतुषारसीकरो Hem.; आचचाम सतुषारशीतलो Ar.Nā.; आससाद सतुषारशीकरो Jin.

---

**73.1** राजा ] *conj.*; स राजा G$_1$UPB$^1$J **73.1** अश्वनिकटादपि ] *conj.*; तुरगसमीपादश्वनिकटादपि G$_1$UPB$^1$J **73.1** केकिनं ] *conj.*; मयूरं केकिनं G$_1$UPB$^1$J **73.1** शरस्य शरव्यं नाकरोत् ] *conj.*; बाणलक्ष्यीचकार शरव्यं नाकरोत् G$_1$; न बाणलक्ष्यीचकार शरव्यं नाकरोत् UB$^1$J; न बाणलक्षीचकार शरस्य शरव्यं नाकरोत् P **73.3** तत्कालं ] *conj.*; सपदि तत्कालं G$_1$UPB$^1$J **73.3** गतचित्तः ] *conj.* (cf. Jin.); गतमनस्कः G$_1$UPB$^1$J **74.1** दशरथस्य ] *conj.*; तस्य राज्ञः G$_1$UPB$^1$J **74.1** घर्मजलं ] *conj.*; स्वेदं घर्मजलं G$_1$UPJ; स्वेदं जन्मजलं B$^1$ **74.1** कठिनखेटक° ] P; कठिन° G$_1$UB$^1$J **74.1** काननवातो ] *conj.*; वनवात G$_1$UPB$^1$J **74.1** व्यनाशयत् ] *conj.*; आचचाम व्यनाशयत् G$_1$UPB$^1$J **74.2** मुखश्लिष्टकणसमूहम् ] *conj.* (cf. Jin.); आनने मुखे विलग्नं श्लिष्टं जालकं कि(क G$_1$)रणसमूहो यस्य G$_1$UJ; आनने मुखे विलग्नं श्लिष्टं जालकं कणसमूहो यस्य PB$^1$ **74.2** शीतजलकणयुक्तः ] *conj.*; कीदृशो वातः शीतजलकणयुक्तः UPB$^1$; कीदृशो वातः शीतजलकणकीदृशो युक्तः G$_1$J **74.2** भग्नाः ] *conj.*; भिन्नाः G$_1$UB$^1$J; भिन्नाः भग्नाः P **74.2** पत्रपूगानां ] *conj.*; पल्लवपुटानां पत्रपूगानां G$_1$UPB$^1$J **74.2** संश्लेषाः कवाटा ] *conj.*; पुटास्संश्लेषाः कवाटा G$_1$UPB$^1$J **74.3** सौरभमार्दवोक्तिः ] UP; सौरभमान्दवोक्तिः G$_1$B$^1$; सोरभमार्दवोक्तिः J

सचिवावलम्बितधुरं नराधिपम्।
परिवृद्धरागमनुबन्धसेवया
मृगया जहार चतुरेव कामिनी॥ ७५॥

इत्थं राजानमाखेटिका वशीचकार। प्रवीणा ललनेव। सन्तताभ्यासेन ≪वृद्धिं गतो≫ रसो यस्य तम्। व्यसनेषु ह्यत्यन्तसेवया राग उपजायते, अतश्च विस्मृतात्मीयकार्यान्तरं ≪मन्त्रिधृतकार्यभारम्, इति≫ राज्ये विपक्षभयाभावमाह। सुमङ्गली वृत्तम्॥ ७५॥

स ललितकुसुमप्रवालशय्या
ज्वलितमहौषधिदीपिकासनाथाः।
वनरतिरतिवाहयां बभूव
क्वचिदसमेतपरिच्छदस्त्रियामाः॥ ७६॥

राजा कुत्राप्यसङ्घटितशय्याद्युपकरणभाण्डो मृगयाप्रसक्तो निशा निनाय। †ललितानि रम्याणि यानि कुसुमानि प्रवालानि च तान्येव शय्याः खट्वा यासु ताः†। दीप्तबृहदोषधिभिरेव दीपिकाभिरलङ्कृताः। पुष्पिताग्रा वृत्तम्॥ ७६॥

उषसि च गजयूथकर्णतालैः

**75 b.** नराधिपम् ] ŚMall.; धराधिपम् Hem.Jin.; धरापतिम् Ar.(?)Nā. **76 a.** °शय्या ] Σ; °शय्यां ℭ **76 b.** °सनाथाः ] Σ; °सनाथाम् ℭ **76 c.** वनरति° ] *conj.*; नरपति° Σ **76 d.** त्रियामाः ] Σ; त्रियामाम् ℭ **77 a.** च ] Hem.Jin.; स ŚMall.Ar.Nā.

**75** सन्तताभ्यासेन ··· ह्यत्यन्तसेवया ] *om.* $G_1$(eyeskip) **76 b.** $B_5^M$ resumes here with सनाथाः। नरपति°...

**75.1** इत्थं ] *conj.*; इतीत्थं $G_1$UP$B^1$J **75.1** राजानमाखेटिका ] *conj.*; नराधिपं राजानं मृगया आखेटिका $G_1$P$B^1$J; नराधिपं राजानं मृगया आखेटका U **75.1** वशीचकार ] *conj.*; जहार वशीचकार $G_1$UP$B^1$J **75.1** ललनेव ] P; कामिनीव कीदृशमनुबन्धसेवया $G_1$U$B^1$J **75.2** वृद्धिं गतो ] *conj.* (cf. Jin.); परिवृद्धो UP$B^1$J **75.2** रसो ] *conj.*; रागो रसो U$B^1$J; रागो P **75.2** ह्यत्यन्तसेवया ] P$B^{3pc}$; ह्यन्तसेवया U$B^{1ac}$J **75.3** मन्त्रिधृतकार्यभारमिति ] *conj.* (cf. Jin.); सचिवैरवलम्बिता धृता धूः कार्यभार्यो यस्येति $G_1$P$B^1$J; सचिवैरवलम्बिता धृताः श्रिता धूः कार्यभार्यो यस्येति U **75.3** राज्ये ] P$B^1$; राज्ञे $G_1$UJ **75.4** सुमङ्गलीवृत्तम् ] $B^1$; समङ्गलीवृत्तम् $G_1$P; समतालीवृत्तम् U; *om.* J **76.1** राजा ] *conj.*; स राजा Σ **76.1** मृगयाप्रसक्तो ] $G_1$U$B^1$J; वनरतिः मृगयासक्तो P **76.1** निशा ] $G_1$P$B^1$J; निशां U

पटहपटुध्वनिभिर्विनीतनिद्रः ।
अरमत मधुरस्वनानि शृण्वन्
विहगविकूजितवन्दिमङ्गलानि ॥ ७७ ॥

प्रभाते चासावसमेतपरिच्छदो †मधुरस्वनानि† शकुनरुतान्येव मागधानां मङ्गलवाक्यान्याकर्णयंश्चिक्रीड । ≪करिकुलश्रवणशब्दैः≫ आनकवदुच्चः शब्दो येषां तैः विबुद्धः । द्विरदकर्णध्वनय एव पटहपटुध्वनयः । चशब्दो ऽसमेतपरिच्छदानुवृत्त्यर्थः । वृत्तं पुष्पिताग्रैव ॥ ७७ ॥

अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरङ्गमेण ॥ ७८ ॥

अनन्तरं कदाचिदसौ प्रवृद्धमृगयारागस्तुरगेण रुरुमृगमनुसरन्ननुचरैरदृष्ट एव गहने मुनिजनाक्रान्तां तमसाख्यां नदीमाससाद । जवेन लालाजलं स्वेदं वा मुञ्चति यस्तेनाश्वेन । औपच्छन्दसिकं वृत्तम् ॥ ७८ ॥

---

**77 b.** पटहपटु° ] $G_1UPB^1JD^MV^MB_2^MB_3^MB_4^MB_5^MB_7^M$Ar.Nā.; पटुहपटु° $B_1^M$; पटुपटह° Hem.Mall.Jin. **77 c.** मधुरस्वनानि ] Ś; मधुराणि तत्र Hem.Mall.; मधुरस्वराणि Ar.Nā. Jin.

---

**77.1** मधुरस्वनानि ] $G_1^{pc}PB^{1pc}$; मध्वरस्वनाणि $G_1^{ac}$; मधुरस्वरानि U; मधुरस्वराणि $B^{1ac}$ J **77.1** °रुतान्येव ] $UPB^1J$; °व्रतान्येव $G_1$ **77.1** मागधानां ] *conj.*; वन्दिनां मागधानां $G_1UPB^1J$ **77.2** चिक्रीड ] $B^{3ac}$; अरमत चिक्रीड $G_1UPB^{3pc}J$ **77.2** करिकुलश्रवणशब्दैः ] *conj.*; गजयूथानां करिकुलानां कर्णतालैः श्रवणशब्दैः $G_1UPB^1J$ **77.2** आनकवदुच्चः ] *conj.*; पटहवदानकवत्पटुरुच्चो $G_1UB^1J$; पटहदानकवत्पटुरुच्चो P **77.2** शब्दो ] *conj.*; ध्वनिशब्दो $G_1B^1J$; ध्वनिः शब्दो UP **77.3** विबुद्धः ] *conj.*; विनीतनिद्रो विबुद्धः $G_1UPB^1J$ **77.3** द्विरदकर्णध्वनय एव पटहपटुध्वनयः ] $PB^1$; द्विरदकर्णध्वनयः $G_1UJ$ **77.4** ऽसमेतपरिच्छदानुवृत्त्यर्थः ] P; °समवेतपरिच्छदानुवृत्त्यर्थः $B^1$; ससमेतपरिच्छदानुवृत्यर्थः (?) $G_1$; ऽसमेतपरिच्छेदानुवृत्त्यर्थः U; ऽसमेतपरिच्छानुवृत्त्यर्थः J **77.4** वृत्तं ] $PB^1$; *om.* $G_1$ UJ **78.1** अनन्तरं कदाचिदसौ ] *conj.*; अथ कदाचिदसौ $G_1UB^1$; अथानन्तरं कदाचिदसौ P; अथ कदाचिदसौ राजा दशरथः J **78.1** °रागस् ] $G_1UPJ$; °रावः $B^1$ **78.1** तुरगेण ] $G_1B^1J$; तुरङ्गमेन U; तुरगेनाश्वेन रुरोर्मृगभेदस्यानुमार्गो P **78.2** गहने ] $UPB^1$; गृहने $G_1$; वहने J **78.2** नदीमाससाद ] *conj.*; नदीम् प्राप ससाद $G_1UB^{1ac}J$; नदीं प्रापाससाद $PB^{1pc}$ **78.2** जवेन लालाजलं ] *conj.*; श्रमफेनमुचा जवेन श्रमफेनाललाजलं $G_1$; श्रमफेनमुचा जवेन श्रमल+ा+लाजर्णं U; श्रमफेनमुचा जवेन श्रमफेणं लालाजलं P; श्रमफेनमुचा जवेन श्रमफेनां लालाजलं $B^1$; श्रमफेनमुचा जवेन श्रमफेनाललाजवं J **78.3** यस्तेनाश्वेन औपच्छन्दसिकं वृत्तम् ] $UB^{3pc}$; यस्तेनाश्वेन औपच्छन्दसकं वृत्तम् $G_1J$; यस्तेनाश्वेन $PB^{1ac}$

कुम्भपूरणभवः पटुरुच्चैरुच्चचार निनदो ऽम्भसि तस्याः।
तत्र स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज॥ ७९॥

तमसाया जले घटपूरणजातो गम्भीरो रवो महानुदपादि। राजा तत्र प्रदेशे गजगलगर्जितशङ्कया शब्दवेधित्वाच्छरं चिक्षेप। शब्दे पतति व्रजतीति तम्। स हि विनापि दृष्टिगोचरं शिक्षितत्वाच्छब्दानुसारेण लक्ष्यवेधी। स्वागता वृत्तम्॥ ७९॥

नृपतेः प्रतिषिद्धमेव तत्कृतवान्पङ्क्तिरथो ऽविशङ्क्य यत्।
अपथे पदमर्पयन्ति हि श्रुतवन्तो ऽपि रजोनिमीलिताः॥ ८०॥

दशरथो यदविचार्येत्थमकार्षीत् तद्राज्ञः सकलशास्त्रवेदिनः प्रसभकारिनिग्राहिणो निषिद्धमेव, न तु कृत्यम्। पङ्क्तिशब्देन पङ्क्तिच्छन्दस्सम्बन्धाद् दशसंख्या लक्ष्यते। तया तु दशशब्दः। निषिद्धं चेत्कथमकृतेत्याह। यस्माच्छास्त्रज्ञा अपि मोहेनान्धकारिताः सन्तः कुमार्गे चरणं निदधते। अन्धस्य च स्खलने का वाच्यता। शास्त्रज्ञानां च मोहलवो भवत्येव। वैतालीयं वृत्तम्॥ ८०॥

ततस्तेनेषुणासौ मुनिकुमारमवधीत्।

---

**80 ab.** तत्कृतवान्...यत् ] Σ; यत्कृतवान्...तत् Hem. **80 b.** ऽविशङ्क्य ] $G_1UPB^1JV^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ Hem.Ar.Nā.Jin.; विशङ्क $L^M$; विशङ्कि $D^M$; विलङ्घ्य Mall.

---

**79.1** तमसाया ] *conj.*; तस्यास्तमसाया $G_1PB^1J$; तस्या अस्तसमया U **79.1** जले ] *conj.*; अम्भसि जले $G_1UPB^1J$ **79.1** गम्भीरो ] *conj.*; पटुगम्भीरो $G_1B^1J$; पटुर्गम्भीरो U; पटुः गम्भीरा P **79.1** महानुदपादि ] *conj.*; महानुच्चचारोदपादि $G_1UPB^1J$ **79.1** राजा ] $G_1UB^1$; स राजा P; राजा दशरथः J **79.2** गजगल° ] $G_1PB^1J$; गजगण° U **79.2** °वेधित्वाच्छरं ] *conj.*; °वेदित्वाच्छरं $G_1UB^1J$; °वेदित्वशरं P **79.3** °च्छब्दानु° ] $PB^1$; °च्छन्दानु° $G_1UJ$ **79.3** °वेधी ] $UPB^1J$; °वीधी $G_1$ **79.4** स्वागता° ] $G_1PB^1J$; स्वागतानु° U **80.1** दशरथो ] *conj.*; पङ्क्तिरथो दशरथो $G_1UPB^1J$ **80.1** यदवि° ] $G_1PB^1$; यदि वि° UJ **80.1** °त्थमकार्षीत् ] *conj.*; °त्थं कृतवान्नकार्षीत् $G_1UPB^1J$ **80.2** प्रसभ° ] $G_1UPB^1$; प्रसभा° J **80.2** °निग्राहिणो ] $PB^{3pc}$; °निग्राहिणी $G_1UB^{1ac}J$ **80.2** पङ्क्तिच्छन्दस्सम्बन्धाद् ] $B^1$; पङ्क्तिशब्दस्सम्बन्धाद् $G_1U$; पङ्क्तिशब्दसम्बन्धाद् PJ **80.3** दशशब्दः ] $G_1PB^1J$; दशरथः U **80.3** °कृतेत्याह ] $G_1UPB^1$; °कृत्येत्याह J **80.4** मोहेनान्धकारिताः ] *conj.*; रजसा मोहेन निमीलिता अन्धकारिताः $G_1UPB^1$; रजसा मोहेन निमीलिताः अंधकारितः J **80.4** सन्तः ] $G_1^{pc}UPB^1J$; सन्ताः $G_1^{ac}$ **80.4** कुमार्गे ] *conj.*; अपथे कुमार्गे $G_1UPB^1J$ **80.4** चरणं निदधते ] *conj.*; पदं चरणमर्पयन्ति निदधते $G_1UPB^1$; पदं चरणमर्पयंति निदधे J **80.5** °ज्ञानां ] $UPB^1$; °ज्ञतां $G_1J$ **80.5** भवत्येव ] $B^1$; भवतीव $G_1J^{pc}$; भवतीति U; भव--- P; भवतीवि $J^{ac}$ **80.5** वैतालीयं ] $UPB^1J$; वैतालीय° $G_1$

हा तातेति क्रन्दितमाकर्ण्य विषण्णस्
तस्यान्विष्यन्वेतसगूढप्रभवं सः ।
शल्यप्रोतं वीक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवास क्षितिपो ऽपि॥ ८१॥

तस्य च पीडावशात् हा तातेत्थं दीनध्वनिं श्रुत्वा किमेतदकार्यं मया कृतमिति स राजा विषादमगमत्। ततस्तस्य क्रन्दितस्य स्थानं वेतसवृक्षान्तर्हितं सदन्वियेष, ततो राजा सघटमृषिसुतं शरफलेन स्यूतमालोक्य पश्चात्तापाद्धृद्गतशल्य इवासीत्। मत्तमयूरं वृत्तम्॥ ८१॥

तेनावतीर्य तुरगात्प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः ।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भि-
रात्मानमक्षरपदैः कथयां बभूव॥ ८२॥

ख्यातवंशेन तेन राज्ञाश्वादवरुह्य, अनुयुक्तवंशः स मुनिसुतो वारिघटे लग्नं

---

**81 b.** °विष्यन् ] Σ; °विच्छन्° Ar.Nā. **81 c.** वीक्ष्य ] Σ; प्रेक्ष्य **C** **81 d.** इवास ] *conj.*; इवासीत् Σ **82 b.** °निषण्णदेहः ] $PD^M V^M B_2^M B_3^M B_4^M B_5^{Mpc}$**C**; °निषण्णपार्श्वः $G_1 UB^1 JB_1^M B_7^M L^M$; °निषण्ण $B_5^{Mac}$ **82 c.** द्विजेतर° ] Σ; द्विजोत्तर° $Ar.^{vl}$ • °सुतं ] $B_2^M B_5^M$ (?) Hem.Mall.Ar.Nā.; °सुतः $G_1 UPB^1 JV^M$ (?) $B_1^M B_3^M B_4^M B_7^M L^M$ Jin.; °ततः $D^M$

---

**81.1** पीडा° ] $G_1$UPJ; पीड° $B^1$ **81.1** तातेत्थं ] *conj.*; तातेति इत्थं क्रन्दितं $G_1 PB^1$ J; तातेति इत्थं क्रन्दित° U **81.1** दीनध्वनिं ] $UPB^1$J; दीनाध्वनिं $G_1$ **81.2** राजा ] $G_1 UPB^1$; राजा दशरथो J **81.2** स्थानं ] *conj.*; प्रभवं स्थानं $G_1 UPB^1$J **81.2** °वृक्षान्तर्हितं ] UJ; °वृक्षन्तर्हितं $G_1$; °वृक्षान्तरितं $PB^1$ **81.3** सदन्वियेष ] $UPB^1$J; सदन्वयेष $G_1$ **81.3** °सुतं ] $G_1 UPB^1$; °पुत्रं J **81.3** शरफलेन ] *conj.*; शल्येन शरफलेन $G_1 UPB^1$; शल्येन शफलेन J **81.4** पश्चात्तापाद्धृद्गतशल्य ] *conj.*; पश्चात्तापादन्तःशल्यो हृद्गतशल्य $G_1$ UPJ; सश्चात्तापादन्तःशल्यो हृद्गतशल्य $B^1$ **81.4** मत्तमयूरं ] $UPB^1$; मत्तमयूर° $G_1$; स तु मयूर° J **82.1** °वरुह्य ] $G_1 UB^1$J; °वतीर्य P **82.1** अनुयुक्तवंशः ] *conj.*; पृष्टान्वयः सन् $G_1 UB^1$J; पृष्टान्वयो ऽनुयुक्तवंशः P

पार्श्वं यस्य राज्ञे स्वं राजर्षिपुत्रं वर्णरूपैः पदैः, न तु समस्तैः, अकथयत्। तैरपि स्खलद्भिरित्यतिव्यथाप्रतिपादनम्। वर्णत्रयवाचकत्वे ऽपि द्विजशब्देनात्रौचित्यादाद्य एव वर्ण उच्यते। तदितरः क्षत्रियः। आर्षे विप्र एवासौ वर्णितः। पदानां सङ्घटयितुमशक्यत्वादक्षरपदैरित्युक्तम्॥ ८२॥

तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय।
ताभ्यां तथागतमवेत्य तमेकपुत्रम्
अज्ञानतः स्वचरितं च नृपः शशंस॥ ८३॥

दशरथस्तेन मुनिपुत्रेण ≪प्रेरितः≫ सन् तं मातापित्रोः ≪समीपम्≫ अनैषीत्। अनुत्खातशरम्। अन्धयोः। मातापितृभ्याम्, तमेकपुत्रं तामवस्थां प्राप्तं ज्ञा-

---

**83 a.** तच्चोदितश्च ] ŚMall.; तच्चोदितः स Hem.Ar.Nā.; तन्नोदितश्च Jin. **83 c.** °मवेत्य ] $G_1UB^1JB_1^MB_4^MB_5^{Mpc}B_7^M$ (Jin.?); °मुपेत्य $PD^MV^MB_2^MB_3^ML^M$Hem.Mall.Ar.Nā.; म ⏑त्य $B_5^{Mac}$ **83 d.** स्वचरितञ्च नृपः ] Ar.Nā.Jin.; स्वचरितं नृपतिः ] Σ

---

**82.2** वारिघटे लग्नं पार्श्वं यस्य ] *conj.*; जलकुम्भे निषण्णं पार्श्वं यस्य सः तस्मै $G_1UB^1J$; वारिघटे निषण्णं लग्नं पार्श्वं यस्य तस्मै P **82.2** स्वं ] *conj.*; आत्मानं तस्य $G_1UJ$; आ त्मा न स्व P (tops missing); आत्मानं $B^1$ **82.2** राजर्षिपुत्रं ] *conj.*; द्विजेतरतपस्विसुतो राजर्षिसुतः $G_1UJ$; द्वि ज त र त प स्वि सु त रा ज र्ष पु त्र P (tops missing); द्विजेतरतपस्विसुतं राजर्षिसुतं $B^1$ **82.2** वर्णरूपैः पदैः ] *conj.*; स्खलद्भिरक्षरपदैः वर्णरूपैः पदैः $G_1UB^1J$; अक्षरपदैः वर्णरूपैः पदैः P **82.2** अकथयत् ] *conj.*; *om.* $G_1UB^1J$; कथयां बभूवाकथयत् P **82.3** तैरपि ] $G_1UB^1J$; सङ्घटयितुमशक्यत्वात्तैरपि P **82.3** °तिव्यथाप्रतिपादनम् ] $UPB^{3pc}J$; °तिविथरप्रतिपादनम् $G_1$; ⏑व्यथाप्रतिपादनम् $B^{1ac}$ **82.3** वर्णत्रयवाचकत्वे ] P; कथयां बभूवाकथयत् वर्णत्रयवाचकत्वे $G_1UB^{3pc}J$; कथयां बभूवाकथयत् वर्णत्रयवाचके (?) $B^{1ac}$ **82.4** °त्रौचित्यादाद्य ] $UPB^1J$; ⊔ त्याद्याद्य $G_1$ **82.4** तदितरः ] $G_1UB^1J$; तदिरः P **82.5** पदानां ] UJ; पादानां $G_1PB^1$ **82.5** °शक्यत्वा° ] $G_1P$; °शक्तत्वा° $UB^1J$ **83.1** दशरथस्तेन मुनिपुत्रेण प्रेरितः ] *conj.* (cf. Jin.); नृपतिस्तच्चोदितश्च तेन मुनिपुत्रेण चोदितः $G_1UPB^1$; नृपतिर्दशरथः तच्चोदितश्च तेन मुनिपुत्रेण चोदितः J **83.1** मातापित्रोः समीपमनैषीत् ] *conj.* (cf. Jin.); पित्रोर्मातापित्रोस्सकाशं निनाय अनैषीत् $G_1UPB^1J$ **83.2** अनुत्खातशरम् ] *conj.*; अनुद्धृतशल्यमनुत्खातशरम् $G_1UPB^1J$ **83.2** अन्धयोः ] *conj.*; अवसन्नदृशोः अन्धयोः $G_1UPB^1J$ **83.2** मातापितृभ्याम् ] *conj.*; ताभ्यां मातापितृभ्यां $G_1PB^1J$; ताभ्यां मातृपितृभ्यां U

त्वा, अज्ञानाच्चात्मचरितमकथयत्। आर्षे तु नदीतीर एव शरोद्धरणान्मृत इति वर्णितम्॥ ८३॥

तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः।
सो ऽभूत्परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः॥ ८४॥

तौ जायापती चिरं शोचित्वा प्रहर्त्रा राज्ञा दारकस्य वक्षसः शरं मग्नमुदचीखनताम्। ततः शरोद्धरणवशात्स दारको मृतो ऽभवत्। अनन्तरं करनिहितैर्बाष्पतोयैरेव मुनिर्नृपमशपत्। जलपातपूर्वकं हि शापप्रदानम्॥ ८४॥

दिष्टान्तमाप्स्यति भवानपि पुत्रशोकाद्
अन्ते वयस्यहमिवेति तमुक्तवन्तम्।
आक्रान्तपूर्वमिव मुक्तविषं भुजङ्गं
प्रत्याह कोसलपतिः प्रथमापराद्धः॥ ८५॥

---

**85 b.** अन्ते ] **V**D$^{M}$V$^{M}$B$_2^{M}$B$_3^{M}$B$_4^{M}$B$_7^{M}$L$^{M}$Hem.Ar.Nā.Jin.; अन्त्ये B$_1^{M}$B$_5^{M}$Mall. **85 c.** मुक्तविषं ] ΣHem.$^{vl}$; मुक्तमुखं Hem. **85 d.** प्रत्याह ] Σ; प्रोवाच **C**

---

**83.3** तामवस्थां प्राप्तं ज्ञात्वा ] *conj.*; तथागतं तमवस्थां प्राप्तामवेत्य ज्ञात्वा G$_1$; तथागतं तामवस्थां प्राप्तमवेत्य ज्ञात्वा UB$^1$J; तथागतं तामवस्थां प्राप्तं प्राप्य P **83.3** अज्ञानाच्चात्मचरितमकथयत् ] *conj.*; अज्ञानतो ऽज्ञानाच्च स्वचरितं शशंसाकथयत् G$_1$UB$^1$J; अज्ञानतः अज्ञानाच्च स्वचरितं आत्मचरितं शशंसाऽकथयत् P **83.3** आर्षे ] G$_1$UPB$^{3pc}$J; आर्षी B$^{1ac}$ **83.3** नदीतीर ] G$_1^{pc}$UPB$^1$; नदीतेर G$_1^{ac}$J **83.3** एव ] UPB$^1$J; इव G$_1$ **84.1** जायापती ] *conj.*; दम्पती G$_1$UB$^1$J; दम्पती जायापती P **84.1** चिरं ] *conj.*; बहु चिरं G$_1$UPB$^1$J **84.1** शोचित्वा ] *conj.*; विलप्य शोचित्वा G$_1$UPB$^1$J **84.1** प्रहर्त्रा ] G$_1$B$^1$U; प्रहर्ता J **84.1** दारकस्य ] *conj.*; शिशोर्दारक G$_1$; शिशोर्दारकस्य UPB$^1$; शिशोर्बालकस्य J **84.1** वक्षसः शरं ] *conj.*; *om.* G$_1$; वक्षसश्शल्यं UPB$^1$J **84.2** मग्नमुदचीखनताम् ] *conj.*; *om.* G$_1$; निखातं मग्नमुदहारयताम् उदचीखनताम् UPJ; निखातमग्नमुदहारयताम् उदचीखनताम् B$^1$ **84.2** ततः ] PB$^1$; *om.* G$_1$; अतश्च UJ **84.2** दारको मृतो ऽभवत् ] *conj.*; दारकः परासुरभूत् मृतो ऽभवत् G$_1$UPB$^1$J **84.2** अनन्तरं ] *conj.*; ततः G$_1$UB$^1$J; अथाऽनन्तरं P **84.3** मुनि° ] *conj.*; वृद्धो मुनि° Σ **84.3** जलपात° ] G$_1$UB$^1$J; जलदान° P

राजा पूर्वापराधी ऋषिमित्थं कथितवन्तं पुनरवदत्। किमुक्तवन्तमिति कोपनिरासमाह—न केवलमहं मरणं सुतदुःखादाप्नोमि, यावद्भवानपि वार्द्धके पुत्रशोकात्पञ्चत्वं लप्स्यतीति। प्रथमं पादमृदितं ≪सर्पम्≫ इवोत्सृष्टगरलम्॥ ८५॥

शापो ऽप्यदृष्टतनयाननपद्मशोभे
सानुग्रहो भगवता मयि पातितो ऽयम्।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
बीजप्ररोहजननीं ज्वलनः करोति॥ ८६॥

मुनिनासौ शापो ऽपि मयि ≪प्रसादरूपो≫ दत्तः, यतो ऽनिरीक्षितपुत्रवक्राम्बुजकान्तौ। अतो वृद्धकुमारीवरन्यायेन पुत्रोत्पत्तिः सुतशोकेनाक्षिप्ता, पश्चात्तु मम मरणं नाम। सानुग्रहत्वं शापस्य, तनयाननदर्शननान्तरीयकत्वात्। अत्र दृष्टान्तमाह। कर्षणयोग्यां भुवं कक्ष्यदीप्तो वह्निर्भस्मीकुर्वन्नपि बीजाङ्कुरोत्पादिनीं करोति। तृणजालावृतत्वाद्दाहं विना हि न किञ्चित्तत्रोत्पद्यते॥ ८६॥

इत्थं गते गतघृणः किमयं विधत्ताम्
अव्यक्तमित्यभिहिते वसुधाधिपेन।
एधान्हुताशनवतः स मुनिर्ययाचे

---

**87 b.** अव्यक्तमित्यभिहिते ] Σ; वध्यस्तवेत्यभिहितो ℭ

---

**85.1** राजा ] $G_1UB^1$; राजा दशरथः J **85.1** ऋषि° ] चोन्ज्; तमृषि° $G_1UPB^1J$ **85.1** कथितवन्तं ] *conj.*; उक्तवन्तं कथितवन्तं $G_1UPB^1J$ **85.1** किमुक्तवन्तमिति ] $UPB^1J$; किंमुक्तवन्तमिति $G_1$ **85.2** न केवलमहं ] P; अहमेव न केवलं महं $G_1U^{ac}$; अहमिव न केवलमहं $U^{pc}B^1J$ **85.2** °दाप्नोमि ] $G_1UB^1J$; °दप्नोमि P **85.2** वार्द्धके ] *conj.*; अन्ते वयसि वार्द्धके $G_1UPB^1J$ **85.3** पुत्रशोकात् ] *conj.*; पुत्रशोकाद्दिष्टान्तं $G_1UPB^1J$ • पञ्चत्वं लप्स्यतीति ] $G_1B^1J$; पञ्चत्व लप्स्यसि इति U; पञ्चत्वमाप्स्यति लप्स्यति इति P **85.3** प्रथमं ] P; प्रथमाक्रान्तं $G_1UB^1J$ **85.3** °सर्पमिवोत्सृष्टगरलम् ] *conj.*; °भुजङ्गमिव मुक्तविषमुत्सृष्टगरलम् $G_1UPB^1J$ **86.1** मुनिना° ] *conj.*; भगवता मुनिना $G_1UB^1J$; भवता मुनिना P **86.1** प्रसादरूपो ] *conj.* (cf. Jin.); अनुग्रहरूपो $G_1UPB^1J$ **86.2** °निरीक्षितपुत्रवक्राम्बुज° ] P; °नीक्षितपुत्रवक्त्रपद्म° $G_1UB^1J$ **86.2** अतो वृद्धकुमारीवर° ] $PB^1J$; अतो वृद्धमुमारी° $G_1$; अतवृद्धकुमारीवर° U **86.3** °ग्रहत्वं ] $UPB^1J$; °ग्रहं $G_1$ **86.3** °दर्शननान्तरीय° ] *conj.*; °दर्शने नान्तरीय° $G_1UPB^1J$ **86.4** कर्षणयोग्यां ] *conj.*; कृष्यां कर्षणयोग्यां $UPB^1$; कृष्यां कर्मणयोग्यां $G_1J$ **86.4** वह्निर्भस्मीकुर्वन्नपि ] *conj.*; वह्निर्दहन्भस्मीकुर्वन्नपि $G_1UPB^1J$ **86.5** तृणजाला° ] $B^{1pc}$; तृणजाल° $G_1B^{1ac}$; तृणजल° UJ; तृणजला° P

पुत्रं परासुमनुगन्तुमनाः सदारः॥ ८७॥

तदेवं गते ऽप्यसौ निर्दयः किं कुरुतामिति सव्रीडत्वादस्पष्टं राज्ञोक्ते सति स ऋषिः प्रज्वलितानि काष्ठान्ययाचत। यतो भार्यया सह मृतं सुतमनुयियासुः। अनुगन्तुमना इत्यत्र तुं काममनसोरिति मलोपः॥ ८७॥

प्राप्तानुगः सपदि शासनमस्य राजा
सम्पाद्य पातकविलुप्तधृतिर्निवृत्तः।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः॥ ८८॥

आगतानुचरो ≪दशरथो≫ मुनेस्तत्कालमेवाज्ञां विधायाकार्येण नष्टधैर्यः पुरीं प्रत्याययौ। शापं स्वमरणकारणं धारयन्। हृदये स्थितं पदम्, पीठबन्धः पदानि वा "दिष्टान्तमाप्स्यति भवान्" इत्यादीनि यस्य तम्। समुद्र इव

---

**88** After this verse, Hem. gives two extra verses that he introduces with *atra pāṭhāntaraṃ ślokadvayam:* तदर्थमर्थज्ञ गते गतत्रपः किमेष ते वध्यजनो ऽनुतिष्ठतु। स वह्निसंस्कार-मयाचतात्मनः सदारसूनोर्विदधे च तन्नृपः॥ समेयिवान् रघुवृषभो ऽथ सैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः। मनोगतं गुरुमृषिशापमुद्वहन् क्षयानलं जलधिरिवान्तकं पदम्॥

---

**87.3** तुं काममनसोः From the *Kāśikā* on *Aṣṭādhyāyī* 6.1.144.

---

**87.1** निर्दयः ] *conj.*; मुनिर्गताघृणो निर्दयः $G_1$; मुनिर्गतघृणो निर्दयः P$B^1$J; मुनिगतघृणो निर्दयः U **87.1** कुरुतामिति ] *conj.*; विधित्तां कुरुतामिति $G_1$; विधत्तां कुरुतामिति UP $B^{1pc}$; विधात्तां कुरुतामिति $B^{1ac}$; विधात्तां कुर्वतामिति J **87.1** सव्रीडत्वादस्पष्टं ] *conj.*; सव्रीडत्वादव्यक्तमस्पष्टं $G_1$UP$B^1$J **87.1** राज्ञोक्ते ] *conj.*; राज्ञा अभिहिते उक्ते $G_1$UP$B^1$J **87.2** ऋषिः ] $G_1$UP$B^1$; मुनिः J **87.2** प्रज्वलितानि काष्ठान्ययाचत ] *conj.*; हुताशनवत एधान् प्रज्वलितानि काष्ठानि (काष्टानि J) अयाचत $G_1$UP$B^1$J **87.2** भार्यया ] $G_1$UPJ; भार्याया $B^1$ **87.2** मृतं ] *conj.*; परासुं मृतं $G_1$UP$B^1$J **87.2** सुतमनुयियासुः ] *conj.*; पुत्रमनुगन्तुमनाः (मानाः J) अनुयियासुः $G_1$UP$B^1$J **87.3** अनुगन्तुमना ] $G_1$P$B^1$J; अनु-गमना U **87.3** तुं ] $G_1$UP$B^1$; त्तं J **87.3** मलोपः ] $G_1$P$B^1$; सलोपः UJ **88.1** दशरथो मुनेस् ] *conj.*; राजा अस्य मुनेः सपदि $G_1$UP$B^1$J **88.1** नष्टधैर्यः ] $G_1$U$B^1$J; नष्टधैर्यः नष्टं धैर्यं यस्य सः P **88.2** पुरीं प्रत्याययौ ] *conj.*; निवृत्तः प्रत्याययौ $G_1$U$B^1$J; निवृत्तः पुरीं प्रत्याययौ P **88.2** स्वमरणकारणं ] P$B^{3pc}$; स्वमरण° $G_1$J; स्वमरणं U$B^{1ac}$ **88.2** हृदये स्थितम् ] *conj.*; अन्तर्हृदये निविष्टं स्थितं $G_1$UP$B^1$J **88.3** भवानित्यादीनि ] $G_1$U$B^1$J; भवानपीत्यादीनि P **88.3** समुद्र ] *conj.*; अम्बुराशिः समुद्र $G_1$UP$B^1$; अम्बुराशिः समुद्रम् J **88.3** इव ] *conj.*; इवौर्वं $G_1$U$B^1$J; इवौर्वं ज्वलनं P

वडवाग्निम्। ऊर्वमुनिना क्रोधाग्निरुदधौ निक्षिप्तो यस्तमन्ते क्षपयिष्यति। तस्यैवाश्ववक्त्रसादृश्याद्वडवामुख इति नाम। तस्याप्यन्तर्निर्विष्टेत्यादिविशेषणद्वयम्॥ ८८॥

इति रघुवंशे महाकाव्ये सटीके नवमः सर्गः॥

---

**88.4** ऊर्वमुनिना ] *em.*; उर्वमुनिना $G_1$UP$B^1$J **88.5** °सादृश्याद्वडवा° ] P$B^1$; °सदृशाद्वडवा° $G_1$; °सदृशत्वाद्वडवा° U; °सदृशात् वाडवा° J **88.6** °प्यन्तर्निर्विष्टेत्य° ] J; °प्यन्तन्निविष्टेत्य° $G_1$P$B^1$; °प्यन्तन्निविष्ट इत्य° U • Colophon: इति रघुवंशे ] $B^1$; इति श्रीरघुवंशे $G_1$PJ; रघुवंशे U • सटीके ] $G_1B^1$; टीकायां UP; पंडितलोष्टकविरचितायां टीकायां J

# दशमः सर्गः॥

पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ॥ १॥

दशरथस्य भुवं पालयतो मनागूनं वर्षाणां दशसहस्रं जगाम। †पाकशासन इन्द्रस्तद्वत्तेजो यस्य†। महती स्फीता समृद्धिर्यस्य॥ १॥

न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम्।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम्॥ २॥

राजा दशरथो वर्षायुतातिक्रमे ऽपि पितॄणामनृणत्वे हेतुं पुत्राख्यं तेजो न प्राप। सदिति पाठे शोभनम्। अपत्यं कर्म विद्या चेति ज्योतिषां त्रित्वे विशेषेणोपादानम्। तत्क्षणं दुःखमेव तमो ऽपहन्ति निवारयतीति तथोक्तम्॥ २॥

---

**2 c.** सुताभिधानं स ज्योतिः ] $G_1UPB^1V^MB_1^MB_2^MB_3^MB_5^MB_7^ML^M$**C**; पुत्राभिधानं स ज्योतिः $L_2$; सुताभिधानं सज्ज्र्यैतिः J; सुताभिधानं स ज्योति $D^M$; सुताभिधानं सज्ज्योतिः $B_4^M$Vall.$^{vl}$

---

**2.2** अपत्यं कर्म विद्या चेति ] त्रीणि ज्योतींषि पुरुष इति वै देवलो ऽब्रवीत्।
अपत्यं कर्म विद्या च यतः सृष्टाः प्रजास्ततः॥ *Mahābhārata* 2.64:5.

---

**1.1** दशरथस्य भुवं ] *conj.*; तस्य दशरथस्य पृथिवीं $G_1UB^1L_2J$; तस्य दशरथस्य पृथिवीं भुवं P **1.1** मनाग् ] *conj.*; किञ्चिन्मनाग् $G_1UPB^1L_2J$ **1.1** वर्षाणां दशसहस्रं ] *conj.*; शारदां वर्षाणां अयुतं दशसहस्री $G_1J$; शरदां वर्षाणामयुतं दशसहस्रं U; शरदां वर्षाणामयुतं दशसाहस्री $PB^1L_2$ **1.1** जगाम ] *conj.*; ययौ जगाम $G_1UPB^1L_2J$ **1.2** महती स्फीता समृद्धिर्यस्य ] *conj.*; अनूना महती ऋद्धिः समृद्धिर्यस्य $UG_1B^1L_2J$; अनूना महती स्फीता समृद्धिर्यस्य P **2.1** राजा दशरथो ] *conj.*; स राजा $G_1UB^1L_2$; सः राजा P; स राजा दशरथः J **2.3** °षेणोपादानम् ] $PB^1$; °षेणोपदानम् $G_1$; °षणोपादानम् U; °षोणपदानम् $L_2$; °षेणोपादनम् J **2.3** तत्क्षणं ] *conj.*; सद्यस्तत्क्षणं $G_1UPB^1L_2J$ **2.3** दुःखमेव ] *conj.*; शोक एव $G_1UB^1L_2J$; दुःख एव P

© CSABA DEZSŐ, DOMINIC GOODALL AND HARUNAGA ISAACSON, 2025 | DOI:10.1163/9789004721746_005
This is an open access chapter distributed under the terms of the CC BY-NC-ND 4.0 license.

**मनोर्वंशश्चिरं तस्मिन्ननभिव्यक्तसन्ततिः ।**
**निमज्ज्य पुनरुत्थास्यन्नदः शोण इवाभवत् ॥ ३ ॥**

राज्ञि मनोरन्वयो बहुकालमप्रकटितः सन्तानो यस्य तथोक्तो ऽभूत्। शोणाख्यो नद इव। सन्तानः शोणश्च ब्रुडित्वा पुनरुद्भविष्यन्। स हि शोणो ऽनार्यदेशेष्वन्तर्धाय पुनरुत्तिष्ठतीति सन्ततेरपि भावित्वसूचनम्॥ ३॥

यदि सन्ततिरुत्थायिनी कथं तत्कालमेव नोत्पन्नेत्याह—

**अतिष्ठत्प्रत्ययापेक्षसन्ततिः सुचिरं नृपः ।**
**प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ४ ॥**

राजा बहुकालं कारणान्तरमपेक्षत इति तथोक्ता सन्ततिरन्वयो यस्य स एवंविधो ऽभवत्। मन्थनात्पूर्वं न तावत्प्रकटामृतकौस्तुभचन्द्रादीनामुद्भूतिर्यस्य स समुद्र इव। तदुत्पत्तौ तु मन्थ एव प्रत्ययः॥ ४॥

**वामदेवादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।**
**आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ५ ॥**

---

**3 .** ] *om.* Mall.Ar.Nā. ; labelled a *kṣepaka* and discussed after 4 by Hem. **3 c. °थास्यन्** ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Jin. ; °थाप्य U **3 d. नदः** ] $G_1UJD^MV^MB_1^MB_2^MB_3^MB_7^M$Hem.Jin. ; ह्रदः $L^MP$ ; नद $B^1L_2$ ; नद×$B_4^M$ ; ×दस् $B_5^M$ **4 b. सुचिरं** ] Σ; स चिरं Ꞓ **5 a. वामदेवादयस्तस्य** ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$ ; वामदेवादयस्तत्र U; ऋष्यशृङ्गादयस्तस्य Ꞓ **5 c. यतात्मानः** ] Σ; जितात्मानः Mall.

---

**5** Alas, a digital photograph of $L_2$ is missing here.

---

**3.1 राज्ञि** ] *conj.*; तस्मिन्राज्ञि $G_1UPB^1L_2J$ **3.1 °न्वयो बहुकालम्** ] *conj.*; °न्वयश्चिरम् $G_1UB^1L_2J$; °न्वयः चिरं बहुकालं P **3.1 यस्य** ] $UPB^{1pc}L_2$; यस्या $G_1B^{1ac}J$ **3.2 सन्तानः** ] P; *om.* $G_1UB^1L_2J$ **3.2 ब्रुडित्वा** ] $G_1UPB^1J$; क्रुडित्वा $L_2$ **3.3 °नार्य°** ] $G_1UPB^1J$; त्तार्य° $L_2$ **3.3 पुनरुत्तिष्ठतीति** ] $G_1UPB^1J$; पुनरनुष्ठाय पुनरुत्तिष्ठतीति $L_2$ **3.3 सन्ततेरपि** ] $G_1UPB^1J$; सन्ततेपि $L_2$ **3.4 तत्कालमेव** ] $UPB^1L_2J$; तःकालमेव $G_1$ **4.1 राजा बहुकालं** ] *conj.*; राजा सुचिरं $G_1UB^1L_2$; राजा सुचिरं बहुकालं P; स राजा चिरं J **4.1 कारणान्तरम्** ] *conj.*; प्रत्ययं कारणान्तरम् $G_1UPB^1L_2J$ **4.1 तथोक्ता** ] $G_1UPB^1J$; तथोक्तस् $L_2$ **4.2 प्रकटामृतकौस्तुभचन्द्रादीनामुद्भूतिर्यस्य** ] *conj.*; प्रकटरत्नानाममृतकौस्तुभचन्द्रादीनामुत्पत्ति(ति $G_1$) रुद्भूतिर्यस्य $G_1UJ$; प्रकटा रत्नानाममृतकौस्तुभचन्द्रादीनामुत्पत्तिरुद्भूतिर्यस्य $PB^1$; न प्रकटा रत्नामृतकौस्तुभचन्द्रादीनामुत्पत्तिर्यस्य उद्भूति यस्य $L_2$ **4.3 स समुद्र इव** ] *conj.*; स तथाविधो ऽर्णवः समुद्र इव $G_1UB^1J$; सः तथाविधो ऽर्णव इव P; तथाविधोर्णवस्समुद्र इव $L_2$ **4.3 तदुत्पत्तौ** ] $G_1UPB^1J$; ⏑ त्पत्तौ $L_2$

अपत्यकाम्यस्य राज्ञो वामदेवादय ऋत्विजः पुत्राणां निमित्तमपत्यजननं यज्ञं ≪प्रारब्धवन्तः≫। कर्तुमिति शेषः। आदिग्रहणादृष्यशृङ्गजाबालिकात्यायनादयो गृह्यन्ते। साधवः कारुणिकास्तत्कर्मयोग्याः। तथा शान्तमनसः॥ ५॥

अस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः॥ ६॥

अस्मिन्समये यदा पुत्रेष्टिप्रारम्भस्तदैव देवा रावणेनोपद्रुताः सन्तो ऽब्धिशय्याशयनं विष्णुं शरणं ययुः। पान्था इव घर्मखिन्नाश्छायाप्रधानं तरुम्॥ ६॥

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्॥ ७॥

ते च देवा यदैव क्षीराब्धिमासेदुस्तदैव प्रावृडपगमाद्भगवानपि प्रतिबुद्धः। यस्माद्भाविनो व्यापारफलस्य कालहरणाभावश्चिह्नम्॥ ७॥

भोगिभोगासनासीनं ददृशुस्तं दिवौकसः।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्॥ ८॥

---

**6 a.** अस्मिन्न° ] $\mathrm{G_1UPB^1L_2JD^MB^M_4B^M_7}$; तस्मिन्न° $\mathrm{V^MB^M_1B^M_2B^M_3B^M_5L^M}$**C** **7 c.** अव्याक्षेपो ] ŚMall.Ar.Nā.; अव्यापेक्षो Hem.; अत्याक्षेपो Jin.

---

**5.1** अपत्यकाम्यस्य राज्ञः ] *conj.*; सन्तानकाङ्क्षिणो ऽपत्यकाम्यस्य तस्य राज्ञः $\mathrm{G_1UPB^1L_2J}$ **5.2** अपत्यजननं यज्ञं प्रारब्धवन्तः ] *conj.* (cf. Jin.); पुत्रीयामपत्यजननीमिष्टिं (ष्टं J) यज्ञमारेभिरे (यज्ञमारे $\mathrm{G_1}$) $\mathrm{G_1UPB^1L_2J}$ **5.2** कर्तुमिति ] $\mathrm{G_1UPB^1L_2}$; कतुमिति J **5.2** शेषः ] $\mathrm{G_1UB^1J}$; शेषः यज्ञकर्तुममारेभिरे P; विशेषः $\mathrm{L_2}$ **5.3** °दृष्य° ] $\mathrm{G_1B^1L_2J}$; °दृषि° UP **5.3** साधवः ] *conj.*; सन्तः साधवः $\mathrm{G_1UPB^1L_2J}$ **5.3** शान्तमनसः ] *conj.*; यतात्मानः शान्तमनसः $\mathrm{G_1UPB^1L_2J}$ **6.1** °द्रुताः ] $\mathrm{G_1UPB^1L_2J}$; °प्लुताः उपद्रुता $\mathrm{L_2}$ **6.2** °शयनं ] $\mathrm{G_1UPB^1L_2J}$; °शयानं $\mathrm{L_2}$ **6.2** विष्णुं शरणं ] $\mathrm{P^{pc}}$; हरिं विष्णुमभिजग्मुः (ग्मु U) शरणं $\mathrm{G_1UB^1L_2}$; शरणं $\mathrm{P^{ac}}$; हरिं श्रीविष्णुमभिजग्मुः शरणं J **6.2** पान्था ] *conj.*; अध्वगाः पन्था $\mathrm{G_1B^1J}$; अध्वगाः पान्थाः $\mathrm{UPL_2}$ **6.2** घर्मखिन्ना° ] *conj.*; निदाघार्ता घर्मखिन्ना° $\mathrm{G_1UPB^1L_2J}$ **7.1** यदैव क्षीराब्धिमासेदुस् ] *conj.*; यदै (दे $\mathrm{G_1}$) वोदन्वन्तं (वोन्वदन्तं $\mathrm{L_2}$) क्षीराब्धिं प्रापुरासेदुः $\mathrm{G_1UPB^1L_2J}$ **7.1** तदैव ] $\mathrm{UPL_2J}$; तदेव $\mathrm{G_1B^1}$ **7.1** प्रावृद° ] $\mathrm{L_2}$; प्रावृडु° $\mathrm{G_1UPB^1J}$ **7.1** °माद्भगवानपि ] $\mathrm{G_1UPB^1}$; °मात् श्रीभगवानपि J **7.1** प्रतिबुद्धः ] *conj.*; बुबुधे प्रतिबद्धः $\mathrm{G_1J}$; बुबुधे प्रतिबुद्धः $\mathrm{UPB^1}$; बबुधे प्रतिबुद्धो $\mathrm{L_2}$ **7.2** भाविनो ] *conj.*; भविष्यन्त्या भाविन्याः $\mathrm{G_1UB^1L_2J}$; भविष्यन्त्याः P **7.2** व्यापारफलस्य ] *conj.*; कार्यसिद्धेर्व्यापारफलस्य $\mathrm{G_1UPB^1L_2J}$ **7.2** कालहरणाभावश् ] *conj.*; अव्याक्षेपः कालहरणाभावः $\mathrm{G_1UPB^1L_2J}$ **7.2** चिह्नं ] *conj.* (cf. Jin.); अविघ्नं लक्षणम् $\mathrm{G_1PB^1L_2J}$; अविघ्ने लक्षणम् U

अष्टाभिः कुलकम्। देवा भगवन्तमैक्षन्त, न तु दर्शने विघ्न उदपादि। ≪शेषशिरःसमूहभास्वन्मणिप्रकटितशरीरम्≫ ॥ ८ ॥

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे॥ ९ ॥

कमलोपविष्टाया लक्ष्म्याः प्रसृतपाणिपल्लव उत्सङ्गे स्थापितपादम्। पट्टांशुकेन व्यवहिता मेखला यत्र। अभ्यन्तरे हि रशनाबन्धः। अन्तरितत्वं चरणयोर्लक्ष्मीकरयोर्वा। केचित्त्वन्तरितमित्याच्छादितमित्याहुः॥ ९ ॥

प्रफुल्लपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥ १० ॥

प्रफुल्लं यत्सितपद्मं तत्तुल्ये अक्षिणी यस्य तम्। प्राभातिकातप इव वस्त्रे यस्य, पीतवासस्त्वात्। †प्रारम्भे सुखं दर्शनं यस्य† देवैरपि निर्विघ्नदृष्टत्वात्। †शारदं दिवसमिव†। तच्च विकसितानि श्वेतपद्मान्येव नेत्राणि यस्य, बालातपमेवाम्बरं

---

**9 a.** श्रियः ] $UPB^1L_2D^MV^MB_1^MB_2^MB_3^MB_4^M$**C**; श्रियाः $G_1JB_5^MB_7^ML^M$ **10 a.** प्रफुल्ल° ] $UPB^1L_2V^MB_1^MB_4^MB_5^MB_7^ML^M$; प्रफुल्ल° $G_1JB_3^M$; प्रबुद्ध° $D^M$**C**; प्रफुलु° $B_2^M$

---

**8.1** अष्टाभिः कुलकम् ] *conj.*; इत्याद्यष्टाभिः कुलकम् $G_1UJ$; दिवौकसो $PB^1L_2$ **8.1** भगवन्तम् ] *conj.*; तं भगवन्तं $G_1UPB^1J$; तं भगवन्त⏑ ⏑ $L_2$ **8.1** विघ्न उदपादि ] $PB^1$; विघ्नतत्पादि $G_1$; विघ्न उत्पादि U; ि⏑घ्न उदपादि $L_2$; विघ्न उत्पाद्य J **8.2** शेषशिरःसमूहभास्वन्मणिप्रकटितशरीरम् ] *conj.*; भोगिनः शेषस्य भोगः शरीरमेवासनं पर्यङ्कं तत्रासीनं शयानम् (शय्यानं $L_2$) $G_1UPB^1L_2J$ After this, all MSS transmit a further analysis of the same compound: तस्य शेषस्यैव (शेषस्येव P) शिरःसमूहस्य ये उदर्चिषो (उदर्चिषे $L_2$) भास्वन्तो (भास्वोन्त $B^1$, भासंतो J) मणयस्तैर्द्योतितो विग्रहो यस्य तम् **9.1** लक्ष्म्याः ] P; श्रियाः श्रियो लक्ष्म्याः $G_1JL_2$; श्रियः लक्ष्म्याः U; श्रिया× श्श्रि⏑× लक्ष्म्याः $B^1$ **9.1** उत्सङ्गे ] *conj.*; अङ्के उत्सङ्गे $G_1UPB^1L_2J$ **9.1** स्थापितपादम् ] $G_1UB^1L_2J$; स्थापितपदं P **9.2** पट्टांशुकेन व्यवहिता ] *conj.*; कीदृशे। क्षौमेण पट्टांशुकेनान्तरिता व्यवहिता UP; कीदृशे। क्षौमेन पट्टांशुकेनान्तरिता $G_1B^1J$; पट्टांशुकेनान्तरिता व्यवहितापि $L_2$ **9.2** अन्तरितत्वं ] $PB^1L_2J$; अन्तरित्वं $G_1U$ **9.3** °मित्याहुः ] $G_1PJ$; °माहुः U; °मित्या $B^1$; °मित्याह $L_2$ **10.1** प्रफुल्लं ] $UPB^1$; प्रफुल्लं $G_1J$; प्रफुलुं $L_2$ **10.1** यत्सितपद्मं ] *conj.*; पुण्डरीकं यत्सितपद्मं $G_1UJ$; यत्पुण्डरीकं सितपद्मं $PB^1L_2$ **10.1** प्राभातिकातप इव वस्त्रे ] *conj.*; प्राभातिकतपसे वस्त्रे $G_1$; प्राभातिक उपसे वस्त्रे UJ; बालातपनिभे प्रभातिकातपसे वस्त्रे P; बालातपनिभमंशुकं $B^1L_2$ **10.2** °वासत्वात् ] $G_1UPB^1J$; °वासत्वात् $L_2$ **10.2** प्रारम्भे ] $G_1UPB^1J$; प्रारम्भ° $L_2$ **10.3** विकसितानि ] $UPB^1L_2$; विकासितानि $G_1J$

यस्य। आदौ सुखदृश्यं च॥ १०॥

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्रतं बृहतोरसा॥ ११॥

विशालेन वक्षसा कौस्तुभनामानं मणिं दधानम्। दीप्त्याच्छुरित उरस्यो मत्स्याकारो लक्षणविशेषो येन। श्रियो विलासमुकुरम्, मुखदर्शनात्॥ ११॥

बाहुभिर्विटपाकारैर्हेमाभरणभूषितैः।
आविर्भूतं पयोमध्यात्पारिजातमिवापरम्॥ १२॥

स्कन्धवदाकृतिरायता स्थूला च येषां तैर्भुजैः कनकमयकटककेयूरालङ्कृतैरुदधिमध्याद् द्वितीयं पारिजाताख्यं तरुमिवोत्पन्नम्। स हि सुवर्णाभरणभूषितप्रकाण्डः॥ १२॥

दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः।

---

**11 d.** बिभ्रतं बृहतोरसा ] $G_1PB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.$^{vl}$Jin.; बिभ्रतो बृंहतोरसा J; बिभ्रतं विहतोरसा $D^M$; बिभ्राणं बृहतोरसा Hem.Mall.Ar.Nā. **12 b.** हेमा° ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Jin.; दिव्या° Hem.Mall.Ar.Nā. **12 c.** आविर्भूतं पयोमध्यात् ] $G_1PB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Jin.; आविर्भूतं पयोर्मध्यात् $D^M$; आविर्भूतमपां मध्ये Hem.Mall.; आविर्भूतमपां मध्यात् Ar.Nā.

---

**11** U gives testimony through 10:11c, but then its next folio gives text that begins in the middle of the commentary on 10:51.

---

**10.4** आदौ सुखदृश्यं च ] UJ; आदौ सुखं दृश्यं च $G_1$; प्रारम्भे आदौ सुखदृश्यम् P; प्रारम्भे आदौ सुखदृश्यं च $B^1L_2$ **11.1** विशालेन वक्षसा ] $G_1$J; बृहता विशालेनोरसा वक्षसा $PB^1L_2$ **11.1** कौस्तुभनामानं ] $G_1$J; कौस्तुभाख्यमपां सारं कौस्तुभनामानं P; कौस्तुभाख्यमपां सारं (पारं $L_2$) $B^1L_2$ **11.2** दीप्त्याच्छुरित उरस्यो मत्स्याकारो ] $G_1$J; प्रभया दीप्त्या अनुलिप्तो व्याप्तः श्रीवत्सः उरसो मत्स्याकारो P; प्रभयानुलिप्तो व्याप्तः श्रीवत्स उरस्यो $B^1L_2$ **11.2** येन ] $G_1$PJ; यस्य $B^1L_2$ **11.2** श्रियो विलासमुकुरम् ] $G_1$; अन्यच्च लक्ष्म्या विलासमकुरं (विलाप° $L_2$) $PB^1L_2$; श्रियो विलासमन्थरं J **12.1** स्कन्धवदाकृतिरायता स्थूला च ] *conj.*; स्कन्दवदाकृतिरायता स्थूला $G_1$; विटपवदाकारः (विटवदा° $L_2$) आयतः स्थूलश्च $PB^1L_2$; स्कन्दवदायाता येषां स्थूला J **12.1** तैर्भुजैः ] $G_1$PJ; *om.* $B^1L_2$ **12.1** °लङ्कृतैर् ] $G_1B^1L_2$J; °लङ्कृतैः हेतुभिः P **12.2** उदधिमध्याद् ] *conj.*; पयोमध्यादुदधिमध्यात् $G_1PB^1L_2$J **12.2** द्वितीयं पारिजाताख्यं तरुमिवोत्पन्नम् ] $G_1$J; द्वितीयं पारिजाताख्यं तरुमिव आविर्भूतमुत्पन्नम् $PB^1$; *om.* $L_2$ **12.3** सुवर्णा° ] $G_1$J; स्वर्णा° $PB^1L_2$

आयुधैश्चेतनावद्भिरुदीरितजयस्वनम्॥ १३॥

सजीवैरायुधैश्चक्रादिभिरुच्चारितजयशब्दम्। असुरवनिताकपोलभित्तीनां क्षीवतालौहित्यनाशिभिः, पतिवधात्॥ १३॥

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता॥ १४॥

गरुडेन सेवितम्। ≪योजितकरेण≫। श्रीभगवत्सन्निधानवशाच्छान्तेन। अत एव त्यक्तशेषाहिवैरेण। गरुडस्योरगैर्हि शाश्वतिको विरोधः। प्रभुसन्निधौ तु विनीता न वैरायन्ते। वज्रक्षतचिह्नत्वममृताहरणकाले शक्रेण सहयुध्वत्वात्॥ १४॥

योगनिद्रान्तविषदैः पावनैरवलोकनैः।
भृग्वादीननुगृह्णन्तं सौखशायितिकानृषीन्॥ १५॥

सुखशयितं पृच्छन्तीति सौखशायितिकास्तान्भृगुमरीचिपुलस्त्यपुलहादीन्मुनीन्। पवित्रीकरणैः समाधिस्वप्नावसानविमलैर्दृष्टिदानैः प्रसादं तेषां कुर्वाणम्। भगवान् हि वर्षासु शेषशय्यायामब्धौ योगेन निद्राति॥ कुलकम्॥ १५॥

---

**13 c.** आयुधै° ] $G_1PB^1L_2JD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7L^M$Jin.; हेतिभि° Hem.Mall.Ar.Nā. **15 b.** °लोकनैः ] $G_1PB^1L_2JD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5L^M$Hem.Mall.Ar.(?)Nā.; °लोकनै $B^M_7$; °लोकितैः Jin. **15 d.** सौखशायितिकानृषीन् ] $B^M_1$; सौखशायतिकानृषीन् $G_1PB^1L_2JV^MB^M_2B^M_3B^M_4B^M_7L^M$; सौखशायतिका ऋषीन् $D^M$; सौख्यशायतिकानृषीन् $B^M_5$; सौखशायनिकान्मुनीन् Hem.; सौखशायनिकानृषीन् Mall.Ar.Nā.; सौख्यशायिनिकानृषीन् Jin.

---

**13.1** °जयशब्दम् ] $G_1B^1J$; °जयस्वनं +शब्दं+ $L_2$; °जयजयशब्दम् P **13.2** °लौहित्य° ] $G_1PL_2J$; °लोहित्य° $B^1$ **13.2** पतिवधात् ] $G_1PB^1L_2$; पतिधवात् J **14.1** सेवितम्। योजितकरेण *conj.* (cf. Jin.); सेवितम्। कीदृशेन $G_1PB^1L_2J$ **14.1** °धानवशाच्° ] $PB^1L_2J$; °धानेन $G_1$ **14.1** शान्तेन ] *conj.*; विनीतेन शान्तेन $G_1PB^{3pc}L_2J$; विनीतेन $B^{1ac}$ **14.3** वज्रक्षत° ] $L_2$; वज्रकृत° $G_1PB^1J$ **14.4** सहयुध्वत्वात् ] *conj.*; सह युद्धत्वात् $G_1PB^1J$; सहयुध्वत्वम् $L_2$ **15.2** सौखशायितिका° ] *conj.*; सौखशायतिका° $G_1PB^1L_2J$ **15.2** °पुलहादीन् ] $PB^1L_2J$; °पुलहान् $G_1$ **15.2** समाधिस्वप्नावसानविमलै° ] *conj.*; योगनिद्रान्तविषदै° $G_1B^1L_2J$; योगनिद्रान्तविषदैः समाधिस्वप्नावसानविमलै° P **15.2** प्रसादं तेषां कुर्वाणम् ] *conj.*; अनुगृह्णन्तम् $G_1B^1L_2J$; अनुगृह्णान्तं प्रसादं तेषां कुर्वाणं P **15.3** भगवान् ] $G_1PB^1L_2$; श्रीभगवान् J **15.3** °शय्यायामब्धौ ] P; °शय्यायां $G_1B^1L_2J$ **15.3** कुलकम् ] $G_1B^1L_2J$; अनुभावप्रत्ययालम्बनावृत्तिर्निद्रा॥ १५॥ कुलकम् P

**प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।**
**अथैनं तुष्टुवुः स्तुत्यमावाङ्मनसगोचरम्॥ १६॥**

अनन्तरं देवा विष्णुं प्रह्वीभूय स्तुतवन्तः, यतः सर्वोत्कृष्टतया स्तवार्हं रक्षसां चान्तकम्। वाचो मनसश्च यावती तेषां शक्तिस्तद्विषयं तत्पर्यन्तमस्तुवन्नित्यर्थः॥ १६॥

कथमस्तुवन्नित्याह—

**नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।**
**अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने॥ १७॥**

कमलजहरिहररूपाय तुभ्यं नमः। तत्र ब्रह्मरूपेण प्रथमं जगन्ति सृजते। ततो विष्णुमूर्त्या पालनपराय। ततो ऽपि रुद्रात्मना क्षपयित्रे। तदुक्तम्

ब्रह्मत्वे सृजते लोकमित्यादि॥ १७॥

एवं विकृतरूपत्वमभिधायाविकृतरूपत्वमाह—

---

**16 c.** अथैनं ] $G_1PB^1D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$**C**; अथैनंस् $L_2$; अथैवं J **16 cd.** स्तुत्यमा° ] Jin.; स्तुत्यम° $G_1PB^1L_2JB_1^MB_2^MB_3^MB_4^MB_7^ML^M$Hem.Mall.Ar.Nā.; स्त्यत्यम° $D^MV^MB_5^M$

---

**17.3** Cf. *Mārkaṇḍeyapurāṇa* 46:17: ब्रह्मत्वे सृजते लोकान् रुद्रत्वे संहरत्यपि। विष्णुत्वे चाप्युदासीनस्तिस्रो ऽवस्थाः स्वयम्भुवः॥; *Liṅgapurāṇa* 1.70:91: ब्रह्मत्वे सृजते लोकान्कालत्वे संक्षिपत्यपि। पुरुषत्वे ह्युदासीनस्तिस्रो ऽवस्थाः प्रजापतेः॥; *Vāyavīyasaṃhitā* of *Śivapurāṇa*, *pūrva* 10:28: ब्रह्मत्वे सृजते लोकान् कालत्वे संक्षिपत्यपि। पुरुषत्वे ऽत्युदासीनः कर्म च त्रिविधं विभोः॥; and *Svacchandatantra* 11:66c–67b: ब्रह्मत्वे सृजते लोकान् विष्णुत्वे स्थितिकारकः। रुद्रत्वे संहरेत् सर्वं जगदेतच्चराचरम्॥ But Vallabhadeva, who alludes to the verse ad 13:5 below, quotes it ad *Kumārasambhava* 2:6 in the following form: ब्रह्मत्वे सृजते लोकान् कालत्वे संहरत्यपि। पुरुषत्व उदासीनस्तिस्रो ऽवस्थाः स्वयम्भुवः॥

---

**16.1** अनन्तरं देवा विष्णुं ] *conj.*; अथानन्तरं देवा एनं विष्णुं $G_1PB^1L_2J$ **16.1** प्रह्वीभूय ] $G_1PB^1L_2$; प्रक्षीभूय J **16.1** स्तुतवन्तः ] *conj.*; तुष्टुवुः स्तुतवन्तः $G_1PB^1L_2J$ **16.1** स्तवार्हं ] *conj.*; स्तुत्यं स्तवार्हं $G_1PB^1L_2J$ **16.2** यावती ] $G_1PB^1J$; यावत् $L_2$ **16.3** तद्विषयं तत्पर्यन्त° ] *em.*; तद्विषयं तत्पर्यान्त° $G_1$; तद्गोचरं तद्विषयं तत्पर्यन्त° P; तद्गोचरं तत्पर्यन्त° $B^1L_2$; तद्विषयं तत्पयांत° J **17.1** कमलजहरिहररूपाय तुभ्यं नमः ] *conj.*; *om.* $G_1J$; त्रे(त्रि P)धास्थितात्मने कमलजहरिहररूपाय तुभ्यं नमः $PB^1L_2$ **17.2** °पि रुद्रात्मना ] P; °पि रुद्रात्मा $G_1B^1J$; रुद्रात्मा ×⏑̆× $L_2$ **17.2** क्षपयित्रे ] $G_1B^1L_2J$; क्षपयते P **17.3** लोकमित्यादि ] $PB^1L_2J$; लोकमित्या $G_1$

एकः कारणतस्तां तामवस्थां प्रतिपद्यसे।
नानात्वं रागसंयोगात्स्फटिकस्येव ते स्थितम्॥ १८॥

त्वमेको निर्विकारो ऽपि गुणत्रयविभागार्थं तां तां हरिहरब्रह्मलक्षणां दशां श्रयसे। तस्मान्निर्मलस्य स्फटिकमणेः पीतादिरागवशादिव ते बहुरूपत्वमुक्तम्। तत्त्वतस्त्वविकृत एवासि, शुद्धस्वभावः। यद्वा एकश्चिद्रूपः कारणतश्चित्तोपाधिवशात्तां तामवस्थां सुखदुःखमोहादिलक्षणां गृह्णासि। स्फटिक इव रागान्तरम्। यदुक्तम्।

पुरुषो ऽविकृतात्मैव स्वनिर्भासमचेतनम्।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा॥ इति॥ १८॥

एतदेव वितनोति—

रसान्तराण्येकरसं यथा दिव्यं पयो ऽश्नुते।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥ १९॥

मेघ्यं जलं मधुरमपि सद् देशभेदाद्भूमिगुणाद्रसान्तराणि लवणकटुकादीनि यथा प्राप्नोति, तथा त्वमविकारो ऽपि गुणेषु सत्त्वरजस्तमःस्ववस्थाः सुखदुःखमो-

---

**18 .** ] *om.* Ar.Nā.; *kṣepaka* according to Hem.Mall. **18 d.** स्फटिकस्येव ते स्थितम् ] $PB^1B_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.$^{vl}$; स्फटिकस्येव संस्थितम् $G_1$J; ⏑⏑ कस्येव ते स्थितम् $L_2$; स्फटिकस्य ते स्थितम् $V^M$; स्पटिकस्येव ते स्थितम् $D^M$; स्फटिकस्येव दृश्यते Hem.; स्फाटिकस्येव दृश्यते Mall.; स्फटिकस्येव ते मतम् Jin. **19 d.** °वस्था° ] Σ; °वस्थ° Ar.Nā.

---

**18.7** पुरुषो ऽविकृतात्मैव …यथा Source unknown; see endnote.

---

**18.1** निर्विकारो ] $PL_2$; °पि र्विकरो $G_1$; °पि निर्विकारो $B^1$J **18.1** गुणत्रयविभागार्थं ] $G_1$; कारणतो गुणत्रयविभागार्थं $PB^1L_2$; कारणतो गुणत्रयविभागस्थं J **18.1** तां तां हरिहरब्रह्मलक्षणां दशां ] *conj.*; तां तामनवस्थां हरिहरब्रह्मलक्षणां $G_1$; तां तामवस्थां हरिहरब्रह्मलक्षणां दशां P; तां तामवस्थां हरिहरब्रह्मलक्षणां $B^1$; तां तामवस्था +हरि+ हरब्रह्मलक्षणां $L_2$; तामवस्थां हरिहरब्रह्मलक्षणां J **18.2** श्रयसे ] *conj.*; प्रतिपद्यसे $G_1$; प्रतिपद्यसे श्रयसे $PB^1L_2$J **18.2** °रागवशादिव ] P; °रागवदिव $G_1B^1L_2$J **18.3** शुद्धस्वभावः ] $PB^1L_2$; शुद्धसुभावः $G_1$J **18.3** एकश्चिद्रूपः ] $G_1B^1L_2$J; एकचिद्रूपम् P **18.4** गृह्णासि ] $PL_2$; गृह्णामि $G_1B^1$J **18.7** सान्निध्यादुपाधिः ] $PL_2$; सान्निध्यादुपाधि° $B^1$; सानिध्यादुपाधि° $G_1$J **18.7** स्फटिकं ] $G_1PB^1$J; स्फाटिकं $L_2$ **19.1** देशभेदाद्भूमिगुणाद्रसान्तराणि ] $G_1PB^1$J; देशभेदाद्रसान्तराणि $L_2$ **19.2** त्वमविकारो ऽपि ] *conj.*; त्वमविक्रियो $G_1B^1$J; त्वमविक्रियः अविकारो ऽपि P; त्वमविक्रियो $L_2$

हरूपाः प्राप्नोषि॥ १९ ॥

**अमेयो मितलोकस्त्वमनर्थी प्रार्थितावहः।**
**अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥ २०॥**

त्वं ज्ञानबलैश्वर्यवीर्याणां गुणानाममितत्वादपरिच्छेद्यः। लोकस्तु त्वयैतावानयमिति परिच्छिन्नः। तथा त्वं परिपूर्णत्वान्न किञ्चिद्याचसे। लोकस्य तु प्रार्थितं पूरयसि स्वभावात्। तथा गुणोत्कृष्टत्वान्न केनचित्त्वमभिभूतः। अन्यान्पुनर्जयसीति जिष्णुः। तथा त्वं प्रकृतिपुरुषरूपत्वादिन्द्रियाद्यगोचरः। अथ च जगतो हेतुरुत्पादकः। यदुक्तम्

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे। इति॥ २०॥

**हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।**
**दयालुमनघस्पृष्टं पुराणमजरं विदुः॥ २१॥**

---

**20 a.** अमेयो ] Σ; अमितो Ar.Nā. **20 b.** ◦नर्थी प्रार्थितावहः ] $G_1PB^1L_2JV^MB_2^MB_3^MB_4^MB_5^MB_7^M$; ◦र्थी प्रार्थितावहः $D^M$; ◦नर्थी प्रार्थतावहः $B_1^M$; ◦नर्थी पार्थितावहः $L^M$; ◦नर्थः प्रार्थनावहः Hem.; ◦नर्थी प्रार्थनावहः $Hem.^{vl}$Mall.Ar.Nā. (Jin. uncertain) **21 b.** अकामं ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Mall.Jin.; कामदं $Hem.^{vl}$Ar.(?)Nā. **21 c.** ◦नघ◦ ] $G_1B^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Mall.Ar.Nā.; ◦दया◦ Hem. (Jin. uncertain)

---

**20.6** अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे *Mahābhārata* 6.30:18ab (*Bhagavadgītā* 8:18ab).

---

**19.3** अवस्थाः सुखदुःखमोहरूपाः प्राप्नोषि ] *conj.*; अवस्था सुखदुःखमोहरूपा (प $G_1$) अश्नुषे प्राप्नोषि $G_1PB^1L_2J$ **20.1** ज्ञानबलैश्वर्यवीर्याणां ] $G_1B^1L_2J$; ज्ञानबलैश्वर्यशक्तितेजोवीर्याणां षण्णां P **20.1** गुणानाममितत्वाद◦ ] *conj.*; गुणानाममितत्वादमेयो $B^1L_2$; गुणानामसितत्वादमेयो $G_1J$; गुणानामपि तत्त्वादमेयो P **20.2** परिच्छिन्नः ] *conj.*; मितः परिच्छिन्नः $G_1PB^1L_2J$ **20.2** त्वं ] *conj.*; त्वमनर्थी $G_1PB^1L_2J$ **20.2** किञ्चिद्याचसे ] $PB^1L_2J$; किञ्चिदाचसे $G_1$ **20.3** पूरयसि ] *conj.*; आवहसे पूरयसि $G_1B^1L_2J$; आवहसे पूरयसे P **20.3** त्वमभिभूतः ] *conj.*; त्वं जितः $G_1B^1L_2J$; त्वं जितः अभिभूतो P **20.4** तथा ] $G_1PB^1L_2$; अन्यथा J **20.4** त्वं प्रकृतिपुरुषरूपत्वाद् ] *conj.*; त्वमव्यक्तः $G_1B^1J$; त्वमव्यक्तः प्रकृतिपुरुषरूपत्वाद् P; त्वमविक्तः $L_2$ **20.5** अथ च जगतो हेतुरुत्पादकः ] *conj.*; व्यक्तस्य जगतस्तु कारणम् $G_1B^1J^{pc}$; अथ च व्यक्तस्य जगतः कारणं हेतुरुत्पादकः P; व्यक्तस्य जगतः - - - $L_2$; अव्यक्तस्य जगतस्तु कारणं $J^{ac}$ **20.6** अव्यक्ताद्व्यक्तयः सर्वाः प्रभव◦ ] P; अव्यक्ताद्व्यक्तया सर्वाः प्रभव◦ $G_1$; अव्यक्ताद्व्यक्तयः सर्वप्रभाव◦ $B^1$; अव्यक्ताद्व्यक्तयस्सर्वा प्रभव◦ $L_2$; श्रीभगवद्गीतासु अव्यक्ताद्व्यक्तयः सर्वाः प्रभव◦ J **20.6** इति ] $G_1P^{pc}B^1L_2J$; *om.* $P^{ac}$

त्वामेवंविधं विरुद्धस्वभावं पण्डिता जानन्ति। तथा हि चेतःस्थमप्यनिकटं। यश्च हृदयस्थो निकटस्थः सन् स कथमनासन्नो दूरे भवेत्। भगवांस्तु परमात्मरूपत्वाद्धृत्स्थः, अज्ञेयत्वाच्चानिकटः। तथानभिलाषमपि तपस्यन्तम्। कामनाग्रस्तो हि तपश्चरति। भगवांस्तु सर्वतः परिपूर्णत्वादकामः। लोकयात्रार्थं तु तपस्यति। यदुक्तम्

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं प्रवर्ते ऽथ च कर्मणि॥
यद्यहं न प्रवर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तेरन्मनुष्याः पार्थ सर्वशः॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। इति।

तथा कृपावन्तं क्लेशेभ्यो जगतामुज्जिहीर्षुत्वात्, व्यसनैश्चालिप्तम्। न मां कर्माणि लिम्पन्तीति स्मृतेः। यश्च स्वयमघैरभिभूयते स कृपावान्भवति। त-

---

21 न मे पार्थास्ति ··· पार्थ सर्वशः ] न मे पार्थास्ति कर्तव्यमिति॥ यद्यहम् न प्रवर्तेयमिति $L_2$

---

**21.10** न मे पार्थास्ति ··· कर्म चेदहम् *Mahābhārata* 6.25:22–4b (with variants) (*Bhagavadgītā* 3:22–4b).

**21.12** न मां कर्माणि लिम्पन्ति *Mahābhārata* 6.26:14a (*Bhagavadgītā* 4:14a).

---

**21.1** °स्वभावं ] $PB^1J$; °सुभावं $G_1L_2$ **21.1** पण्डिता ] *conj.*; विदुः। पण्डिता $G_1PB^1L_2J$ **21.2** चेतःस्थमप्यनिकटं यश्च हृदयस्थो ] P; यो हृदयस्थो $G_1B^1L_2J$ **21.2** स कथमनासन्नो ] $PB^1$; स कथमन्नासन्नः $G_1$; स कथमापन्नः $L_2$; कथमनासन्नः J **21.2** भगवांस्तु ] $G_1PB^1L_2$; श्रीभगवांस्तु J **21.3** °द्धृत्स्थः ] P; °द्धृदयस्थः $G_1B^1L_2J$ **21.3** °त्वाच्चानिकटः ] $PB^1L_2$; °त्वाच्च निकटः $G_1J$ **21.3** तथानभिलाषमपि ] *conj.*; तथा अकामपि $G_1L_2^{ac}$; तथा अकाममनभिलाषमपि P; तथा अकाममपि $B^1J$; तथा ऽकाम+म+पि $L_2^{pc}$ **21.3** तपस्यन्तम् ] P; तपस्विनम् $G_1B^1L_2J$ **21.4** कामनाग्रस्तो ] $G_1B^1J$; कामनाग्रस्थो P; कामनामनाग्रस्थो $L_2$ **21.4** परिपूर्णत्वाद् ] P; पूर्णकामत्वाद् $G_1B^1L_2J$ **21.5** यदुक्तम् ] $G_1PB^1L_2$; यदुक्तं भगवता J **21.6** किञ्चन ] $G_1B^1J$; विद्यते P **21.7** प्रवर्तेथ च ] $PB^1$; न प्रवर्ते ऽथ $G_1$; प्रवर्त तेथ J **21.8** प्रवर्तेयं ] $PB^1J$; प्रवर्ते $G_1$ **21.9** °नुवर्तेरन् ] $G_1P^{pc}B^1J$; °नुवर्तन्ते $P^{ac}$ **21.10** लोका न कुर्यां कर्म चेदहम् ] $PB^1J$; लोका न कुर्यात् कर्म चेदहम् $G_1$; लोकान् $L_2$ **21.11** कृपावन्तं ] *conj.*; दयालुं $G_1B^1L_2$; दयालुं कृपावन्तं P; दयालं J **21.11** व्यसनैश्चालिप्तम् ] *conj.* (cf. Jin.); अघैर्व्यसनैश्चास्पृष्टम् $G_1PB^1L_2J$ **21.12** न मां कर्माणि लिम्पन्तीति स्मृतेः ] *em.*; न मां कर्माणि लिम्पन्ति इति स्मृते P; न मे कर्माणि लिप्यन्तीति स्मृते $G_1$; न मे कर्माणि लिम्पन्ति इति स्मृतेः $B^1L_2J$ **21.12** कृपावान्भवति ] $G_1PB^1$; कृ ------ $L_2$; कृपाभान् भवति J

था चिरन्तरं नित्यत्वात्, अक्षयमविनाशित्वात्। यश्च पुराणश्चिरजीवी स विस्रसायुक्तो न भवतीति विरोधः॥ २१॥

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः। सर्वप्रभुरनीशस्त्व-
मेकस्त्वं सर्वरूपभाक्॥ २२॥

अपि त्वं सर्ववेदी, सर्वेश्वरत्वात्, त्वां तु न कश्चिज्जानाति, विलक्षणत्वात्। तथा सर्वेषां त्वं योनिः, त्वं पुनरात्मन एव सकाशात्प्रादुर्भवसि। तथा त्वं सर्वेषां नायकः, सर्गस्थितिप्रलयकृत्त्वात्, तव तु न कश्चिदीशो विद्यते। तथा एको निर्विकारो ऽपि त्वं सर्वेषां तु मूर्तीः सेवसे, विश्वात्मकत्वात्॥ २२॥

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥ २३॥

एवंविधं त्वां मुनय आचचक्षिरे। विष्णुसंहितायाम् 'इदं विष्णुर्विचक्रमे' इ-त्यादिभिः सप्तभिः सामभिरभिष्टुतम्। तथा †सप्तस्वर्णवेषु यज्जलं तत्र शेते†

---

**23.1** इदं विष्णुर्विचक्रमे *Sāmaveda* 1669. There follow, however, only five further verses in that *sūkta*. Possibly the recension known to Vallabha was different. Note that Hem. and Mall. identify different groups of *Sāman*s, one starting with रथन्तर, according to Mall., and, according to Hem., with बृहद्रथन्तरम्

---

**21.13** चिरन्तरं ] *em.*; पुराणं $G_1B^1L_2J$; पुराणं चिरन्तरं P **21.13** अक्षयमविनाशि-त्वात् ] *conj.*; अजरमक्षयत्वात् अविनाशित्वात् $G_1PB^1J$; अजरमक्षयत्वात् ----- $L_2$ **21.13** पुराणश् ] $PB^1L_2$; पुराणश्च $G_1J$ **21.14** विस्रसायुक्तो ] $G_1PB^1J$; विससा युक्ते $L_2$ **21.14** भवतीति विरोधः ] $G_1PB^1J$; ---रिधः $L_2$ **22.1** अपि त्वं सर्ववेदी ] *conj.*; अपि त्वं सर्वज्ञः सर्ववेदी $G_1PB^1J$; ----ज्ञः सर्ववेदी $L_2$ **22.1** त्वां ] $G_1PB^1$; त्वा J **22.1** विलक्षणत्वात् ] $G_1PB^1J$; ---- $L_2$ **22.2** तथा ] $PB^1L_2$; तथा च $G_1J$ **22.2** स-काशात्प्रादुर्भवसि ] P; सकाशाद्भवसि $G_1J$; सका +शा+दुद्भवसि $B^1$; सकाशात् --- $L_2$ **22.3** त्वं सर्वेषां ] $G_1PJ$; सर्वेषां त्वं $B^1L_2$ **22.3** नायकः ] *conj.*; प्रभुः नायकः $G_1PB^{3pc}J$; प्रभुः $B^1L_2$ **22.3** °प्रलयकृत्त्वात् ] $PB^1L_2J$; °प्रलयत्वात् $G_1$ **22.3** तव तु न ] $G_1PB^1J$; --- $L_2$ **22.3** कश्चिदीशो विद्यते ] P; कश्चिदीशः $B^1L_2J$; कच्चिदीशः $G_1^{pc}$; किच्चिदीशः $G_1^{ac}$ **22.4** सर्वेषां तु मूर्तीः सेवसे ] *conj.*; सर्वरूपभाक् $G_1B^1J$; सर्वरूपभाक् सर्वेषां तु रूपाणि मूर्तीर्भजसे सेवसे P; सर्वरूपभासकात्वात् $L_2$ **22.4** विश्वात्मकत्वात् ] $G_1PB^1J$; *om.* $L_2$ **23.1** एवंविधं त्वां मुनय ] $G_1PB^1J$; ---- $L_2$ **23.2** सप्तभिः सामभिर् ] $G_1B^1$; सामभिः P; *om.* $L_2^{ac}$(eyeskip); सप्तभिः $L_2^{pc}J$ **23.2** °रभिष्टुतम् ] *conj.*; °रुपगीतमभिष्टुतं $G_1PB^1L_2^{pc}J$; *om.* $L_2^{ac}$(eyeskip)

इति तम्। क्षारक्षीरदधिघृतेक्षुसुरास्वादूदकाख्याः सप्त समुद्राः। तथा †सप्तार्चिरग्निरेव मुखं यस्य तम्†। यस्याग्निरास्यमिति वचनात्। तथा †सप्त लोका एकः संश्रयः पदं यस्य†। भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येते सप्त लोकाः॥ २३॥

चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥ २४॥

धर्मार्थकाममोक्षफलं यदेतज्ज्ञानम्, कृतत्रेताद्वापरकलिलक्षणा या समयदशा, ब्राह्मणक्षत्रियवैश्यशूद्ररूपो यश्चैष लोकः, तदशेषं भवत्तश्चतुर्मुखात्प्रभवति। मया सर्वमिदं सृष्टमिति श्रुतेः। सर्वमिति नपुंसकेनैकवत्। चतुर्मुखत्वं भगवतश्चातुरात्म्यात्सर्वतोमुखत्वाद्वा। सर्वतोमुखः सर्वदर्शनस्तुत्यः॥ २४॥

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।

---

**24 b.** कालावस्था चतुर्युगा ] $G_1PB^1JV^MB_3^MB_4^M$Mall.; कालावस्था चतुर्युगः $L_2L^M$; कालावस्था चतुर्युगाः $D^MB_5^{Mpc}B_7^M$; कालावस्थाश्चतुर्युगाः $B_1^MB_2^M$Hem.Ar.Nā.Jin.; कालावस्था चतुर्युमाः $B_5^{Mac}$ **24 c.** चतुर्वर्णमयो लोकस् ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$ $L^M$Mall.Ar.Nā.Jin.; चातुर्वर्ण्यमयो लोकस् Hem.; चतुर्वर्णमया लोकास् Jin. **24 d.** सर्वं ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^ML^M$Hem.Mall.Ar.$^{vl}$Nā.Jin.; सर्गश् Hem.$^{vl}$Ar. **24 d.** °मुखात् ] Σ, °मुखम् $L^M$ **25 .** $B_4^M$℗ invert verses 25 and 26.

---

**23.4** यस्याग्निरास्यम् *Mahābhārata* 12.47:44a and *Viṣṇudharmottara* 1.52:30c.

**24.3** मया सर्वमिदं सृष्टम् Source unknown, but cf. *Mahābhārata* 6.31:4ab (*Bhagavadgītā* 9:4ab) मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।

---

**23.3** इति तम् ] $G_1J$; इति सप्तार्णवजलेशयस्तं $PB^1L_2$ **23.3** °घृते° ] $G_1PL_2J$; °पाते° $B^1$ **23.3** °दकाख्याः ] $G_1PB^1J$; °दकास् $L_2$ **23.4** यस्याग्निरास्यमिति वचनात् ] $G_1PB^1L_2$; यस्याग्निरास्यं द्यौर्मूर्ध्न खं नाभिश्चरणौ क्षितिरिति वचनात् मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायतेति श्रुतिः J **23.5** एकः संश्रयः ] $PB^1L_2^{pc}$; एकास्संश्रयः $G_1J$; *om.* $L_2^{ac}$ **23.6** पदं यस्य। भूः भुवः स्वर्महर्जनस्तपः सत्यमित्येते सप्त लोकाः ] $G_1PB^1J$; *om.* $L_2^{ac}$; पदं यस्य (यस्य पदं $L_2^{ac}$) भूः भुवः स्वः महः जनः तपः $L_2$ (in margin) **24.1** कृतत्रेताद्वाप्र° ] $B^1L_2$; कृतात्रेताद्वापर° $G_1J$; कृतत्रेताद्वापरि° P **24.1** समयदशा ] P; कालावस्था $G_1B^1L_2J$; कालावस्था समयदशा P **24.2** यश्चैष ] P; यश्च $G_1B^1L_2J$ **24.2** लोकः ] $G_1$ $PB^1J$; लोका $L_2$ **24.2** तदशेषं ] $G_1B^1L_2J$; तदेतदशेषं P **24.2** भवत्तश् ] *conj.*; त्वत्तश् $G_1B^1L_2J$; त्वत्तः भवत्तः P **24.3** सृष्टमिति ] $PB^1L_2J$; स्पृष्टमिति $G_1$ **24.4** °स्तुत्यः ] $G_1PB^1J$; °स्तु -- $L_2$

स्वपतो जागरूकस्य याथात्म्यं वेद कस्तव॥ २५ ॥

एवंविधस्य विरुद्धरूपस्य तव यथास्वरूपत्वं को जानाति। स्वयम्भुवो ऽपि सतो ऽसकृदुपेन्द्रादिरूपेण जन्माददानस्य। अजो ऽपि न व्ययोत्पत्तिरिति श्रुतेः। तथा परमात्मरूपत्वान्निष्क्रियस्यापि मारितहिरण्यादिविपक्षस्य। तथा त्रिभुवनकार्यैकजागरूकस्यापि योगनिद्रायां शयालोः। विरोधः सुगमः॥ २५ ॥

यदि याथात्म्यज्ञानाभावः, कथं तर्हि ध्यानप्रवृत्तिरित्याह—

अभ्यासनिगृहीतेन मनसा हृदयास्पदम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये॥ २६ ॥

त्वां हृत्पद्मस्थं प्रकाशमयं केवलमभ्यासनिरुद्धेन चेतसा समाधिमन्तो विमोक्षार्थं गवेषयन्ति, न त्वन्ये॥ २६ ॥

---

**25 d. याथात्म्यं** ] $PB^1L_2JV^{Mpc}D^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Mall.Jin.; यथात्म्यं $G_1$ $V^{Mac}$; याथार्थ्यं Ar.Nā. **26 b. हृदयास्पदम्** ] $G_1B^1JD^MB_1^MB_3^MB_4^MB_7^M$; हृदयङ्गमम् $V^M$; हृदयाश्रयम् $PL_2B_5^ML^M$**C**; हृदयश्रयम् $B_2^M$

---

**25.3** अजो ऽपि न व्ययोत्पत्तिः Source? Cf. *Mahābhārata* 6.26:6a (*Bhagavadgītā* 4:6ab) अजो ऽपि सन्नव्ययात्मा भूतानामीश्वरो ऽपि सन्।

---

**25.1 तव यथास्वरूपत्वं** ] $G_1PB^1J$; ---- स्वरूपत्वं $L_2$ **25.1 जानाति** ] *conj.*; वेद जानाति $G_1PB^1L_2J$ **25.1 स्वयम्भुवो** ] *conj.*; अजस्य स्वयम्भुवो $G_1PB^1L_2J$ **25.2 ऽसकृदुपेन्द्रा°** ] $G_1PB^1J$; ---- पेन्द्रा° $L_2$ **25.2 जन्माददानस्य** ] *conj.*; जन्म गृह्णत आददानस्य $PB^1L_2$; जन्म गृह्णतो आददानस्य $G_1J$ **25.2 °पि न व्ययोत्पत्तिरिति** ] $G_1PB^1J$; ---- त्पत्तिरिति $L_2$ **25.3 परमात्मरूप°** ] $G_1PB^{1ac}L_2J$; परमात्म+स्व+रूप° $B^{3pc}$ **25.3 °स्यापि** ] $G_1PB^1J$; °स्य -- $L_2$ **25.3 मारित°** ] P; क्षपित° $G_1B^1J$; -- त° $L_2$ **25.4 त्रिभुवनकार्यैकजागरूकस्यापि** ] *conj.*; त्रिभुवनभार्यैकजागरूकस्यापि $G_1PB^1J$; रात्रिभुवनभार्य ---- स्यापि $L_2$ **25.4 योगनिद्रायां** ] *conj.*; स्वपतो योगनिद्रायां $G_1PB^1J$; सुपतो योगनिद्रायां $L_2$ **25.4 शयालोः। विरोधः सुगमः** ] $PB^1J$; शयालो विरोधः सुगमः $G_1$; शयालोः $L_2$ **25.5 याथात्म्यज्ञानाभावः** ] $PB^{1pc}$; याथात्म्यज्ञानभावात् $G_1$; याथात्म्यज्ञानभावः $B^{1ac}$; ----- $L_2$; याथात्म्यज्ञानाभावात् J **26.1 हृत्पद्मस्थं** ] *conj.*; हृदयस्थं $G_1B^1L_2J$; हृदयस्थं हृत्पद्मस्थं P **26.1 प्रकाशमयं** ] *conj.*; ज्योतीरूपं $G_1B^1L_2J$; ज्योतीरूपं प्रकाशमयं P **26.1 °सनिरुद्धेन चेतसा** ] P; °सवशीकृतेन मनसा $G_1B^1J$; ----- न मनसा $L_2$ **26.1 समाधिमन्तो** ] *conj.*; योगिनो $G_1B^1L_2J$; योगि--- समाधिमन्तो P **26.2 विमोक्षार्थं** ] *conj.*; ऽपि मोक्षार्थं $G_1PB^1L_2J$ **26.2 गवेषयन्ति** ] *conj.*; विचिन्वन्ति $G_1B^1L_2J$; विचिन्वन्ति गवेषयन्ति P

**शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः।**
**पर्याप्तो ऽसि प्रजाः पातुमौदासीन्येन वर्तितुम्॥ २७॥**

विरुद्धरूपाः क्रियाः कर्तुं त्वमेव शक्तः। तथा ह्यात्मरूपेण शब्दस्पर्शरसरूपगन्धान्विषयान् भुङ्क्षे, दुश्चरमपि तपश्चरसि नरनारायणरूपेण। तथा दानवादिवधेन प्रजाः पालयसि, सर्वज्ञरूपेणोदासीनो ऽपि वर्तसे॥ २७॥

**बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।**
**त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥ २८॥**

साङ्ख्यन्यायवैशेषिकबौद्धलोकायतमीमांसाभिर्बहुभिरपि दर्शनैः ≪पृथग्भूता≫ मार्गास्त्वामेवानुप्रविशन्ति। बहुमुखैरुपायैस्त्वमेव साध्य इत्यर्थः। सर्वरूपत्वात्तव। सर्वे च ते मार्गाः सिद्धिकारणानि। साध्यस्यार्थस्य युक्तिघटितत्वात्। यथा गाङ्गाः प्रवाहा बहुमुखा अपि समुद्रमेवैकं प्रविशन्ति। ते ऽपि सिद्धिदाः, स्वर्गादिहेतुत्वात्॥ २८॥

**त्वदावेशितचित्तानां त्वत्समर्पितकर्मणाम्।**
**गतिस्त्वं वीतरागाणामभूयःसन्निवृत्तये॥ २९॥**

---

**27 b.** चरितुं दुश्चरं ] $G_1B^1L_2B_1^MB_3^MB_4^MB_7^M$Hem.Mall.Ar.Nā.(Jin. uncertain); दुश्चरं चरितुं $PD^MV^MB_2^MB_5^ML^M$; चरितं दुश्चरं J **29 a.** त्वदा° ] Σ; त्वय्या° Mall.

---

**27.1** विरुद्धरूपाः ] $PB^1L_2$; विरुरूपाः $G_1$; विविधरूपाः J **27.1** शक्तः ] *conj.*; पर्याप्तः शक्तः $G_1PB^1L_2J$ **27.2** °रूपगन्धान्विषयान् ] $PB^1L_2J$; °गन्धान्विषयान्विषयान् $G_1$ **27.2** भुङ्क्षे ] *conj.*; भुङ्क्ते $G_1^{pc}PL_2J$; भोङ्क्ते $G_1^{ac}$ **27.2** दुश्चरमपि ] P; दुश्चरं $G_1B^1L_2J$ **27.2** तपश्चरसि ] $G_1PB^{1pc}L_2J$; तपश्चरांसि ×⏑̄ ⏑̄ ⏑̄×रूपे $B^1$ **27.3** नरनारायणरूपेण तथा दानवादिवधेन प्रजाः पालयसि सर्वज्ञरूपेणोदासीनो ऽपि वर्तसे ] $PB^1$; नरनारायणरूपेणोदासीनो ऽपि वर्तसे $G_1$J(eyeskip); नरनारायणरूपेण तथा दानवादिवधेन प्रजाः पालयसि सर्वज्ञरूपेणोपि वर्तसे $L_2$ **28.1** पृथग्भूता ] *conj.* (cf. Jin.); भिन्ना $G_1PB^1L_2J$ **28.2** मार्गास् ] *conj.*; मार्गास्त्वय्येव निपतन्ति $G_1PB^1L_2J$ **28.2** त्वामे° ] $G_1PB^1J$; तामे° $L_2$ **28.2** °वानुप्रविशन्ति ] $G_1B^1L_2J$; °वानुप्रवेशन्ति व्रजन्ति P **28.2** बहुमुखैरुपायैस्त्वमेव ] P; त्वमेव बहुभिरुपायैः $G_1B^1L_2J$ **28.3** सर्वरूपत्वात्तव ] $L_2$; सर्वरूपात्तव $G_1PB^1J$ **28.3** सिद्धिकारणानि ] $G_1PB^1J$; सिद्धकरणानि $L_2$ **28.4** गाङ्गाः ] $B^1L_2^{pc}$; गङ्गा° $G_1P L_2^{ac}J$ **28.4** अपि समुद्रमेवैकं ] P; अपि समुद्रमेकं $G_1J$; अ+र्णवं+ स×ा×मुद्रमेवैकं $B^1$; असमुद्रमेवैकं $L_2$ **28.4** प्रविशन्ति। ते ऽपि ] $G_1PB^1J$; प्राविशन्ति ते से $L_2$

एवंविधानां प्राणिनामपुनरावृत्तये त्वमेव गतिरुपायः शरणम्। कीदृशानाम्? त्वयि निक्षिप्तं "त्वमेव सर्वम्" इति मनो यैः। तथा त्वयि सन्न्यस्तं क्रियाफलं यैः। ब्रह्मण्याधाय कर्माणीति वचनात्। रागद्वेषादिरहितानाम्, तेषामेव सन्न्यासे ऽधिकारात्। इत्थमेव च तेषां मोक्षावाप्तिः॥ २९॥

इह भगवतो भूमिरापो ऽनलो वायुरित्यादिकमेकं व्यक्तं रूपम्, अपरमव्यक्तमागमहेतुगम्यम्, सत्तर्केषु च साध्यसाधनं प्रति 'दृष्टमनुमानमाप्तवचनम्' इति प्रमाणत्रयमुक्तमिति हृदि कृत्वाह—

प्रत्यक्षो ऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥ ३०॥

तव यो भूम्यादिको महिमा प्रत्यक्षो ऽपि, अतिभूयस्त्वादपरिच्छेद्यो दुर्ज्ञेय इत्येवमवस्थिते, आगमहेतुभ्यां प्रमाणाभ्यां साध्यं त्वां प्रति कथैव नास्ति। यः प्रत्यक्षेणापि दुःसाधः स कथं प्रमाणान्तरैः सुसाधः स्यात्, विश्वातीतस्य ज्योतिषो वाङ्मनसाविषयत्वादिति भावः॥ ३०॥

---

**30 d. साध्यं त्वां** ] $G_1PB^1JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Mall.Ar.$^{vl}$Jin.; सख्यं त्वां $L_2$; साख्यं त्वां $D^M$; साध्यतां Ar.Nā.

---

**30 दुःसाधः स कथं प्रमाणान्तरैः सुसाधः** ] दुःसाध्यः $L_2$(eyeskip)

---

**29.3** ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्त्रमिवाम्भसा॥ *Mahābhārata* 6.27:10 (*Bhagavadgītā* 5:10).

**29.7** दृष्टमनुमानमाप्तवचनम् *Sāṃkhyakārikā* 4ab.

---

**29.1 प्राणिनामपुनरावृत्तये** ] P; प्राणिनां पुनरावृत्तये $G_1L_2J$; प्राणिनां पुनरनावृत्तये $B^1$ **29.2 त्वयि निक्षिप्तं** ] *conj.*; त्वय्यावेशितं निक्षिप्तं $G_1PB^1L_2J$ **29.2 सर्वमिति** ] $PB^1L_2$; सर्वं $G_1J$ **29.2 मनो** ] *conj.*; चित्तं $G_1B^1L_2J$; चित्तं मनो P **29.2 तथा** ] $G_1PB^1L_2$; तया J **29.3 सन्न्यस्तं क्रियाफलं** ] *conj.*; समर्पितं सन्न्यस्तं कर्म क्रियाफलं $G_1PB^1L_2J$ **29.3 ब्रह्मण्यधाय** ] $B^1J$; ब्रह्मण्यादाय $G_1L_2$; कर्मण्यादाय P **29.3 कर्माणीति** ] $PL_2J$; कर्मणीति $G_1B^1$ **29.3 रागद्वेषादिरहितानाम्** ] *conj.*; वीतरागाणां रागद्वेषादिरहितानाम् $PB^1$; वेतरागाणां रागद्वेषादिरहितानाम् $G_1J$; वीतरागानां रागद्वेषरहितानां $L_2$ **29.4 च तेषां** ] $G_1PB^1J$; चैतेषां $L_2$ **29.5 °कं व्यक्तं रूपम्** ] $G_1PB^1J$; °के व्यतरूपम् $L_2$ **29.6 सत्तर्केषु च** ] P; स तु केषु $G_1$; सत्तर्केषु $B^1$; स तर्केषु च $L_2$; मत्तर्केषु J **29.7 दृष्टम्** ] $PB^1L_2J$; दृष्टम् $G_1$ **30.2 इत्येवमवस्थिते** ] $B^1L_2$; इत्येवमस्थितम् $G_1J$; इत्येवमवस्थितम् P **30.2 आगमहेतुभ्यां** ] *conj.*; आप्तवचनानुमानाभ्यामागमहेतुभ्यां $G_1PB^1J$; आप्तवचनानुमाभ्यामगमहेतुभ्यां $L_2$ **30.2 साध्यं** ] $G_1PB^1J$; सख्यं $L_2$ **30.3 सुसाधः** ] $G_1B^1J$; सुसाध्यः P

यश्चैवंविधः स कथं लोकस्योन्मुखः स्यादित्याह—

**केवलं स्मरणेनैव पुनासि पुरुषं यदा।**
**अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥ ३१॥**

त्वं ध्यानमात्रेणैव यदा पुरुषं पवित्रीकरोषि, एतेनैव लिङ्गेन त्वय्यपरा ये व्यापारा अर्चादयस्ते व्याख्यातफलाः। पावनत्वे किं प्रमाणमिति चेत्। आत्मनो लाघवाद्यनुभवः॥ ३१॥

स्तुतीनामप्यगोचरत्वं भगवतो वक्तुमाह—

**उदधेरिव रत्नानि तेजांसीव विवस्वतः।**
**स्तुतिभ्यो व्यतिरिच्यन्ते दूरेण चरितानि ते॥ ३२॥**

त्वदीयानि चेष्टितानि स्तुतिभ्यः सुष्ठु पृथग्भवन्ति। त्वच्चेष्टितं नुतिभिर्वक्तुमशक्यमित्यर्थः। यथार्णवान्मणयो व्यतिरिच्यन्ते। न ह्यब्धिपरिच्छेदेन रत्नपरिच्छेदः कृतो भवति। यथा च तेजांसि सूर्यात् पृथग्भवन्ति। न हि रविरेवालोक इति तात्पर्यार्थः। तस्मादन्य एव सकलपदार्थबाह्यस्त्वमन्यान्येव च त्वच्चरितानीति तात्पर्यार्थः॥ ३२॥

---

**31 a. स्मरणेनैव** ] ŚMall.; स्मरणेनापि Hem.Ar.Nā.Jin. **31 b. यदा** ] $G_1^{pc}PB^1L_2JD^M B_1^M B_3^M B_4^M B_5^M B_7^M$Ar.Nā.Jin.; यधा $G_1^{ac}$; यदि $V^M$; यिदि $L^M$; यतः $B_2^M$Hem.Mall. **32 c. स्तुतिभ्यो व्यतिरिच्यन्ते** ] $G_1PB^1L_2JV^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M L^M$Mall.Ar.Nā.; स्तुतिभ्यो वितिरिच्यन्ते $D^M$; स्तुतिभ्यो ह्यतिरिच्यन्ते Hem.; श्रुतिभ्यो व्यतिरिच्यन्ते Jin. **32 d. दूरेण** ] $G_1PB^1L_2JD^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M L^M$Hem.Jin.; दूराणि Mall.Ar.Nā.

---

**31.1 °मात्रेणैव** ] P; °मात्रेण $G_1B^1L_2J$ **31.2 त्वय्यपरा ये व्यापारा** ] *conj.*; त्वयि अन्या अपरा या वृत्तयो व्यापारा $G_1PB^1L_2J$ **31.2 ते व्याख्यातफलाः** ] *conj.*; ता निवेदितफलाः $G_1$; ता निवेदितफला व्याख्यातफलाः $PB^1L_2J$ **31.2 पावनत्वे** ] $PB^1L_2$; पावणत्वे $G_1J$ **31.2 प्रमाणमिति** ] $G_1PB^1J$; प्रमाणमिते $L_2$ **31.2 चेत्। आत्मनो** ] $PB^1J$; चेदात्मननो $G_1L_2$ **31.3 लाघवाद्यनुभवः** ] *em.*; लाघवाद्यनुभावः $G_1PB^1J$; लाघव्याद्यनुभवः $L_2$ **31.4 भगवतो** ] $PG_1B^1L_2$; श्रीभगवतो J **32.1 चेष्टितानि** ] *conj.*; चरितानि $G_1B^1L_2J$; चरितानि चेष्टितानि P **32.1 सुष्ठु** ] *conj.*; दूरेण स्रष्टुर् $G_1J$; दूरेण सुष्ठु $PB^{1pc}$; दूरेण स्रष्टु $B^{1ac}$; दूरेण दृष्टुर् $L_2$ **32.1 पृथग्भवन्ति** ] *conj.*; व्यतिरिच्यन्ते पृथग्भवन्ति $G_1PB^1L_2J$ **32.2 त्वच्चेष्टितं नुतिभिर्वक्तुमशक्यमित्यर्थः···सूर्यात्पृथग्भवन्ति।** ] $PB^1L_2J$; *om.* $G_1$(eyeskip) **32.2 ह्यब्धिपरिच्छेदेन** ] $PB^1L_2$; ह्यपरिच्छेदेन J **32.3 सूर्यात्** ] $B^1L_2^{pc}J$; *om.* P; सूर्यान् $L_2^{ac}$ **32.3 हि रविरेवालोक इति** ] P; ह्यालोक एव रविरिति $G_1B^1L_2J$ **32.5 तस्मादन्य एव सकलपदार्थबाह्यस्त्वमन्यन्येव च त्वच्चरितानीति तात्पर्यार्थः** ] *conj.*; तस्मादन्य एव सकलपदार्थबाह्यस्त्वमन्यन्येव च त्वद्वचांसीति तात्पर्यार्थः P; *om.* $G_1B^1L_2J$(eyeskip)

ननु प्रत्यक्षत एवास्य जन्मकर्मोपलब्ध्या किंकृतं वैलक्षण्यं स्याद्येन स्तोतुमशक्यः स्यादित्याह—

**अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते।**
**लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः॥ ३३॥**

सर्वतः परिपूर्णस्यापि ते यज्जन्मकर्मग्रहणं तत्र लोकानुग्रह एवैकं निमित्तम्, न तु स्वतः। तत्त्वतस्त्वमेवंविधः। अप्राप्तं प्राप्तव्यं च तव न किञ्चिदस्ति। यदुक्तम्

न मे विदुः सुरगणाः प्रभवं न महर्षयः। इत्यादि॥ ३३॥

नुतिमुपसंहरन्नाह—

**महिमानं यदुत्कीर्त्य तव सङ्क्षिप्यते वचः।**
**श्रमेण तदशक्त्या वा न गुणानामियत्तया॥ ३४॥**

तव माहात्म्यमालोच्यापि यन्नुतिवचनं संह्रियते तत् खेदेन। अनन्तो हि त्वन्महिमा विचार्यमाणः खेदमावहेत्। असामर्थ्येन वा स्वभावतः। न हि भवद्गुणलवकीर्तने कस्यचिच्छक्तिः। न तु त्वद्गुणानां परिमितत्वेन, अमिता हि भवद्गुणाः, वाचस्तु समाप्ति रित्यर्थः॥ ३४॥

---

**33 b.** किञ्चन ] $PD^{M}V^{M}B_1^{M}B_2^{M}B_5^{Mpc}$𝕮; किञ्चिन्न $G_1L_2JB_3^{M}B_7^{M}$; किञ्चि $B^1$; किञ्चिन $B_4^{M}$ $B_5^{Mac}L^{M}$ **34 b.** सङ्क्षिप्यते ] $G_1PB^1L_2JV^{M}B_1^{M}B_2^{M}B_3^{M}B_4^{M}B_5^{M}B_7^{M}L^{M}$; संक्ष्यते $D^{M}$(unmetrical); संह्रियते Hem.Mall.Ar.(?)Nā.Jin.

---

**33.4** न मे विदुः सुरगणाः प्रभवं न महर्षयः *Mahābhārata* 6.32:2ab (*Bhagavadgītā* 10:2ab).

---

**32.6** ननु ] $G_1PB^1L_2^{pc}J$; ×ननु प्रत्यक्षत एवारविरिति तात्पार्यार्थः×ननु $L_2$ **32.6** किंकृतं ] $G_1PB^1J$; किंकृत° $L_2$ **33.1** तत्र लोकानुग्रह ] $G_1B^1L_2J$; तत्रानुग्रह P **33.1** एवैकं निमित्तम् ] *conj.*; एवैको हेतुः निमित्तम् $G_1PB^1J$; एवैको हेतु निमित्तं $L_2$ **33.2** तत्त्वतस् ] $G_1B^1L_2J$; *om.* P **33.3** यदुक्तम् ] $G_1PB^1L_2$; यदुक्तं श्रीभगवता J **33.4** °गणाः प्रभवं न महर्षयः। इत्यादि ] $PB^1J$; °गणाः प्रभावं न महर्षय इत्यादि $G_1$; °गणा इति $L_2$ **34.1** °लोच्यापि ] $G_1PB^1J$; °लोप्यापि $L_2$ **34.1** संह्रियते ] *conj.*; संक्षिप्यते संह्रियते $G_1PB^1L_2J$ **34.1** तत् खेदेन ] *conj.*; तच्छ्रमेन खेदेन $G_1J$; तच्छ्रमेण खेदेन $PB^1L_2$ **34.2** त्वन्महिमा ] $G_1PB^1L_2$; मा J **34.2** विचार्यमाणः ] $PB^1L_2J$; विचार्यमाण $G_1$ **34.2** असामर्थ्येन ] *conj.*; अशक्त्या असामर्थ्येन $G_1PB^1L_2J$ **34.3** परिमितत्वेन ] *conj.*; इयत्तया परिमितत्वेन $G_1PB^1L_2J$ **34.4** समाप्तिरि° ] *conj.*; समाप्तिविरम इ° $G_1L_2$; समाप्तिविरस इ° $PB^1J$

इति प्रसादयामासुस्ते सुरास्तमधोक्षजम्।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥ ३५॥

इत्थं ते देवास्तं विष्णुमतूतुषन्। यस्माद्यत्तैरुक्तं तद्देवस्य परमार्थकथनम्, न तु स्तुतिः। अध्यारोपितवचना हि स्तुतिः। न च सकलगुणपरिपूर्णस्यालीकवचोभिः प्रीतिरुपजायत इति भावः॥ ३५॥

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतयः सुराः।
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः॥ ३६॥

इन्द्रादयो देवा राक्षस एव समुद्रस्तस्माद्भीतिं रावणत्रासं विष्णवे ऽकथयन्। यतः प्रसन्नेन भगवता वः सर्वत्र भद्रमित्यादिप्रश्नेन प्रकटितप्रमोदाः। तच्च कुशलचोदनं भयकथनं च कुमारसम्भवत एव विस्तरतो ऽवगन्तव्यम्। राक्षस एव महत्त्वादिभिर्धर्मैरब्धिः, केवलं तद्व्यतिरेकमाह—असंहारविकृतादिति।

---

**35 b.** सुरास्त° ] $G_1B^{3pc}L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Mall.Jin.; देवास्त° PHem.; ⏓ ⏓ $B^{1ac}$; सुतोष° Ar.Nā. **36 b.** °प्रीतयः ] $G_1PB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_7^ML^M$Jin.; °प्रेतयः $D^MB_5^M$; °प्रीतये Hem.Mall.Ar.(?)Nā. **36 c.** भयमप्र° ] $G_1PB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.Mall.Ar.Nā.; भयमःप्र° $L_2$; भयमाप्र° $Ar.^{vl}$

---

**36** तच्च कुशलचोदनं …°वगन्तव्यम् ] $G_1PB^{3pc}J$; *om.* $B^1L_2$ **36** राक्षस एव …तद्व्यतिरेकमाह ] *om.* $L_2$

---

**35.1** ते देवास्तं विष्णुमतूतुषन् ] *conj.*; देवास्तमधोक्षजं विष्णुं प्रसादयामासुः अतूतुषत् $G_1$; ते देवास्तमधोक्षजं विष्णुं प्रसादयामासुरतूषन् P; ते देवास्तमधोक्षजं विष्णुं प्रसादयामासुः अतूतुषन् $B^1$; देवास्ते तमधोक्षजं विष्णुं प्रसादयामासुः अतूतुषन् $L_2$; तं देवाः तं अधोक्षजं श्रीभगवंतं प्रसादयामासुः अतूतुषत् J **35.1** यस्माद्यत्तैरुक्तं तद्देवस्य परमार्थकथनम्, न तु स्तुतिः ] *conj.*; यस्माद्यत्तैरुक्तं सा देवस्य भूतार्थव्याहृतिः परमार्थकथनं न तु स्तुतिः $G_1PB^1L_2^{pc}$; यस्माद्यत्तैरुक्तम् सा देवस्य भूतार्थ° $L_2^{ac}$(eyeskip); *om.* J **35.2** अध्यारोपितवचना ] $PB^1L_2^{pc}$; अव्यारोपितवचना $G_1J$; वचना $L_2^{ac}$(eyeskip) **35.2** न च ] $G_1PB^1J$; स च $L_2$ **36.1** राक्षस एव समुद्रस्तस्माद्भीतिं ] *conj.*; नैर्ऋतो राक्षसो एवोदधिः समुद्रः तस्माद्भेतं $G_1$; नैर्ऋतो राक्षस एवोदधिः समुद्रः तस्माद्भीं $PB^1$; नैनृतो राक्षस एवोदधिस्समुद्रः तस्माद्भीतिं $L_2$; नैर्ऋतो राक्षसेवोऽदधिः समुद्रः तस्माद्भीतं J **36.1** विष्णवे ऽकथयन् ] *conj.*; विष्णवे आचख्युः अकथयन् $G_1J$; तस्मै विष्णवे आचख्युरकथयन् $PB^1L_2$ **36.2** यतः ] $G_1PB^1J$; यत $L_2$ **36.2** भगवता ] $G_1PB^1L_2$; श्रीभगवता J **36.2** भद्रमित्यादिप्रश्नेन ] $B^1L_2^{pc}$; भद्रमिति तेषां कुशलं पृष्टं। तेन च प्रश्नेन ते(तेन) $G_1J$; भद्रमित्यादिप्र ×सन्नेन भगवता वः ×श्नेन $L_2$; भद्रमित्यादि तेषां कुशलं पृष्टं तेन कुशलप्रश्नेन P **36.2** प्रकटित° ] $L_2$; प्रकट° $G_1PB^1J$ **36.3** विस्तरतो ] P; विस्तरो $G_1$; विस्तारो $B^3J$ **36.4** असंहार° ] *conj.*; अप्रलयोद्वेलादसंहार° $PB^1L_2$; अप्रलोयोद्वेलादसंहार° $G_1$; प्रलयोद्वेलादसंहार° J

अब्धिर्हि प्रलय एव विकृतो भवति, न तु सर्वदा॥ ३६॥

**अथ वेलासमासन्नशैलरन्ध्रानुनादिना।**
**स्वरेण भगवानाह परिभूतार्णवध्वनिः॥ ३७॥**

अनन्तरं विष्णुरभाषत। तिरस्कृतसमुद्रघोषः। प्रकटभाषिणो हि महान्तः। अतश्च ≪जलधिजलविकृतिनिकटस्थपर्वतदरीषु≫ अनुनदति, तच्छीलो यस्तेन शब्देनेति। रन्ध्राणि वानुनादयति, प्रतिश्रुत्कां ग्राहयतीति॥ ३७॥

**पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।**
**बभूव भारती भव्या चरितार्था चतुष्टयी॥ ३८॥**

तस्य चिरन्तनस्य सर्वज्ञस्य चतुर्मुखोदीरिता सरस्वती कृतकृत्यासीत्। चतुर्णां मुखानां समाहारश्चतुर्मुखम्। भगवद्भाषणाद्धि वाचः कृतार्थत्वम्। प्रशस्ता,

---

**37 b.** °नादिना ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Ar.Nā.Jin.; °वादिना Hem. Mall. **37 c.** स्वरेण भगवानाह ] $G_1PB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Hem.; स्वरेणोवाच भगवान् $L_2$Mall.Ar.Nā.Jin. **38 b.** चतुर्मुख° ] $G_1PB^1L_2JV^MB_1^{Mpc}B_2^MB_3^MB_4^MB_5^MB_7^M$ $L^M$; चतुमुख° $D^M$; वर्णस्थान° $B_1^{Mac}$Vall.$^{vl}$ℭ **38 cd.** भारती भव्या चरितार्था चतुष्टयी ] $G_1B^1L_2JV^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$; पदसंस्काराच्चरितार्थैव भारती $PB_1^M$Vall.$^{vl}$; कृतसंस्कारा चरितार्थैव भारती Hem.Mall.; पदसंस्कारा चरितार्थैव भारती $D^M$Jin.; कृतसंस्कारा चरितार्थैव भारती Ar.Nā.

---

**38** भगवद्भाषणाद्धि ···व्याकरणादिलक्षणोपपन्ना ] भगवद्भाषणादिलक्षणोपपन्ना $G_1$(eyeskip)

---

**36.5** प्रलय एव विकृतो ] *conj.*; प्रलय उद्वेलो विकृतो $G_1J$; प्रलय एव उद्वेलो विकृतो P; प्रलय एवोद्वेलो +विकृतो+ $B^1$(+$B^3$+); प्रलय एवोद्वेलो $L_2$ **36.5** सर्वदा ] $G_1J$; सर्वदा स तु सर्वदा वेलामुत्क्रान्तः उद्वेलः P; सर्वदा वेलामुत्क्रान्त उद्वेलः $B^1L_2$ **37.1** अनन्तरं ] *conj.*; अथान्तरं $G_1PB^1L_2$; अथ तेषां देवानां स्तुत्यानंतरं J **37.1** विष्णुरभाषत ] *conj.*; भगवान्विष्णुराहाभाषत $G_1PB^1L_2$; श्रीभगवान्विष्णुराह अभाषत J **37.1** तिरस्कृतसमुद्रघोषः ] *conj.*; कीदृशः। परिभूतार्णवध्वनिः॥ अथानन्तरं तिरस्कृतसमुद्रघोषः $G_1$; कीदृशः। परिभूतार्णवध्वनिः तिरस्कृतसमुद्रघोषः $PB^1L_2J$ **37.2** जलधिजलविकृतिनिकटस्थपर्वतदरीषु ] *conj.*; वेलायां निकटो यः शैलस्तस्य दरीषु $G_1J$; वेलायां समासन्नो यः शैलस्तस्य दरीषु $PB^1$; वेलायां समासन्नयोश् शैलस्तस्य दरीषु $L_2$ **37.2** दरीष्वनुनदति ] *conj.*; रन्ध्रेषु दरीष्वनुनदति $G_1PB^1$; रन्ध्रेषु दरीष्वननुदति $L_2$; रंध्रेषु दरीषु नुनदति J **38.1** चिरन्तनस्य ] *conj.*; पुराणस्य चिरन्तनस्य $G_1PB^1L_2J$ **38.1** सर्वज्ञस्य ] *conj.*; कवैस्सर्वज्ञस्य $G_1$; कवेः सर्वज्ञस्य $B^1L_2J$; कवेः सर्वज्ञस्य भगवतः P **38.1** चतुर्मुखोदीरिता सरस्वती कृतकृत्यासीत् ] $G_1B^1L_2J$; चतुर्मुखोदीरिता चतुर्भिः मुखैरुच्चारिता भारती वाक् सरस्वती चरितार्था कृतप्रयोजना आसीत् P **38.2** चतुर्णां मुखानां ] $PB^1L_2J$; चतुर्मुखानां $G_1$ **38.2** वाचः ] $PB^1L_2$; वचः J **38.2** प्रशस्ता ] *conj.*; भव्या प्रशस्ता $PB^1L_2^{pc}J$; × भगवद्भा× भव्या प्रशस्ता $L_2$

व्याकरणादिलक्षणोपपन्ना। चत्वारो ऽवयवा जातिगुणक्रियायदृच्छाभेदाच्छब्दानाम्। चतुर्मुखशब्दस्य पात्रादित्वात् स्त्रीत्वनिषेधः। अत्र च पाठान्तरम्॥

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।
बभूव पदसंस्काराच्चरितार्थेव भारती॥ इति।
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥

भगवदुदीरणेन कृतार्थत्वे जाते पदसंस्कारादिवेतीवशब्दस्य भिन्नक्रमत्वेन निमित्तान्तरारोपः। कविः किल यदा संस्कृतपदां वाचमभिधत्ते तदा तस्याश्चरितार्थता। पदानां सुप्तिङन्तानां संस्कारः प्रकृतिप्रत्ययविभागादिज्ञानम्। तज्ज्ञाने हि प्रयोगो यश्चेमां पदशो वर्णशो वेदेत्यादिना स्तुतः॥ ३८॥

**बभासे दशनज्योत्स्ना सा विभोर्वदनोद्गता।**
**निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रसारिणी॥ ३९॥**

सा दन्तप्रभा विष्णोर्मुखान्निःसृता रेजे। उत्प्रेक्ष्यते—पादान्निर्गमनाच्छेषा ख-

---

**39 a.** बभासे ] $G_1PB^1L_2JV^MB_1^MB_2^MB_3^MB_4^{Mac}B_5^{Mpc}B_7^ML^M$Hem.$^{vl}$Jin.; बभौव $D^M$; बभौस° $B_4^{Mpc}B_5^{Mac}$Vall.$^{vl}$Hem.Mall.Ar.Nā. **39 b.** विभो° ] $G_1PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^ML^M$Mall.Ar.Nā.Jin.; प्रभो° Hem. **39 d.** °प्रसारिणी ] $G_1PB^1L_2JB_3^MB_4^MB_5^MB_7^ML^M$; °प्रवर्तिनी $D^MV^MB_1^MB_2^M$Hem.Mall.Ar.(?)Nā.; प्रवाहिणी Jin.

---

**38.8** This verse occurs for instance as *Pāṇinīyaśikṣā* 13.

---

**38.4** जातिगुणक्रियायदृच्छाभेदाच्छ°° ] *conj.*; जातिगुणक्रियायादृच्छाभेदाच्छ° $G_1B^1J$; द्रव्यगुणजातिक्रियाभेदाच्छ° P; जातिगुणक्रियायदृच्छाभेदाश° $L_2$ **38.4** पात्रादित्वात् ] $B^{1pc}L_2$; पात्रादित्वा $G_1B^{1ac}J$ **38.4** अत्र च पाठान्तरम् ] $G_1PB^1J$; पाठान्तरमत्र $L_2$ **38.6** °संस्काराच्च° ] $PB^1$; °संस्काराश्च° $G_1J$; °संस्काराश्चा° $L_2$ **38.7** कण्ठः शिरस्तथा ] $B^1L_2J$; °च्छिरस्तथा $G_2P$ **38.8** दन्ताश्च नासिकोष्ठौ ] $PB^1L_2$; चन्ताश्च नासिकोष्ठौ $G_1$; दंताश्च नासिकौष्टौ J **38.9** °स्कारादिवेतीवशब्दस्य ] $B^1L_2J$; °स्कारादितीवेति इवशब्दस्य P; °स्कारादिवेति $G_1$ **38.10** भिन्नक्रमत्वेन निमित्तान्तरारोपः ] $PB^1J$; *om.* $G_1$; भिन्नक्रमत्वेन निमित्तान्तरालोपः $L_2$ **38.10** संस्कृत° ] $G_1PB^1J$; संस्थित° $L_2$ **38.10** °भिधत्ते ] $G_1PB^1L_2$; °भिदत्ते J **38.11** तदा तस्याश्च° ] $G_1B^1L_2J$; तदा ऽस्याः च° P **38.11** सुप्तिङन्तानां ] $PB^1$; स्वप्तिङन्तानां $G_1L_2J$ **38.11** संस्कारः ] *em.*; संस्काराः $G_1PB^1L_2J$ **38.11** °भागादिज्ञानम् ] $G_1PB^1L_2$; °भागादिर्ज्ञानम् J **38.12** हि प्रयोगः यश्चेमां ] $G_1PB^1J$; ति प्रयोगश्चेमां $L_2$ **38.12** वर्णशो ] $G_1PB^1J$; *om.* $L_2$ **39.1** विष्णो° ] *conj.*; विभो° $G_1B^1L_2J$; विभोर्विष्णो° P **39.1** रेजे ] *conj.*; बभासे रेजे $G_1PB^1J$; बभासे रेजी $L_2$ **39.1** पादान्निर्गमनाच्छेषा ] *conj.*; चरणान्निर्यातशेषा निर्गमनाच्छेषा $G_1B^1L_2J$; चरणात्पदान्निर्यातशेषा निर्गमनाच्छेषा P

मिता या न पतिता भगवत्पाद एव कृतसन्निधिः सा गङ्गेवोर्ध्वप्रसारिणी। यो भागः पूर्वमस्या अवशिष्टः स इव मुखं प्रविष्ट इत्यर्थः। बभौ सदशनज्योत्स्नेति पाठे सा भारती दशनज्योत्स्नासहिता बभाविति योज्यम्॥ ३९॥

किमाहेत्याह—

जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ।
अङ्गिना तमसेवोभौ गुणौ प्रथममध्यमौ॥ ४०॥

युष्माकं रावणेन महिमोत्साहावभिभूतावित्यवगतं मयैतत्। यथा कस्यचिदुत्कटेन प्रधानेन तमोगुणेन सत्त्वरजसी आक्रम्येते। अङ्गाङ्गिभावो हि पर्यायेण। गुणानां तु य एवोत्कटः सो ऽन्यं बाधते। रावणस्य च तमोरूपत्वात्तादृशेनैवौपम्यम्। रावणादयश्चाङ्गीनि मूर्तानि तमांसीत्यागमः॥ ४०॥

विदितं ताप्यमानं च तेन मे भुवनत्रयम्।
अकामोपनतेनेव साधोर्हृदयमेनसा॥ ४१॥

---

**40 a.** रक्षसा° ] $G_1PB^1L_2D^MV^MB_1^MB_2^MB_3^MB_5^MB_7^ML^M$Hem.Mall.Ar.(?)Nā.Jin.; राक्षसा° $B_4^M$J **40 c.** अङ्गिना तमसे° ] $PB^1L_2D^MV^MB_1^MB_5^MB_7^ML^M$Ar.Nā.; अङ्गिनात्तमसे° $G_1$ $B_3^M$; अंगिनातुसमे° J; अङ्गिनस्तमसे° $B_2^M$; अङ्गिनां तमसे° $B_4^M$Hem.Mall.Ar.$^{vl}$Nā.$^{vl}$Jin. **41 a.** ताप्यमानं ] $G_1PB^1L_2JV^{Mpc}D^MB_1^MB_2^{Mpc}B_3^MB_4^MB_5^MB_7^ML^M$; तप्यमानं $V^{Mac}B_2^{Mac}$**C**

---

**39.2** खमिता या न पतिता ] P; या न पातिता $G_1B^1L_2$J **39.2** यो ] $G_1PB^1$J; यि $L_2$ **39.3** पूर्वमस्या ] $PB^1L_2$; पूर्वस्या $G_1$J **39.4** सा भारती ] P; *om.* $G_1B^1L_2$J **39.4** °सहिता ] P; °सहिता भारती $G_1$ °सहिता सा भारती $B^1L_2$; °संहिता भारती J **39.5** किमाहेत्याह ] $PB^1L_2$J; किमित्याह $G_1$ **40.1** युष्माकं ] *conj.*; वो युष्माकं $G_1PB^1L_2$J **40.1** रावणेन महिमोत्साहावभिभू° ] *conj.*; रक्षसा रावणेनानुभावपराक्रमौ महिमोत्साहौ क्रान्तावभिभू° $G_1PB^1L_2$; रक्षसा रावणेना ऽनुभावपराक्रमौ महिमोत्साहो क्रान्तावभिभू° J **40.1** °त्यवगतं मयैतत् ] *conj.*; °त्येतदहं जाने। अवगतं मयैतत् $G_1PB^1$; °त्येतदाह जाने। अवगतं मयैतत् $L_2$; °त्येतदहं जाने अवगतं मयेतत् J **40.2** कस्यचिदुत्कटेन ] *conj.*; कस्यचिदङ्गिनोत्कटेन $G_1PB^1L_2$J **40.2** तमोगुणेन ] *conj.*; तमसा उभौ तमोगुणेन $G_1$; तमसा तमोगुणेन $PB^1L_2$J **40.2** सत्त्वरजसी ] *conj.*; प्रथममध्यमौ गुणौ रजःसत्त्वे $G_1B^1$J; प्रथममध्यमौ गुणौ सत्त्वरजसी P; प्रथममध्यमगुणौ रजस्सत्वे $L_2$ **40.2** आक्रम्येते ] $G_1PB^1L_2$; आक्रम्यते J **40.2** अङ्गाङ्गिभावो ] $PB^1L_2$; अङ्गानि भावो $G_1$J **40.3** तु ] $G_1P^{pc}B^1L_2$J; *om.* $P^{ac}$ **40.3** य एवो° ] $G_1PB^1$J; एवो° $L_2$ **40.3** सो ऽन्यं बाधते ] $PB^1J^{pc}$; सैन्यं वाधते $G_1J^{ac}$; स अन्यं धार्यते (तै $L_2^{ac}$) $L_2$ **40.3** रावणस्य च ] $PB^{3pc}$; रावणस्य $G_1B^{1ac}$ $L_2$J **40.4** °वौपम्यम् ] P; °वोपस्यं $G_1B^{1pc}$; °वौपास्यं $B^{1ac}$; °कौपम्यं $L_2$; °वोपम्यं J **40.4** °श्चाङ्गीनि ] $PB^1L_2$; °श्चाङ्गी निमित्तानि $G_1$J

तेन रक्षसा त्रिभुवनं च बाध्यमानं मया ज्ञातम्। यथानभिलाषिणो नरस्य मानिनः पापेन मनस्ताप्यते। अकामस्योपनतमकामोपनतम्॥ ४१॥

कार्येषु चैककार्यत्वादभ्यर्थ्यो ऽस्मि न वज्रिणा।
स्वयमेव हि वातो ऽग्नेः सारथ्यं प्रतिपद्यते॥ ४२॥

जगद्रक्षयैकव्यापारत्वाच्चेन्द्रेणाहं व्यापारेषु विषये न याच्यः। स्वार्थे हि स्वयमेव प्रवृत्तिः। यथा—

समीरणश्चोदयिता भवेति व्यादिश्यते केन हुताशनस्य॥ ४२॥

न च तद्वधे ऽहमशक्त इत्याह—

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे।
स्थापितो दशमो मूर्धा लव्यांश इव रक्षसा॥ ४३॥

निश्चितं मच्चक्रस्य भोगपतेरिव दशमो मूर्धा च्छेद्यो भाग इव रावणेन शेषितः,

---

**42 b.** °दभ्यर्थ्यो ] $G_1B^1L_2JD^MV^MB_1^MB_3^MB_4^MB_7^M$**C**; °दभ्यर्थो $PB_2^ML^M$; °दभिर्थो $B_5^M$
**43 d.** लव्यांश ] ŚHem.Mall.Jin.; लभ्यांश Mall.$^{vl}$; लब्धांश Ar.Nā.

---

**42.3** समीरणश्चोदयिता भवेति व्यादिश्यते केन हुताशनस्य। *Kumārasambhava* 3:21cd.

---

**41.1** बाध्यमानं ] *conj.*; ताप्यमानं बाध्यमानं $G_1PB^1L_2J$ **41.1** मया ] *conj.*; मे मया $G_1PB^1L_2J$ **41.1** यथानभिलाषिणो नरस्य ] *conj.*; यथा अकामस्यानभिलाषिणो रस्य $G_1$; यथा ऽकामस्यानभिलाषस्य नरस्य P; यथा अकामस्यानभिलाषिणो नरस्य $B^1L_2J$ **41.2** मानिनः ] *conj.*; साधोः मानिनः $G_1PB^1L_2J$ **41.2** पापेन ] *conj.*; एनसा पापेन $G_1PB^{3pc}L_2J$; एनसा पेन $B^{1ac}$ **41.2** अकामस्योपनतमकामोपनतम् ] $B^1L_2$; अकामस्योपनतकामोपनतम् $G_1J$; अकामोपनतम् P **42.1** जगद्रक्षयैकव्यापारत्वा° ] *conj.*; एककार्यत्वा° $G_1B^1L_2J$; एककार्यत्वाज्जगद्रक्षयैकव्यापारत्वा° P **42.1** °च्चेन्द्रेणाहं ] $G_1PB^1L_2$; °च्चेन्द्रेणादहं J **42.1** व्यापारेषु ] *conj.*; कार्येषु $G_1B^1L_2J$; कार्येषु व्यापारेषु विषये P **42.1** न याच्यः ] *conj.*; नाभ्यर्थ्यः $G_1L_2$; नाभ्य ×⏑̱×+र्थः+ न याच्यः P; नाभ्यर्थः $B^1J$ **42.2** प्रवृत्तिः ] P; प्रवृत्तैः $G_1J$; प्रवृत्तेः $B^1L_2$ **42.3** समीरणश्चो° ] $PB^1L_2$; समीरिणश्चो° $G_1J$ **42.3** केन हुताशनस्य ] *em.*; येन हुतासनस्य $G_1J$; केन हुताशस्येति P(unmetrical); केन हुताशनस्येति $B^1L_2$ **42.4** न च तद्वधे ] $PB^1$; न ततद्वधे $G_1J$; न च तधे $L_2$ **43.1** निश्चितं ] *conj.*; कामं निश्चितं $G_1PB^1L_2J$ **43.1** च्छेद्यो भाग इव ] *conj.*; लव्यांश इव च्छेद्यो भाग इव $G_1PB^1L_2J$ **43.1** रावणेन शेषितः ] *conj.*; स्थापितः तेन रक्षसा रावणेन शेषितः $G_1B^1L_2J$; स्थापितः तेन रक्षसा रावणेनेति शेषितः P

यत आत्मीयखड्गधारया वर्जितः। तेन हि पूर्वं तपस्यता खड्गेन नव शिरांसि शिवाराधनाय लूनान्यासन्। कार्षिको हि यथा निजस्वामिनो निजदात्रलवनपरिहृतं लव्यमंशं स्थापयति॥ ४३॥

यद्येककार्यत्वं तत्कस्मात्पूर्वमेवासावुपेक्षित इत्याह—

स्रष्टुर्वरातिसर्गाच्च मया तस्य दुरात्मनः।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः॥ ४४॥

दुष्टस्वभावस्य तस्य ≪रावणस्य≫ आक्रमोत्कर्षो मया सह्यः सहनीय इति ब्रह्मणो वरदानात्। चन्दनाख्येन तरुणा पन्नगस्य। स हि तस्य शिरो ऽप्याक्रामति॥ ४४॥

एतदेव वितन्वन्नाह—

धातारं तपसा प्रीतं ययाचे स हि राक्षसः।
दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः॥ ४५॥

---

**44 a.** °सर्गाच्च ] $G_1B^1L_2V^MB^M_1B^M_2B^M_3B^M_4B^M_7$Mall.; °सर्गात्तु PHem.Ar.Nā.Jin.; °सर्गाश्च $JD^ML^M$; °स्सर्गाच्च $B^M_5$ **44 b.** तस्य दुरात्मनः ] $G_1PB^1L_2JD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$ $L^M$Hem.Mall.Jin.; तस्यामरात्मना Ar.Nā. **44 c.** अत्यारूढं रिपोः सोढं ] $PV^MB^M_1B^M_2$ Mall.Ar.Nā.Jin.; अद्यारोढं रिपोः सोढं $G_1B^1B^M_4$; अत्यारोढं रिपोस्सोढं $L_2JB^M_3$; अत्यारूढो रिपोः सोढुं $D^M$; अत्यारूढं रिपोः सोढुं $B^M_5$; अत्यारूढुं रिपोः सोढं $B^M_7$; अन्यारूढं रिपोस्सोढं $L^M$; अत्यारूढं रिपोः सह्यं Hem. **45 b.** हि ] Σ; ह J

---

**43.2** आत्मीयखड्गधारया ] *conj.*; स्वासिधारया खड्गधारया $G^{pc}_1$; स्वासिधारया $G^{ac}_1$; स्वासिधारया आत्मीयखड्गधारया $PB^1$; स्वासिधारया आत्मीयखड्गाधारया $L_2$; स्वासिधारया आत्मीखड्ग(?)धारया J **43.2** वर्जितः ] *conj.*; परिहृतो वर्जितः $G_1PB^1L^{pc}_2J$; परिहृतो वजितः $L^{ac}_2$ **43.2** हि पूर्वं ] $G_1B^1L_2J$; च P **43.2** खड्गेन ] $G_1PB^1J$; खड्गो $L_2$ **43.3** शिवाराधनाय ] $G_1PB^1L_2$; श्रीशिवाराधनाय J **43.4** °दात्रलवनपरि° ] $B^1$; °दात्रलवानपरि° $G_1$; °दात्रलवणपरि° P; °दात्रलवण° $L_2$; °धात्रलवानपरि° J **43.4** लव्यमंशं ] $G_1PB^1$ J; लव्यांश $L_2$ **43.5** यद्येक° ] $G_1PB^1J$; यद्ये° $L_2$ **43.5** °वुपेक्षित ] $G_1B^1L_2J$; °वपेक्षितः P **44.1** दुष्टस्वभावस्य ] *conj.*; दुरात्मनो दुष्टस्वभावस्य $G_1PB^1L_2J$ **44.1** रावणस्य आक्रमोत्कर्षो ] *conj.* (cf. Jin.); रिपोरत्यन्तमारोढमाक्रमोत्कार्यः $G_1$; रिपोरत्यन्तमारोढमाक्रमणोत्कर्षः P; रिपोरत्यन्तमारोढमाक्रमोत्कर्षः $B^1L_2J$ **44.1** सह्यः सहनीय इति ] *conj.*; सोढं सह्यं सहनीयमिति $G_1B^1L_2J$; सोढं सह्यम् सहनीयमित्यर्थः P **44.2** ब्रह्मणो ] *conj.*; स्रष्टुर्ब्रह्मणो $G_1PL_2J$; सुष्टुर्ब्रह्मणो $B^1$ **44.2** वरदानात् ] *conj.*; वरातिसर्गाद्वरदानात् $G_1PB^1L_2J$ **44.2** चन्दनाख्येन ] *conj.*; चन्दनेन तदाख्येन $G^{pc}_1PB^1L_2J$; चन्दनेने तदाख्येन $G^{ac}_1$ **44.2** पन्नगस्य ] *conj.*; भोगिनः पन्नगस्य $G_1PB^1L_2J$ **44.3** °क्रामति ] $G_1B^1J$; °क्रमति $PL_2$

स हि रावणो ब्रह्माणमतिदुश्चरतपस्तोषितं यतः कारणाद्देवसम्बन्धिनः सर्गादष्टविधादवध्यभावमयाचत, तत एव मयासौ तेन रूपेण न हतः। मनुष्येषु सम्भावनाया विमुखः। किं मे वराका मनुष्याः कुर्वन्तीति॥ ४५॥

दैवात्सर्गादवध्यत्वे वधोपायकथनम्—

**सो ऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम्।**
**करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्॥ ४६॥**

यत एवं मर्त्यास्तेन वर्जिताः, ततो ऽहं दशरथतनयः पुरुषो भूत्वा पौलस्त्यमस्तकपद्मावचयं ≪विधास्ये≫, शितैरिषुभिः, समरोर्व्या बलावुपहारे प्रकरे वा योग्यम्। कमलैः किल भूमेरुपहारः क्रियते। रामभद्ररूपेण तमहं हनिष्यामीति वाक्यार्थः॥ ४६॥

**अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः।**
**मायाविभिरनालीढमादास्यध्वे निशाचरैः॥ ४७॥**

---

**46 b.** °भूमेर्बलि° ] $\mathfrak{C}$; °भूमिर्बलि° $G_1$; °भूमिबल° $PB_1^{Mac}$; °भूमिबलि° $B^1L_2JD^M V^M B_1^{Mpc} B_2^M B_3^M B_4^M B_5^M B_7^M L^M$ **46 c.** शरैस्तीक्ष्णैस् ] $G_1B^1L_2JD^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ $\mathfrak{C}$; शरैस्तीक्ष्णै $L^M$; शरैर्घोरैस् P

---

**45.1** स हि रावणो ब्रह्माणम् ] *conj.*; स हि राक्षसो धातारं ब्रह्माणं $G_1PB^1L_2J$ **45.1** अतिदुश्चरतपस्तोषितं ] *conj.*; तपसा प्रीतं अतिदुश्चरतपस्तोषितं $G_1P^{pc}B^1$; तपसा प्रीतं अतिदुश्चरिततपस्तोषितं $P^{ac}$; तपसा प्रीतं अतिदुश्चरस्तपस्तोषितं $L_2$; तपसा प्रीतं अतिदुश्चरतपः स्तोषितं J **45.1** देवसम्बन्धिनः ] *conj.*; दैवाद्देवसम्बन्धि $G_1$; दैवाद्देवसम्बन्धिनः P; दैवाद्देवसम्बन्धि+न+स् $B^1$; दैवादेव सम्बन्धिनस् $L_2$; दैवाद्देवसंबंधि J **45.2** °वध्य° ] $PB^1L_2$; °बुध्य° $G_1J$ **45.2** मयासौ ] $G_1PB^1J$; मया असौ मया $L_2$ **45.2** न हतः ] $PL_2$; हतः $G_1B^1J$ **45.3** मनुष्येषु सम्भावनाया विमुखः ] *conj.*; मर्त्येषु मनुस्येष्वास्थायाः सम्भावनाया विमुखः $G_1B^1L_2J$; मर्त्येषु आस्थायाः सम्भावनायाः विमुखः P **45.3** किं मे ] $PL_2$; किमे $G_1B^1J$ **45.4** °कथनम् ] *conj.*; °कथनम् पैशाचो (पिशाचो $G_1J$) राक्षसो यक्षो (याक्षो P) गन्धर्वश्चेन्द्र (°चैन्द्र $B^1L_2$) एव च। प्रजेशश्चैव सौम्यश्च ब्रह्मा चैवाष्टमः स्मृतः (स्मृत $PL_2$, स्मृता $B^1$)॥ इत्यष्टविधो दैवः (दैव° $PL_2J$) सर्गः॥ $G_1PB^1L_2J$ **46.1** मर्त्यास्तेन वर्जिताः ] $G_1B^1L_2J$; मर्त्या वर्जितास्तेन P **46.2** पौलस्त्यमस्तकपद्मावचयं ] *conj.*; तच्छिरःकमलोच्चयं तस्य पौलस्त्यस्य शिरांस्येव (शरांस्येव $L_2$, शिरांस्यैव J) पद्मानि (कमलानि पद्मानि $B^1L_2$) तेषामुच्चयमवचयं $G_1PB^1L_2J$ **46.2** विधास्ये ] *conj.*; करिष्यामि $G_1PB^1L_2J$ **46.2** शितैरिषुभिः ] *conj.*; तीक्ष्णैः शितैः शरैः $G_1$; तीक्ष्णैः शरैः P; तीक्ष्णैश्शितैश्शरैरिषुभिः $B^1L_2$; तीक्ष्णैः तच्छिरैः शितैः J **46.2** समरोर्व्या ] *conj.*; रणभूमेः समरोर्व्याः $G_1PB^1L_2J$ **46.2** बलावुपहारे ] $G_1PB^1L_2$; लबावुपहारे J **46.3** प्रकरे ] $PB^1J$; प्रकारे $G_1L_2$ **46.3** योग्यम् ] *conj.*; क्षमं योग्यम् $G_1PB^1L_2J$ **46.4** °मीति वाक्यार्थः ] $G_1B^1L_2J$; °मीत्यर्थः P

एवं च यज्ञेषु याजकैर्विधिना भागं दत्तं यूयं स्वल्पेन कालेन भूयो भोक्ष्यध्वे। इन्द्रजालयुक्तै राक्षसैरनुच्छिष्टम्॥ ४७॥

वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि।
पुष्पकालोकसङ्क्षोभं मेघावरणतत्पराः॥ ४८॥

विमानेन चारिणः पुष्पकविमानेक्षणत्रासं जहत्वाकाशे सुकृतिनः। ते हि यानैर्नभसि विहरन्तः पुष्पकविमानदर्शनाद्रावणागमनमाशङ्क्य भयाज्जलदैरात्मानमन्तर्धायातिष्ठन्। अद्य ते देवा दिवि सुखेन क्रीडन्तु॥ ४८॥

मोक्ष्यथ स्वर्गवन्दीनां वेणीबन्धानदूषितान्।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥ ४९॥

किं बहुना। निश्चितं नाकस्त्रीणां केशरचनाग्रन्थीन् स्वयमेव मोक्ष्यथ। ता हि विरहिण्यः पराभवात्केशरचनां न कुर्वन्ति। बलादपहृता रिपुनारी वन्दी।

---

**48 c.** °लोकसङ्क्षोभं ] $G_1B^1L_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7L^M$**Ꞓ**; °लोकनक्षोभं P; °लोकविक्षोभं $D^M$ **49 a.** मोक्ष्यथ स्वर्ग° ] $G_1PB^1L_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7L^M$Ar.(?)Nā.; मोक्ष्यध्व स्वर° $D^M$; मोक्ष्यध्वे सुर° Hem.; मोक्ष्यध्वे स्वर्ग° Mall.Jin.

---

**49** °ग्रन्थी° ···पराभवात् ] *om.* J(eyeskip)

---

**47.1** दत्तं ] *conj.*; कल्पितं $G_1PB^1L_2J$ **47.1** यूयं स्वल्पेन कालेन भूयो भोक्ष्यध्वे ] *conj.*; यूयमादास्यध्वे भोक्ष्यध्वे $G_1J$; यूयमादास्यध्वे स्वल्पेन कालेन भूयो भोक्ष्यद्धे P; यूयमादस्यध्वे भोक्ष्यध्वे $B^1$; यूयमादास्यध्वे भोक्ष्यसे $L_2$ **47.2** इन्द्रजालयुक्तै ] *conj.*; मायाविभिरिन्द्रजालयुक्तैः $G_1PJ$; मायाविद्भिरिन्द्रजालयुक्तैः $B^1L_2$ **47.2** राक्षसैरनुच्छिष्टम् ] *conj.*; निशाचरैरनालीढमनुच्छिष्टम् $G_1PB^1L_2J$ **48.1** चारिणः ] $PB^1L_2$; चारिणा $G_1J$ **48.1** पुष्पकविमानेक्षणत्रासं ] *conj.*; पुष्पकविमानस्यालोकेन सङ्क्षोभं त्रासं $G_1B^1$; पुष्पकविमानस्यालोकेन ईक्षणेन संक्षोभं त्रासं P; पुष्पिकविमानस्यालोकेन सङ्क्षोभं त्रासं $L_2J$ **48.1** जहत्व् ] *conj.*; त्यजन्तु जहन्तु $G_1J$; जहतु त्यजतु P; त्यजन्तु जहतु $B^1$; त्यजतु जहतु $L_2$ **48.1** आकाशे सुकृतिनः ] *conj.*; मरुतां पथि आकाशे $G_1PB^1J$; मरुतां पति आकाशे $L_2$ **48.2** विहरन्तः ] *conj.*; विहरन्तो शङ्कां $G_1PB^1J$; वहरन्तो शङ्कां $L_2$ **48.2** पुष्पकविमान° ] $G_1B^1$; पुष्पिकाविमा° $L_2$; पुष्पिकविमान° J **48.2** °वणागमन° ] $G_1PB^1J$; °वणगमन° $L_2$ **48.3** °न्तर्धायातिष्ठन् ] $PB^1L_2J$; °न्तर्धायीतिष्ठन् $G_1$ **48.3** अद्य ते देवा दिवि सुखेन क्रीडन्तु ] *em.*; *om.* $G_1PB^1J$; अद्य ते देवा दिवि स्वखेन क्रीडन्तु $L_2$ **49.1** नाकस्त्रीणां ] P; स्वर्गस्त्रीणां $G_1B^1L_2J$ **49.1** केशरचनाग्रन्थीन् ] *conj.*; वेणीबन्धान्केशरचनाग्रन्थीन् $G_1PB^1J$; वेणाबन्धान्केशरचनाग्रन्थीन् $L_2$ **49.1** स्वयमेव ] $PL_2^{pc}$; द्वयमेव $G_1B^1$; स्वय×स्वर्ग×मेव $L_2$ **49.2** पराभवात् ] $G_1PB^1$; पराभवोत् $L_2$

कदाचिद्रावणेन ते विलुलिताः स्युः, किं तैर्मुक्तैः प्रयोजनमित्याह शापरुद्धेन रावणेन हठकेशादानैरनिन्दितानिति। अनिच्छन्त्या नार्या विध्वंसनात्तव मूर्धा शतधा स्फुटिष्यतीति रावणस्य नडकूवरशापः॥ ४९॥

रावणावग्रहक्लान्तमिति वागमृतेन सः।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे॥ ५०॥

विष्णुरेव ≪जलदो≫ ऽन्तर्दधे। रावण एव वर्षप्रतिबन्धस्तेनाभिभूतं सुरधान्यं वाग्जलेन समाश्वास्य। यो ऽपि कालमेघः स शुष्कं सस्यममृतेन सिक्त्वान्तर्धत्ते॥ ५०॥

पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः॥ ५१॥

ततो भगवन्तमिन्द्रप्रमुखा देवा भागैरनुजग्मुः, देवहितार्थं मनुष्यलोकमवतीर्णम्। कुसुमैरनिलमिव तरवः। देवा हरिसाहायकार्थं मनुष्यलोकमवतेरुरित्य-

---

**50 a.** °ग्रहक्लान्त° ] PB$^1$L$_2$JV$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_7^M$L$^M$$\mathfrak{C}$; °ग्रहाक्लान्त° G$_1$B$_5^M$; °ग्रक्रान्ता° D$^M$(unmetrical) **51 c.** °ययुर्विष्णुं ] G$_1$PB$^1$L$_2$JB$_3^M$B$_4^M$B$_5^M$B$_7^M$L$^M$$\mathfrak{C}$; °ययु विष्णुं D$^M$B$_1^M$; °ययुः कृष्णं V$^M$B$_2^M$

---

**50** The opening of the commentary has been omitted by L$_2$ and then added in a later hand in the margin. **51** The testimony of U resumes here on the recto of a new folio with the words: भागैरनुययुः अनुजग्मुः

---

**49.3** किं ] G$_1$B$^1$L$_2$J; तत्किं P **49.3** शापरुद्धेन ] *conj.*; शापयन्त्रेण शापरुद्धेन G$_1$J; शापरुद्धेण P; शापयन्त्रितेन शापरुद्धेन B$^1$L$_2$ **49.4** हठकेशादानैरनिन्दितानिति ] P; हठकचग्रहैरदूषितानिति G$_1$L$_2$J; हठात्(हठत् B$^{1ac}$) कचग्रहैरदूषितानिति B$^1$J **49.4** नार्या ] G$_1$PB$^1$J; नाहा L$_2$ **50.1** विष्णुरेव ] *conj.*; कृष्णो विष्णुरेव PB$^1$L$_2^{pc}$J; कृष्णोर्विष्णुरेव G$_1$ **50.1** जलदो ऽन्तर्दधे ] *conj.*; मेघस्तिरोदधे। अन्तर्दधे। किं कृत्वा G$_1$PB$^1$L$_2^{pc}$J **50.1** एव वर्षप्रतिबन्धस् ] *conj.*; एवावग्रहं वर्षप्रतिबन्धः G$_1$; एवावग्रहो वर्षप्रतिबन्धः P B$^1$L$_2$; एव ग्रहं वर्षप्रतिबंधः J **50.1** तेनाभिभूतं ] *conj.*; तेन क्लान्तमभिभूतं G$_1$PB$^1$L$_2$J **50.1** सुरधान्यं ] *conj.*; मरुत्सस्यं सुरधान्यं G$_1$PB$^1$J **50.2** वाग्जलेन समाश्वास्य ] *conj.*; वाग्जलेनाभिवृष्य समाश्वास्य G$_1$PB$^1$L$_2$J **50.2** काल° ] PB$^1$L$_2$J; काले G$_1$ **51.1** ततो भगवन्तम् ] G$_1$PB$^1$; ततो भगन्तं L$_2$; ततः श्रीभगवंतं J **51.1** इन्द्रप्रमुखा देवा ] *conj.*; विष्णुं पुरुहूतप्रभृतयः इन्द्रमुखास्सुरा देवाः G$_1$; विष्णुं पुरुहूतप्रभृतयः इन्द्रप्रमुखाः देवाः P; विष्णुं पुरुहूतप्रभृतयः इन्द्रप्रमुखास्सुरा देवाः B$^1$L$_2$J **51.1** भागैरनुजग्मुः ] *conj.*; अंशैर्भागैरनुययुरनुजग्मुः G$_1$PB$^1$L$_2$; ---भागैरनुययुः अनुजग्मुः U; अंशैर्भागैः अनुययुः अनुरग्मुः J **51.2** °लोकमवतीर्णम् ] G$_1$PB$^1$L$_2$J; °लोके ऽवतीर्णं U **51.2** तरवः ] P; देवतरवः G$_1$U B$^1$L$_2$J **51.2** हरिसाहायकार्थं ] B$^1$J; हरिसाहायार्थकं G$_1$; हरिसहायकार्थं P; हरिसहायार्थं U; हरिसाहायाकार्थं L$_2$

र्थः॥ ५१॥

इदानीं यदर्थमेतदुक्तं तां प्रस्तुतां कथामाह—

अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम्॥ ५२॥

अनन्तरं तस्य नरनाथस्य दशरथस्य पुत्रेष्टिलक्षणस्य ≪यज्ञस्य≫ समाप्तौ, अग्निमध्याद्दिव्यः पुरुषो ≪याज्ञिकानामाश्चर्येण≫ सह प्रादुरास। तदाविर्भावात्तेषां कौतुकमुदपादीत्यर्थः॥ ५२॥

हेमपात्रीकृतं दोर्भ्यामादधानः पयश्चरुम्।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्॥ ५३॥

पय एव चरुः, पयसा वा साधितश्चरुरुपहारः पयश्चरुः, तं सौवर्णपात्रस्थितं बाहुभ्यां वहन्। विष्णोः सन्निधानात्तेनापि पुरुषेण दुर्धरम्। भगवता हि तदध्यासितमित्यागमः॥ ५३॥

प्राजापत्योपनीतं तं चरुं प्रत्यग्रहीन्नृपः।
वृषेव पयसां सारमाविष्कृतमुदन्वता॥ ५४॥

---

**53 a.** ॰पात्रीकृतं ] $G_1PL_2V^{Mpc}D^MB_2^{Mpc}B_3^MB_5^ML^M$; ॰पात्रे कृतं $UB^1V^{Mac}B_1^MB_2^{Mac}B_4^MB_7^M$ Jin.; ॰मपात्रीकृतो J(unmetrical); ॰पात्रगतं Hem.Mall.Ar.Nā. **53 b.** ॰दधानः ] $UPD^M V^MB_1^{Mac}B_2^MB_5^ML^M$Hem.Mall.; ॰ददानः $G_1B^1L_2JB_1^{Mpc}B_3^MB_4^MB_7^M$Ar.(?)Nā.Jin. **53 d.** तेनापि ] **C**; तेनाति॰ **Ś** **54 ab.** तं चरुं ] Σ; तदन्नं **C**

---

**51.3** ॰वतेरुरित्यर्थः ] $B^1L_2J$; ॰वतरेदित्यर्थः $G_1$; ॰वतीरुरित्यर्थः UP **52.1** अनन्तरं ] *conj.*; अथानन्तरं Σ **52.1** नरनाथस्य ] *conj.*; विशाम्पत्युर्नरनाथस्य Σ **52.1** पुत्रेष्टिलक्षणस्य यज्ञस्य ] *conj.* (cf. Jin.); काम्यस्य कर्मणः पुत्रेष्टिलक्षणस्य U; काम्यस्य कर्मणः पुत्रेष्टिलक्षणस्यान्ते $G_1PB^1L_2J$ **52.2** ॰द्दिव्यः ] $B^1L_2$; ॰द्दिव्य॰ $G_1UPJ$ **52.2** याज्ञिकानामाश्चर्येण ] *conj.* (cf. Jin.); ऋत्विजां विस्मयेन $G_1UPB^1J$; ऋत्विजा विस्मयेन $L_2$ **52.2** प्रादुरास ] *conj.*; प्रबभूव प्रादुरास $G_1UPB^1J$; बभूव प्रादुरासीत् $L_2$ **53.1** चरुः ] $G_1UB^1L_2J$; चरुः पयोमिश्रः P **53.2** सौवर्ण॰ ] $G_1UPB^1J$; सौवर्णं $L_2$ **53.2** बाहुभ्यां वहन् ] *conj.*; दोर्भ्यां बाहुभ्यामाददानः वहन् $G_1B^1L_2$; दोर्भ्यां बाहुभ्यां आदधानः वहन् UP; दौर्भ्यां बाहुभ्यामाददानः वहन् J **53.2** सन्निधाना॰ ] $UPB^1L_2J$; सन्निदाना॰ $G_1$ **53.2** पुरुषेण ] $G_1PB^1L_2J$; पुरुषे U **53.2** दुर्धरम् ] *conj.*; दुर्वहं दुर्धरम् Σ **53.3** ॰त्यागमः ] $G_1UPB^1L_2$; ॰त्यागमः युग्मम् J

राजा तद्दिव्यमन्नं पायसमाददे। प्रजापतेरयं प्राजापत्यो दिव्यपुरुषः, तेन ढौकितम्। इन्द्रो यथाब्धिना प्रकटीकृतममृतम्॥ ५४॥

अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः।
विवृत्तिं चकमे तस्मिंस्त्रैलोक्यप्रभवो ऽपि यत्॥ ५५॥

तस्य दशरथस्य सर्वोत्कृष्टा गुणा एतेनैवोक्ता यत्त्रैलोक्यकारणमपि विष्णू राजनि दशरथ उत्पत्तिं रामादिरूपेण परिणतिमकामयत। यदि ह्यसौ सर्वातिशयी न स्यात्तत्कथं भगवानपि पितृत्वेनोररीकुर्यात्। भगवद्विवृत्तिस्तु चरुणैव व्याख्याता॥ ५५॥

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम्।
द्यावापृथिव्योः प्रत्यग्रं वृषाकपिरिवातपम्॥ ५६॥

स राजा विष्णुसत्कं तेजश्चरुसंज्ञितं भार्ययोर्ज्येष्ठयोर्भागीकृतवान्, रोदस्योर्न-

---

**55 c.** विवृत्तिं ] $G_1P^{pc}B^1L_2JB_3^MB_7^M$Jin.; प्रवृत्तिं $U^{pc}P^{ac}D^MV^MB_1^MB_2^MB_5^M$; पृवृत्तिं $B_4^M$; निवृत्तिं $U^{ac}$; प्रसूतिं Hem.Mall.Ar.Nā. **56 d.** वृषाकपिरिवा° ] $G_1UPB^1L_2JD^MV^MB_1^{Mac}B_2^MB_3^MB_4^MB_5^MB_7^M$Ar.Nā.; अहर्पतिरिवा° $B_1^{Mpc}$Hem.Mall.Jin.

---

**54.1** राजा तद्दिव्यमन्नं ] *conj.*; राजानं चरुं तद्दिव्यमन्नं $G_1UJ$; राजा तं चरुं तद्दिव्यमन्नं $PB^1L_2$ **54.1** पायसमाददे ] *conj.*; पायसं प्रत्यग्रहीदाददे $G_1PB^1$; पायसं प्रत्यग्रहीदा(ही-मा$L_2^{ac}$)दधे $UL_2$; पयसं प्रत्यग्रहीदाददे J **54.2** तेन ढौकितम् ] *conj.*; तेनोपनीतं ढौकितम् Σ **54.2** इन्द्रो यथाब्धिना ] *conj.*; वृषा इन्द्रो यथा उदन्वत अब्धिना Σ **54.2** प्रकटीकृतम् ] *conj.*; आविष्कृतं प्रकृटीकृतम् $G_1$; आविष्कृतं प्रकटीकृतम् $UPB^1L_2J$ **54.2** अमृतम् ] *conj.*; पयसां सारममृतम् Σ **55.1** दशरथस्य ] *conj.*; राज्ञो दशरथस्य $G_1UPB^1L_2J$ **55.1** सर्वोत्कृष्टा ] *conj.*; अन्यदुर्लभाः सर्वोत्कृष्ट° $G_1J$; अन्यदुर्लभाः सर्वोत्कृष्टा $UB^1L_2$; अन्यदुर्लभाः अन्योत्कृष्टाः P **55.1** एतेनैवोक्ता ] P; एतेनैव कथिताः $G_1UB^1L_2J$ **55.1** यत्त्रैलोक्य° ] $G_1UB^1L_2$; यत्तु त्रैलोक्य° P; यत्नोलोक्य J **55.2** विष्णू राजनि ] *conj.*; विष्णुः तस्मिन्राजनि $G_1UPB^1J$; विष्णु तस्मिन्राजनि $L_2$ **55.2** दशरथ ] P; *om.* $G_1B^1L_2J$ **55.2** उत्पत्तिं ] *conj.*; विवृत्तिमुत्पत्तिं $G_1PB^1L_2J$; निवृत्तिमुत्पत्तिं U **55.2** परिणतमिकामयत ] P; परिणतं चकमे अकामयत $UB^1J$; परिणतं चकमे अकामयत् $G_1$; तं चकमे अकामयत् $L_2$ **55.2** सर्वातिशयी ] UJ; सर्वातिशायी $G_1PB^1L_2$ **55.3** स्यात्तत्कथं ] $G_1UPB^1$; स्या तत्कथं $L_2$; स्यात्तथं श्री° J **56.1** राजा ] $G_1UPB^1L_2$; राजा दशरथः J **56.1** विष्णुसत्कं ] *conj.* (cf. Jin.); वैष्णवं $G_1UPB^1L_2J$ **56.1** °र्भागीकृतवान् ] *conj.*; °र्विभेजे विभागीकृतवान् $G_1UB^1L_2J$; °ः विभेजे भागीकृतवान् P **56.1** रोदस्योर् ] *conj.*; द्यावापृथिव्योः रोदस्योः $G_1UB^1J$; द्यावापृथिव्योः रोधस्योः P; द्धावापृथिव्योः रोदस्यः $L_2$

वमातपं रविरिव, इति चरोर्भासुरत्वोक्तिः॥ ५६॥

ननु पत्नीत्रयसद्भावे किमिति द्वाभ्यामेव तेन दत्तमित्याह—

**अर्चिता तस्य कौसल्या प्रिया केकयवंशजा।**
**अतः सम्भावितां ताभ्यां सुमित्रामैच्छदीश्वरः॥ ५७॥**

ज्येष्ठा तस्य गौरविता, मध्यमापीष्टा, तेन कौसल्याकैकेयीभ्यां कर्त्रीभ्यां कृतसंविभागां राजा सुमित्रामियेष 'एते एव एतस्यै दत्ताम्' इति॥ ५७॥

**ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः।**
**चरोरर्धार्धभागेन तामयोजयतामुभे॥ ५८॥**

ततः प्रत्यभिज्ञाताभिप्रायत्वात्कौसल्याकैकेय्यौ सुमित्रायै प्रत्येकमर्धमर्धमदत्तामिति गर्भाणां समबलत्वमुक्तम्। रामायणे त्वन्यथा विभागः — चरोरर्धं ज्येष्ठायाः, मध्यमायास्तदर्धं, तदर्धं तु द्विभागीकृत्य सुमित्राया इति। बहुज्ञत्वमत्र ज्येष्ठामुखेन कनिष्ठायाः संविभागात्। एवं ह्युभयानुग्रहः कृतो भवति॥ ५८॥

अथ कस्मात्ताभ्यां तस्याः सपत्नीद्वेषो न दर्शित इत्याह—

---

**58 b.** पत्युर्महीक्षितः ] UJ$B_3^M B_4^M$Hem.Mall.Ar.(?)Nā.; पत्युर्महीक्षिताम् $G_1PB^1L_2D^MV^M B_1^M B_2^M B_5^M B_7^M$; पत्युर्मुदेक्षिताम् Jin. **58 c.** °भागेन ] ŚJin.; °भागाभ्यां Hem.Mall.Ar.Nā.

---

**58** अथ कस्मात्ताभ्यां तस्याः सपत्नीद्वेषो न दर्शित इत्याह ] *om.* $B^{1ac}L_2$

---

**56.2** नवम् ] *conj.*; प्रत्यग्रं नवम् Σ **56.2** रविरिव इति ] *conj.*; वृषाकपिः रविरिति $G_1UPB^1L_2J$ **56.2** चरोर्भासु° ] $B^1L_2$; चरोभासु° $G_1J$; चरोः भास्व° UP **56.3** तेन ] $G_1UPB^1J$; *om.* $L_2$ **57.1** °कैकेयीभ्यां कर्त्रीभ्यां ] $G_1B^1L_2J$; °कैकेयीभ्यां कर्तृभ्यां U; °केकयीभ्यां कर्त्रीभ्यां P **57.2** कृतसंविभागां ] *conj.*; सम्भावितां कृतसंविभागां $G_1PB^1$ J; सम्भावितां कृतं संविभागां U; सम्भावितां कृतविभागां $L_2$ **57.2** °मियेष ] $UPL_2J$; °मियैष $G_1$; °मियेषु $B^1$ **57.2** एते एव ] $PL_2$; राजा एते $G_1J$; राजायते U; एते $B^1$ **57.2** दत्ताम्' इति ] $G_1UPB^1J$; दत्तमिति $L_2$ **58.1** कौसल्याकैकेय्यौ ] $G_1UJ$; कौसल्या कैकेयी च $PB^1L_2$ **58.2** °र्धमदत्तामिति ] $G_1UPB^1J$; °र्धदत्तामिति $L_2$ **58.2** रामायणे ] $UPB^1L_2$; रामायने $G_1$; श्रीरामायणे J **58.2** त्वन्यथा विभागः ] $G_1UPB^1J$; तु विभागमन्यथा $L_2$ **58.3** ज्येष्ठायाः ] $G_1UB^{1pc}L_2$; ज्येष्ठाय+ा+ः $B^1$; ज्येष्टायौ J **58.3** तु द्विभागीकृत्य ] $G_1UB^{1ac}L_2J$; द्विभागीकृत्य P; तु +त+द्विभागीकृत्य $B^1$ **58.3** सुमित्राया ] $UPB^1L_2J$; स्वमित्राया $G_1$ **58.4** बहुज्ञत्वमत्र ] $G_1UB^{3pc}J$; बहुज्ञमत्र $B^{1ac}L_2$ **58.6** दर्शित इत्याह ] $G_1UPJ$; दर्शितः सा हि $B^3$

सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि।
भ्रमरी वारणस्येव मदनिःष्यन्दलेखयोः॥ ५९॥

यस्मात्सुमित्रा प्रार्थनावत्यभूत्। द्वयोरपि सपत्न्योः, यथालिनी गजस्य मदवारिस्रुतिराज्योः॥ ५९॥

ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसम्भवः।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः॥ ६०॥

विष्णोर्भागादुत्पत्तिर्यस्य स गर्भस्ताभी राज्ञीभिर्लोकाभ्युदयाय धृतः। सूरस्येमाः सौर्यः। ताभिः सूर्यसम्बन्धिनीभिरमृतानाम्नीभिर्दीधितिभिर्यथा जलमयो गर्भो ग्रीष्मे धार्यते। गर्भ इति प्रत्येकं सम्बन्धविवक्षया भगवतो वैकत्वादेकवचनम्॥ ६०॥

सममापन्नसत्त्वास्ता बभुरापाण्डुरत्विषः।
अन्तर्गतफलारम्भाः सस्यानामिव सम्पदः॥ ६१॥

ततस्तास्तुल्यकालमन्तर्वत्न्यो रेजुः। मध्यस्थितफलारम्भाः शाल्यादीनां समृ-

---

**59 a.** सा हि ] Σ; सापि Mall. **61 b.** बभुरा° ] ŚHem.Jin.; रेजुरा° Mall.Ar.(?)Nā.

---

**59.1** यस्मात्सुमित्रा ] *conj.*; प्रणयः प्रीतिः सेवा (सेव G$_1$J) वा निष्यन्दः स्रुतिः यस्मात्सुमित्रा G$_1$UPB$^1$J; स्स्रुतिः यस्मात्सुमित्रा L$_2$(eyeskip) **59.1** °नावत्यभूत् ] P; °नावभ्यभूत् G$_1$B$^1$L$_2$; °वत्यासीत् अभूत् U; °नावध्यभूत् J **59.1** गजस्य ] P; वारणस्य G$_1$UB$^1$L$_2$J **60.1** विष्णोर्भागादुत्पत्तिर्यस्य ] *conj.*; देवस्य विष्णोरंशात्सम्भवो यस्य गर्भस्य G$_1$UB$^1$L$_2$; देवस्य विष्णोरंशाद्भागात्सम्भव उत्पत्तिः यस्य गर्भस्य P; देवस्य श्रीविष्णोरंशात्सम्भवो यस्य गर्भस्य J **60.1** गर्भस्ताभी ] PJ; गर्भस्ताभि G$_1$UB$^1$L$_2$ **60.1** राज्ञीभिर्लोकाभ्युदयाय ] *conj.*; राज्ञीभिः प्रजाभूत्यै लोकाभ्युदयाय Σ **60.1** धृतः।] *conj.*; दध्रे धृत इति कर्मणि लकारः G$_1$UPB$^1$J; दध्रे धृता इति कर्मणि लकारः L$_2$ **60.2** सूरस्येमाः ] G$_1$UPB$^{1pc}$J; सूरस्येमस् B$^{1ac}$; सूरस्येमाप् L$_2$ **60.2** सौर्यः ] PB$^1$L$_2$J; सौर्याः G$_1$U **60.2** सूर्यसम्बन्धिनीभिरमृतानाम्नीभिर्दीधितिभिर्यथा ] *conj.*; सौरीभिरमृतनामाभिः नाडीभिर्दीधिति (ती B$^{1ac}$J) भिर्यथा G$_1$B$^1$L$_2$J; सौरीभिरमृतनामाभिः नाडीभिः दीधिति यथा U; सौरीभिस्सूर्यसम्बन्धिनीभिरमृतनामाभिर्नाडीभिः दीधितिभिर्यथा P **60.2** जलमयो ] *conj.*; अम्मयो जलमयः G$_1$UB$^1$L$_2$J; अप्मयो जलमयो P **60.3** गर्भो ] G$_1$UPB$^1$J; र्भि L$_2$ **60.3** वैक° ] *em.*; वा एक° G$_1$PB$^1$L$_2$J; व एक° U **61.1** ततस्तास्तु° ] UPB$^1$L$_2$J$^{pc}$; ततस्ता तु° G$_1$ J$^{ac}$ **61.1** °कालमन्तर्वत्न्यो ] *conj.*; कालमापन्नसत्त्वा अन्तर्वत्न्यः Σ **61.1** शाल्यादीनां ] *conj.*; सस्यानां शाल्यादीनां G$_1$UJ; शाल्यादीनां सस्यानां PB$^1$L$_2$

द्धय इव सगर्भत्वात्। गौरकान्तय इत्युभयविशेषणम्॥ ६१॥

गुप्तं ददृशुरात्मानं सर्वाः स्वप्ने ऽथ वामनैः।
असित्सरुगदाशार्ङ्गचक्रलाञ्छितमूर्धभिः॥ ६२॥

अथ तास्तिस्रो ऽपि स्वप्ने ऽपि भगवदायुधाङ्कितशिरोभिर्वामनै रक्षितं स्वमैक्षन्त। वामनाकारं भगवतो रूपम्। केचित्त्वथशब्दस्थाने लिपिव्यामोहादर्धशब्दं पेठुः। अर्धवामना भगवदनुचरा इति व्याचख्युः। असित्सरुः खड्गमुष्टिः॥ ६२॥

हेमपत्त्रप्रभाजालं गगने च वितन्वता।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा॥ ६३॥

तथा स्वप्ने गरुडेन च सर्वा ≪धार्यन्ते≫ स्म। सौवर्णपक्षकान्तिसमूहं खे प्रसारयता। ≪जवापवाहितमेघेन≫। इतः प्रभृति सर्वा इति स्वप्ने इति चाग्रे सर्वत्रोपयुज्यते॥ ६३॥

बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम्।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया॥ ६४॥

---

**62 b.** स्वप्ने ऽथ ] $G_1UB^1L_2JD^MV^MB_1^{Mpc}B_2^MB_3^MB_5^MB_7^M$Ar.(?)Nā.; स्वप्नेषु $PB_1^{Mac}B_4^M$Hem. Mall.; स्वप्ने च Jin.; स्वप्ने ऽर्ध° Vall.$^{vl}$ **62 c.** असित्सरु° ] $G_1UPB^1L_2JD^MV^MB_1^{Mac}B_2^MB_3^MB_4^MB_5^MB_7^M$; असित्सोरु° $B_1^{Mpc}$; असिशङ्ख° Hem.Jin.; जलजासि° Mall.Ar.Nā. **62 d.** °मूर्धभिः ] Ar.Nā.; °मूर्तिभिः $G_1UB^1L_2JD^MV^MB_1^{Mac}B_2^MB_3^MB_4^M$Hem.Mall.Jin.; °पाणिभिः $PB_1^{Mpc}B_5^MB_7^M$ **63 a.** हेमपत्त्र° ] $UPB^1L_2JD^MV^MB_1^MB_2^MB_3^{Mpc}B_4^{Mpc}B_5^M$Hem.Ar.Nā. Jin.; हेमपात्र° $G_1B_3^{Mac}B_4^{Mac}B_7^M$; हेमपक्ष° Mall. **64 a.** कौस्तुभ° ] Σ; कौस्तुभं $B_7^{Mac}$

---

**61.2** समृद्धय ] *conj.*; सम्पदः समृद्धय $UPL_2J$; सम्पदास्समृद्धय $G_1B^1$ **62.2** रक्षितं स्वमैक्षन्त ] *conj.*; °र्गुप्तं रक्षितमात्मानमैक्षन्त Σ **62.2** भगवतो ] $UPB^1L_2$; भगतो $G_1$; श्रीभगवतो J **62.3** °नुचरा ] $UPB^1L_2J$; °नुचारा $G_1$ **62.3** खड्गमुष्टिः ] PJ; खड्गामुष्टिः $G_1UB^1$; खड्गामुष्टि $L_2$ **63.1** धार्यन्ते ] *conj.* (cf. Jin.); उह्यन्ते Σ **63.1** °पक्षकान्ति° ] $B^1J$; °पक्षिकान्ति° $G_1UL_2$; °पक्षति° P **63.1** खे ] *conj.*; गगने खे $G_1UB^1L_2J$; गगने P **63.2** प्रसारयता ] *conj.*; वितन्वता प्रसारयता $G_1UPB^1J$; वितनुता प्रसारयता $L_2$ **63.2** जवापवाहितमेघेन ] *conj.*; वेगेनाकृष्टा (वेगानाकृष्टा U; वेगेन कृष्टा P) अपवाहिताः पयोमुचो मेघाः येन तेन $G_1UPB^1L_2J$ **63.2** इतः ] UPJ; इत $G_1$; ततः $B^1$; इतोः $L_2$ **63.2** इति चाग्रे ] $PB^1L_2$; इति चाग्रे ऽग्रे $G_1J$; इत्यग्रे ग्रे U

राजीवतालवृन्तकरया तेन वीजयन्त्या श्रिया ताः स्वप्ने ऽसेव्यन्त। पतिसत्कं पयोधरमध्यगतं कौस्तुभमणिनिक्षेपं धारयन्त्या। स हि देवेनावतरता श्रियाः कण्ठे निक्षिप्तः॥ ६४॥

कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे॥ ६५॥

मरीचिप्रभृतिभिर्ब्रह्मर्षिभिः परं ब्रह्म वेदरहस्यं जपद्भिर्व्योमोत्पन्नायां गङ्गाया-मास्रुतैः सप्तभिः सर्वाः पूज्यन्ते स्म॥ ६५॥

ताभ्यस्तथाविधान्स्वप्नाञ्श्रुत्वा प्रीतो ऽपि पार्थिवः।
मेने ऽपराद्धमात्मानं गुरुत्वेन जगद्गुरोः॥ ६६॥

भार्याणां सकाशादेवंविधान्स्वप्नानाकर्ण्य दिव्यापत्यत्वेन प्रीतो ऽपि राजात्मा-नं सापराधं बुबुधे। केन हेतुना। विष्णोः पितृत्वेन। यः किलाखिलजगतो गुरुस्तस्य कथं मया गुरुत्वेन वर्तनीयमिति। प्रीत इत्यपराद्धमिति च पाठः,

---

**66 b.** प्रीतो ऽपि ] $G_1UPB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_7^M$Jin.; प्रीतो ऽथ $B_5^M$Hem.; प्रीतो हि Mall.; प्रीतस्स Ar.(?)Nā.; ह्रीतो ऽपि Vall.$^{vl}$ **66 c.** मेने ऽपराद्धम् ] $G_1UP^{pc}B^{3pc}L_2J D^MV^MB_1^MB_2^MB_5^MB_7^M$; मेने परार्ध्यं $P^{ac}B^{1ac}B_4^M$ℭVall.$^{vl}$; मेने पाराद्धम् $B_3^M$

---

**64.1** राजीव° ] $G_1UJ$; तथा पद्मव्यजनहस्तया राजीव° $PB^1L_2$ **64.1** °करया तेन ] $G_1PB^1L_2J$; °कलया तेन U **64.1** श्रिया ] $G_1UPB^1L_2$; श्रियास् J **64.1** ताः स्वप्ने ] $PB^1J$; स्तास्सुप्ने $G_1$; ता U; ताः सुप्ने $L_2$ **64.1** ऽसेव्यन्त ] $G_1UJ$; पर्युपासन्त असेव्यन्त P; पर्युपास्यन्तासेवन्त $B^1$; पर्युपास्यन्त सेव्यन्त $L_2$ **64.1** पतिसत्कं ] $UPB^{1pc}L_2J$; पतिसम्पर्कं $G_1$; पतिशत्कं $B^{1ac}$ **64.2** धारयन्त्या ] *conj.*; बिभ्रत्या धारयन्त्या Σ **64.2** °वतरता ] $G_1UPB^1J$; °वतारता $L_2$ **64.2** श्रियाः ] $G_1UB^1L_2J$; श्रियः P **64.3** निक्षिप्तः ] $UPB^1L_2J$; निक्षिप्ताः $G_1$ **65.1** परं ] $G_1UPB^1J$; पर° $L_2$ **65.1** जपद्भिर् ] $G_1PB^1J$; जगद्भिर् U; जपद्भि $L_2$ **65.1** व्योमोत्पन्नायां ] *conj.*; दिव्यायां $G_1UB^1L_2J$; दिव्यायां व्योमोत्पन्नायां P **65.2** °यामास्रुतैः ] *conj.*; °यां कृताभिषेकैरास्रुतैः $UPB^1L_2$; °यां कृताभिषेकैरास्रुताः $G_1$; °यां कृताभिषेकैरास्रुता J **65.2** सप्तभिः ] $G_1PB^1L_2J$; सर्वाभिः U **65.2** सर्वाः पूज्यन्ते स्म ] *conj.*; सर्वा उपतस्थिरे पूज्यन्ते स्म Σ **66.1** स्वप्नान् ] $UPB^1L_2J$; सुप्नान् $G_1$ **66.1** °पत्यत्वेन ] $G_1UPB^1J$; °पतित्वेन $L_2$ **66.1** प्रीतो ऽपि ] $G_1UB^1L_2J$; प्रीतो हि P **66.2** सापराधं ] *conj.*; अपराद्धं सापराधं $PB^1L_2J$; अपराद्धं सापराद्धं $G_1U$ **66.2** बुबुधे ] *conj.*; मेने बुबुधे Σ **66.2** विष्णोः ] *conj.*; जगद्गुरोर्विष्णोः Σ **66.2** पितृत्वेन ] *conj.*; गुरुत्वेन पितृत्वेन $G_1UPB^1J$; गुरुत्वे पितृत्वेन $L_2$ **66.2** यः किला° ] $PB^1L_2$; यत्किला° $G_1UJ$ **66.2** °जगतो ] UP; °जगतां $G_1B^1L_2J$ **66.3** °पराद्धमिति ] $G_1B^{3pc}J$; °पराद्ध इति U; °परार्धमिति $PB^{1ac}$; °रार्धमिति $L_2$

ह्रीत इति परार्ध्यमिति चापपाठ एव, अपिशब्दस्यावाचकत्वात्॥ ६६॥

**विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा।**
**उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव॥ ६७॥**

स विष्णुरेको ऽपि ≪विभागीकृतस्वत्वात्≫ तासामुदरेषु बहुप्रकारैस्तस्थौ, निर्मलानां जलाशयानां मध्ये प्रतिबिम्बितः शशीव॥ ६७॥

**अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती।**
**पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः॥ ६८॥**

अनन्तरं ≪दशरथस्य≫ अग्र्या चासौ महिषी — द्वे महिष्यावास्तामित्यग्र्यग्रहणम् — प्रधानभार्या कौसल्या दुःखनाशनं ≪सुतम्≫ असूत, रात्रावोषधिस्तिमिरघ्नं तेज इव॥ ६८॥

कं तमजनयदित्याह।

**राम इत्यभिरामेण वपुषा यस्य चोदितः।**

---

**67 a.** विभक्तात्मा ] Σ; स विभक्तो Ar. **68 a.** अथाग्र्य° ] $UPB^{1ac}L_2JV^MB_1^MB_2^MB_3^{Mpc}B_5^M$ $B_7^M$Hem.Ar.(?)Nā.; अस्याग्र्य° $G_1$; अथाग्र° $B^{3pc}D^MB_4^M$Mall.Jin.; अ×⏑̲×ग्र्य° $B_3^{Mac}$ **69 b.** यस्य चोदितः ] $G_1UB^1L_2JV^MB_7^M$Hem.Mall.Ar.(?)Nā.; तस्य चोदितः $PB_1^MB_2^MB_3^M$ $B_4^MB_5^M$; तस्य चोदिताः $D^M$; यस्य नोदितः Jin.

---

**66.4** ह्रीत इति ] $G_1UPJ$; ह्रीतमिति $B^1L_2$ **66.4** परार्ध्यमिति ] $G_1UB^1J$; परार्ध्यामिति $L_2$ **66.4** चापपाठ ] $UB^1L_2J$; चापरापाठ $G_1$; चापरपाठ P **67.1** विष्णुरेको ] *conj.*; विभुरेको $G_1UB^1L_2$; विभुः विष्णुः एको P; विभुः भगवानेको J **67.1** विभागीकृतस्वत्वात् ] *conj.*; विभक्तात्मत्वात् $G_1UB^1L_2J$; विभक्तात्मा विभागीकृतः स्वो येन सः P **67.1** उदरेषु ] P; कुक्षिषु उदरेषु $G_1UB^1L_2J$ **67.1** बहुप्रकारैस्तस्थौ ] *conj.*; अनेकधा उवास तस्थौ $G_1UB^1L_2J$; अनेकधा बहुप्रकारैः उवास तस्थौ P **67.2** मध्ये ] P; *om.* $G_1UB^1L_2J$ **67.2** शशीव ] P; शशी यथा $G_1UB^1L_2J$ **68.1** अनन्तरं दशरथस्य ] *conj.*; अनन्तरं राज्ञः P; अथानन्तरं राज्ञः $G_1UB^1L_2$; अथ स्वमदर्शनादनंतरं राज्ञो दशरथस्य J **68.1** अग्र्या चासौ महिषी ] $G_1PB^{1ac}J$; अग्र्या महिषी U; अग्रा चासौ महिषी $B^{3pc}$; अग्र्या च महिषीति $L_2$ **68.2** द्वे महिष्यावास्तामित्यग्र्यग्रहणम् ] *em.*; ते द्वे महिषौ अस्तामित्यग्र्यग्रहणम् $G_1$; ते द्वे महिषावास्तामित्यग्रग्रहणम् U; ते द्वे महिष्या आस्तां (?) इत्यग्र्यग्रहणं P (tops missing); ते ×द्वे×च +ते अग्र्य ×महिष्यावा×+ महिष्यावास्तामित्यग्रग्रहणम् B; ते द्वे महिष्यावास्तामित्यग्र्यग्रहणम् $B^{1ac}$; द्वे महिष्यावास्थामित्यग्र्यग्रहणं $L_2$; ते द्वे महिष्यावास्तामि ऽत्यग्रग्रहणं J **68.2** दुःखनाशनं ] *conj.*; तमोपहं दुःखनाशनं Σ **68.2** सुतम् असूत ] *conj.*; पुत्रं लेभे असूत Σ **68.2** रात्राव् ] *conj.*; नक्तं रात्रौ Σ **68.3** तेज ] *conj.*; ज्योतिस्तेज Σ **68.4** तमजनय° ] $G_1UPB^1J$; उपजनय° $L_2$

नामधेयं गुरुश्चक्रे जगत्प्रथितमङ्गलम्॥ ६९॥

यस्याभिरामशरीरत्वाद्राम इति सार्थकं नाम पिता चकार। जगति ख्यातं मङ्गलं यस्मिन्॥ ६९॥

रघुवंशप्रदीपेन तेनाप्रतिमतेजसा।
शय्यागृहगता दीपाः प्रत्याख्याता इवाभवन्॥ ७०॥

तेन †रघुवंशप्रदीपेन† सुतेनात्युत्कृष्टतेजस्त्वात् गर्भवेश्मस्था दीपा विच्छायत्वात् प्रहिततेजस इवासन्। महापुरुषलक्षणं ह्यतितेजः॥ ७०॥

शय्यागतेन चानेन माता च्छातोदरी बभौ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा॥ ७१॥

तेन च तनयेन शयनस्थेन कृशावलग्ना कौसल्या शुशुभे। तटस्थेन पूजापद्मेन शरत्कालतन्वी यथा गङ्गा शोभते। पद्मेन पूजा, पद्ममेव वा पूजा॥ ७१॥

कैकेय्यास्तनयो जज्ञे भरतो नाम वीर्यवान्।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम्॥ ७२॥

---

**69 d.** जगत्प्रथित° ] Σ; जगत्प्रथम° ℭ **70 b.** तेनाप्रतिम° ] ΣHem.$^{vl}$; तेनाभिमत° Hem. **70 c.** शय्या° ] Ś$D^M B_2^M B_3^M B_4^M B_5^M B_7^M$; रक्षा° $B_1^M$ℭ **70 d.** प्रत्याख्याता ] $G_1$U $B^1 L_2$J$V^M B_2^M B_3^M B_4^M B_5^M$; प्रत्याख्याताः $D^M$; प्रत्यादिष्टा P$B_1^M$ℭ **71 a.** चानेन ] ŚJin.; रामेण Hem.Mall.; सा तेन Ar.(?)Nā. **71 b.** च्छातोदरी ] Ś; शातोदरी Hem.Mall.Ar. Nā.; क्षामोदरी Jin. **72 b.** वीर्यवान् ] Σ; शीलवान् ℭ

---

**71** पूजापद्मेन ···पद्ममेव वा पूजा ] पूजापद्ममेव वा पूजा J(eyeskip)

---

**69.1** पिता ] $G_1$UP$B^1 L_2$; गुरुर्वसिष्ठः अथवा पिता दशरथः J **69.1** ख्यातं ] *conj.*; प्रथितं ख्यातं Σ **69.2** मङ्गलं यस्मिन् ] *conj.*; यस्मिन्नामधेयम् $G_1$J; नामधेयं यस्मिन् U; मङ्गलं नामधेयो यस्मिन् P; मङ्गलं यस्मिन्नामधेये $B^1 L_2$ **70.1** °दीपेन सुतेना° ] P; °दीपेना° $G_1$U$B^1 L_2$J **70.1** °त्युत्कृष्ट° ] UP$B^1 L_2$; °त्युष्ट° $G_1$J **70.2** प्रहिततेजस ] *conj.*; प्रत्याख्याताः प्रहिततेजस Σ **71.1** शयनस्थेन ] $G_1$UP$B^{1ac}$; शयनस्तेन $B^{3pc} L_2$; शयस्थेन $J^{pc}$; शयस्थोन $J^{ac}$ **71.1** कृशावलग्ना ] *conj.*; च्छातोदरी कृशावलग्ना Σ **71.1** कौसल्या ] *conj.*; माता कौसल्या Σ **71.1** शुशुभे ] $G_1$UP$B^3 L_2$; बभौ शुशुभे J **71.2** °तन्वी ] $G_1$P$B^3 L_2$; °कृशा U **71.2** वा ] $G_1$UP$L_2$J; *om.* $B^3$

मध्यमाया भरतो नाम पुत्रो जातः। यो मातरममण्डयत्। विनय इव लक्ष्मीम्॥ ७२॥

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ।
सम्यगागमिता विद्या प्रबोधविनयाविव॥ ७३॥

सुमित्रा नाम लक्ष्मणशत्रुघ्नौ पुत्रौ सहैव जातावजनयत्, यथा विधिवदर्जिता विद्या ज्ञानप्रश्रयौ प्रसूते। यमौ हि युगपज्जातौ कथितौ॥ ७३॥

निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत्।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम्॥ ७४॥

तेषु जातेषु सकलं भुवनं दोषरहितं सगुणं चाभवत्। निर्दोषत्वे ऽपि गुणाभावः स्यादित्युक्तमाविष्कृतगुणं प्रकटितगुणमिति। अतश्चोत्प्रेक्ष्यते—भुवं प्राप्तं नारायणं स्वर्गो ऽनुययाविव॥ ७४॥

तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव॥ ७५॥

---

**73 c.** सम्यगागमिता ] $G_1UPB^3V^MB_1^MB_2^MB_4^MB_5^MB_7^M$Mall.Ar.Nā.Jin.; सम्यगागामिता $L_2$; सम्यगागविता $JB_3^M$; सम्यगागम्यता $D^M$; सम्यगभ्यसिता Hem. **74 c.** हि स्वर्गो ] $G_1PB^3L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.Jin.; हि सर्गो U; हि सुर्गो $D^M$; च स्वर्गो Ar.Nā.

---

**72.1** मध्यमाया ] $G_1UPB^3$; मध्यमायां $L_2$; कैकेय्यो मध्यमायाः J **72.1** मातरममण्डयत् ] *conj.*; मातरमलञ्चक्रे अमण्डयत् $G_1UB^3L_2J$; मातमलंचक्रे अमण्डयत् P **72.1** विनय ] *conj.*; प्रश्रयो विनय Σ **73.1** पुत्रौ ] *conj.*; सुतौ $G_1UPL_2J$; सुतौ पुत्रौ $B^3$ **73.1** सहैव जातावजनयत् ] *conj.*; यमौ सहैव जातौ सुषुवे $G_1$; यमौ सहैव जातौ सुषुवे अजनयत् $UB^3$; यमौ सहैव जातौ युगपज्जातौ सुषुवे अजनयत् P; यमौ सहैव जातौ सुषवे अजनयत् $L_2J$ **73.1** अजनयत् विधिवदर्जिता विद्या ज्ञानप्रश्रयौ ] *om.* $G_1$ **73.1** विधिवदर्जिता ] *conj.*; सम्यगागमिता U; सम्यग्विधिव आगमिता अर्जिता P; सम्यग्विधिवदागमिता अर्जिता $B^3J$; सम्यग्विधिवदागामिता अर्जिता $L_2$ **73.2** प्रसूते ] $G_1UPL_2J$; सूते यथा $B^3$ **74.1** तेषु ] $G_1UPB^3L_2$; तेषु श्रीरामादिषु J **74.1** जातेषु ] $B^3$; जातेषु सत्सु $G_1UPL_2J$ **74.1** सकलं भुवनं ] *conj.*; सर्वं जगद्भुवनं $G_1PL_2$; सर्वं जगद्भवनं UJ; सकलं ×ज× सर्वं जगद्भुवनं $B^3$ **74.1** दोषरहितं ] *conj.*; निर्दोषं $G_1UPL_2J$; निर्दोषं दोषरहितं $B^3$ **74.1** सगुणं चाभवत् ] $B^3$; सगुणमभवत् $G_1PL_2J$; आविष्कृतगुणमभवत् U **74.2** निर्दोषत्वे ऽपि गुणाभावः स्यादित्युक्तमाविष्कृतगुणं प्रकटितगुणमिति ] $B^3$; *om.* $G_1UPL_2J$ **74.3** नारायणं ] $G_1UPB^3L_2$; श्रीनारायणं J **74.3** °नुययाविव ] $B^3$; °न्वगादनुययाविव $G_1UL_2$; °न्वयादनुययौ इव P; °न्वगादनुययाविवेत्यर्थः J

तस्य भगवतो रामादिरूपेण चतुस्तनोरुत्पत्तौ हरितो निर्धूलिभिर्वायुभिरुच्छ्वसिता इव। ततः पूर्वं रावणाद्भीता नित्यमेवेन्द्रयमवरुणधनदाः स्वामिनो यासु तथोक्ताः। उदात्तदुःखनाशादुच्छ्वासोत्प्रेक्षा॥ ७५॥

**कृषाणुरपधूमत्वात्प्रसन्नत्वात्क्षपाकरः।**
**रक्षोविप्रकृतावास्तामपविद्धशुचाविव॥ ७६॥**

निर्मलत्वादग्नीन्दू अपि तदा रावणपरिभवजं शोकं तत्यजतुरिव॥ ७६॥

**दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।**
**मणिव्याजेन पर्यस्ताः पृथिव्यामस्रुबिन्दवः॥ ७७॥**

तदा च रावणस्य मुकुटेभ्यो रत्नानि भुवि पेतुः। उत्प्रेक्ष्यते—रक्षःश्रियो नूनमेते रत्नलक्ष्येण वाष्पकणाः शोकात्पतिताः कष्टं नष्ट एवास्मत्प्रभुरिति॥ ७७॥

**पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः।**
**आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि॥ ७८॥**

---

**76 a.** कृषाणु° ] $G_1UPB^3V^MB_2^MB_5^M$; कृशाणु° $B^3$; कृशानु° $L_2JD^MB_1^MB_3^MB_4^MB_7^M$**C** **76 b.** क्षपाकरः ] **V**$B_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Jin.; क्षिपाकरः $D^M$; प्रभाकरः Hem.Mall.; दिवाकरः Ar.(?)Nā. **77 b.** राक्षस° ] $G_1UPL_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; रावण° $B^3D^M$ **77 d.** °मस्रु° ] **Ś**; °मास्र° Ar.(?)Nā.; °मश्रु° Hem.Mall.Jin. **78 a.** °प्रवेश्यानां ] **V** $B_1^MB_2^MB_3^MB_7^M$**C**; °प्रवेशानां $D^MB_4^MB_5^M$

---

**75.1** भगवतो ] $G_1UPB^3L_2^{pc}$; भगतो $L_2^{ac}$; श्रीभगवतो J **75.1** चतुस्तनोरुत्पत्तौ ] $B^3$; चतुर्मूर्तेरुत्पत्तौ $G_1UPL_2J$ **75.1** हरितो ] $B^3$; दिशो हरितो $G_1UPL_2J$ **75.2** निर्धूलिभिर्वायुभिरुच्छ्वसिता ] $B^3$; विरजस्कैर्निर्धूलिभिर्वातैरुच्छ्वसिता $G_1UJ$; विरजस्कैर्वातैरुच्छ्वसिताः P; विरजस्कैर्वातैरुच्छासिता $L_2$ **75.2** ततः ] $B^3$; यतः $G_1UPL_2J$ **75.2** नित्यमेवेन्द्र° ] $B^3$; ईश्वरा पतयः इन्द्र° $G_1$; ईश्वराः पतय इन्द्र° $UPL_2$; ईश्वराष्टतय J **75.2** यासु ] $UPB^3L_2J$; यास्व $G_1$ **75.3** तथोक्ताः ] $G_1UJ$; तथोक्तः $B^3$; तथोक्ता॥ $L_2$ **75.3** °दुःखनाशा° ] $UPL_2J$; °द्वुःखनाशा° $G_1$; °दुःखात्ता° $B^3$ **75.3** °त्प्रेक्षा ] $G_1UP$ $B^3$; °त्पेक्षा $L_2$; °त्प्रेक्ष्या J **76.1** शोकं ] $PB^3L_2$; *om.* $G_1J$; शुचं U **76.1** तत्यजतुरिव ] $UPB^3$; तद्यजतुरिव $G_1$; तत्यजरिवः $L_2$; तत्त्यजतुरिव J **77.1** रत्नानि भुवि पेतुः ] $G_1UP$ $L_2J$; मणयो निपेतुः $B^3$ **77.1** रक्षःश्रियो ] $G_1UPL_2J$; राक्षसलक्ष्म्या $B^3$ **77.2** रत्नलक्ष्येण ] *conj.*; मणिव्याजेन रत्नलक्ष्येण $G_1U$; मणिव्याजेन $PL_2$; °न मणिव्याजेन $B^3$; मणिव्याजेन लक्ष्येण J **77.2** वाष्पकणाः शोकात्पतिताः ] $UB^3$; वाष्पकणाच्छोकात्पतितः $G_1$; वाष्पाम्बुकणाः शोकात्पतिताः P; वाष्पाम्भकणाः शोकात्पतिताः $L_2$; वाष्पकणाः शोकात्पतितः J **77.2** कष्टं ] $G_1UB^3L_2J$; कष्ट P **77.2** एवास्मत्प्रभुरिति ] $G_1J$; इवास्मत्प्रभुरिति UP; एव तत्पातेनेति भावः $B^3$; एवास्मत्प्रभु इति $L_2$

दशरथसुतोत्पत्तिप्रवेशार्हाणां वादित्राणां खे ≪सुरानकाः≫ पूर्वमेवारम्भं व्यधुः। प्रहर्षाद्धि देवैरादौ भेर्य आहताः। ७८॥

सन्तानकमयी वृष्टिर्भवने तस्य पेतुषी।
सन्मङ्गलोपकाराणां शोभाद्वैगुण्यमादधे॥ ७९॥

तस्य च वेश्मनि दिव्या पुष्पवृष्टिः पतन्ती शोभनमङ्गलप्रकाराणां कान्त्यतिशयमकार्षीत्। सन्तानकाख्यानि देवपुष्पाणि॥ ७९॥

कुमाराः कृतसंस्कारास्ते धात्रीस्तनपायिनः।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः॥ ८०॥

ते शिशवो जनकस्य प्रमोदेन सह वृद्धिं गतवन्तः। विहितजातकर्मादिसंस्काराः। ज्येष्ठभ्रात्रा यथेत्यानन्दविशेषणम्। स हि प्रथमतरमुत्पन्नः॥ ८०॥

---

**79 c.** °काराणां ] Σ; °चाराणां ℭ **79 d.** शोभाद्वैगुण्यमादधे ] $G_1UPL_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_7$; शोभाद्वैगुण्यमाददे $B^3B^M_5$; शोभावैगुण्यमादधे $D^M$; सैवादिरचनाभवत् ℭ **80 b.** °स्तन° ] Σ; °स्तन्य° Mall. **80 c.** °ग्रजेनेव ] $G_1UPL_2JD^MV^MB^M_1B^M_2B^M_3B^M_5B^M_7$Mall.Ar.Nā.Jin.; °ग्रजेनैव $B^3B^M_4$Hem.

---

**78.1** दशरथसुतोत्पत्तिप्रवेशार्हाणां ] *conj.*; दशरथसत्पुत्रजन्मोत्पत्तिप्रवेशार्हाणां $G_1$; दशरथस्य सत्पुत्रस्य पुत्रजन्मोत्पत्तिप्रवेशार्हाणां U; दशरथस्य सत्पुत्रस्य पुत्रजन्मप्रवेश्यानां सुतोत्पत्तिप्रवेश्यार्हाणां P; दशरथस्य सुतोत्पत्तिप्रवेश्यानां $B^3$; दशरथसत्पुत्रस्य पुत्रजन्मप्रवेश्यानां $L_2$; दशरथसत्पुत्रस्य श्रीरामस्य पुत्रजन्मोत्पत्तिप्रवेशार्हाणां J **78.1** सुरानकाः पूर्वमेवा° ] *conj.*; सुरा हृष्टाः पूर्वमेवा° $G_1UJ$; हृष्टाः सुरा एव पूर्वं प्रथममा° P; वृष्टाः (ष्ट्याः $B^{3ac}$) सुरा एव पूर्वमा° $B^3$; स्वरा हृष्टाः पूर्वमेवा° $L_2$ **78.1** व्यधुः ] $B^3$; चक्रुः $G_1UL_2J$; चक्रुः व्यधुः P **78.2** प्रहर्षाद्धि ] $G_1UPL_2J$; सत्पुत्रस्य प्रहर्षाद्धि $B^3$ **78.2** देवैरादौ ] $UPB^3L_2J$; देव्यैरादौ $G_1$ **78.2** भेर्य आहताः ] $B^3$; दुन्दुभयो हताः प्रवेश्यानां प्रवेशार्हाणाम् $G_1UJ$; द्वन्द्वभयो हताः प्रवेश्यानाम् प्रवेशार्हाणाम् P; दुन्दुभयो हताः प्रवेश्यानां +प्रवेशार्हाणाम्+ वादिकाणां $L_2$ **79.1** तस्य च ] $B^3$; तस्य $G_1UPL_2J$ **79.1** °प्रकाराणां ] $G_1UPB^3$; °प्रकरणां $L_2$; °प्रकराणां J **79.2** कान्त्यतिशयमकार्षीत् ] $B^3$; शोभाद्वैगुण्यं कान्त्यतिशयमादधेऽकार्षीत् $G_1UPL_2J$ **79.2** सन्तानकाख्यानि ] $G_1UB^3J$; सन्तानकानि $L_2$ **79.2** देवपुष्पाणि ] UJ; देवपुष्पानि $G_1$; देवपुष्पाणि मन्दारः पारिजातकः सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥ इत्यमरः P; देवकुसुमानि $B^3$; दिव्यानि कुसुमानि $L_2$ **80.1** शिशवो जनकस्य प्रमोदेन सह ] $B^3$; शिशवः पितुरानन्देन समं $G_1UPL_2J$ **80.1** वृद्धिं गतवन्तः ] $B^3$; ववृधिरे वृद्धिं गताः $G_1UPL_2J$ **80.2** ज्येष्ठभ्रात्रा ] *conj.*; अग्रजेन ज्येष्ठभ्रत्रा $G_1$; अग्रजेन ज्येष्ठभ्रात्रा $UPL_2$; ज्येष्टो भ्राता $B^3$; अग्रजेन ज्येष्ट ×कं विनीतत्वं तेषां विनयकर्मणा सुमूर्तसहजं तेजो×भ्रार्ता J **80.2** °विशेषणम् ] $G_1UPB^3L_2$; °विशेषणां J

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा।
मुमूर्छ्छ सहजं तेजो हविषेव हविर्भुजाम्॥ ८१॥

तेषां सहजं प्रश्रितत्वं गुरूपदेशक्रियया ववृधे। वह्नीनां स्वाभाविकं तेजो यथा हव्येन वर्धते॥ ८१॥

परस्पराविरुद्धास्ते तद्रघोरनघं कुलम्।
अलमुद्योतयामासुर्देवारण्यमिवर्तवः॥ ८२॥

भ्रातृत्वाद्विरोधयोग्या अपि ते ऽन्योन्यमविरुद्धाः सन्तस्तं रघोर्वंशमत्यर्थमदिद्युतन्। निष्पापमव्यसनम्। यथा वसन्तादयः षड्ऋतवः, अविरुद्धा भूत्वा, देवोद्यानं परस्परानभिभवेन शोभयन्ति॥ ८२॥

समाने ऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः॥ ८३॥

तेषां चतुर्णां सदृशे ऽपि सौहार्दे प्रीतिवशाद्यथा द्वौ रामलक्ष्मणौ युग्ममभूतां तथैव भरतशत्रुघ्नौ सहचरौ। स्वभावाद्धि क्वचित्प्रीत्यतिशयः। शोभनः पूजितो

---

**83 a.** हि ] $G_1UB^3L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; च P; ग $D^M$

---

**81.1** तेषां सहजं ] $B^3$; तेषां स्वाभाविकं $G_1$; तेषा स्वाभाविकं सहजं U; तेषां स्वाभाविकं सहजं $PL_2J$ **81.1** प्रश्रितत्वं ] $B^3$; विनीतत्वं $G_1UPL_2J$ **81.1** गुरूपदेशक्रियया ] *em.*; विनयकर्मणा गुरूपदेशक्रियया $G_1UL_2J$; विनयकर्मणा गुणरूपदेशक्रियया P; यद्गुपदेशक्रियया $B^3$ **81.1** ववृधे ] $B^3$; मुमूर्छ्छ ववृधे $G_1UPL_2J$ **81.2** हव्येन ] $G_1UPB^3J$; हवेन $L_2$ **82.1** भ्रातृ° ] $G_1UPB^3L_2$; भ्रार्तृ° J **82.1** °योग्या अपि ] $PB^3L_2$; °योग्यापि $G_1J$; °योग्या U **82.1** ते ऽन्योन्यम° ] $B^3$; अन्योन्यम° $G_1UJ$; परस्पर° $PL_2$ **82.2** तं रघोर्वंशमत्यर्थमदिद्युतन्। निष्पापमव्यसनम् ] *conj.*; तद्रघोः कुलमभ्यर्थमुद्द्योतयामासुरदिद्युतन् $G_1L_2J$; तद्रघोः कुलमत्यर्थमुद्द्योतयामासु अदिद्युतन् U; तद्रघोः कुलमलमत्यर्थं उद्योतयामासुः अदिद्युतन् P; तं रघोर्वंशमत्यर्थं शोभयामासुः अनघं निष्पापम् अव्यसनम् $B^3$ **82.2** यथा ] $G_1PB^3L_2J$; *om.* U **82.2** अविरुद्धा भूत्वा ] $B^3$; विरुद्धा अपि $G_1UPL_2J$ **82.3** देवोद्यानम् ] $B^3$; देवोपवनं नन्दनं $G_1UPL_2$; देवोपवनं J **82.3** परस्परानभिभवेन ] $G_1PL_2J$; परस्परास्परनभिभवेन U; अन्योन्यानभिभवेन $B^3$ **82.3** शोभयन्ति ] $B^3$; शोभयन्ति अनघं निष्पापमव्यसनम् $G_1UPL_2$; शोभयन्ति अनघं निष्पापसव्यसनम् J **83.1** प्रीति° ] $G_1UPB^3L_2$; प्रीत्य° J **83.1** °द्यथा द्वौ ] $B^3$; °द्यथा उभौ द्वौ $G_1L_2J$; °द्यथोभौ UP **83.2** सहचरौ ] $G_1UPB^3J$; सहचारौ $L_2$ **83.2** क्वचित् ] $G_1UPB^3J$; कुचित्क्वचित् $L_2$ **83.2** शोभनः ] $G_1UB^3L_2J$; शोभनैः P

भ्राता यस्य स सुभ्राता, तस्य भावः सौभ्रात्रम्। द्वौ द्वावभिव्यक्तौ द्वन्द्वम्॥ ८३॥

द्वन्द्वार्थं व्याख्यातुमाह—

**तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन।**
**यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः॥ ८४॥**

तेषां चतुर्णां मध्यादुभयोरुभयोः साहचर्यमेकयोगक्षेमत्वं कदाचिदपि न विजघटे। यथा पवनाग्न्योः। यत्र किलाग्निस्तत्रावश्यं वायुरिति सहचरत्वकथनम्। यथा चन्द्राब्ध्योः। शशिनि वृद्धे क्षीणे वाब्धिरपि तथाविध इति समसुखदुःखत्वोक्तिः॥ ८४॥

**ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च।**
**मनो जह्रुर्निदाघान्ते श्यामार्धा दिवसा इव॥ ८५॥**

ते राजपुत्रा लोकानामोजसा पेशलतया च चित्तमावर्जयन्। ग्रीष्मावसाने

---

**84 a.** तेषां ] $\mathbf{V}D^M B_1^M B_3^M B_4^M B_5^M B_7^M$**C**; तयोर् $V^M B_2^M$ **84 b.** बिभिदे न ] Σ; न बिभेद J **85 d.** श्यामार्धा दिवसा इव ] $PB^3L_2JB_1^M B_2^M B_4^M B_7^M$Ar.Nā.; श्यामार्धा दिवस इव $G_1$(unmetrical); श्यामार्धा दिवसा यथा U; श्यामाभ्रा दिवसा इव $V^M$Hem.Mall.Jin.; श्यामा वा दिवसा इव $D^M$; शामार्धा दिवस इव $B_3^M$; श्यामा× दिवसा इव $B_5^{Mac}$; श्यामार्दा दिवसा इव $B_5^{Mpc}$; श्यामला दिवसा इव Hem.[vl]

---

85 पेशलतया ··· जलद° ] जलद° J(eyeskip)

---

**83.3** यस्य स सुभ्राता ] $G_1UB^3L_2J$; *om.* P(eyeskip) **83.3** द्वौ ] $G_1UPB^3L_2$; द्वा J **83.3** °भिव्यक्तौ ] $G_1UPL_2J$; °भियुक्तौ $B^3$ **83.3** द्वन्द्वम् ] $G_1L_2J$; द्वन्द्वे U; द्वन्द्वशब्दो निपातितः। द्वन्द्वरहसेत्यादिना अद्वित्वे भ्रातुरिति को निषिद्धः। सुभ्रातुरिदं सौभ्रातं युवादित्वादण् $B^3$ **83.4** °ख्यातुमाह ] $G_1UPL_2J$; °ख्यातमाह $B^3$ **84.1** तेषां ] $G_1UPB^3L_2$; तेषां रामादीनां J **84.1** °दुभयोरुभयोः ] $B^3$; °दुभयोरैक्यं $G_1UPJ$; °दुभयोरुभयोरैक्यं $L_2$ **84.1** साहचर्य° ] $G_1UPB^3J$; सहचर्य° $L_2^{pc}$; सहोचर्य° $L_2^{ac}$ **84.1** कदाचिदपि ] $G_1UPB^3L_2$; कदाचिन्नपि J **84.2** न विजघटे ] *conj.* (cf. Jin.); न बिभिदे न विजयघटे $G_1UL_2^{pc}J$; न बिभिदे न विजघटे P; न विजयघटे $B^3$; न बिभिदे न विजटे $L_2^{ac}$ **84.2** सहचरत्व° ] $G_1UPL_2J$; साहचर्यत्व° $B^3$ **84.3** चन्द्राब्ध्योः ] $B^3$; चन्द्रसमुद्रयोः $G_1UPL_2J$ **84.3** वाब्धिरपि ] $B^3$; वा समुद्रो ऽपि $G_1UPL_2J$ **84.3** तथाविध ] $G_1PB^3L_2J$; तथावि U **84.4** इति समसुखदुःख° ] $G_1UL_2J$; समसुखदुःख° P; इति समदुःखसुख° $B^3$ **85.1** राजपुत्रा ] $B^3$; राजपुत्राः $G_1UPL_2$; राजपुत्राः श्रीरामभरतलक्ष्मणशत्रुघ्नाः J **85.1** लोकानामोजसा ] *conj.*; प्रजानां लोकस्य तेजसा $G_1UL_2J$; प्रजानाम् लोकानामोजसा P; लोकस्य तेजसा $B^3$ **85.1** पेशलतया ] *conj.*; प्रश्रयेण पेशलतया $G_1UP$; प्रश्रयेण च पेशलतया $B^3$; प्रश्रयेन च पेशलतया $L_2$; प्रश्रयेण J **85.1** चित्तमावर्जयन् ] *conj.*; मनो जह्रुश्चितमावर्जयन् $G_1$; मनो जह्रुश्चित्तमावर्जयन् $UPL_2$; मनो जह्रुः मनांस्यवर्जयत् $B^3$ **85.1** ग्रीष्मावसाने ] $G_1UPL_2J$; ग्रीष्मान्ते $B^3$

विरलजलदवशादर्धश्यामानि दिनानीव। तदा हि किञ्चित्तेजः किञ्चित्सौम्यत्वमिति॥ ८५॥

स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः।
धर्मार्थकाममोक्षाणामवतार इवाङ्गवान्॥ ८६॥

चतुर्भिः प्रकारैर्विस्तृतो राज्ञः सन्तानो रेजे। उत्प्रेक्ष्यते — सशरीरश्चतुर्वर्गावतार इव॥ ८६॥

गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः॥ ८७॥

श्रुतशौर्यप्रश्रयादिभिर्गुणैस्ते सूनवः पितरमतूतुषन्। गुरुप्रियाः। तमेव राजानं चतुर्णां दिगवधीनामधिपं सार्वभौमम्। मणिभिरब्धय इव॥ ८७॥

सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायैः।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः

---

**86 d.** इवाङ्गवान् ] Ś; इवाङ्गभाक् Hem.Mall. **87 d.** महार्णवाः ] $G_1PJD^MV^MB_1^MB_2^MB_3^MB_4^MB_7^M$𝕮; महार्णवः $UB^3L_2B_5^M$ **88 b.** पण° ] $G_1UPB^3L_2JV^MB_1^MB_2^MB_3^MB_4^MB_7^M$Hem.Mall.Jin.; प° $D^M$(unmetrical); पन° $B_5^M$; फल° $Hem^{vl}$Ar.Nā.

---

**85.2** विरलजलद° ] $G_1UPL_2$; किल जलद° $B^3$; जलद° J **85.2** अर्धश्यामानि ] *conj.*; श्यामार्धा अर्धश्यामा $G_1PL_2J$; श्यामर्धा अर्धश्यामा U; श्यामार्धा अर्धश्यामानि P; अर्धश्यामा $B^3$ **85.2** दिनानीव ] P; दिवसा इव $G_1UB^3L_2J$ **85.2** तदा हि ] $G_1UPB^3J$; तदादि $L_2$ **85.3** किञ्चित्सौम्य° ] $G_1UJ$; किञ्चिच्च सोम्य° P; किञ्चित्सोम्य° $B^3$; किञ्चिच्च सौम्य° $L_2$ **86.1** चतुर्भिः प्रकारैर्विस्तृतो राज्ञः सन्तानो रेजे ] *em.*; स राज्ञः प्रसवः सन्तानश्चतुर्धा(सन्तान चतुर्धा $G_1$, संतानश्चतुधा J) व्यस्तो विस्तृतो बभौ रेजे $G_1UL_2J$; सः राज्ञः प्रसवः सन्तानः चतुर्धा चतुर्भिः प्रकारैः व्यस्तो विस्तृतो बभौ P; चतुर्भिः प्रकारैर्विसृतो राज्ञः सन्तानो रेजे $B^3$ **86.2** सशरीरश्च° ] $B^3$; अङ्गवान्सशरीरश्च° $G_1PL_2J$; अङ्गवानुपपन्नशरीरः च° U **87.1** श्रुतशौर्यप्रश्रयादिभिर्गुणैस्ते सूनवः ] $B^3$; ते सूनवः गुणैः श्रुतशौर्यप्रशमादिभिः $G_1UPJ$; ते सूनवः सन्तानाः गुणैश्श्रुतौदार्यप्रशंसादिभिः $L_2$ **87.1** पितरमतूतुषन् ] $B^3$; गुरुं पितरमाराधयामासुः अतूतुषन् $G_1UPJ$; गुरुपितरमाराधयामासुः अथूतुषन् $L_2$ **87.1** गुरुप्रियाः ] *conj.*; गुरुवत्सलाः गुरुप्रियाः $G_1UPB^3J$; गुणवत्सलाः गुरुप्रियाः $L_2$ **87.2** चतुर्णां दिगवधीनामधिपं सार्वभौमम् ] $B^3$; चतुरन्तेशं सार्वभौमत्वात् $G_1UPL_2J$ **87.2** मणिभिरब्धय ] $B^3$; रत्नैरब्धय $G_1UPL_2J$

पतिरवनिपतीनां तैश्चतुर्भिश्चकाशे॥ ८८॥

राज्ञां राजा दशरथस्तैश्चतुर्भी रामादिभिर्भगवदंशैः पुत्रत्वमापन्नैः शुशुभे। यथैरावणश्चतुर्भिर्दशनैस्त्रोटितासुरखड्गधारैः शोभते। यथा च नीतिशास्त्रव्यवहारश्चतुर्भिरुपायैः सामदानभेददण्डै राजते। पणबन्धः सन्धिस्तेन प्रकटः प्रयुक्तिर्येषां। सन्धिदर्शनाद्धि विज्ञायते "नूनं सामादयः सम्यक्प्रयुक्ताः", "तेन सन्धिरुचितो जातः" इति च। यथा च विष्णुर्युगवद्दीर्घैश्चतुर्भिर्भुजैराभाति। भग्नदैत्यासिधारैरित्यादीनि विशेषणानि कुमाराणामपि यथासम्भवं योजनीयानि। तस्य हरेरिमे तदीया इत्युपमानसम्बन्धविरचनावशात् परामर्शो न युक्तः। इति भद्रम्॥ मालिनी वृत्तम्॥

---

**88 d.** तैश्चतुर्भिश्चकाशे ] $G_1UPB^3L_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; तैश्चतुभिश्चकाशे J (unmetrical); तैश्चकासे चतुर्भिः Hem.; तैश्चकाशे चतुर्भिः Mall.Ar.Nā. (Jin. uncertain)

---

**88** यथा ··· °खड्गधारैः शोभते ] *om.* J(eyeskip) **88** शोभते। यथा च नीतिशास्त्रव्यवहारश्चतुर्भिरुपायैः ] उपायैः U

---

**88.1** राज्ञां राजा ] *conj.*; अवनिपतीनां पतिः (पति $G_1L_2$) राजराजो $G_1UL_2J$; अवनिपतीनां पतिः राज्ञां राजा P; पतिरवनीपतीनां राज्ञां राजा $B^3$ **88.1** तैश्चतुर्भी ] $G_1PB^3$; तैश्चतुर्भि U; तैश्चचर्भि $L_2$; तैश्चतुभिः J **88.1** रामादिभिर्भगवदंशैः ] $PB^3$; रामादिभिरंशैर्भगवदंशैः $G_1U$; रामादिभिरंशैः $L_2$; श्रीरामादिभिः भगवदंशैः J **88.1** °पन्नैः शुशुभे ] $G_1UPJ$; °पन्नैश्चकाशे शुशुभे $B^3$; °पनैः शुशुभे $L_2$ **88.2** यथा ] *conj.*; यथा सुरगज $G_1UPB^3L_2$ **88.2** ऐरावणश्चतुर्भिर्दशनैस्त्रोटितासुरखड्गधारैः ] *em.*; ऐरावणः तैश्चतुर्भिर्दशनैस्त्रोटितासुरखड्ग (ड्गा $PL_2$) धारैः $G_1PL_2$; ऐरावणः तैश्चतुर्दशनैः त्रोटितासुरखड्गाधारैः U; ऐरावणश्चतुर्भिर्दन्तैर्दशनैर्भग्नदैत्यासिधारैस्त्रुटितासुखड्गधारैः $B^3$ **88.3** नीतिशास्त्र° ] *conj.*; नयो नीतिशास्त्र° $G_1PJ$; नयो नीति° $B^3$; नयो नितिशास्त्र° $L_2$ **88.3** पणबन्धः सन्धिस्तेन ] *conj.*; पणबन्धः सन्धिः स्तेन $G_1$; पणबन्धः सन्धिः तेन $UPL_2J$; गुणबन्धः सन्धिविग्रहादिस्तेन $B^3$ **88.3** प्रकटः ] *conj.*; व्यक्तः प्रकटो योगः $G_1UPB^3L_2$; व्यक्तः प्रकटयोगाः J **88.4** °द्धि विज्ञायते ] $B^3$; °द्धि ज्ञायते ] $G_1UL_2J$; °द्विज्ञायते P **88.4** नूनं सामादयः ] $B^3$; नूनं शमादयो ऽत्र $G_1L_2$; नूनं सामादयो त्र UPJ **88.4** प्रयुक्ताः, तेन ] $B^3$; प्रयुक्ता येन $G_1UPJ$; ⏑̱ युक्ता येन $L_2$ **88.5** सन्धिरुचितो ] $G_1PB^3L_2J$; सन्धिरुदितो U **88.5** जातः" इति च ] $B^3$; जात इति $G_1UJ$; जातमिति $PL_2$ **88.5** विष्णुर्युगवद्दीर्घैश्च° ] $G_1UPJ$; हरिविष्णुर्युगदीर्घैश्च° $B^3$; विष्णुर्युगवच्च° $L_2$ **88.6** कुमाराणामपि ] $PB^3L_2$; कुमारा अपि $G_1UJ$ **88.7** इत्युपमानसम्बन्धविरचनावशात् ] *em.*; इत्युपमानस्य तत्सम्बन्धविरचनात् $G_1UPL_2J$; इत्युपमानसम्बन्धविचरनावशात् $B^3$ **88.8** मालिनी वृत्तम् ] $G_1UB^3J$; *om.* $PL_2$

॥ इति रघुवंशे महाकाव्ये दशमः सर्गः॥

**88.9** इति रघुवंशे महाकाव्ये दशमः सर्गः ] $G_1$; रघुवंशे महाकाव्ये टीकायां दशमः सर्गः U; इति श्रीरघुवंशे महाकाव्ये टीकायां दशमः सर्गः P; इति श्रीरघुवंशे महाकाव्ये वल्लभदेवविरचिते टीकायां दशरथपुत्रोत्पत्तिर्नाम दशमः सर्गः $B^3$; इति रघुवंशे महाकाव्ये सटीके दशमस्सर्गः $L_2$; इति श्रीरघुवंशे महाकाव्ये पण्डितलोष्टकविरचितायां टीकायां दशमः सर्गः J

# एकादशः सर्गः॥

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचितस्तेजसो हि न वयः समीक्ष्यते॥ १॥

ततः कुशिकापत्येन विश्वामित्रेण स राजा रामं प्रार्थ्यत, यज्ञबाधानिवृत्त्यर्थम्, आगत्य। बालव्रतचूडाभृतम्, पञ्चदशाब्दप्रायम्। यदि बालस्तत्किं तेन नीतेनापीत्याह। यस्मात्तेजस्विनो वयो न विचार्यते। तेजःशब्देनात्र तद्वन्तो

---

**1 a.** कौशिकेन स किल क्षितीश्वरो ] $G_1UPB^3JT^MD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Mall.Ar.Nā. Jin.; कौशिकेन सकलक्षितीश्वरो $L_2$Hem.; सो ऽभिगम्य किल गाधिसूनुना Vall.$^{vl}$; सो ऽधिगम्य किल गाधिसूनुना Hem.$^{vl}$ **1 c.** काकपक्षधरमेत्य याचितस् ] $G_1UPB^3L_2D^MV^M B^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$**C**; काकपक्षधरमेत्य याचतस् J; याचितः शिशुमपि प्रजेश्वरस् Vall.$^{vl}$ Hem.$^{vl}$ **1 d.** तेजसो हि न ] **Ś**Vall.$^{vl}$Hem.$^{vl}$; तेजसां न हि Hem.Ar.Nā.; तेजसां हि न Mall.Jin. (word order uncertain in Jin.)

---

**1** $a^1$–$b^2$, $d^9$–$d^{11}T^M$ **1** $B^1$ takes up the text with *jasvino* at the top of a folio (f. 63r), but the previous folio (f. 62), in the hand of $B^3$, continues until the end of the commentary on 11:6, so that they both give testimony for this portion. At the bottom of $B^3$'s folio another hand(?) has accordingly written: प्रथमश्लोकार्धटीकायां षट्पर्यन्तमधिकमस्ति

---

**1.1** कुशिकापत्येन ] $B^3$; कौशिकेन कुशिकापत्येन $G_1PL_2J$; कौशिकेन कुशकापत्येन U **1.1** राजा ] $G_1UPB^3L_2$; राजा दशरथः J **1.1** प्रार्थ्यत ] *em.*; याचित प्रार्थ्यत $G_1$; याचितः प्रार्थितः U; याचितः प्रार्थ्यत $PL_2$; प्रार्थ्यते $B^3$; याचत प्रार्थ्यत J **1.2** यज्ञबाधानिवृत्त्यर्थम् ] $B^3$; किमर्थम्। अध्वरविघातशान्तये यज्ञबाधानिवृत्त्यर्थम् $G_1UPL_2$; किमर्थं अध्वरविघातशांतये यज्ञबाधनानिवृत्त्यर्थम् J **1.2** आगत्य। बालव्रतचूडाभृतम् ] *conj.*; बालव्रतचूडाभृतम् $B^3$; किं कृत्वा। आगत्य बालव्रतचूडाभृतम् $G_1UPJ$; किं कृत्वा आगत्य काकपक्षधरं बालव्रतचूडाभृतं $L_2$ **1.2** बालस्तत्किं ] $UPB^3L_2J$; बालास्तत्किं $G_1$ **1.3** तेन नीतेनापी° ] $G_1UPB^3J$; तेनापी° $L_2$(eyeskip) **1.3** यस्मात्तेजस्विनो ] $B^3$; हि यस्मात्तेजसस्तेजस्विनो $G_1PL_2J$; हि यस्मात्तेजस्विनो U; ---जस्विनो $B^1$ **1.3** तद्वन्तो ] $UPB^1B^3L_2J$; उद्धन्तो $G_1$

© Csaba Dezső, Dominic Goodall and Harunaga Isaacson, 2025 | DOI:10.1163/9789004721746_006
This is an open access chapter distributed under the terms of the CC BY-NC-ND 4.0 license.

लक्ष्यन्ते। यथा प्रेम पश्यति भयान्यपदे ऽपीति। तेजस्विनो हि शिशवो ऽपि लोकोत्तरं कर्म कर्तुं समर्थाः। अत्र पाठान्तरम्

सो ऽभिगम्य किल गाधिसूनुना राममध्वरविघातशान्तये।
याचितः शिशुमपि प्रजेश्वरस्तेजसो हि न वयः समीक्ष्यते॥ इति।

सर्गे ऽत्र रथोद्धता वृत्तम्। नौं रलौ गुरुयुता रथोद्धता ॥१॥

**कृच्छ्रलब्धमपि लब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम्।**
**अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता॥ २॥**

पण्डितान् पोषयतीति राजा रामं लक्ष्मणयुतमृषये दत्तवान्। दुःखप्राप्तमपि। यस्माद्रघोर्वंशे प्राणार्थिनामपि याचकभावः कदाचिदपि न विहतः, याञ्चाभङ्गो

---

**2 a.** लब्धवर्णभाक् ] $G_1UPB^1L_2JT^MD^MV^MB^M_1B^M_2B^M_3B^M_5B^M_7$**C**; मेदिनीपतिस् $B^M_4$Hem.$^{vl}$

---

**2** $a^1$–$b^2$ $T^M$

---

**1.4** प्रेम पश्यति भयान्यपदे ऽपि *Kirātārjunīya* 9:70d.

**1.8** नौं रलौ गुरुयुता रथोद्धता *Jayadevachandaḥśāstra* 6:23.

---

**1.4** भयान्यपदेपीति ] $PB^1B^3L_2J$; भयान्यपि देपि इति $G_1$; भयान्यपदीपीति U **1.4** तेजस्विनो हि ] $G_1PB^1B^3L_2$; तेजस्विनो U **1.5** लोकोत्तरं ] $G_1UPB^1B^3J$; लोकोत्वरं $L_2$ **1.6** सो ऽभिगम्य किल गाधिसूनुना ] $UPB^{1pc}$; सोभिगम्य किल गादिसूनुना $G_1B^{1ac}L_2J$; सोधिगम्य किल गादिसूनुना $B^3$ **1.8** सर्गे ऽत्र ] $G_1UPB^1B^3L_2$; सर्गोत्र J **1.8** रथोद्धता वृत्तम्। नौं रलौ गुरुयुता रथोद्धता ] UP; रथोद्धता वृत्तम्। नौ(तौ J) रलौ गुरुयुता रथोद्धता $G_1B^1B^3J$; रथोद्धता $L_2$ **2.1** पण्डितान् पोषयतीति राजा रामं लक्ष्मणयुतमृषये दत्तवान्। दुःखप्राप्तमपि ] *conj.*; तं राममसौ दुःखप्राप्तमपि तस्मै मुनये कौशिकायादिदेश ददौ। लब्धवर्णभाक् लब्धवर्णान्पण्डितान्भजते पोषयतीति। भजो ण्विः $G_1U$; तं राममसौ राजा कृच्छ्रलब्धमपि दुःखप्राप्तमपि तस्मै मुनये कौशिकाय दिदेश ददौ लब्धवर्णान् पण्डितान् भजते पोषयतीति लब्धवर्णभाक् भोजो ण्विः P; तं राममसौ दुःखप्राप्तमपि तस्मै मुनये कौशिकाय दिदेश ददौ लब्धवर्णान्पण्डितान्भजते पो(पू $L_2$)षयतीति लब्धवर्णभाक् भजो ण्विः $B^1L_2$; पण्डितान् पोषयन्तीति। राजा रामं लक्ष्मणयुतमृषये दत्तवान्। दुखप्राप्तमपि $B^3$; तं श्रीराममसौ दुःखप्राप्तमपि तस्मै मुनये कौशिकायाः दिदेश ददौ लब्धवर्णभाक् लब्धवर्णान्पण्डितान्भजते पोषयतीति भजो ण्विः J **2.2** यस्माद्रघोर्वंशे ] $B^3$; यतो रघुवंशे $G_1PB^1L_2J$; यतो रघुवंश U **2.2** प्राणार्थिनामपि ] $G_1PB^1B^3J$; प्रार्थिनामपि U; प्रा ⌣र्थिनां अपि $L_2$

न केनचिदकारि। राममात्रार्थनया लक्ष्मणदानमपि, साहचर्यात्॥ २॥

यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम्।
तावदाशु विहिता मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः॥ ३॥

पुत्रयोः प्रयाणार्थं राजा नीरजःकरणपुष्पप्रकरादिरूपं राजपथसंस्कारं यावन्निरूपयति, तावच्छीघ्रं पुष्पसहिततोयवर्षिभिर्वातप्रेरितैर्जलदैरेव सा सम्पादितेति भाव्युदयसूचनम्॥ ३॥

तौ निदेशकरणोद्यतौ पितुर्वन्दितुं चरणयोर्निपेततुः।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि वाष्पबिन्दवः॥ ४॥

---

**3 b.** °सत्क्रियाम् ] $\mathbf{V}T^M D^M V^M B_1^M B_2^M B_3^M B_5^M B_7^M$Hem.Mall.Jin.; °सत्क्रिया $B_4^M$; °संस्क्रियाम् Ar.Nā. **3 c.** विहिता मरुत्सखैः ] $G_1PB^3L_2JV^M B_1^M B_2^M B_3^M B_4^M B_5^M$Hem.Nā.; विहिता मरुत्सखै U; विहिता मरुत्खगैस् $B^1$; विहिता मत्सखैः $D^M$(unmetrical); विहिता महत्सखैः $B_7^M$; विदधे मरुत्सखैः Mall.Ar. (Jin. uncertain) **3 d.** सा सपुष्प° ] $G_1UPB^1B^3$ $L_2JV^M B_1^M B_2^M B_3^M B_5^M B_7^M$Mall.$Ar.^{vl}$Nā.; सामपुष्प° $D^M$; सा × पुष्प° $B_4^M$; सान्द्रपुष्प° Hem.Ar. (?) Jin. **4 b.** वन्दितुं ] Ś; धन्विनौ C

---

**3** $b^3$–$b^{11}$ $T^M$ **4** $c^{11}$–$d^9$ $T^M$

---

**2.3** याचकभावः कदाचिदपि न विहतः, याञ्चाभङ्गो न केनचिदकारि ] $B^3$; जातुचित्(जाचित् U)केनचिदपि याञ्चाभङ्गो ना(न $G_1J$)कारि। व्यहन्यतेति कर्मणि लट्(कर्म लाट् $G_1$) $G_1UPJ$; जातुचित्केनचिदपि याञ्चाभङ्गो ⌣ +कारि+ न कारि व्यहन्यतेति कर्मणि लट् $B^1$; जातुचित्केनचिदपि याञ्चभङ्गो नाकारि व्यहतेति कर्मणि लट् $L_2$ **2.3** राममात्रार्थनया लक्ष्मणदानमपि ] $G_1UPB^1$; लक्ष्मणं $B^3$; राममात्रार्थनया लक्ष्मणमपि $L_2$; राममत्रार्थया लक्ष्मणदानमपि J **2.3** साहचर्यात् ] $G_1PB^1B^3L_2$; साहचरत्वात् U; साहचर्यत्वात् J **3.1** पुत्रयोः प्रयाणार्थं ] $G_1UPB^1L_2$; *om.* $B^3$; तयोः पुत्रयो रामलक्ष्मणयोः J **3.1** नीरजःकरणपुष्पप्रकरादिरूपं ] $B^3$; नीरजःकचापुष्पप्रकारादिकं $G_1$; नीरज ⌣कदापुष्पप्रकारादिकं U; नीरजःकरणपुष्पप्रकारादिकं P; नीरजःकरणपुष्पप्रकरादिकं $B^1$; नीरजकोरणेक्षणपुष्पप्रकारादिरूपं $B^3$; नीरजःकरण° $L_2$(eyeskip); नीरजः कदापुष्पप्रकरादिकं J **3.2** राजपथसंस्कारं यावन्निरूपयति ] $B^3$; राजपथसत्कारं यावदाज्ञापयति $UPB^1J$; राजपथं सत्कारं यावदाज्ञापयति $G_1$; *om.* $L_2$(eyeskip) **3.2** तावच्छीघ्रं ] $B^3$; तावदेव $G_1UPB^1J$; *om.* $L_2$(eyeskip) **3.3** पुष्पसहिततोयवर्षिभिर्वातप्रेरितैर्जलदैरेव सा सम्पादितेति भाव्युदयसूचनम् ] *conj.*; पुष्पप्रकारादिकं सहिततोयवर्षिभिर्वातैर्जलदैरेव सम्पादितेत्युदयकथनम् $G_1$; पुष्पसहित(तं U) तोयवर्षिभिर्वातैर्जलदैरेव सा सम्पादितेत्युदयकथनम् $UPB^1L_2$; जलदैः सा सत्क्रिया सम्पादिता मरुत्सखैर्वातप्रेरितैः पुष्पजलवर्षिभिरिति भाव्युदयसूचनम् $B^3$; पुष्पसहिततोयवर्षिभिर्वातैर्जलदैरेव सा सम्पादितेभ्युदयकथनम् J

तौ रामलक्ष्मणौ जनकस्य नमस्कर्तुं पादयोर्निपतितौ। आज्ञासम्पादनकृतक्षणौ। राज्ञो ऽपि तयोर्जिगमिषतोः नतयोरुपर्यस्रुकणाः स्नेहान्निपेतुः॥ ४॥

लक्ष्मणाभिसरमेव राघवं
नेतुमैच्छदृषिरित्यतो नृपः।
आशिषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा॥ ५॥

एतस्माद्धेतो राजाशिषं तयोः प्रयुक्तवान्, न सेनां, यस्माद्विश्वामित्रो लक्ष्मणसहायमेवैनं नेतुं चकमे। सा त्वाशीस्तयोः पालनविधाने शक्ता॥ ५॥

तौ पितुर्नयनजेन वारिणा किञ्चिदुक्षितशिखण्डकावुभौ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ॥ ६॥

तौ रामलक्ष्मणौ विश्वामित्रमनुययतुः, दशरथस्यास्रुणा किञ्चित्सिक्तचूडौ, ध-

---

**5 .** Hem.Mall. place this verse after verse 6, as $T^M$ probably did, for our verse 6 there follows 4. **5 a.** °भिसरमेव ] $B^1B^3L_2B_1^MB_4^M$; °नुसरमेव $G_1UPJD^MB_2^MB_3^MB_7^M$; °ग्रसरमेव $V^MB_5^M$; °नुचरमेव **C** **5 b.** °त्यतो ] ŚAr.Nā.; °त्यसौ Hem.Mall.Jin.

---

**6** $a^2$–$b^5$ $T^M$

---

**4.1** जनकस्य नमस्कर्तुं पादयोर्निपतितौ ] $B^3$; पितुर्वन्दितुं नमस्कर्तुं चरणयोर्निपतितौ $G_1PL_2$; पितुर्वन्दितुं चरणयो ×र्निपेततुः× : नमस्कर्तुं निपतितौ U; पितुः वन्दितुं नमस्कर्तुं पादयोर्निपतितौ $B^1$; पितुर्दशरथस्य वंदितुं नमस्कर्तुं चरणयोर्निपतितौ J **4.1** आज्ञासम्पादनकृतक्षणौ ] $PB^3$; आज्ञाकरणकृतक्षणौ $G_1UB^1L_2$; आज्ञाकरणकृतलक्षणौ J **4.2** तयोर्जिगमिषतोः ] $B^3$; तयोः प्रवत्स्यतोर्जिगमिष(ष्य $L_2$)तोः $G_1UPB^1L_2J$ **4.2** °पर्यस्रुकणाः स्नेहान्निपेतुः ] $B^3$; °पर्यस्रुकणा नि(र्नि $G_1$)पेतुरपतन् $G_1UPB^1J$; °परि स्नेहादस्रुकणाः निपेतुरपतत् $L_2$ **5.1** We have adopted $B^3$'s text; $G_1UPB^1L_2J$ have a different commentary on this verse: विश्वामित्रो यदा (यदा $G_1UPL_2J$, *om.* $B^1$) लक्ष्मणसहायं रामं(श्रीरामं J) नेतुं चकमे तदा राजा(राज्ञा $G_1$) केवलमाशिषमेव ताभ्यां ददौ (ददौ प्रयुक्तवान् P)। न सेनां(सेनां +प्रयुक्तवान्+ $B^1$) यतः सा आशीः (सा आशीः $G_1UPL_2J$, आशिषं $B^1$) तयोः रक्षण(णा $L_2$)विधौ क्षमा शक्ता(सक्ताः $L_2$, सक्ता J) सत्यवाक्(सत्येवं $L_2$) किलासौ अभितः सरतीति अभिसरः **5.2** °मेवैनं ] *conj.*; °मेवं $B^3$ **6.1** राम° ] $G_1UPB^1B^3L_2$; श्रीराम° J **6.1** विश्वामित्रमनुययतुः ] $B^3$; विश्वामित्रमन्वगच्छतामनुययतुः $G_1UB^1J$; तमृषिमन्वगच्छतामनुययतुः $PL_2$ **6.1** दशरथस्यास्रुणा ] $B^3$; पितुर्नयनजेन वारिणा अस्रुणा $G_1UB^1$; पितुः दशरथस्य नयनजेन वारिणा अस्रुणा PJ; पितुर्नयनजेन वारिणामस्रुणा $L_2$ **6.1** किञ्चित्सिक्तचूडौ ] $B^3$; ईषदुक्षितशिखण्ड(ण्डि P)कौ किञ्चित्सिक्तचूडौ $G_1UPJ$; ईषदुक्षितशिखण्ड(ण्डि$B^{1pc}$)कौ सिक्तचूडौ $B^1L_2$

नुष्पाणी, नागरकाणां दर्शनकौतुकेनोभयपार्श्वस्थानां नेत्रैरिव विहितमध्वबहिर्द्वारं ययोः। तन्मध्येन तयोर्निगमनादेवमुत्प्रेक्षा। तयोर्वा पौराणां दृष्टिः पतितेति तावेव कृतौ मार्गतोरणौ। मार्गतोरणे हि सर्वस्य दृष्टिः पतति॥ ६॥

मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः।
रेजतुर्गतिवशप्रवर्तिनौ भास्करस्य मधुमाधवाविव॥ ७॥

तदा जननीपादानभिवन्द्य मुनेर्मार्गं प्राप्य मुनिमनुगच्छन्तौ ≪शुशुभाते≫। सूर्यस्य गतिविशेषकरौ मधुमाधवाविव। वसन्ते हि सूर्यगतिवशाच्चैत्रवैशाखौ स्वचिह्नान्वितौ प्रवर्तेते। अत्र पाठान्तरम्—

रेजतुश्च सुतरां महौजसः कौशिकस्य पदवीमनुद्रुतौ।
उत्तरां प्रति दिशं विवस्वतः प्रस्थितस्य मधुमाधवाविव॥ इति॥ ७॥

वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत।

---

**7 .** ] Ś$Hem^{vl}$Mall.Ar.Nā.Jin.; रेजतुश्च सुतरां महौजसः कौशिकस्य पदवीमनुद्रुतौ। उत्तरां प्रति दिशं विवस्वतोः प्रस्थितस्य मधुमाधवाविव॥ $Vall^{vl}$Hem.$Ar^{vl}$ **7 c.** °वश° ] $G_1UPB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^MHem^{vl}$Ar.Nā.Jin.; °वशि° $D^M$; °वशात् Mall.

---

**6.2 धनुष्पाणी** ] $UB^3$; धन्विनौ धनुष्पाणी $G_1PB^1L_2J$ **6.2 नागरकाणां दर्शनकौतुकेनोभयपार्श्वस्थानां नेत्रैरिव** ] $B^3$; पौरदृष्टिकृतमार्गतोरणौ नागर(रि U)काणां दर्शनकौतुकेनोभयपार्श्वस्थानां नेत्रैरिव $G_1UJ$; पौरदृष्टिभिरेव $PB^1L_2$ **6.3 विहितमध्वबहिर्द्वारं** ] $UB^3J$; हितमध्वबहिर्द्वारं $G_1$; कृतं मार्गतोरणं $PB^1L_2$ **6.3 तन्मध्येन तयोर्निगमनादेवमुत्प्रेक्षा** ] *conj.*; उभयत्र लोकपातवशात्। मध्येन गमनात् $G_1J$; उभयतो लोकदृष्टिपातवशात् मध्येन गमनात् $UPB^1L_2$; तन्मध्येन तयोर्निगमादेवमुत्प्रेक्षा $B^3$ **6.4 पतितेति तावेव कृतौ मार्गतोरणौ** ] $B^{3ac}$; पतितेति मार्गतोरणमध्वबहिर्द्वारम्। ययोः तावेव वा कृतौ मार्गतोरणौ $G_1$; *om.* P; प(पा $L_2$)तितेति मार्गतोरणमध्वबहिर्द्वारम् तावेव(तावे U) वा कृतौ मार्गतोरणौ $UB^1L_2$; पतितेति तावेव +वा+ कृतौ मार्गतोरणौ $B^3$; पातितेति तावेव वा कृतौ मार्गतोरणौ J **6.4 पतति** ] $B^3$; पतति धन्विनाविति व्रीह्यादिः(दि $L_2$) $G_1UPB^1L_2J$ **7.1 तदा** ] $G_1$; उभौ U; तौ $PB^{1pc}L_2$; --- $B^{1ac}$; ततो J **7.1 जननीपादानभिवन्द्य** ] *em.*; जननीपदानभिवन्द्य $G_1PB^1L_2$; जननीपादानभिनन्द्य UJ **7.1 शुशुभाते** ] *conj.* (cf. Jin.); रेजतुः $G_1UPB^1J$; रेजतु $L_2$ **7.2 सूर्यस्य …वसन्ते हि सूर्य°** ] सूर्यस्य U(eyeskip) **7.2 मधुमाधवाविव** ] $G_1PL_2J$; मधुमाधवाविव वसन्ते हि सूर्यगतिविशेषकरौ मधुमाधवाविव $B^1$(eyeskip) **7.2 वसन्ते हि** ] $G_1B^1J$; वसन्ते P; वसन्तेति $L_2$ **7.3 प्रवर्तेते** ] $UPB^1$; प्रवर्तते $G_1L_2J$ **7.4 सुतरां** ] $G_1UPB^1$; स्वतरां $L_2$; सुतरा J **7.4 कौशिकस्य** ] $UL_2$; कौशकस्य $G_1B^1$; विश्वामित्रस्य J(unmetrical) **7.5 प्रति दिशं** ] $G_1PB^1L_2J$; दिशं प्रति U(unmetrical)

तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम्॥ ८॥

रामलक्ष्मणयोर्गमनं बाल्यात् †चपलमप्य†≪राजत≫। तरङ्गवच्चपलौ ≪बाहू≫ ययोः। उद्ध्यभिद्याख्ययोर्नदयोः — उज्झति वेगेन क्षिपति जलमित्युद्ध्यः, भिनत्ति कूलानीति भिद्यः — इत्येवंविधार्थनामतुल्यं विलसितं यथा शोभते। तरङ्गा एव चपला बाहवो ययोस्तौ॥ ८॥

तौ बलातिबलयोः प्रभावतो विद्ययोस्तदुपदिष्टयोः पथि।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव॥ ९॥

≪रत्नचूर्णनिर्मितस्थानयोग्यावपि≫ परुषतरे मार्गे तौ म्लानिं न जग्मतुः, मातृनिकटस्थाविव। मातृवेश्मनि किल न काचिद्ग्लानिः। कुतो ऽम्लानौ? तेन विश्वामित्रेण दत्तयोरुक्तयोर्बलातिबलाख्ययोर्विद्ययोर्महिम्ना। ते हि विद्ये

---

**8 c.** इवोद्ध्यभिद्ययोर् ] **𝕮**; इवोद्यभिद्ध्ययोर् $G_1JB^M_3B^M_7$; इवोद्यभिद्ययोर् $UPD^MV^MB^M_2B^M_5$; इवोध्यभिद्ययोर् $B^M_4$; इवोद्ध्यभिद्ध्ययोर् $L_2B^M_1$ **9 b.** विद्ययोस्तदुपदिष्टयोः पथि ] ŚJin.; विद्ययोः पथि मुनिप्रदिष्टयोः Hem.Mall.Ar.Nā. **9 d.** °वर्तिनाविव ] $PB^1L_2JD^MB^M_1B^M_2B^M_4B^M_5B^M_7$**𝕮**; °वर्तनाविव $G_1UB^M_3$; °चारिणाविव $V^M$

---

**8.1** राम° ] *conj.*; तयो राम° $G_1UPL_2B^1$; तयोः श्रीराम° J **8.1** °र्गमनं ] *conj.*; °र्गतं गमनं $G_1UPB^1L_2J$ **8.1** बाल्यात् ] *conj.*; शैशवाद्बाल्यात् $G_1UPB^1$; शैशवाद्बालव्यात् $L_2$; शैश्यवात् बाल्यात् J **8.1** °प्यराजत ] *conj.* (cf. Jin.); °प्यशोभत $G_1UPB^1L_2J$ **8.1** तरङ्गवच् ] *conj.*; वीचिवत्तुरगवत् $G_1$; वीचिवत्तुरङ्गवत् U; वीचिवत्तरङ्गवत् $PB^1L_2J$ **8.1** बाहू ] *conj.* (cf. Jin.); भुजौ $G_1UPB^1L_2J$ **8.2** उद्ध्यभिद्याख्ययोर् ] $G_1B^1$; उद्यभिद्याख्ययोः U; उद्ध्यभिद्ध्याख्ययोः $PL_2$; उद्ध्यभित्द्याख्ययोः J **8.2** उज्झति ] $G_1B^1J$; उझति U; उज्झ P; उज्जाति $L_2$ **8.2** जलमित्युद्ध्यः ] $G_1B^1J$; जलमित्युद्यः UP; जलमित्युझ्यः $L_2$ **8.3** भिनत्ति कूलानीति भिद्यः ] $PB^1$; भिनत्ति भिद्ध्यः $G_1$; भिन्नति कुलानि इति भिद्यः U; भिन्नति कूलानि इति भिन्द्यः $L_2$; भिनंति कूलानि भिद्यैः J **8.3** इत्येवंविधार्थनामतुल्यं ] P $L_2$; इत्येवंविधार्थानामतुल्यं $G_1J$; इत्येवंविधार्थनां नामतुल्यं U; इत्येवंविधार्थं ⌣मतुल्यं $B^1$ **8.3** विलसितं ] *conj.*; विचेष्टितं विलसितं $G_1UPB^1L_2J$ **8.3** शोभते ] $G_1UB^1L_2J$; शोभते तयोरपि P **8.4** तरङ्गा एव ] $G_1UB^1L_2J$; तरङ्गा P **9.1** रत्नचूर्णनिर्मितस्थानयोग्यावपि ] *conj.*; मणिकुटिमोचितौवपि $G_1$; मणिकुट्टिमोचितावपि $UB^1J$; मणिकुट्टिमोचितौ रत्नानां चूर्णेन निर्मिते स्थाने योग्यावपि तौ P; मणिकुटिमोचितावपि तौ $L_2$ **9.1** परुषतरे ] $B^1L_2J$; पुरुषतरे $G_1U$; परुषेतरे P **9.1** मार्गे ] P; पथि $G_1UB^1L_2J$ **9.1** न जग्मतुः ] $G_1UPB^1J$; जग्मतुः $L_2$ **9.2** किल न ] $G_1B^1J$; किल U; न किल P **9.2** काचिद्ग्लानिः ] $G_1UPB^1J$; कदाचिद्ग्लानि $L_2$ **9.2** कुतो ऽम्लानौ ] $G_1PB^1L_2J$; कु कुतो न म्लानौ U **9.3** तेन विश्वामित्रेण दत्तयोरुक्तयो ] *conj.*; कौशिकोपदिष्टयोस्तेन दत्तयोः $G_1UB^1L_2J$; कौशिकोपदिष्टयोस्तेन विश्वामित्रेण दत्तयोरुक्तयोः P **9.3** °योर्महिम्ना ] $G_1UB^1J$; °योः महिम्ना अनुभावात् P; °योर्महि--- $L_2$ **9.3** ते हि विद्ये ] P; ते हि $G_1UB^1L_2J$

क्षुत्पिपासादिसर्वोपद्रवनाशिन्यौ। मणीनां कुट्टेन चूर्णेन निर्वृत्तं मणिकुट्टिमम्। भावप्रत्ययान्तादिमब्वक्तव्यः॥ ९॥

पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः।
उह्यमान इव नाध्वनो ऽन्तरं पादचारगतमप्यलक्षयत्॥ १०॥

लक्ष्मणसहितो रामो नगराश्रमपथस्य मध्यं न विवेद, चरणगत्या लङ्घितमपि। पुरा पूर्वमतिक्रान्तं वेत्ति जानाति यः, तस्याख्यानवेदिन ऋषेः पूर्ववृत्तान्तकथनैः। वाहनेन रथादिनोढो ध्रियमाण इव। वाहनोढः किल मार्गं न चेतयते। अपरार्धे पाठान्तरम्

उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत्॥ १०॥

तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः।

---

**10 a.** °कथितैः ] **V**$D^M$$V^M$$B^M_1$$B^M_2$$B^M_3$$B^M_4$$B^M_5$Mall.Jin.Nā.; °कथनैः $B^M_7$Hem.Ar. **10 cd. नाध्वनो ऽन्तरं पादचारगतमप्यलक्षयत्** ] $G_1$UP$B^1$J$V^M$$B^M_1$$B^M_2$$B^M_3$$B^M_4$$B^M_5$$B^M_7$Ar.Jin.; नाध्वनोंतरं पादचारगमप्यलक्ष्ययत् $D^M$; वाहनोचितः पादचारमपि न व्यभावयत् $L_2$Vall.$^{vl}$Hem. Mall.Ar.$^{vl}$Nā.Jin.$^{vl}$

---

**10 चेतयते…सुगन्धिकुसु** ] This unit in B (up to the end of the commentary on verse 11) was damaged and has been patched over and rewritten in the hand of $B^3$.

---

**9.5 भावप्रत्ययान्तादिमब्वक्तव्यः** ] This is a quotation of a sentence in the *Kāśikāvṛtti* on *Aṣṭādhyāyī* 4.4.20 justifying the use of the suffix *imap.*

---

**9.4 °नाशिन्यौ** ] $G_1$UP$B^1$J; °नाशिनौ $L_2$ **9.4 निर्वृत्तं** ] *conj.*; निवृत्तं $G_1$UP$B^1$$L_2$J **9.5 °प्रत्ययान्ता°** ] UP$B^1$J; °प्रत्ययन्ता° $G_1$; °प्रत्ययं ⁻⁻ $L_2$ **9.5 °मब्वक्तव्यः** ] *conj.*; °मद्वक्तव्यः $G_1$; °मन्वक्तव्यः UP$B^1$; मन्वक्तष्टि $L_2$; °मन्व× व्य× क्तव्यः J **10.1 लक्ष्मणसहितो** ] *conj.*; सानुजो लक्ष्मणसहितो Σ **10.1 नगराश्रमपथस्य** ] *conj.*; °ध्वनो नगराश्रमपथस्य $G_1$P$B^1$$L_2$J; °ध्वनोन्तरं नगराश्रमपथस्य U **10.1 चरणगत्या** ] *conj.*; पादचारेण चरणगत्या $G_1$P$B^1$$L_2$J; पादचारेण चरणन्यासेन U **10.2 पुरा पूर्वमतिक्रान्तं वेत्ति जानाति यः तस्याख्यानवेदिन ऋषेः पूर्ववृत्तान्त°** ] पुरा पूर्वमतिक्रान्त° U(eyeskip); पुरा पूर्ववृत्तान्त° $L_2^{ac}$(eyeskip) **10.2 तस्याख्यानवेदिन** ] P$L_2^{pc}$; तस्याख्यानवेदन $G_1$J; तस्याख्याने वेदिन $B^1$ **10.3 °कथनैः** ] $G_1$P$B^1$$L_2$J; °कथनैरुह्यमान इव U **10.3 वाहनेन** ] UP$L_2$; वाहने $G_1$$B^1$J **10.3 रथादिनोढो** ] $G_1$UP$B^1$$L_2$; रथादिनोढौ J **10.3 चेतयते** ] $G_1$U$L_2$J; चेतयते चरणयोर्गत्योर्लङ्घितमपि P$B^3$ **10.5 उह्यमान** ] UP$B^3$$L_2$J; उह्यमाण $G_1$ **10.5 °चितः पादचारमपि न व्यभावयत्** ] UP$L_2$; °चितः पादचारपि न व्यभावयत् $G_1$(unmetrical); °चितपादचारमपि न व्यभावयत् $B^3$; °चितः पादचारमपि न भावयत् J(unmetrical)

वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे॥ ११॥

तौ राघवावमून्यमीभिः भेजिरे। कानि कैः। ≪सरोवराणि≫ स्वादुभिर्जलैः, पक्षिणः कर्णसुखकारिभिर्वाशितैः, पवनाः सुगन्धिकुसुमरजोभिः, मेघाश्छा-यया॥ ११॥ 3

नाम्भसां विकचपद्मशोभिनां वीरुधां फलभृतां न वा तथा।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः॥ १२॥

मुनयो लघुना प्रियेणानायासलाभात् तयोर्दर्शनेन यथा पिप्रियिरे न तथा फुल्लाब्जरम्यानां वारीणां, नापि फलितानां लतानां दर्शनेन वा॥ १२॥

तौ सुकेतुसुतया खिलीकृते
कौशिकाद्विदितशापया पथि।
निन्यतुः स्थलनिवेशिताटनी
लीलयैव धनुषी अधिज्यताम्॥ १३॥

तौ मार्गे धनुषी अधिज्यतामधिगता ज्या गुणो याभ्यां तद्भावमनयताम्। चापे

---

**11 c.** सुरभि° ] Σ; सरस° P **12 a.** विकचपद्मशोभिनां ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^{Mpc} B_5^M B_7^M$ Jin.; विचपद्मशोभिनां $B_3^{Mac}$; कमलशोभिनां तथा Hem.Mall.Ar.(?)Nā. **12 b.** वीरुधां फलभृतां न वा तथा ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ $Hem.^{vl}$ Jin.; शाखिनां च न परिश्रमच्छिदाम् Hem.Ar.(?)Nā.; शाखिनां न च परिश्रमच्छिदाम् Mall. **13 .** Before this Hem.Mall.Ar.Nā. read verse 21 (beginning स्थाणुदग्ध°) **13 d.** लीलयैव ] $G_1UPB^1L_2J$ $D^M B_1^M B_3^M B_4^M B_5^M B_7^M$ Hem.Mall.Ar.(?)Nā.Jin.; हेलयैव $V^M B_2^M$

---

**11.1** राघवावमून्यमीभिः भेजिरे ] *conj.*; राघवावमून्यमीभिः सिषेविरे $G_1UPL_2$; राघवौ ⏓जिरे $B^3$; रामलक्ष्मणौ अमून्यमीभिः सिषेविरे J **11.1** सरोवराणि ] *conj.* (cf. Jin.); सरांसि $G_1UPB^1L_2J$ **11.1** स्वादुभिर्जलैः ] $PB^3$; सादुभिर्जलैः $G_1UJ$; स्वादजलः $L_2$ **11.3** मेघाश्छा° ] $B^{3pc}$; मेघाश्च च्छा° P; मेघश्छा° $G_1UB^{1ac}L_2$; मेघच्छा° J **12.1** प्रियेणानायासलाभात् ] $G_1PB^1J$; अनायासमालभता U; प्रियेण नायासलाभात् $L_2$ **12.1** पिप्रियिरे ] *conj.*; प्रीतिमापुः पिप्रियिरे Σ **12.2** फुल्लाब्ज° ] $UPB^1$; फुलाब्ज° $G_1L_2J$ **12.2** लतानां दर्शनेन वा ] *conj.*; नादर्शनेन वा $G_1J$; वीरुधां दर्शनेन वा U; लतानाम् $PB^1L_2$ **13.1** तौ ] $G_1UPB^1L_2$; तौ श्रीरामलक्ष्मणौ J **13.1** धनुषी ] $G_1UPB^1L_2$; ध J **13.1** °मनयताम् ] $G_1PB^1L_2J$; °मानयतां U

सगुणे विदधतुः। कीदृशे पथि। ताटकया उज्झटिते विश्वामित्राज्ज्ञातशापया। ताटकारण्यं प्राप्तयोस्तयोर्मुनिरवोचत्। सुकेतुनाम्नो यक्षस्य तनया ताटका सुन्दभार्या मरीचेन पुत्रेण सहागस्त्यं बाधमाना तच्छापेन राक्षसीत्वमाप्येमं देशमुत्सादयति। अतस्तां हतमिति। एतदाकर्ण्य तौ हेलया धनुषी अधिज्ये चक्रतुः। खिलीकरणमुज्झटनम्। स्थले भूमौ निवेशिता आरोहणार्थं स्थापिता अटनिः कोटिः प्रान्तो ययोर्धनुषोस्ते। केचित्तु अटनिशब्दस्य धनुर्विशेषणत्वे नपुंसकत्वप्राप्तौ नकारागमं विधाय भाषितपुंस्कत्वादटनिनीति पाठो भवतीति चोदयन्ति। तदपोहार्थं स्थलनिवेशितार्तिनीति पाठं पठन्ति। अर्तिशब्दस्यापि धनुष्कोट्यर्थवाचित्वात्। अपरे तत्र तावित्यस्यैव पदस्य विशेषणीकृतभाषित-पुंस्कत्वादन्यपदार्थप्राधान्येन बहुव्रीहिं यथास्थितमेव मेनिरे। इति॥ १३॥

## ज्यानिनादमथ गृह्णती तयोः

---

**14 a. ज्यानिनादमथ** ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$Mall.Jin.; ज्यानिनादमभि° Hem. Ar.Nā.

---

**13.2 कीदृशे पथि** ] $G_1UPB^{1ac}J$; +तौ कीदृशौ स्थलनिवेशिताटनी स्थले निवेशिता भूमौ स्थापिता अटनिः कोटिप्रान्तं याभ्यां+ कीदृशे पथि $B^{3pc}$; कीदृशे प--- $L_2$ **13.2 ताटकया** ] सुकेतुसुतया ताटकया $UPB^1J$; सुकेतुसुतया नाटकया $G_1$; स्वकेतुस्वतया ताटकया $L_2$ **13.2 उज्झटिते** ] $PB^1$; उज्झिटिते $G_1UJ$; *om.* $L_2$ **13.2 विश्वामित्राज्ज्ञातशापया** ] *conj.*; कौशिकाद्विश्वामित्रात् ज्ञातशापया $UPB^{1ac}L_2J$; कौशिकाद्विश्वामित्रात् ज्ञातशापायां $G_1$; कौ-शिकाद्विश्वामित्रात् +विदितशापया+ ज्ञातशापया $B^{3pc}$ **13.3 प्राप्तयोस्तयोर्मुनिरवोचत्** ] $G_1UPB^{1ac}J$; प्राप्तयोस्तयोर्मुनिर्+इदम्+अवोचत् $B^{3pc}$; प्राप्तयोर्मुनिरवोचत् $L_2$ **13.3 यक्षस्य** ] $G_1PB^1L_2J$; राक्षसस्य U **13.4 सुन्द°** ] $PB^1L_2^{ac}$; सुन्दर्य° $G_1J$; सुन्दर्या U; सुन्द+री+ $L_2^{pc}$ **13.4 मारीचेन** ] $G_1PB^1L_2$; मरीचि° U; मरीचेन J **13.4 बाधमाना** ] $G_1UB^1L_2J$; बाध्यमाणा P **13.4 °त्वमाप्येमं** ] $G_1UB^1J$; °त्वं अवाप्य इदं P; °त्व ×⏑̆ ⏑̆ मवाप्येमं $L_2$ **13.5 अतस्तां हतमिति** ] $G_1B^1J$; अतस्तां हथामिति U; अतस्तामाशु हतामिति P; अतस्तं हतामिति $L_2$ **13.5 तौ** ] $G_1UPB^1L_2$; तौ राघवौ J **13.5 अधिज्ये** ] $UPB^1L_2$; अधिज्य $G_1J$ **13.6 खिलीकरणमुज्झटनम्** ] $PB^1$; खिलीकारणमुज्झटनम् $G_1J$; खिली-कारणमुज्झनम् U; खिलीकरण उज्झटनम् $L_2$ **13.6 आरोहणार्थं** ] $G_1B^1L_2J$; आरोहनार्थं U; गुणाधिरोहणार्थं P **13.7 ययोर्धनुषोस्ते** ] $UPB^1L_2$; ययोर्धानुषोस्ते $G_1J$ **13.8 नपुंसक-त्व°** ] $G_1B^1J$; °न नपुंसकत्व° U; नपुंसकत्वं P; न् अपुंसकत्वे $L_2$ **13.8 नकारा°** ] *conj.*; नुकार° Σ **13.9 स्थल°** ] $G_1UPL_2J$; स्थले $B^1$ **13.9 °र्तिनीति** ] $G_1PB^1J$; °न्तिनी-ति $UL_2$ **13.9 अर्तिशब्दस्यापि** ] *em.*; अन्तिशब्दस्यापि $G_1UPB^1$; अन्तिशब्देस्यापि $L_2$; अंतिशब्दस्यापि J **13.10 °र्थवाचित्वात्** ] $G_1UB^1L_2J$; °र्थवाचित्वात् अर्तिः पीडाधनुष्को-ट्योः जातिः सामान्यजन्मनि इति नानार्थेष्वमरवचनात् अर्तिशब्दस्य धनुष्कोट्यर्थवाचित्वम् P **13.10 तावित्यस्यैव** ] $PB^1L_2$; तावित्यस्यै $G_1$; ताविन्द (?) त्र (?) र्य (?) स्यैव U; तावि-त्यस्य J **13.11 बहुव्रीहिं** ] *conj.*; बहुव्रीहि $G_1$; बहुव्रीहिः $UPB^1L_2J$ **13.11 °स्थितमेव** ] $UPB^1L_2$; °स्थितमिव $G_1J$ **13.11 इति** ] $G_1PB^1L_2J$; *om.* U

प्रादुरास बहुलक्षपाच्छविः ।
ताटका चलकपालकुण्डला
कालिकेव निविडा बलाकिनी ॥ १४ ॥

अनन्तरं मौर्वीरवमाददाना ज्याघोषानुसारेण यान्ती तावुद्दिश्य ताटका प्रकटीबभूव । कृष्णपक्षरात्रिस्तद्वच्छविः कान्तिर्यस्याः कालत्वात् । तथा कम्पमानानि मृतकमूर्धास्थीन्येव कर्णवेष्टकानि यस्याः । अतश्च बलाकायुतसजलत्वाद्घना मेघमालेवेत्युपमा । गृह्णतीति हेतौ शतृप्रत्ययः ॥ १४ ॥

वेगविप्रकृतमार्गवृक्षया प्रेतचीवरवसास्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ॥ १५ ॥

ताटकया राम आचक्रमे । जवेन बाधिता मार्गवृक्षा उन्मूलनात् यया, तथा शवानामम्बरैर्वसया शवानामेव स्वनेन च भीषणया, श्मशानादाविर्भूतया,

**15 a.** वेगविप्रकृत° ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ ; तीव्रवेगधुत° **C** **15 b.** °वसास्वनोग्रया ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ Jin. ; °वसा स्वनोग्रया Hem.Mall.Ar.Nā.

**15** We have no copy of f. $100^r$ of J, whose testimony therefore breaks off at this point and begins again with the word राक्षसी in the commentary on 11:19.

**14.1** अनन्तरं ] *conj.*; अथानन्तरं Σ **14.1** मौर्वीरवमाददाना ] *conj.*; ज्यानिनादमौर्वीरवं गृह्णती आददाना $G_1$ ; तयोर्ज्यानिनादं मौर्वीरवं गृह्णति आददाना UP$B^1L_2$J **14.1** यान्ती ] $G_1$U$B^1L_2$ ; यान्तीति P; याती J **14.2** प्रकटीबभूव ] *conj.*; प्रादुरास प्रकटीबभूव Σ **14.2** कृष्णपक्षरात्रिस् ] *conj.*; बहुलक्षपा कृष्णपक्षरात्रिः Σ **14.2** तद्वच्छविः ] UP$B^1L_2$J; तच्छविः $G_1$ **14.2** कालत्वात् ] $G_1$UP$B^1$J; कालवर्णत्वात् $L_2$ **14.3** कम्पमानानि ] *conj.*; चलानि कम्पमानानि $G_1B^1L_2$J; चपलानि कम्पमानानि U; अचला+नि+ निष्कम्पमानानि P **14.3** मृतकमूर्धा° ] *conj.*; कपालकुण्डलानि मृतकमूर्धा° $B^1L_2$ ; कपालकुण्डलानि मृतकरमूर्धा° $G_1$UJ; कपालकुण्डलानि मृतकमूर्व्वों(?)र्व्वा° P **14.3** बलाकायुत° ] $G_1^{pc}$U$B^1L_2$J; बालकायुत° $G_1^{ac}$ ; बलाकायुता P **14.3** °त्वाद्घना ] *conj.*; °त्वान्निविडा घणा $G_1$ ; °त्वान्निविडा घना UP$B^1$J; °त्व--- विडा घना $L_2$ **14.4** मेघमालेवेत्युपमा ] *conj.*; कालिका मेघमालेवेत्युपमा $G_1$P$B^1$J; कालिका मेघमालेव उपमां U; कालिका मेघमाला एवेत्युपमा $L_2$ **14.4** गृह्णतीति ] $B^1L_2$J; गृह्णातीति $G_1$UP **14.4** शतृ° ] UP$B^1L_2$J; शत्रु° $G_1$ **15.1** ताटकया ] *conj.*; तया ताटकया $G_1$P$B^1L_2$J; तया ताटकाया U **15.1** राम ] Σ; श्रीरामः J **15.1** आचक्रमे ] *conj.*; अभ्यभावि आचक्रमे Σ **15.1** जवेन ] *conj.*; वेगेन $G_1$UP$B^{1ac}L_2$ ; वेगेन +जवेन+ $B^{3pc}$ **15.1** बाधिता ] *conj.*; विप्रकृता बाधिता $G_1$UP$B^1L_2$ ; ×ा× वकृता बाधि--- J **15.2** शवानामम्बरैर् ] *conj.*; प्रेतानां शवानां चीवरैरम्बरैः $G_1$P$B^1L_2$ ; प्रेतानां शवानां चेवरैरम्बरैः U **15.2** शवानामेव ] $G_1$U$B^1L_2$ ; शुद्धमांसरसेन P **15.2** स्वनेन च भीषणया ] *conj.*; स्वनेन रवेण(न $G_1$U) चोग्रया भीषणया $G_1$UP$B^1L_2$

अतश्च वात्ययेवेत्युपमा। यदि वा पितृकाननोत्थया वात्ययासावभ्यभावीति सहोक्तिः। सापि श्मशानप्रवृत्तत्वादेवंविधैव। वातानां समूहो वात्या पाशादित्वाद्यत्। उत्थयेति सुपि स्थ इति कः॥ १५॥

उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बपुरुषान्त्रमेखलाम्।
तां विलोक्य वनितावधे घृणां पत्त्रिणा सह मुमोच राघवः॥ १६॥

ताटकामागच्छन्तीमेवंविधामालोक्य योषिद्वधे दयां शरेण सहामुचत्। नैर्घृण्यमवलम्ब्य तां हन्तुं शरमक्षिपदित्यर्थः। कीदृशीं ताम्? उद्धूता हन्तुमुत्क्षिप्ता एका भुजलता यया सा ताम्। कटौ लम्बमानानि पुरुषान्त्राण्येव रशना यस्याः॥ १६॥

रामभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलम्।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत्॥ १७॥

---

**16 b.** °लम्ब° ] $G_1PB^1L_2D^MV^MB_1^MB_2^MB_3^MB_5^MB_7^M$ ; °यन्त्र (?) लम्ब° U(unmetrical) ; °लम्भ° $B_4^M$ ; °लम्बि° Hem.Mall.Ar.Nā. (Jin. uncertain) **17 .** 𝕮 place this after verse 18. **17 a.** राम° ] $G_1UPB^1D^MV^MB_1^MB_2^MB_3^MB_5^MB_7^M$ ; बाण° $B_4^M$𝕮

---

**16** $b^8$–$c^2$ $T^M$ **17** $c^1$–$d^4$ $T^M$

---

**15.5** वात्या पाशादित्वाद्यत् This is an allusion to *Aṣṭādhyāyī* 4.2.49 *pāśādibhyo yaḥ*.

**15.5** उत्थयेति सुपि स्थ इति कः This alludes to two rules of Pāṇini, 3.2.3 *āto 'nupasarge kaḥ* and 3.2.4 *supi sthaḥ*.

---

**15.3** श्मशानादाविर्भूतया, अतश्च वात्ययेवेत्युपमा।यदि वा ] $G_1B^1L_2$ ; श्मशानादाविर्भूतया अतश्च वात्यया इवेत्युपमया दिवा U ; श्मशनादाविर्भूतया अतश्च वात्ययैव श्मशानादाविर्भूतेन पवनसमूहेनैवेत्युपमा यदि वा P **15.4** सहोक्तिः ] $G_1UPB^1$ ; सहोवन्तोः $L_2$ **15.4** वातानां समूहो ] $G_1PB^1L_2$ ; वातानामसमूहो U **15.5** उत्थयेति सुपि स्थ इति ] *conj.* ; उत्थायेति सुपि स्था इति $G_1$ ; उत्थायेति स्वपि स्थः U ; उत्थायेति स्वपि स्थ इति P ; उत्थायेति सुपि स्थ इति $B^1$ ; इत्थं येति सुपि स्थ इति $L_2$ **16.1** ताटकामागच्छन्तीमेवंविधामालोक्य ] *conj.* ; तां ताटकामायतीमागच्छन्तीमेवंविधा (ध U) मालोक्य $G_1UPB^1L_2$ **16.1** योषिद्वधे ] $UPB^1L_2$ ; योषिद्ववधे $G_1$ **16.1** दयां ] *conj.* ; घृणां दयां $G_1UPB^1L_2$ **16.1** सहामुचत् ] $G_1PB^1L_2$ ; सह मुमोच U **16.2** तां हन्तुं ] P ; *om.* $G_1UB^1L_2$ **16.2** उद्धूता हन्तुम् ] $PB^1L_2$ ; उद्धूता हन्त्वम् $G_1$ ; उद्यता हन्तुं U **16.3** एका ] U ; एक° $G_1PB^1L_2$ **16.3** पुरुषान्त्राण्येव ] $G_1PB^1L_2$ ; पुषन्त्राण्येव U **16.4** रशना यस्याः ] *em.* ; मेखला रशना यस्याः $G_1UB^1L_2$ ; रशना यस्य P

ततः सा रामशरभिन्नवक्षस्थला पतन्ती सती केवलं निजवनावनिमेव नाधुनोत्, यावत्त्रिभुवनजयदृढां पौलस्त्यलक्ष्मीमपि। नूनं मयाप्यधुना नशितव्यमिति रावणश्रीकम्पः॥ १७॥

**यच्चकार विवरं शिलाघने ताटकोरसि स रामसायकः।**
**अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत्॥ १८॥**

दृषत्पीवरे ताटकावक्षसि स राघवेषुर्यच्छिद्रमकरोत्, तन्नूनम् †अन्तकस्य रक्षोविषयमप्रविष्टस्य द्वारतां† ययौ। कथमन्यथा तदादि ते मृत्युवशमाययुरिति भावः। रक्षसां सम्बन्धी विषयो यः सो ऽप्रविष्टो येनासावप्रविष्टविषय इति नित्यमापेक्षत्वात्समासः। उत्प्रेक्षा चैषा विनापीवशब्दं प्रयुज्यते। द्वौ प्रवेशनिर्गमौ रातीति द्वारम्। पृषोदरादित्वादात्वम्॥ १८॥

**राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी।**
**गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा॥ १९॥**

अतिविषमेण राघवस्मरशरेण विद्धा सती सा राक्षसी ताटका यमस्य लोकं ययौ। उत्कटगन्धेन रुधिरेणैव चन्दनेनोपलिप्ता। या च निशाचरी रात्र्यभि-

---

**18 .** 𝕮 place this before verse 17. **19 c.** °चन्दनो° ] $G_1UPB^1L_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$𝕮; °कुङ्कुमो° Vall.[vl] Hem.[vl]

---

**18** $d^2$–$d^{11}$ $T^M$ **19** $a^1$–$a^{10}$ $T^M$

---

**17.1** सा रामशर° ] $G_1^{pc}U^{pc}B^1L_2$; सा राम° $G_1^{ac}U^{ac}$; स रामशर° P **17.2** °वनिमेव नाधुनोत् ] $B^1L_2$; °वनिमेवाध्वनोत् $G_1$; °वलीमेवाधुनोत् U; °वनिमेव नाधुनत् P **17.2** °भुवनजयदृढां ] P; °भवनजयदृढां $G_1B^1$; °भुवनजयदृढा U; °भु---य दृढां $L_2$ **18.1** दृषत्पीवरे ] $G_1UPB^1$; ईषत्पीवरे $L_2$ **18.1** राघवेषुर्य° ] $G_1B^1UL_2$; रामशरः य° P **18.2** ययौ ] $G_1PB^1L_2$; अगमत् U **18.2** तदादि ते ] $G_1UPB^1$; तदादितो $L_2$ **18.3** सो ऽप्रविष्टो ] $G_1UPL_2$; न प्रविष्टो $B^1$ **18.3** येनासावप्रविष्ट° ] $PB^{1pc}$; येनसावप्रविष्ट° $G_1B^{1ac}$; येनासा+व(?)+प्र° U; येन सावप्रतिष्ठा $L_2$ **18.4** °मापेक्ष° ] $G_1UB^1$; °माक्षेप° P; °सपक्ष° $L_2$ **18.4** उत्प्रेक्षा ] $UPB^1L_2$; उत्प्रेक्ष्या $G_1$ **18.4** विनापीवशब्दं ] $P^{ac}B^1L_2$; विनाप्येवशब्दं $G_1UP^{pc}$ **18.5** °निर्गमौ ] $UPB^1L_2$; °निर्गमो $G_1$ **18.5** रातीति ] $G_1PB^1L_2$; दातीति U **19.1** विद्धा ] $PB^1L_2$; विरुद्धा $UG_1$ **19.1** राक्षसी ] *conj.*; निशाचरी राक्षसी V **19.1** यमस्य ] *conj.*; जीवितेशस्य यमस्य $G_1UPB^1J$; जीवितेशस्य विष्णोर्भुवनं वैकुण्ठं च यमस्य $L_2$ **19.2** लोकं ययौ ] *conj.*; वसतिं लोकं जगाम ययौ Σ **19.2** उत्कटगन्धेन ] *conj.*; गन्धवतोत्कटगन्धेन $G_1UPB^1$; गन्धवतोकटा गन्धेन $L_2$; गंधवत्कटगंधेन J **19.2** चन्दनेनोपलिप्ता ] *conj.*; चन्दनेनोक्षितोपलिप्ता Σ **19.2** या च ] Σ; या $L_2$

सारिका दुःसहस्मरशरताडितहृदया सुरभिमलयजानुलिप्तावश्यमेव प्राणनाथवेश्म प्रयाति। रुधिरकुङ्कुमेति पाठान्तरम्। रुधिरमेव कुङ्कुमं रूपसादृश्यात्। निन्दाप्रशंसयोर्मतुप्॥ १९॥

नैर्ऋतघ्नमथ मन्त्रवन्मुनेः
प्रापदस्त्रमपदानतोषितात्।
ज्योतिरिन्धननिपाति भास्करात्
सूर्यकान्त इव ताटकान्तकः॥ २०॥

अनन्तरं रामो ऽद्भुतकर्मणा †तोषितात्† विश्वामित्राद् राक्षसघ्नं समन्त्रमस्त्रग्रामं ≪लेभे≫। अस्त्रमिति जातावेकवचनम्। दारुनिचयदाहि तेजो यथा सूर्यात्सूर्यकान्तमणिर्लभते॥ २०॥

स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः।
विग्रहेण मदनस्य चारुणा सो ऽभवत्प्रतिनिधिर्न कर्मणा॥ २१॥

रामः कामस्य शरीरेण सदृशो ऽभूत्। न पुनर्व्यापारेण तस्य परिभूतत्वादविषयप्रेरणादिना वा। मूर्तः कामस्तत्रासाववतीर्णो ऽज्ञायीत्यर्थः। शिवभस्मीकृतशरीरस्य कामस्य तपोवनमनङ्गाश्रमाख्यमवाप्य। गृहीतचापः॥ २१॥

---

**20 b.** °पदान° ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$Ar.Nā.; °वदान° $T^M$Hem.Mall.Jin. **21** This verse is placed between 12 and 13 in Hem.Mall.Ar.Nā.. **21 b.** प्राप्य ] **V**$V^M B_1^M B_2^M B_3^M B_4^M B_7^M$Ar.Nā.Jin.Hem.Ar.(?)Nā.; एत्य $D^M B_5^M$

---

**20** $a^1$–$b^{11}$ $T^M$ **21** $a^8$–$c^4$ $T^M$

---

**19.3** दुःसहस्मरशरताडित° ] $UPB^1J$; द्वस्सहस्मरशरताटित° $G_1$; दुस्सह---शताडिते $L_2$ **19.3** सुरभिमलय° ] Σ; सुरभि+परि+मलय° $B^{3pc}$ **19.5** °प्रशंसयोर्मतुप् ] P; °प्रशंसयोर्मतुम् $G_1L_2$; °प्रशंसयोर्मतम् U; °प्रशांसयोर्मतुप् $B^1$; °प्रशंसयोर्दत्तम् J **20.1** अनन्तरं ] *conj.*; अथानन्तरं Σ **20.1** रामो ऽद्भुतकर्मणा ] *conj.*; रामः अपदानेनाद्भुतकर्मणा $G_1UPB^1L_2$; श्रीरामः अपदानेनाद्भुतकर्मणा J **20.1** विश्वामित्राद् ] *conj.*; मुनेर्विश्वामित्रात् $G_1UPB^1L_2$; *om.* J **20.1** राक्षसघ्नं ] *conj.*; नैर्ऋतघ्नं राक्षसघ्नं Σ **20.2** समन्त्रमस्त्रग्रामं ] *conj.*; मन्त्रमस्त्रग्रामं $G_1PB^1L_2$; मन्त्रमस्त्रगर्भं U; मंत्रंमंस्त्रं J **20.2** लेभे ] *conj.* (cf. Jin.); प्रापत् Σ **20.2** दारुनिचयदाहि ] $G_1PB^1L_2J$; दारुणिचयषा(?)हि U **20.2** तेजो ] $UPB^1L_2$; तेजो यथा हि तेजो $G_1J$ **20.3** °मणिर्लभते ] $G_1UB^1J$; °मणिर्लभ्यते P; °मणिलेभते $L_2$ **21.1** रामः ] *conj.*; स रामः $G_1UPB^1L_2$; स दाशरथिः श्रीरामः J **21.1** शरीरेण ] *conj.*; विग्रहेण शरीरेण Σ **21.1** सदृशो ] *conj.*; प्रतिनिधिः सदृशो Σ **21.1** पुनर्व्यापारेण ] *conj.*; पुनः कर्मणा व्यापारेण Σ **21.2** तत्रासाववतीर्णो ] $G_1UB^1J$; तत्राऽवतीर्णो $PL_2$ **21.2** °ज्ञायीत्यर्थः ] Σ; ज्ञानीत्यर्थः $G_1$

**वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान्।**
**उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः॥ २२॥**

तस्मादनन्तरं रामो वामनाश्रमस्थानमुपगतः प्राप्तः सन्, उत्को ऽभूत्। पूर्ववासनाबीजवशादिति भावः। पवित्रम्, ऋषेः सकाशादाकर्णितं, यथात्र वामनरूपी हरिर्बलिं बबन्धेति। पूर्वजननचरितानि बलिवञ्चनादीनि अस्मरन्नपि वासनावशान्निजस्थानदर्शनेन सोत्कण्ठ इवासीत्॥ २२॥

**आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम्।**
**बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोत्सुकमृगं तपोवनम्॥ २३॥**

अनन्तरं विश्वामित्रः ≪स्वं≫ तपोवनं सिद्धाश्रमाख्यं प्राप। ≪अन्तेवासिसमूहरचितपूजम्। रचितपत्त्रसंश्लेषाञ्जलितरु≫। मुनिदर्शने चोत्कण्ठिता मृगा यत्र तत्॥ २३॥

---

**23 d.** दर्शनोत्सुक° ] $\mathrm{G_1UPB^1D^MV^MB_1^MB_3^MB_4^MB_5^MB_7^M}$Jin.; ---नोत्सुक° $\mathrm{L_2}$; दर्शनोत्सक° $\mathrm{JB_2^M}$; दर्शनोन्मुख° Hem.Mall.Ar.(?)Nā.

---

**22** $\mathrm{c^1–d^{11}\ T^M}$ **23** $\mathrm{a^1–b^4,\ d^9–d^{11}\ T^M}$

---

**22.1** तस्मादनन्तरं ] *conj.*; ततः परं तस्मादनन्तरं $\mathrm{G_1UPB^1L_2}$; ततः परं तस्मात्ताटकावधादनन्तरं J **22.1** रामो ] $\mathrm{PB^1}$; सो $\mathrm{G_1UL_2J}$ **22.1** °पगतः ] $\mathrm{G_1PB^1L_2J}$; °पागतः U **22.1** उत्को ऽभूत् ] *conj.*; उन्मना उत्कटो ऽभूत् $\mathrm{G_1}$; उन्मना उत्कण्ठितो बभूव U; उन्मना उत्को भूत् $\mathrm{PB^1L_2}$; उन्मना उत्कंठो भूत् J **22.2** पवित्रं ] *conj.*; पावनम् पवित्रम् Σ **22.2** सकाशादाकर्णितं ] *conj.*; सकाशाच्छ्रुतमवगतम् $\mathrm{G_1UB^1L_2J}$; सकाशादाकर्णितं श्रुतं P **22.3** यथात्र वामनरूपी हरिर्बलिं बबन्धेति ] P; *om.* Σ **22.3** पूर्वजननचरितानि बलिवञ्चनादीनि ] *conj.*; प्रथमजन्मचेष्टितानि बलिवञ्चनादीनि पूर्वजन्मचरित्राणि $\mathrm{G_1UB^1L_2}$ J; प्रथमजन्मचेष्टितानि पूर्वजननचरितानि बलिवञ्चनादीन्य् P **22.4** °स्थानदर्शनेन ] Σ; °स्थानाददर्शनेन J **22.4** सोत्कण्ठ इवासीत् ] *conj.*; उन्मना बभूव सोत्कण्ठ इवासीत् Σ **23.1** अनन्तरं विश्वामित्रः ] *conj.*; ततो ऽनन्तरं मुनिर्विश्वामित्रः $\mathrm{G_1UPB^1J}$; ततो नन्तं म्निर्वि--- $\mathrm{L_2}$ **23.1** स्वं ] *conj.*; आत्मनस् Σ **23.1** °श्रमाख्यं प्राप ] *conj.*; °श्रमाख्यमाससाद प्राप $\mathrm{G_1UB^1L_2J}$; °श्रमा--- आससाद प्राप P **23.2** अन्तेवासिसमूहरचितपूजम् ] *conj.*; कीदृशं शिष्यवर्गेणान्तेवासिसमूहेन परिकल्पिता रचिता अर्हणा पूजा यत्र तत् $\mathrm{G_1UPB^1J}$; ---शं शिष्यवर्गेणान्तेवासिसमूहेन परिकल्पिता र---ता अर्हणा पूजा यत्र तत् $\mathrm{L_2}$ **23.2** रचितपत्त्रसंश्लेषाञ्जलितरु ] *conj.*; बद्धा रचिताः पल्लवपुटाः पत्त्रसंश्लेषा एवाञ्जलयो यैस्तथाविधा द्रुमास्तरवो यत्र तत् ] $\mathrm{G_1PB^1L_2J}$; *om.* U(eyeskip) **23.2** मुनिदर्शने चोत्कण्ठिता ] $\mathrm{G_1UP}$ J; मुनिदर्शनादुत्कण्ठिता $\mathrm{B^{1pc}L_2}$; मुनिदर्शनाचोत्कण्ठिता $\mathrm{B^{1ac}}$ **23.3** यत्र तत् ] Σ; यत्र $\mathrm{L_2}$

तत्र दीक्षितमृषिं ररक्षतुर्
विघ्नतो नृपसुतौ शितैः शरैः ।
लोकमन्धतमसात्क्रमोदितौ
रश्मिभिः शशिदिवाकराविव ॥ २४ ॥

तस्मिन् सिद्धाश्रमे यज्ञदीक्षाप्रविष्टं कौशिकं रामलक्ष्मणौ पालयामासतुः । राक्षसादिकृतात् प्रत्यूहात् । तीक्ष्णैः सायकैः । यथा रात्रिन्दिवोदितौ चन्द्रसूर्यौ रश्मिभिर्जगद् गाढध्वान्ताद्रक्षतः । अन्धयतीत्यन्धं च तत्तमो ऽन्धतमसम् । अवसमन्धेभ्यस्तमसः ॥ २४ ॥

वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् ।
सम्भ्रमो ऽभवदुपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ॥ २५ ॥

---

**24 b.** नृपसुतौ शितैः शरैः ] **V**$V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$Jin. ; नृपस्वतौ शितै शिरैः $D^M$ ; नृपसुतौ शरैः शितैः Hem. ; दशरथात्मजौ शरैः Mall.Ar.(?)Nā. **25 c.** °भवदुपोढ° ] **V**$D^M$ $V^M B_1^M B_3^M B_4^M B_5^M B_7^M$Hem.Ar.$^{vl}$Nā.Jin. ; °भव--- $T^M$ ; °भवदपोढ° $B_2^M$Vall.$^{vl}$Mall.Ar.Nā.$^{vl}$ **25 d.** °विकङ्कत° ] $B^1 J B_3^M$**C** ; °विकङ्कित° $G_1 P L_2 B_1^M B_2^M B_4^M B_5^M B_7^M$ ; °विशङ्कत° $D^M$ ; °विकम्पित° $UV^M$

---

**24** $a^1$–$b^3$ $T^M$ **25** $b^3$–$c^5$ $T^M$

---

**24.4** अवसमन्धेभ्यस्तमसः *Aṣṭādhyāyī* 5.4.79.

---

**24.1** तस्मिन् सिद्धाश्रमे ] *conj.* ; तत्र सिद्धाश्रमे $G_1 U B^1 L_2 J$ ; तत्र तस्मिन् सिद्धाश्रमे P **24.1** यज्ञदीक्षा° ] $G_1$UPJ ; यक्षदीक्षा° $B^1 L_2$ **24.1** कौशिकं ] $G_1 P B^1 L_2$ ; कौशिकं विश्वामित्रं U ; ऋषिं विश्वामित्रं J **24.1** रामलक्ष्मणौ ] *conj.* ; राजस्वतौ रामलक्ष्मणौ $G_1$ ; राजसुता रामलक्ष्मणौ U ; राजसुतौ रामलक्ष्मणौ $P B^1 L_2$ ; राजसुतौ श्रीरामलक्ष्मणौ J **24.1** पालयामासतुः ] *conj.* ; ररक्षतुः पालयामास्वः $G_1$ ; ररक्षतुः पालयामासतुः (तु U) $U P B^1 L_2$ ; ररक्षतुः पालयामासुः J **24.2** राक्षसादिकृतात् प्रत्यूहात् ] *conj.* ; राक्षसादिकृताद्विघ्नतः प्रत्यूहात् $G_1 U P B^1 L_2 J$ **24.2** तीक्ष्णैः सायकैः *conj.* ; कैश्शितैस्तीक्ष्णैः शरैः $G_1 U P B^1 J$ ; कैः शितैस्तीक्ष्णैस्सायकैः $L_2$ **24.2** यथा ] $U P L_2$ ; यत्र $G_1 B^1 J$ **24.2** रात्रिन्दिवोदितौ ] $G_1 P B^1$ ; रात्रिदिवोदितौ UJ ; रात्रिन्दिवोदिवोदितौ $L_2$ **24.3** रश्मिभिर्जगद् ] *conj.* ; रश्मिभिर्विश्वं जगत् $U G_1 B^1 J$ ; रश्मिभिर्विश्वं P ; रश्मिभिर्विश्वाजगत् $L_2$ **24.3** गाढध्वान्ताद् ] *conj.* ; अन्धतमसाद्गाढध्वान्ताद् $U G_1 B^1 L_2 J$ ; अन्धतमसो गाढध्वान्ताद् P **24.4** अवसमन्धेभ्यस्तमसः ] $UB^{1pc}$ ; अवमरुन्धेभ्यस्तमसः $G_1$ ; अन्धमरुन्धेभ्यः तमसः P ; अवसमन्धेत्यस्तमस इत्यच् $B^{3pc}$ ; अवसरुन्धेत्यस्तमसः $L_2$ ; अवसरुंधेभ्यस्तमसः J

अनन्तरमध्वर्यूणां यज्ञस्थलीं बन्धूककुसुमस्थूलैरसृक्कणैरपवित्रीकृतामालोक्य, आकुलत्वमभूत्। राक्षसागमनशङ्कयाकुलत्वम्। उपोढं प्रत्यासन्नं कर्म येषाम्, अथवा अपोढम् उत्सृष्टं प्रस्तुतं कर्म यैः। भ्रष्टा विकङ्कताख्यस्य क्षीरवृक्षदारुणो विकाराः स्रुचो येषाम्॥ २५॥

**उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाशयमुखात्समुद्धरन्।**
**रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम्॥ २६॥**

ततो रामो राक्षसानां सम्बन्ध्यनीकं व्योम्न्यैक्षिष्ट। तत्क्षणं तूणवक्त्राच्छरमुत्खनन्। गृध्राख्यपक्षिपतत्रवायुकम्पितकेतु। इत्यशकुनकथनं रक्षसाम्॥ २६॥

**तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान्।**
**किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते॥ २७॥**

रामो राक्षसबले तेषां यौ प्रभू मारीचसुबाहू तौ लक्ष्यं व्यधात्। नान्यान् प्रा-

---

**26 b.** बाणमाशय° ] **V**$D^M V^M B_1^{Mpc} B_2^M B_3^M B_5^M$ Ar.Nā.; बाणमाश्रय° $B_1^{Mac} B_4^M B_7^M$ Hem.Mall. Jin. **26 d.** °पक्ष° ] Σ; °पक्षि° P

---

**26** $c^9$–$d^7$ $T^M$

---

**25.1** अनन्तरमध्वर्यूणां ] *conj.*; अथानन्तरमृत्विजामध्वर्यूणां $G_1UB^1L_2J$; अथानन्तरं ऋत्विजां अध्वर्याणां P **25.1** यज्ञस्थलीं ] *conj.*; वेदिं यज्ञस्थलीं $G_1UPB^3J$; वेदियज्ञस्थलीं $L_2$ **25.1** °स्थूलैरसृक्कणैरपवित्री° ] *conj.*; °स्थूलैः रक्तबिन्दु(न्द्व $G_1L_2$)भिरसृक्कणैरपवित्री° Σ **25.2** आकुलत्वमभूत् ] *conj.*; सम्भ्रम आकुलत्वमभूत् Σ **25.2** प्रत्यासन्नं ] $G_1PB^1J$; प्रत्यासन्नं प्रत्यासन्नं U; प्रत्यापन्ने $L_2$ **25.3** उत्सृष्टं ] $G_1UL_2J$; उत्कृष्टं P; तत्सृष्टं $B^3$ **25.3** भ्रष्टा ] *conj.*; च्युता भ्रष्टा Σ **25.3** विकङ्कताख्यस्य ] $B^3$; विकङ्कतस्य $G_1PL_2J$; विकम्पिता अङ्कतः U **25.3** क्षीरवृक्षदारुणो ] $P^{ac}B^3$; क्षीरिवृक्षदारुणो $G_1P^{pc}J$; क्षीरवृ---रुणो $L_2$क्षीरवृक्षाद्दारुणो U **25.4** विकाराः स्रुचो येषाम् ] $G_1UPL_2J$; विकारः स्रुक् येषां तेषाम् $B^3$ **26.1** ततो रामो ] Σ; ततः श्रीरामो J **26.1** राक्षसानां ] $G_1B^3L_2J$; रक्षसां UP **26.1** °नीकं ] $G_1B^3L_2J$; °नेकं UP **26.2** तूणवक्त्रा° ] Σ; तूणमुखा° $B^3$ **26.2** गृध्राख्यपक्षिपतत्रवायुकम्पितकेतु ] *conj.*; गृध्राख्यस्य पक्षिपतत्त्रिवायुना कम्पिता ध्वजाः केतवो यस्य तद् $G_1$; गृद्धाख्यस्य पक्षपवनेन पत्रत्रवायुना कम्पिताः ध्वजाः केतवो यस्य तद् U; गृद्धाख्यपक्षिपतत्रवायुना कम्पिताः ध्वजाः केतवो यस्य तद् P; गृद्धपक्षपवनेरितध्वजाम् गृद्धावध्यपक्षिपतत्रवायुकम्पिताः केतवो यस्य तद् $B^3$; गृद्धाख्यस्य पक्षिपतत्र(त्रं $L_2$)वायुना कम्पिता ध्वजाः केतवो यस्य तद् $L_2J$ **26.2** इत्यशकुनकथनं ] UPJ; इद्यशकुनकथनं $G_1$; इति अनिमित्तकथनं $B^3$; इत्यशक्तेनकथनं $L_2$ **27.1** रामो ] $B^3$; स रामो $G_1UPL_2$; स श्रीरामो J **27.1** राक्षसबले तेषां यौ प्रभू ] $B^3$; राक्षसानां यावधिपती प्रभू $G_1UJ$; राक्षसानां तत्र यावधिपती प्रभू $PL_2$ **27.1** मारीचसुबाहू तौ ] $B^3$; मारीचस्वबाहू आस्तां तौ $G_1UPL_2$; मारीचसुबाहू आस्थां तौ J

कृतान्। नागेन्द्रप्रसरत्पौरुषो निर्विषेषु तुण्डिभेषु गरुडः किं पराक्रमते॥ २७॥

सो ऽस्त्रमुग्रजवमस्त्रकोविदः सन्दधे धनुषि वायुदैवतम्।
येन शैलगुरुमप्यपाहरत्पाण्डुपत्त्रमिव ताटकासुतम्॥ २८॥

रामश्चापेन पवनदैवतमस्त्रमयोजयन्महावेगम्। अस्त्राणां विषये प्रयोगे संहारे च प्रवीणः। तेन चास्त्रेणाद्रिस्थूलमपि मारीचमैलिलत्। न तु जघान। तस्य किञ्चिद्धर्मज्ञत्वात्। शुष्कत्वाद्गौरं पर्णमिव॥ २८॥

यः सुबाहुरिति राक्षसो ऽपरस्तत्र तत्र विससर्प मायया।
तं क्षुरप्रशकलीकृतं कृती पत्त्रिणां व्यभजदाश्रमाद्बहिः॥ २९॥

---

**28 a.** सो ऽस्त्रम् ] **V**D$^M$V$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$Hem.Mall.Jin.; अस्त्रम् Ar.Nā. **28 c.** °पाहरत् ] **V**V$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$Jin.; °पाहर D$^M$; °पातयत् Hem.Mall.Ar.(?)Nā. **28 d.** ताटका° ] **V**V$^M$B$_1^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$Jin.Ar.(?)Nā.; ताडका° D$^M$Hem.Mall. **29 a.** सुबाहुरिति ] B$^3$L$_2$JV$^M$B$_1^M$B$_2^M$B$_4^M$B$_5^M$**C**; स्वबाहुरिति G$_1$B$_7^M$; सुबाहुरपि U; ---रिति P; स्वधावहुरिति D$^M$; सबाहुरिति B$_3^M$ **29 d.** पत्त्रिणां ] G$_1$UL$_2$JB$_1^M$B$_3^M$B$_4^M$B$_7^M$Hem.Mall.Ar.(?)Nā.(?); पत्त्रि⏑ P; पक्षिणां B$^3$V$^M$B$_2^M$B$_5^M$Jin.; पक्षणां D$^M$

---

**28** a$^2$–a$^5$ T$^M$

---

**27.2** लक्ष्यं व्यधात्। नान्यान् प्राकृतान् ] B$^3$; शरव्यं लक्ष्यमकरोत्। नेतरान् Σ **27.2** नागेन्द्रप्रसरत्पौरुषो ] B$^3$; महोरगविसर्पिविक्रमः नागेन्द्रप्रसरत्पौरुषः G$_1$PJ; महोरगविसर्पिविक्र ×मो राजिलेषु गरुडः प्रवर्तते २८×मा नागेन्द्रप्रसरत्पौरुषा U; महोरगविसर्पिविक्रमः नागेन्द्र ‐‐‐रुषः L$_2$ **27.2** निर्विषेषु ] PU$^{pc}$L$_2$; निर्विशेषु G$_1$U$^{ac}$J; निर्विशेषेषु B$^3$ **27.2** तुण्डिभेषु ] B$^3$; राजिलेषु ह्रस्वसर्पेषु G$_1$PL$_2$J; राजिलेषु U **27.2** पराक्रमते ] B$^3$; प्रवर्तते पराक्रमते G$_1$UJ; प्रवर्तते पराक्रमते अपि तु नेत्यर्थः P; प्रवर्तते ‐‐‐‐मते अपि तु नेत्यर्थः L$_2$ **28.1** रामश्चापेन ] B$^3$; स रामो धनुषि G$_1$UP; तस्तं(?) विश्वामित्रो स रामो धनुषि L$_2$; स श्रीरामो धनुषि J **28.1** पवनदैवतमस्त्रमयोजयन्महावेगम् ] B$^3$; वायुदैवतमस्त्रं सन्दधे(सन्ददे G$_1$) अयोजयत्। उग्रजवं महावेगम् G$_1$UJ; वायुदैवतमस्त्रं वायव्यास्त्रं सन्दधे अ---उग्रजवं महावेगं P; वायुदैवतमस्त्रं वायव्यास्त्रं सन्दधे अयोजयत् उग्रजं ×म×महावेगम् L$_2$ **28.2** प्रवीणः ] B$^3$; कोविदः प्रवीणः Σ **28.2** तेन चास्त्रेणाद्रिस्थूलमपि ] B$^3$; येनास्त्रेण शैलगुरुं पर्वतस्थूलमपि G$_1$UL$_2$J; ये---शैलगुरुपर्वतस्थूलमपि P **28.2** मारिचमैलिलत् ] *conj.*; ताटकासुतं मारिचम् G$_1$; ताटकासुतं मारीचमपाहरत् UPL$_2$J; मारिचमपाहरन् B$^{3ac}$; मारिचमपाहर+दैलिल+न् B$^{3pc}$ **28.3** शुष्कत्वाद्गौरं पर्णमिव ] B$^3$; पाण्डु पत्त्रं शुष्कपत्त्रमिव G$_1$; शुष्कत्वाद्गौरपर्णं पाण्डु पर्णं शुष्कपर्णमिव P; पाण्डु पत्रं शुष्कपर्णमिव UL$_2$J

यो ऽन्यः सुबाहुर्नाम राक्षसस् तस्मिंस्तस्मिन्यज्ञदेशे प्रच्छन्नं बभ्राम, तमपि शरविशेषेण खण्डितं कृत्वा तस्मात्सिद्धाश्रमाद्बाह्यप्रदेशे काककङ्कादीनां भागीचकार। कृतकृत्यो लघुहस्तत्वात्॥ २९॥

**इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम्।**
**ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः॥ ३०॥**

इत्थं नाशितक्रतूपद्रवयोः काकुत्स्थयोः साङ्ग्रामिकं शौर्यं संस्तूय वाचंयमस्य कौशिकस्य ऋत्विजो ब्रह्माद्या यथाक्रमं प्रस्तुतानि कर्माणि समापयन्। तत्र ब्रह्मा पश्यति, अध्वर्युः प्रचरति, होता मन्त्रान्पठति, उद्गाता सामानि

---

**30 b.** सांयुगीनमभिनन्द्य ] $G_1PB^3L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; संयुगीनमभिवन्द्य U; सांयुगीनमभिनन्दि° $D^M$

---

**29.1** यो ऽन्यः सुबाहुर्नाम ] $B^3$; यो ऽप्यपरः सु(स्व $G_1L_2$)बाहुर्नामापरो $G_1L_2J$; योप्यपरः सुबाहुर्नाम परः U; यः अपरः सुबाहुर्नाम P **29.1** तस्मिंस्तस्मिन्यज्ञदेशे ] *conj.*; तत्र तत्र यज्ञदेशे $G_1L_2J$; तत्र तत्र यज्ञे देशे U; तत्र तत्र तस्मि---तस्मिन् देशे P; तस्मिंस्तस्मिन्यज्ञे देशे $B^3$ **29.1** प्रच्छन्नं ] $B^3$; मायया प्रच्छन्नं Σ **29.1** बभ्राम ] $B^3$; विससर्प बभ्रम $G_1$; विससर्प बभ्राम UPJ; विससर्प ---म $L_2$ **29.2** शरविशेषेण खण्डितं ] *conj.*; शरखण्डितं $G_1UL_2J$; क्षुरप्रेण शरविशेषेण खण्डितं $B^3$ **29.2** तस्मात्सिद्धाश्रमाद्बाह्यप्रदेशे ] *conj.*; तस्मात्सिद्धाश्रमाद्बहिर्बाह्यप्रदेशे $G_1UJ$; ---सिद्धाश्रमाद्बहिः बाह्यदेशे P; तस्मात्सिद्धाश्रमा---र्बाह्यप्रदेशे $L_2$; *om.* $B^3$ **29.2** काककङ्कादीनां ] *conj.*; पक्षिणां काककङ्कादीनां $G_1UPL_2J$; पत्रिणां काकशुकादीनां $B^3$ **29.3** भागीचकार ] $B^3$; व्यभजद्भागीचकार $G_1$; व्यभव्यभजद्भागीचकार क्षुरप्राः शरविशेषाः U; व्यभजद्भागीचकार ---शरविशेषाः P; व्यभजद्भागीचकार क्षुरप्राः शरविशेषाः(षा $L_2$) $L_2J$ **29.3** कृतकृत्यो लघुहस्तत्वात् ] $B^3$; *om.* $G_1$; कृती लघुहस्तत्वात् रक्षःसैन्यं तु वायव्यास्त्रेण निरास्थत इव इत्यार्षम् U; कृती लघुहस्तत्वात् रक्षस्सैन्यं तु वायव्यास्त्रेण निराकृत(निरास्थित $P^{pc}$) मि --- P; कृती लघुहस्तत्वात् रक्षःसैन्यं तु वायव्यास्त्रेण निरास्थि(स्थ J)त इत्यार्षम् $L_2J$ **30.1** इत्थं नाशितक्रतूपद्रवयोः ] $G_1PL_2J$; इत्थं नाशितमविपद्रवयोः U; इत्थं तयोः $B^{3ac}$; इति इत्थं तयोः रामलक्ष्मणयोः अपातमखविघ्नयोः अपास्तो निरस्तः मखस्य विघ्नोर्ययोः तयोः $B^{3pc}$ **30.1** काकुत्स्थयोः ] UP; काकुस्थयोः $G_1L_2$; *om.* $B^3$; ककुस्थयोः J **30.1** साङ्ग्रामिकं $PL_2$ ] सङ्ग्रामिकं $G_1UJ$; सांयुगीनं सङ्ग्रामे साधु $B^3$ **30.1** शौर्यं ] $G_1UPL_2J$; विक्रमं शौर्यम् $B^3$ **30.1** संस्तूय ] $G_1UP$; अभिनन्द्य संस्तूय $B^3$; संस्थूय $L_2J$ **30.2** वाचंयमस्य कौशिकस्य ऋत्विजो ब्रह्माद्या ] Σ; ऋत्विजो ब्राह्मणा वाग्यतस्य वाचंयमस्य मौनव्रतस्य +कुलपतेः+ विश्वामित्रस्य $B^3$ **30.2** यथाक्रमं ] $G_1^{pc}UPL_2J$; यथाक्रमं वाग्यतस्य $G_1^{ac}$; *om.* $B^3$ **30.2** प्रस्तुतानि ] $G_1UPL_2$; *om.* $B^3$; प्रस्थतानि J **30.2** समापयन् ] Σ; समापयत् J **30.3** अध्वर्युः प्रचरति ] $G_1^{pc}UPB^3$; अध्वर्युः प्रचति $G_1^{ac}$; अथर्युः प्रचरति $L_2$; अध्वर्यः प्रचरति J **30.3** सामानि ] Σ; साम $B^3$

गायतीत्यादिको यथाक्रमार्थः॥ ३०॥

तौ प्रणामचलकाकपक्षकौ भ्रातराववभृथाप्लुतो मुनिः।
आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना॥ ३१॥

यज्ञान्ते स्नातो विश्वामित्रो राघवौ करेण प्रीतिवशाच्छिरसि पस्पर्श। आशिषां पश्चात्। नमनकम्प्रबालचूडे। कुशपरुषीकृतपृष्ठेन॥ ३१॥

तं न्यमन्त्रयत सम्भृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम्॥ ३२॥

विश्वामित्रं मिथिलेषु भव ईश्वरो जनक आजुहाव। यियक्षुः। स च कौशिकः संयतेन्द्रियो मिथिलां गच्छन् रामलक्ष्मणावप्यनैषीत्। यतस्तत्कार्मुकाकर्णनसमुत्थं कौतुकं दधतौ। ताभ्यां हि जनकस्य दिव्यं धनुर्दुरानममस्तीति

**31 b.** °वभृथाप्लुतो ] $\mathrm{UPL_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M}$Hem.Mall.Ar.Nā.; °वभृथप्लुतो $\mathrm{G_1B^3}$ $\mathrm{D^M}$Jin. **32 a.** सम्भृत° ] Σ; संसृत° (?) Jin.

**32** $\mathrm{L_2}$ marked a lacuna here, but it's commentary on 32, up to and including तत्कार्मुकाक°, was later supplied in the lower margin, after which it continues on the next folio.

**30.4 गायतीत्यादिको** ] $\mathrm{PB^3L_2}$; गायतीत्यादिवो $\mathrm{G_1}$; गायति इत्यादयो U; गायतीत्यागतीत्यादि(दा $\mathrm{J^{ac}}$)वो J **30.4 यथाक्रमार्थः** ] $\mathrm{G_1B^3L_2J}$; यथाक्रमार्थाः U; यथाक्रमः P **31.1 यज्ञान्ते** ] $\mathrm{B^3}$; अवभृथो यज्ञान्तः तत्र Σ **31.1 विश्वामित्रो** ] $\mathrm{G_1UB^3J}$; मुनिर्विश्वामित्रः $\mathrm{PL_2}$ **31.2 राघवौ करेण प्रीतिवशाच्छिरसि पस्पर्श। आशिषां पश्चात्। नमनकम्प्रबालचूडे। कुशपरुषीकृतपृष्ठेन** ] *conj.*; भ्रातरौ पाणिना करेण प्रीतिवशाच्छिरसि समस्पृशत् पस्पर्श आशिषामनुपदं पश्चाद्दत्तौ कीदृशौ प्रणामचलकाकपक्षकौ नमनकम्प्रं बालचूडे कीदृशेन पाणिना दर्भपाटिततलेन कुशपुरुषीकृतपृष्टेन $\mathrm{B^3}$ The other MSS follow a different order: प्रणामेन चलत्काकपक्षका (प्रणामेण चलाः काकपक्षकाः बालचूडाः P; प्रणामेन चलाः काकपक्षका $\mathrm{L_2}$) ययोस्तौ (ययोस्तौ तौ $\mathrm{G_1L_2J}$) राघवौ कुश(ष J)परु(द्रु $\mathrm{G_1}$)षीकृतपृष्ठेन(ष्टेन J) पाणिना प्रीतिवशाच्छिरसि पस्पर्श। कदा। आशिषामनुपदं पश्चात्(पदे पदे $\mathrm{L_2}$) $\mathrm{G_1UPL_2J}$ **32.1 विश्वामित्रं** ] $\mathrm{B^3}$; ततस्तं विश्वामित्रं Σ **32.1 मिथिलेषु भव ईश्वरो** ] $\mathrm{B^3}$; मैथिलोऽपि मिथिलायां भवः राजा $\mathrm{G_1UJ}$; मैथिलो मिथिलायां भवः राजा P; मैथिलो मिथिलायां भवः --- $\mathrm{L_2}$ **32.1 जनक आजुहाव** ] $\mathrm{B^3}$; जनकः न्यमन्त्रयत आजु(ज्व $\mathrm{G_1}$)हाव Σ **32.1 यियक्षुः** ] $\mathrm{B^3}$; सम्भृत आरब्धः क्रतुर्यज्ञो येन $\mathrm{G_1UPJ}$; सम्भृत आरब्धः क्रतुर्यज्ञो--- $\mathrm{L_2}$ **32.2 गच्छन्** ] $\mathrm{B^3}$; व्रजन् Σ **32.2 रामलक्ष्मणावप्यनैषीत्** ] $\mathrm{B^3}$; राघवावपि निनाय अनैषीत् $\mathrm{G_1UL_2J}$; राघवावपि निनाय P **32.3 यतस्तत्कार्मुकाकर्णनसमुत्थं** ] *conj.* (cf. Jin.); तत्कन्यकाकर्णसमुत्थं $\mathrm{G_1J}$; ततस्तद्धनुःश्रवणजं तत्कन्यकाकर्णनसमुत्थं U; ततस्तद्धनुश्श्रवणजं तत्कार्मुकाकर्णनजं P; यतस्तत्कार्मुकवर्णनसमुत्थं $\mathrm{B^{3pc}}$; यतस्तत्कन्य(?)क ˘र्णनसमुत्थं $\mathrm{B^{3ac}}$; यतस्तद्धनुश्रवणजं तत्कार्मुकाकर्णनसमुत्थं $\mathrm{L_2}$ **32.3 कौतुकं** ] Σ; कौतूहलं कौतुकं U **32.3 दधतौ** ] $\mathrm{B^3}$; दधानौ Σ

श्रुतम्॥ ३२॥

तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ॥ ३३॥

विश्वामित्ररामलक्ष्मणैस्तेष्वाश्रमवृक्षेषु स्थानमाददे, श्रेयोयुक्तेषु, उल्लङ्घितमार्गैर्दिनान्ते, येषु गौतमस्य भार्या शक्रस्य क्षणमात्रभार्याभावमगात्। अहल्यया यत्र शक्रसम्बन्धस्तेषु गौतमाश्रमवृक्षेष्वित्यर्थः॥ ३३॥

प्रत्यपद्यत चिराय यत्पुनश्
चारु गौतमवधूः शिला सती।
स्वं वपुः स किल किल्बिषच्छिदां
रामपादरजसामनुग्रहः॥ ३४॥

अहल्या भर्तृशापेन दृषद्भूतातिमनोहरमात्मीयं ≪शरीरं≫ बहुकालेन पुनर्यदवा-

---

**34 a.** चिराय ] **V**$D^M V^M B_1^M B_3^M B_4^M B_5^M B_7^M$Mall.; चिरस्य Hem.Ar.(?)Nā.Jin. **34 b.** शिला सती ] **V**$D^M B_1^M B_3^M B_5^M B_7^M$Hem.Ar.Nā.; शिलामयी $V^M B_4^M$Mall.Jin.

---

**32.4** ताभ्यां हि जनकस्य दिव्यं धनुर्दुरानममस्तीति श्रुतम् ] *conj.*; जनकस्य पुराणं दिव्यधनुरास्तीति ताभ्यां श्रुतमासीत् $G_1$UJ; जनकस्य पुराणं दिव्यं धनुर्दुरानमस्तीति ताभ्यां श्रुतमासीत् P; ताभ्यां हि जनकस्य दिव्यं धनुर्दुराक्रममस्तीति श्रुतम् $B^3$; जनकस्य पुराणं दिव्यं धनुरस्तीति ताभ्यां श्रुतमासीत् $L_2$ **33.1** विश्वामित्ररामलक्ष्मणैस् ] *conj.*; तैस्त्रिभिर्विश्वामित्ररामलक्ष्मणैः $G_1$UP$L_2$; तैः विश्वामित्रलक्ष्मणैस् $B^3$; तैस्त्रिभिर्विश्वामित्रश्रीरामलक्ष्मणैः J **33.2** तेष्वाश्रमवृक्षेषु स्थानमाददे, श्रेयोयुक्तेषु, उल्लङ्घितमार्गैर्दिनान्ते ] *conj.*; तेष्वाश्रमवृक्षेषु स्थानमाददे श्रेयोयुक्तेषु उल्लङ्घितो ध्वा यैर्दिनान्ते $B^3$; गताध्वभिरुल्ल(भिर्विल UJ)ङ्घितमार्गैः सायं दिनान्ते(दिनान्तेषु U) आश्रमतरुषु वसतिः स्थानमगृह्यत $G_1$UJ; गताध्वभिर्विलंघितमार्गैः सायं दिनान्ते तेष्वाश्रमवृक्षेषु वसतिः स्थानमगृह्यताददे केषु तरुष्वित्याह P; गताध्वभिरुलङ्घितमार्गैस्सायं दिनान्ते आश्रमतरुध्व वसतिः स्थानमगृह्यत। केषु तरुष्वित्याह $L_2$ **33.2** येषु गौतमस्य भार्या ] $B^3$; दीर्घतपसो गौतमस्य परिग्रहः कलत्रमहल्या $G_1$U$L_2$J; दीर्घतपसो गौतमस्य परिग्रहः कलत्रं भार्या अहल्या P **33.2** शक्रस्य क्षणमात्रभार्याभावमगात् ] *conj.*; वासवस्येन्द्रस्य क्षणं कलत्रतां भार्यात्वमगमत् $G_1$UP$L_2$J; शक्रस्य क्षणमात्रं भार्याभावमगात् $B^3$ **33.3** अहल्यया यत्र शक्रसम्बन्धस्तेषु गौतमाश्रमवृक्षेष्वित्यर्थः ] $B^3$; शक्रेणाहल्यायाः सङ्गमो ऽभूत्। येषु गौतमाश्रमतरुषु $G_1$U$L_2$J; अहल्यायाः शक्रेण यत्र सङ्गमो ऽभूत् तेषु गौतमाश्रमवृक्षेषु इत्यर्थः P **34.1** अहल्या भर्तृशापेन दृषद्भूतातिमनोहरमात्मीयं शरीरं ] *conj.*; शिला सती दृषद्भूता अहल्या भर्तृशापेन अतिमनोहरं स्व(सु $G_1$)मात्मीयं वपुः $G_1$UJ; शिला सती अहल्या भर्तृशापेन(ण $L_2$) दृषद्भूता अतिमनोहरं स्वमात्मीयं वपुः P$L_2$; गौतमवधूः अहल्या भर्तृशापात् शिला सती यत्स्वं वपुः चारु अतिमनोहरं $B^3$

प, स किल सकलकल्मषक्षयकारिणां रामचरणरेणूनां प्रसादः। शिला भवेति शप्त्वा गौतमेन रामदर्शनावधिश्च ते शाप इत्युक्तम्। अतो रामदर्शनात्तया शापमोक्षो ऽवापि। शिलाग्रहणं निश्चलत्वोपलक्षणम्। सा हि निजाश्रमादचलन्ती वायुरूपेणादृश्यासीदित्यागमः॥ ३४॥

राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः।
अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात्॥ ३५॥

विश्वामित्रं रामलक्ष्मणानुगतमागतमाकर्ण्य जनको नरपतिः पूजया प्रत्युद्ययौ। अभिगमनपूर्वं हि पूज्यपूजाकरणम्। सशरीरं धर्ममर्थकामाभ्यां सहितमिव॥ ३५॥

तौ विदेहपुटभेदनौकसां गां गताविव दिवः पुनर्वसू।

---

**35 b.** निशम्य ] $G_1B^3L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; विलोक्य UP **35 d.** देहबद्धमिव ] **V**$D^MV^MB_1^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.Jin.; देहबन्धमिव Ar.Nā. **36 a.** विदेहपुटभेदनौकसां ] $G_1PB^3JD^MV^MB_1^MB_2^MB_4^MB_5^MB_7^M$Ar.Nā.; विदेहपटभेदनौकसां U; ---हपटभेदनौकसां $L_2$; विदेहपुटुभेदनौकसां $B_3^M$; विदेहनगरीनिवासिनां Hem.Mall.Jin.

---

**35** $c^1$–$c^5$ $T^M$

---

**34.2** बहुकालेन पुनर्यदवाप ] *conj.*; पुनर्यत्प्रत्यपद्यत प्राप बहुकालेन $G_1PL_2J$; प्रत्यपद्यत पुनर्यत् प्राप बहुकालेन U; चिराय बहुकालेन पुनः प्रत्यपद्यत अवाप $B^3$ **34.2** सकलकल्मषक्षयकारिणां ] $G_1PL_2J$; कल्मषक्षयकारिणां U; कल्मषक्षयकारणानां $B^3$ **34.2** रामचरणरेणूनां प्रसादः ] *conj.*; रामचरणरेणूनामनुग्रहः प्रसादः $G_1UPL_2$; रामपादरजसां प्रसादः $B^3$; रामपादरजसांश्रीरामचन्द्रचरणरेणूनामनुग्रहः प्रसादः J **34.2** शिला भवेति···इत्युक्तम् ] *om.* $B^3$ **34.3** रामदर्शनावधिश्च ] $G_1UP$; रामदर्शनावधिश्चे $L_2$; श्रीरामदर्शनावधिश्च J **34.3** अतो रामदर्शनात् ] $G_1UPL_2$; रामसन्दर्शनाद्धि $B^3$; अतः श्रीरामदर्शनात् J **34.4** निश्चलत्वो° ] $PL_2$; निश्चलद्यो° $G_1$; निश्चलत्यो° UJ; निश्चलतो° $B^3$ **34.4** निजाश्रमादचलन्ती ] *conj.* (cf. Ar.); निजाश्रमाच्चलन्ती $G_1UPL_2J$; निजाश्रमाचरन्ती $B^3$ **34.5** °दृश्यासीदित्यागमः ] $G_1UPL_2$; °द्यश्यासीदित्यागमः J; °दृश्यादीदित्यागमः शिला सतीति शिला भवेति गौतमेन शप्त्वा रामदर्शनावधिश्च ते शाप इत्युक्तम् $B^3$ **35.1** विश्वामित्रं ] *conj.*; तं विश्वामित्रं $G_1UPL_2J$; तं मुनिं $B^3$ **35.1** राम° ] $G_1UPB^3L_2$; श्रीराम° J **35.1** °नुगतमागतमाकर्ण्य ] $G_1P$; °नुगतमाकर्ण्य UJ; °नुगतमुपस्थितं आगतं निशम्य आकर्ण्य $B^3$; गतं आगतमाकर्ण्य $L_2$ **35.1** नरपतिः पूजया प्रत्युद्ययौ ] *conj.*; नृपः सपर्यया पूजया प्रत्युद्ययौ $G_1UPL_2J$; नरपतिरभ्यगात् प्रत्युद्ययौ सपर्यया पूजया $B^3$ **35.2** अभिगमन° ] $G_1UL_2$; अभ्युगमन° P; अभिरामकरण° $B^3$; अभिगम° J **35.3** सशरीरं धर्ममर्थकामाभ्यां सहितमिव ] $G_1PJ$; सशरीरं धर्ममर्थकामाभ्यामिव सहितं U; देहबद्धमिव सशरीरमिव $B^3$; ---रीरं धर्ममर्थकामाभ्यां सहितमिव $L_2$

मन्यते स्म पिवतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ॥ ३६ ॥

विदेहाख्यं पत्तनं वसतिर्येषां तेषां जनानां सम्बन्धि ≪चित्तं≫ निमेषमपि ≪छलना≫ममन्यत, रामलक्ष्मणौ नेत्रैः पश्यतां, तद्दर्शनविघ्नादिति प्रियत्वोक्तिः। स्वर्गाद्भूमिं प्राप्तौ पुनर्वसू इव। पुनर्वस्वोर्द्वितारकत्वाद् द्विवचननिर्देशः सन्निधानात्तिष्यो ऽपि वा तच्छब्देनोक्तः॥ ३६ ॥

यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्धनः।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयां बभूव सः॥ ३७ ॥

ततो विश्वामित्रो जनकाय यज्ञपशुबन्धनकाष्ठयुक्ते यज्ञकर्मणि समाप्ते सत्यवसरज्ञो ऽवसरं प्राप्य रामं रौद्रधनुर्वीक्षणोत्कण्ठमाचष्ट। इषवो ऽस्यन्ते ऽनेनेति

---

**36 d.** °पातमपि ] $G_1UPB^3JD^MV^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; °पातमिव $L_2B_1^M$ **37 b.** कुशिक° ] $PB^3T^ML_2D^MV^MB_1^MB_2^MB_4^MB_5^M$**C**; कुशक° $G_1UJB_3^MB_7^M$ • °वर्धनः ] Σ; °सम्भवः $B_2^M$

---

**36** $d^6$–$d^{11}$ $T^M$ **37** $a^1$ $T^M$

---

**36.2** विदेहाख्यं पत्तनं वसतिर्येषां तेषां जनानां सम्बन्धि चित्तं निमेषमपि छलनाममन्यत ] *conj.*; विदेहाख्यं पुटभेदनं पत्तनमोको वसतिर्येषां तेषां जनानां सम्बन्धिनः पक्ष्मपातमपि निमेषमपि वञ्चनां मन्यते स्म अमन्तत $B^3$; विदेहस्य जनकस्य पु(प U)टभेदनं नगरमोको वसतिर्येषां ते(तेषां U) तत्रत्यानां लो(लौ J)कानां $G_1$UPJ; विदेहजनकस्य पुटभेदनं नगरमोको वसतिर्येषां तं त्रत्रत्यानां $L_2$ **36.2** रामलक्ष्मणौ ] P; तौ रामलक्ष्मणौ $G_1UB^3L_2$; तौ श्रीरामलक्ष्मणौ J **36.2** नेत्रैः ] *conj.*; विलोचनैर्नेत्रै $G_1$; विलोचनैर्नेत्रैः $UPL_2J$; विलोचनैः $B^3$ **36.2** पश्यतां ] *conj.*; पिवतां पश्यतां(ता $G_1$) सम्बन्धि मनः पक्ष्मपातं निमेषमपि वञ्चनाममन्यत $G_1PL_2J$; पिवतां पश्यतां सम्बन्धि मनः पक्ष्मपातमपि वञ्चनाममन्यत U; पिवतां पश्यतां $B^3$ **36.2** तद्दर्शनविघ्नादिति ] $G_1PB^3J$; दर्शने तयोर्विघ्नादिति U; तद्दर्शविघ्नादिति $L_2$ **36.2** प्रियत्वोक्तिः ] $G_1UPL_2$; प्रयत्वोक्तिः J; प्रियत्वोक्तिः पक्ष्माण्यक्षिरोमाणि $B^3$ **36.3** स्वर्गाद्भूमिं ] Σ; दिवः स्वर्गात् गां भूमिं $B^3$ **36.3** पुनर्वसू इव ] $UPB^3$; पुनर्वसूरिव $G_1J$; पुनर्वसू तव $L_2$ **36.3** द्विवचननिर्देशः ] $PB^3$; द्वित्वोक्तिः $G_1UL_2J$ **36.4** तिष्यो ऽपि वा ] Σ; वा तिष्योपि U **36.4** °नोक्तः ] $G_1$; °नोक्तः पक्ष्माण्यक्षिरोमाणि(नि U) विदेहाख्यं पुरमिति केचित् UJ; °नोक्तः विदेहाख्यं पुरमिति केचित् पक्ष्माण्यक्षिरोमाणि P; °नोक्तेः $B^3$; °नोक्तः पक्ष्माणि अक्षिरोमाणि $L_2$ **37.1** ततो विश्वामित्रो ] *conj.*; ततः स विश्वामित्रो Σ **37.1** जनकाय ] *conj.*; मैथिलाय जनकाय Σ **37.1** यज्ञपशुबन्धन°…ऽवसरं प्राप्य ] *om.* $B^3$ **37.1** यज्ञपशुबन्धनकाष्ठयुक्ते ] *conj.*; यूपान्ते $G_1L_2J$; यूपन्ते $U^{pc}$; यून्तेप $U^{ac}$; यूपवति यज्ञपशुबन्धनकाष्ठयुक्ते P **37.1** समाप्ते ] $G_1PL_2J$; संप्राप्ते U **37.2** सत्यवसरज्ञो ऽवसरं प्राप्य ] P; सत्यवसरमासाद्य $G_1UL_2J$ **37.2** रामं ] Σ; श्रीरामं J **37.2** रौद्रधनुर्वीक्षणोत्कण्ठमाचष्ट ] *conj.*; धनुरीक्षणोत्सुकमकथयत् $G_1UL_2J$; रौद्रधनुरीक्षणोत्सुकमकथयत् P; इष्वसनदर्शनोत्सुकं रौद्रधनुर्वीक्षणोत्कण्ठं कथयां बभूव आचष्ट यूपयुक्ते यज्ञकर्मणि अवसिते समाप्ते सति कालविदवसरमासाद्य $B^3$ **37.2** °नेनेति ] Σ; °नेन U

इष्वसनं चापम्॥ ३७॥

तस्य वीक्ष्य ललितं शिशोर्वपुः
पार्थिवः प्रथितवंशजन्मनः।
स्वं विचिन्त्य च धनुर्दुरानमं
पीडितो दुहितृशुल्कसंस्थया॥ ३८॥

सूर्यवंशत्वात् प्रख्यातान्वयजस्य रामस्य रम्यं देहमालोक्य निजं चापं च दुरारोपं विचार्य सीतापणव्यवस्थया राजादूयत। यदि हि चापाकर्षणकारिण

---

**38 a.** शिशोर्वपुः ] $G_1UL_2JB_1^MB_3^MB_4^MB_7^M$; वपुः शिशोः $PB^3T^MV^MB_2^MB_5^M$Hem.Mall.Ar. Nā. (Jin. uncertain); वपुः शिशो $D^M$ **38 c.** धनुर्दुरानमं ] $UPL_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^M B_7^M$Hem.Mall.Ar.(?)Nā.; धनुर्दुरानसं $G_1$; दुरानमं धनुः $B^3$; धनुर्धरानमं $D^M$; धनुर्दुरासनं Jin. (?)

---

**38** $a^9$–$b^6$ $T^M$ **38** Presumably $B^3$ was following a different source from $B^1$, whose testimony resumes on f. 66r with the words रम्यदेहमालोक्य। $B^3$'s source has therefore not been completely copied: its commentary opens on the bottom of $B^3$'s f. 65v with just a few words (पार्थिवो जनकस्तस्य शिशोः रामस्य वपुर्ललितं र-) and then breaks off; but in the repaired top margin of $B^1$'s f. 66r $B^3$ has added the following: दूपत यदि हि चापाकर्षणकारिण एवेयं मया देयेति पणबन्धो मम नाभविष्यत्तदैनामस्मा एव दास्यामीति न त्वयं शिशुत्वाद्वीक्षितुं धनुः शक्तः प्रथितवंशजन्मत्वात्पीडा। We have adopted $B^3$'s text for the conclusion of the commentary.

---

**37.3** चापम् ] $B^3$; चापं यूपः पशुबन्धनकाष्ठम् $G_1PL_2J$; चापं पशुबन्धकाष्ठम् U **38.1** सूर्यवंशत्वात् ] $G_1UPL_2$; *om.* $B^3$; सूर्यवंशात् J **38.1** प्रख्यातान्वयजस्य ] $G_1L_2^{pc}J$; प्रथितान्वयजस्य U; प्रख्यातान्वयस्य P; प्र×ख्य×ख्याता×ता×न्वयजस्य $L_2$; *om.* $B^3$ **38.1** रामस्य ] $G_1UPL_2$; पार्थिवो जनकस्तस्य शिशोः रामस्य वपुर्ललितं र $B^3$ (end of folio); श्रीरामचन्द्रस्य J **38.1** रम्यं देहमालोक्य ] $G_1UPJ$; रम्यदेहमालोक्य $B^{1ac}L_2$; रम्यदेहं वी+क्ष्य+लोक्य $B^{3pc}$ **38.2** चापं च दुरारोपं ] $G_1$; चापं दुरारोपं U; च चापं दुरारोहं $PB^1L_2$; चापं च दुरानमं दुरारोपं J **38.2** विचार्य ] $G_1UPB^{1ac}L_2J$; वि+चिन्त्य+ चार्य $B^{3pc}$ **38.2** सीतापणव्यवस्थया ] *conj.*; दुहितुः सीतायाः शुल्कं पणस्तस्य संस्था व्यवस्था तया Σ **38.2** राजादूयत ] *conj.* (cf. Jin.); राजा पीडितः आपीड्य(डि $G_1^{ac}$)त $G_1U$; कर्त्र्या राजा पीडितः अपीड्यत $PB^1L_2$; ---दूपत $B^3$; राजा जनकः पीडितः अपीड्यत J

एवेयं मया देयेति पणबन्धो मम नाभविष्यत्तदैनामस्मा एव दास्यामीति। न त्वयं शिशुत्वाद्वीक्षितुं धनुः शक्तः। प्रथितवंशजन्मत्वात् पीडा॥ ३८॥

अब्रवीच्च भगवन्मतङ्गजैर्यन्महद्भिरपि कर्म दुष्करम्।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम्॥ ३९॥

अनुशय्य चासौ मुनिमुवाच हे ऋषे करीन्द्रैरपि यत्कर्म दुःशकं तत्र गजपोतकस्य व्यापारं नाहमूरीकर्तुमुत्सहे यतो निरर्थकम्। किं हि वराको ऽसावत्र कुर्यात्। कलभस्य यथा मत्तेभसाध्यं कर्म दुष्करं तद्वदिदमस्येति वाक्यार्थः॥ ३८॥

एतदेव दृष्टान्तं प्रकृते योजयितुमाह—

ह्रेपिता हि बहवो नरेश्वरास्

---

**39 b.** °न्महद्भिरपि ] **V**$D^M V^M B_1^M B_2^M B_3^M B_5^M B_7^M$ Jin.; द्×हद्भिरप $B_4^M$; °द्भूहद्भिरपि Hem. Mall.Ar.Nā. **39 d.** चेष्टितम् ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ Hem.Mall.Jin.; साहसम् Ar. Nā.

---

**39** $b^7$–$d^5$ $T^M$

---

**38.3** यदि हि चापाकर्षणकारिण एवेयं मया देयेति पणबन्धो मम नाभविष्यत्तदैनामस्मा एव दास्यामीति ] $B^3$; the other MSS have a different formulation of Janaka's reasoning: दुहितुः (---श् $L_2$) शुल्कसंस्थानं (शुल्कस्थानं $G_1$J) तेनैव (तेन व $L_2$) कृतम् यथा अस्मै दातुं (दत्तं $J^{pc}$, दत्तां $J^{ac}$, ---$L_2$) नाघटत (न घटत $G_1B^{1ac}$J, न घटते $PL_2$)। यदि हि (यदि $PB^1L_2$) वीर्यशुल्केयं मया न कृताभविष्यत् (°भविष्यत P, °भविष्यतत् $B^{1ac}$, °भविष्यत्तत् $B^{1pc}$, ---ष्यत $L_2$) तदैनामस्मै (तदैतामस्मै P, तदेव रामायास्मै $L_2$) अदास्यमिति (अदास्यं $L_2$); eyeskip has shortened this in U to the following: दुहितुः शुल्केयं मया न कृताभविष्यत् तदैनामस्मै अदास्यमिति। **38.4** न त्वयं ] $B^3$; अयं तु $G_1UB^1L_2J$; अथ तु P **38.4** शिशुत्वाद्वीक्षितुं धनुः शक्तः ] $B^3$; शिशुत्वाद्धनुर्वीक्षितुमपि नाशक्तः $G_1B^1$; शुल्कत्वाद्धनुर्वीतुमपि नाशक्तः U; शिशुत्वाद्धनुर्वीक्षितुमपि न शक्तः PJ; शि---त्वाद्धन्ववीक्षितमपि नाशक्तः $L_2$ **38.4** प्रथितवंशजन्मत्वात् पीडा ] $B^3$; ख्यातान्वयोत्पत्तेः सूर्यवंशत्वात् (त्वा $G_1$) शुल्कः पणबन्धो त्र $G_1$J; ख्यातान्वयोत्पत्तेः सूर्यवंशत्वात् शुल्कः पणो यत्र अकथयत् U; शुल्कः पणबन्धो ऽत्र $PB^1$; शुल्कपैणबन्धोत्र $L_2$ **39.1** मुनिमुवाच ] Σ; मुनिमब्रवीदुवाच $B^{3pc}$ **39.1** ऋषे ] *conj.*; भगवन्नृषे Σ **39.1** करीन्द्रैरपि ] *conj.*; मतङ्गजैः करीन्द्रैरपि $G_1UPB^1$J; मतुङ्गैः करीन्द्रैरपि $L_2$ **39.1** दुःशकं ] $PL_2$; दुष्करं दुश्शकं $G_1$; दुष्करं दुःशक्यं UJ; दुश्शक्यं $B^1$; +दुष्करं कर्त्तुं+ दुश्शक्यं $B^{3pc}$ **39.1** तत्र ] $B^{3pc}$; तस्मिन्कर्मणि Σ **39.2** गजपोतकस्य ] *conj.*; कलभस्य गजपोतकस्य $G_1PB^1L_2$J; कलभस्य हस्तिपोतकस्य U **39.2** व्यापारं ] *conj.*; चेष्टितं व्यापारं Σ **39.2** नाहमूरीकर्तुम् ] Σ; नाह+मनुमन्तु+मूरीकर्तुम् $B^{3pc}$ **39.2** निरर्थकम् ] *conj.*; मोघवृत्ति निरर्थकम् Σ **39.2** °सावत्र ] Σ; °साव $G_1$ **39.3** °साध्यं ] *conj.*; °साख्यं Σ **39.4** एतदेव दृष्टान्तं ] $G_1$J; एतदेव U; एतमेव दृष्टान्ते $B^1$; एतमेव दृष्टान्तं $L_2$ **39.4** प्रकृते योजयितुमाह ] $G_1PB^1$J; प्रकृतेन योजयितुं दृष्टान्तमाह U; प्रकृते ---यितुमाह $L_2$

तेन तात धनुषा धनुर्भृतः।
ज्याविघातकठिनत्वचो भुजान्
ये ऽवधूय धिगिति प्रतस्थिरे॥ ४०॥

हे मुने तेन ≪चापेनानेके≫ राजानो लज्जिता धनुर्धरा ये ≪बाहुदण्डान्≫ धिगिति निर्भर्त्स्यं यथागतं ययुः। अतश्च किमयं बालो ऽत्र कुर्यादिति भावः। ≪मौर्वीनिष्पेषकर्कशच्छवीन्≫ तान्॥ ४०॥

प्रत्युवाच तमृषिर्निशम्यतां सारतो ऽयमथवा कृतं गिरा।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव॥ ४१॥

तदसहमानो ऽथ मुनिर्जनकं प्रतीपमवदत्। असौ रामः सङ्क्षेपाद्बलाद्वा त्वया विचार्यताम्—अथवा वचने न कश्चिदर्थः। यतो ऽयं भवतो धनुष्येव

---

**40 c.** °विघात° ] $G_1UB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; °विमर्द° P; °निघात° 𝕮 **40 d.** ये ऽवधूय ] $\mathbf{V}B_1^MB_2^MB_3^MB_5^MB_7^M$; स्वान्विधूय $T^M$Hem.Mall.Jin.; ये वधूर्य $D^M$; ये विधूय $V^M$; ये विय $B_4^{Mac}$ (uncertain); ये वि⏑य $B_4^{Mpc}$; व्यावधूय Ar.(?)Nā. **41 b.** सारतो ] $\mathbf{V}D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Mall.Ar.Nā.; वीर्यतो Hem.Jin. **41 d.** °निर्गिराविव ] $\mathbf{V}D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.Jin.; °निस्तराविव $Hem.^{vl}$Ar.(?)Nā.

---

**40** $c^8$–$d^{11}$ $T^M$ **41** $a^1$–$a^{10}$, $d^9$–$d^{11}$ $T^M$

---

**40.1** मुने ] *conj.*; तात मुने Σ **40.1** चापेनानेके ] *conj.*; धनुषा बहवो Σ **40.1** लज्जिता ] *conj.*; ह्रेपिता लज्जिताः $G_1UB^1L_2$; ह्रीपिता लज्जिताः PJ **40.1** धनुर्धरा ये ] Σ; धनुर्धरार्ये $G_1$ **40.1** बाहुदण्डान् ] (cf. Jin.); भुजान् Σ **40.2** धिगिति निर्भर्त्स्यं ] *conj.*; धिगित्यवधूय निर्भर्त्स्यं $G_1PB^1L_2J$; धिगित्येवावधूय निर्भर्त्स्यं U **40.2** यथागतं ययुः ] *conj.*; प्रतस्थिरे यथागतं ययुः $G_1UPB^1J$; प्रतस्थिरे यथागत्य ययुः $L_2$ **40.2** किमयं ] Σ; किं $B^1$ **40.3** मौर्वीनिष्पेषकर्कशच्छवीन् ] *conj.*; ज्याविघातेन मौर्वीनिष्पेषेण भुजान् कीदृशान् कर्कशाश्छविर्येषां P; ज्याविघातेन मौर्वीनिष्पेषेण भुजान् कीदृशान् कठिना त्वग्येषां $G_1UB^1J$; ज्याविघातेन मौर्वीनिष्पेषेण भुजान् कीदृशान् कठिनत्वय्येषां $L_2$ **41.1** मुनिर्जनकं ] *conj.*; मुनिस्तं जनकं $G_1UPB^{1ac}L_2$; मुनिस्तं जनकं +नृपं+ $B^{3pc}$; मुनिर्विश्वामित्रः तं जनकं J **41.1** प्रतीपमवदत् ] *conj.*; प्रत्युवाच प्रतीपमवदत् $G_1UPB^{3pc}L_2J$; ⊔च प्रतीपमवदत् $B^{1ac}$ **41.1** रामः ] Σ; श्रीरामः J **41.1** सङ्क्षेपाद् ] *conj.*; सारतः सङ्क्षेपाद् Σ **41.1** बलाद्वा ] $G_1UPB^1L_2^{pc}$; बालाद्वा $L_2^{ac}J$ **41.2** विचार्यताम् ] *conj.*; निशम्यतां विचार्यतां $G_1UPB^1J$; निश्यम्यतां विचार्यतां $L_2$ **41.2** वचने न ] *conj.*; कृतगिरा वचनेन $G_1$; कृतं गिरा वचनेन $UPB^1J$; कृतं गिरा वचनेन न $L_2$ **41.2** कश्चिदर्थः ] Σ; कश्चित् $B^1$ **41.2** यतो ऽयं ] $G_1B^1L_2J$; यतो U; अतो यं P

दृश्यसामाथ्र्यो भविष्यति। वज्रं पर्वत इव। अत्र च तेन निजयज्ञवृत्तान्तः कथयितुमिष्टो ऽभूत्, भूयःकथनाशङ्कया चोपसंहृतः॥ ४१॥

इत्थमाप्तवचनात्स पौरुषं काकपक्षकधरे ऽपि राघवे।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि॥ ४२॥

सत्यवादिनो मुनेर्विदिततत्त्वस्य विश्वामित्रस्यैवंविधाद्विद्वद्वाक्याज्जनकश्चूडाधारिण्यपि रामे ≪विक्रमं≫ समभावयत्। वह्नाविन्द्रगोपकसूक्ष्मे प्लोषसामर्थ्यमिव। इन्द्रगोपो वर्षासमयजः कीटः, मणिमालिकाभिधानः, तन्मात्रे। अवितथवादीति विदिततत्त्व आप्तः॥ ४२॥

आदिदेश गणशो ऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः॥ ४३॥

ततः शतसङ्ख्याननुचरान् धनुरानयनाय मिथिलानाथो न्ययोजयत्। तेजोम-

---

**42 a.** इत्थम् ] **V**$T^M D^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ Hem.Jin.; एवम् Mall.Ar.Nā. **42 b.** °पक्षकधरे ऽपि ] **V**$T^M D^M V^M B_1^M B_2^M B_3^M B_4^{Mpc} B_5^M B_7^M$ Mall.Jin.; °पक्षधरे ऽपि $B_4^{Mac}$; °पक्षधर एव Hem.Ar.Nā. **43 a.** आदिदेश ] $G_1 U B^1 L_2 J D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$ Hem.Jin.; व्यादिदेश PMall.Ar.Nā.

---

**42** $a^1$–$b^8$, $b^{10}$–$c^1$ $T^M$ **43** $a^{11}$–$c^2$, $c^4$–$c^5$, $c^8$–$c^{10}$, $d^1$–$d^3$ $T^M$

---

**41.3** दृश्यसामाथ्र्यो ] *conj.*; व्यक्तशक्तिर्दृश्यसामाथ्र्यो $UPB^1L_2J$; व्यक्तशक्तिर्दृदृश्यसामथ्र्यो $G_1$ **41.3** वज्रं ] *conj.*; अशनिर्वज्रं $G_1UPB^1J$; ---निर्वज्रं $L_2$ **41.3** पर्वत इव ] Σ; +गिरौ+ पर्वते इव $B^{3pc}$ **41.3** अत्र च तेन ] $G_1B^1L_2J$; अत्र तेन U; अत्र चेतन P **41.4** कथयितुमिष्टो ] $UPB^1J$; कथयित्वमिष्टो $G_1$; ---थयितुमिष्टो $L_2$ **41.4** °हृतः ] $G_1PB^1J$; °हृता U; --- $L_2$ **42.1** सत्यवादिनो ] *conj.*; आप्तस्य सत्यवादिनो Σ **42.1** मुनेर्विदिततत्त्वस्य विश्वामित्रस्यैवंविधाद्विद्वद्वाक्याज् ] *conj.*; मुनेर्विदिततत्त्वस्य विश्वामित्रस्यैवंविधाद्वचनाद्विद्वद्वाक्यात् P; मुनेरेवंवचनाद्विद्वद्वाक्यात् $G_1UB^{1ac}L_2J$; मुनेरेवं+विधात्+ वचनाद्विद्वद्वाक्यात् $B^{3pc}$ **42.2** जनक° ] *conj.*; स जनक° Σ **42.2** रामे ] $G_1PB^1L_2$; राघवे U; श्रीरामे J **42.2** विक्रमं ] *conj.*; पौरुषं Σ **42.2** समभावयत् ] *conj.*; श्रद्दधे समभावयत् Σ **42.3** इन्द्रगोपो ] Σ; इन्द्रगोपको J **42.4** विदिततत्त्व आप्तः ] $UPB^1$; विदितन्त्व आप्तः $G_1J$; विदितत्वा आप्तः $L_2$ **43.1** ततः शतसङ्ख्यान् ] *conj.*; ततो गणेशः शतसङ्ख्यान् $G_1J$; ततो गणशः शतसङ्ख्यान् $UB^1L_2$; ततो ऽनन्तरं गणशः शतसङ्ख्यान् P **43.1** अनुचरान् ] *conj.*; पार्श्वगाननुचरान् Σ **43.1** धनुरानयनाय ] *conj.*; कार्मुकाभिहरणाय धनुरानयनाय $G_1UPB^1J$; कार्मुकाभिहरणाय धनुरायनाय $L_2$

यस्य शक्रचापस्योड्डावार्थं शक्रो जीमूतानिव। गणान्गणान् गणशः। बहुगणे ऽसङ्ख्यत्वे सङ्ख्यैकवचनाच्चेति शस्॥ ४३॥

तत्प्रसुप्तभुजगेन्द्रभीषणं प्रेक्ष्य दाशरथिराददे धनुः।
विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः॥ ४४॥

तत्कार्मुकमालोक्य रामो जग्राह। शयितनागनाथवद्भयङ्करं, येन धनुषा रुद्रो भयपलायितयज्ञहरिणानुयायिनं सायकमक्षिपत्। दक्षयज्ञं हि विध्वंसभयान्मृगरूपेण पलायमानं तेन धनुषा हरो विव्याधेत्यागमः। क्रतुश्चासौ मृगः क्रतुमृगः॥ ४४॥

आततज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रमीक्षितः।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेलवं स्मरः॥ ४५॥

---

**44 b.** प्रेक्ष्य ] Σ; वीक्ष्य Mall. • °ददे ] JD$^{M}$B$_{3}^{M}$B$_{4}^{M}$B$_{5}^{Mac}$**C**; °दधे G$_{1}$PB$^{1}$L$_{2}$V$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{5}^{Mpc}$B$_{7}^{M}$ **45 d.** पेलवं ] G$_{1}$PB$^{1}$L$_{2}$JD$^{M}$V$^{M}$B$_{1}^{M}$B$_{2}^{M}$B$_{3}^{M}$B$_{7}^{M}$Hem.Ar.(?)Nā.Jin.; पेशलं B$_{4}^{M}$Mall.; पेल्लवं B$_{5}^{M}$

---

**44** c$^{6}$–d$^{11}$ T$^{M}$ **45** a$^{1}$–a$^{6}$, d$^{10}$–d$^{11}$ T$^{M}$

---

**43.2** The testimony of U breaks off here and resumes, on the facing page, with the fourth word of the commentary on 11:45.

**43.3** सङ्ख्यैकवचनाच्च वीप्सायाम् *Aṣṭādhyāyī* 5.4.43.

---

यदि वा मदीयया परश्वधलेखया ज्वलज्ज्वालया भर्त्सितस्त्वं दीनो ऽसि किञ्चिदपि कर्तुं न समर्थः, †तदयमभययाचनार्थमञ्जलिः† क्रियताम्। मौर्वीनिष्पेषेण निरर्थकमेव कठोरा अङ्गुलयो यस्य सः। वृथेति—आयुधाभ्यासस्य ह्यरिपरिभवो मुख्यं कारणम्॥ ७७॥

एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः।

---

**77 c.** ज्याविमर्द° ] $UPB^1L_2JV^MB_1^MB_2^MB_3^MB_5^{Mpc}$Hem.Ar.Nā.; ---द° $T^M$; ज्याविमन्द° $G_1$; ज्याविमर्दा° $B_4^M$(unmetrical); ज्याविघात° $D^MB_5^{Mac}$; ज्यानिघात° Mall.Jin.

---

**76** नामिते, अहं ] नामि--- $L_2$ **77** $c^4$–$d^{11}$ $T^M$ **78** $a^1$–$a^3$, $d^5$–$d^{11}$ $T^M$

---

**76.1** तस्मान्मदीय° ] *conj.*; तत्तस्मात्मदीय° $G_1$; तत्तस्मान्मदीय° $UPB^1J$; तत्तस्मात्कारणा---दीय° $L_2$ **76.1** °मारोपितगुणं क्रियताम् ] *conj.*; °माततज्यतां नीयताम्। आरोपितगुणं क्रियताम् $G_1UPB^1$; °माततज्यतां ---तां आरोपितगुणं क्रियताम् $L_2$; °मापतज्यतां नीयताम् आरोपितगुणं क्रियताम् J **76.2** नाम्यताम् ] $PB^1L_2J$; नम्यताम् $G_1U$ **76.2** युद्धं ] *conj.*; प्रधनं युद्धं $G_1UPB^{1pc}J$; प्रधानं युद्धं $B^{1ac}$; प्रध--- $L_2$ **76.2** तावदास्ताम् ] *conj.*; तावत्तिष्ठतु आस्ताम् **V** **76.2** एतस्मिन्धनुषि ] P; एवमपि एतस्मिन्धनुषि $G_1UB^1L_2J$ **76.3** सदृशभुजबलेनाभिभूत ] *conj.*; तुल्यबाहुतरसा सदृशभुजबलेन जितो ऽभिभूत $G_1UPB^1$; तुल्यबाहुतरसा सदृशभुजबलेन जितो--- $L_2$; तुल्यः बहुतरसा सदृशभुजबलेन जितोभिभूत J **76.3** चापारोपणमेव ] $G_1UJ$; चापरोपणमेव $PB^1L_2$ **77.1** मदीयया परश्वधलेखया ] *conj.*; मदीयपरशुधारया $G_1L_2J$; पदीयपरशुधारया U; मदीयधारया परश्वधलेखया P; मदीयपरश्वधधारया $B^1$ **77.1** ज्वलज्ज्वालया ] $UPB^1J$; ज्वलज्ज्वलया $G_1L_2$ **77.1** भर्त्सितस्त्वं ] *conj.*; तर्जितो भर्त्सितस्त्वं **V** **77.1** दीनो ऽसि ] *conj.*; कातरो दीनो ऽसि **V** **77.2** कर्तुं ] $PB^1L_2$; *om.* $G_1UJ$ **77.2** तदयमभययाचनार्थमञ्जलिः क्रियताम् ] *conj.*; तदभययाचनार्थमञ्जलिर्बध्यतां क्रियताम् $G_1UJ$; तदयमभययाचनार्थं अञ्जलिर्बध्यतां P; तदयभययाचनार्थमञ्जलिन्बध्यतां क्रियताम् $B^1$; उदयभययाचनार्थमञ्जलिं बध्यता $L_2$ **77.3** मौर्वीनिष्पेषेण ] *conj.*; ज्याविमर्देन मौर्वीनिष्पेषेण $G_1PL_2J$; ज्याविमर्दनमौर्वीनिष्पेषेण U; ज्याविमन्देन मौर्वीनिष्पेषेण $B^1$ **77.3** निरर्थकमेव कठोरा ] *conj.*; वृथा निरर्थकमेव कठिनाः कठोरा $G_1UPB^1L_2$; वृथा निरर्थकमेव कठिना कुठोरा J **77.4** °भ्यासस्य ह्यरिपरिभवो ] $B^1L_2^{pc}$; °भ्यासस्य ह्यपरिभवः $G_1$; °भ्यासो भावो हि परिभवस्य U; °भ्यासस्य ह्यपराभवः P; °भ्यासस्य +ह्य+रिपरिभवः $L_2$; °भ्याससह्यपरिभवः J

तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम्॥ ७८॥

जामदग्न्ये सकोप †एवमुक्तवति सति† रामस्तदीयचापारोपणमेवानुरूपं प्रत्युत्तरमङ्गीचकार। कातरो ऽसीति भार्गवेणोक्तत्वाद् ≪हसितवेपितोष्ठः≫ स्मयमानः। न हि पौरुषयुक्ताः कत्थन्त इत्याशयः॥ ७८॥

पूर्वजन्मधनुषा समागतः
सो ऽतिमात्रलघुदर्शनो ऽभवत्।
केवलो ऽपि सुभगो नवाम्बुदः
किं पुनस्त्रिदशचापलाञ्छितः॥ ७९॥

तेन जननान्तरचापेन संयुक्तो राघवो ऽतितरां प्रियदर्शनो ऽभूत्। युक्तं चैतत्। यतः केवलो ऽपि वर्षाजलधरो मनोज्ञः, किं पुनरिन्द्रचापचिह्नितः॥ ७९॥

तेन भूमिनिहितैककोटिना कार्मुकं च बलिनाधिरोपितम्।
प्राप वर्णविकृतिं च भार्गवो वृष्टिधौत इव वासवध्वजः॥ ८०॥

---

**79 d.** °लाञ्छितः ] **V**$\mathrm{V}^M\mathrm{B}_1^M\mathrm{B}_2^M\mathrm{B}_3^M\mathrm{B}_4^M\mathrm{B}_7^M$Mall.Ar.(?)Nā.Jin.; °लाञ्छनः $\mathrm{D}^M\mathrm{B}_5^M$Hem. **80 a.** °निहितैककोटिना ] **V**$\mathrm{V}^M\mathrm{B}_1^M\mathrm{B}_2^M\mathrm{B}_3^{Mpc}\mathrm{B}_4^M\mathrm{B}_5^M\mathrm{B}_7^M$Hem.Jin.; ---मितैककोटिना $\mathrm{T}^M$; °निहितैककोदिना $\mathrm{D}^M$ °निहितैककोना $\mathrm{B}_3^{Mac}$; °निहितैककोटि तत् Mall.; °निमितैककोटि तत् Ar.Nā. **80 cd.** प्राप वर्णविकृतिं च भार्गवो वृष्टिधौत इव वासवध्वजः ] **V**$\mathrm{V}^M\mathrm{B}_1^M\mathrm{B}_2^M\mathrm{B}_3^M\mathrm{B}_4^M\mathrm{B}_5^M\mathrm{B}_7^M$Hem.$^{vl}$Ar.$^{vl}$Jin.; प्राप वर्णविकृतिं च भा--- $\mathrm{T}^M$; निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः Hem.Mall.Ar.Nā.

---

**79** $\mathrm{a}^1$–$\mathrm{b}^6$ $\mathrm{T}^M$ **80** $\mathrm{a}^6$–$\mathrm{c}^9$ $\mathrm{T}^M$

---

**78.1** जामदग्न्ये ] *conj.*; भार्गवे जामदग्न्ये $\mathrm{G}_1$UJ; भार्गवे $\mathrm{PB}^1\mathrm{L}_2$ **78.1** सकोप ] *conj.*; भीमदर्शने सकोपे **V** **78.1** राम° ] $\mathrm{G}_1\mathrm{UB}^1\mathrm{L}_2$; श्रीराम° J **78.2** अनुरूपं प्रत्युत्तरमङ्गीचकार ] *conj.* (cf. Jin.); समर्थमनुरूपमुत्तरम् प्रतिपद्यताङ्गीचकार $\mathrm{G}_1$; समर्थमनुरूपमुत्तरम् प्रत्यपद्यताङ्गीचकार $\mathrm{UPB}^1\mathrm{L}_2$; समर्थमनुरूपमुत्तरं प्रतिपद्यतामंगीचकार J **78.2** कातरो ऽसीति ] $\mathrm{UPB}^1\mathrm{L}_2\mathrm{J}$; कातरोसि $\mathrm{G}_1$ **78.3** हसितवेपितोष्ठः स्मयमानः ] *conj.*; स्मितविकम्पिताधरः स्मयमानः $\mathrm{G}_1\mathrm{UB}^1\mathrm{L}_2\mathrm{J}$; स्मितविकम्पिताधरः हसितेन वेपितः ओष्ठो येन स्मयमानः P **78.3** पौरुषयुक्ताः कत्थन्त ] $\mathrm{PB}^1$; पौरुषयुक्तः कत्थने $\mathrm{G}_1$J; पौरुषयुक्तः कत्थते U; पौरुषयुक्ताः कत्थने $\mathrm{L}_2$ **79.1** जननान्तर° ] $\mathrm{UPB}^1\mathrm{L}_2$; जनान्तरे $\mathrm{G}_1$J **79.1** संयुक्तो ] *conj.*; समागतः संयुक्तो **V** **79.2** यतः ] $\mathrm{G}_1\mathrm{PB}^1\mathrm{L}_2\mathrm{J}$; यथा U **79.2** वर्षाजलधरो ] *conj.*; नवाम्बुचो वर्षाजलधरो $\mathrm{G}_1$; नवाम्बुदो वर्षाजलधरो $\mathrm{UB}^1$J; नवाम्बुदो जलदो P; नवाम्बुदो वर्षजलधरो $\mathrm{L}_2$

यदा च राघवेण ≪बलिष्ठेन≫ धनुरवनमितम्, तदैव पराजयवशात् ≪परशुरामो≫ मुखमालिन्यमवाप। †भूमौ निहिता एका कोटिः प्रान्तो येन†। आसारक्षालित इन्द्रचापो यथा धूसरत्वं प्राप्नोति। स हि पूर्वमनेकरागरमणीयो भवति॥ ८०॥

तावुभावपि परस्परं स्थितौ वर्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनक्षये पार्वणौ शशिदिवाकराविव॥ ८१॥

तावुभावपि रामभार्गवौ सर्वलोक ऐक्षिष्ट यथाक्रमं बहुलक्षीणकान्ती सह सम्मुखं स्थितौ। भार्गवं हीनतेजसमालोक्य राघवो वर्धमानतेजाः संवृत्तः, तमपि महाद्युतिकमीक्षित्वा मुनिरल्पतेजाः स्थितः। परस्परशब्दो ऽत्र सहार्थः। यदि वा परस्परमन्योन्यस्माद्वर्धमानपरिहीनतेजसौ स्थिताविति योज्यम्। सन्ध्यासमये पौर्णमास्याम्भवाविन्दुसूर्याविव॥ ८१॥

तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः॥ ८२॥

---

**81 a.** परस्परं ] Hem.Ar.Nā.; परस्पर° ŚMall.Jin. **81 c.** दिनक्षये ] $G_1$UPJ$V^M B_2^M B_3^M B_5^M B_7^M$; दिनात्यये $B^1 L_2 T^M B_1^M B_4^M$℄; दिदक्षये $D^M$ **82 c.** °मोघमाशुगं ] **V**$D^M V^M B_2^M B_3^M B_4^M B_5^M B_7^M$Mall.Ar.Nā.; °मोघसायकं $B_1^M$ (supported by Mahimabhaṭṭa); °वन्ध्यमाशुगं Hem. (Jin. uncertain)

---

**80** तदैव पराजयवशात् ] तदै---जयवशाद् $L_2$ **81** $b^7$–$d^8$ $T^M$ **82** $c^9$–$d^{11}$ $T^M$

---

**80.1** यदा च राघवेण ] *em.*; यदा च राघवेन $G_1 U B^1 L_2$; यदा च राघवेनण P; यदि च श्रीरामेण J **80.1** बलिष्ठेन ] *conj.* (cf. Jin.); भूमावेकां कोटिं प्रान्तं निधाय बलेन $G_1 U B^1$; भूमा--- कोटिं प्रान्तं निधाय बलेन $L_2$; भूमामेकां कोटिं प्रान्तं निधाय बलेन J; *om.* P **80.1** धनुरवनमितम् ] $G_1 P B^1 L_2$J; धनुरवनामितम् U **80.2** परशुरामो मुखमालिन्यमवाप ] *conj.* (cf. Jin.); भार्गवो वर्णविकृतिं मुखमालिन्यं प्राप $G_1 U P B^1 L_2$; भार्गवो वर्णविकृतिं च मुखमालिन्यं प्राप J **80.2** भूमौ निहिता ] $G_1 U P B^1$J; ---नीतिता $L_2$ **80.3** °क्षालित ] $G_1$UPJ; °क्षालिता $B^1$; °लक्षित $L_2$ **81.1** रामभार्गवौ ] $G_1 U P B^1 L_2$; श्रीरामभार्गवरामौ J **81.1** सर्वलोक ऐक्षिष्ट ] $G_1 P B^1 L_2$J; सर्वलोका ऐक्षिष्यन्त U **81.1** बहुलक्षीणकान्ती ] *conj.*; वर्धमानपरिहीनतेजसौ बहुलक्षीणकान्ती **V** **81.2** सह सम्मुखं स्थितौ ] *conj.*; परस्परस्थितौ सह सम्मुखं स्थितौ $G_1 P L_2$J; परस्परस्थितौ सह सम्मुखस्थितौ U; परस्परस्थितौ सह सम्मुखे स्थितौ $B^1$ **81.3** राघवो वर्धमानतेजाः संवृत्तः, तमपि महाद्युतिकमीक्षित्वा ] *conj.*; *om.* $G_1 U B^1 L_2$J(eyeskip); राघवो वर्धमानतेजाः संवृत्तः तमपि मद्युतिकमीक्षित्वा P **81.3** मुनिरल्पतेजाः ] $P B^1 L_2$; मनुरल्पतेजाः $G_1$J; रामो ऽनल्पतेजाः U

करुणाकोमलो राघवः तं भार्गवमात्मन्येव प्रतिहतपराक्रममालोक्य निजं च शरं चापे योजितं सफलं विचार्यावादीत्। कारुण्याद्वृथाशरसन्धानेन च दूयमान इत्यर्थः। कुमारतुल्यपराक्रमः॥ ८२॥

न प्रहर्तुमलमस्मि निर्दयं
विप्र इत्यभिभवत्यपि त्वयि।
शंस किं गतिमनेन पत्त्रिणा
हन्मि लोकमथ ते मखार्जितम्॥ ८३॥

अहं निर्घृणं यथा भवति तथा त्वयि बाधितुं न शक्तः परिभवं कुर्वाणे ऽपि यतो ब्राह्मणो ऽसि। अयं च वैष्णवः शरो न मोघो भवितुमर्हति। तदाख्याहि। किमनेन ≪बाणेन≫ गतिवैकल्यं करवाणि, अथवा तव यज्ञार्जितं स्वर्गं नाशयामीति॥ ८३॥

प्रत्युवाच तमृषिर्न तत्त्वत-
स्त्वां न वेद्मि पुरुषं पुरातनम्।
गां गतस्य तव धाम वैष्णवं
कोपितो ह्यसि मया दिदृक्षुणा॥ ८४॥

**83 d.** लोकमथ ] ŚHem.Jin.; लोकमुत Mall.Ar.(?)Nā. **84 d.** मया दिदृक्षुणा ] $G_1$UPJ$D^M$ $B_3^M B_5^M B_7^M$ **C** (Jin. uncertain); दिदृक्षुणा मया $B^1 L_2 V^M B_1^M B_2^M B_4^M$

**83** $a^1$–$a^9$ $T^M$ **84** $a^1$–$b^3$, $b^5$, $b^7$–$b^9$ $T^M$

**82.1** करुणाकोमलो ] *conj.*; कृपामृदुः करुणाकोमलो **V** **82.1** राघवः ] $G_1$U$B^1L_2$; श्रीराघवः J **82.2** योजितं सफलं ] *conj.*; योजितममोघं सफलं $G_1$U$B^1L_2$J; रोपितं योजितममोघं सफलम् P **82.2** °वादीत् ] U; °वदीत् $G_1$P$B^1L_2$J **82.2** कारुण्याद्वृथाशरसन्धानेन च ] UP$B^1$; कारुण्याद्वृथशरसन्धानेन $G_1$; कारुण्यात् वृथशरसंधानेन च $L_2$J **82.3** दूयमान ] $G_1$UJ; धूयमान P; दूयमाना $B^1L_2$ **82.3** कुमारतुल्यपराक्रमः ] *conj.*; हरसूनुसन्निभः कुमारतुल्यपराक्रमः **V** **83.1** निर्घृणं ] *conj.*; निर्दयं $G_1$U$B^1L_2$J; निर्दयं निर्घृणं P **83.1** त्वयि बाधितुं ] *conj.*; त्वयि प्रहर्तुं बाधितुं $G_1$P$B^1$J; प्रहर्तुं बाधितुं U; त्वयि प्रहर्तुं बधितुं $L_2$ **83.1** न शक्तः परिभवं ] *conj.*; नालमस्मि न शक्तः परिभवं $G_1B^1$J; नालमस्मि न शक्तः परिभवे $L_2$ **83.1** कुर्वाणे ] $G_1$P$B^1L_2$J; कुर्वाणो U **83.2** वैष्णवः शरो ] $G_1$U$B^1L_2$J; वैष्णवशरो P **83.3** बाणेन गतिवैकल्यं ] *conj.* (cf. Jin.); पत्त्रिणा गतिवैकल्यं $G_1$P$B^1L_2$J; पत्त्रिणा गतिं कैवल्यं U **83.3** स्वर्गं ] *conj.*; लोकं स्वर्गं **V**

भार्गवो राघवं प्रत्यब्रवीत्। अहं त्वां सनातनं पुरुषं नारायणाख्यं परमार्थतो न न जाने, जान एव। किन्तु भुवमवतीर्णस्य तव दिव्यं तेजो द्रष्टुमिच्छुना जानानेनापि मया ≪रोषितो≫ ऽसि। कोपं विना कथं धनुर्भङ्गो भवेत्॥ ८४॥

भस्मसात्कृतवतः पितृद्विषः
पात्रसाच्च वसुधां ससागराम्।
आहितो जयविपर्ययो ऽपि मे
श्लाघ्य एव परमेष्ठिना त्वया॥ ८५॥

मम त्वया पराजयो ऽपि स्तुत्य एव कृतः, न व्रीडावहः। यतस्त्वं सर्वोत्कृष्टः। कीदृशस्य मम। क्षत्रियान् दग्धान् कृतवत इति वीर्यवत्त्वोक्तिः। समुद्रसहितां भुवं पात्राधीनां कृतवत इति दातृत्वकथनम्। रामस्योत्कर्षप्रतिपादनाच्चात्मस्तुतिरप्येवंविधा भार्गवस्य न विरुद्धा। क्षत्रियानुन्मूल्य यज्ञे भार्गवेण कश्यपाय भूः प्रतिपादितेत्यागमः। भस्मसादिति 'विभाषा साति कार्त्स्न्ये', पात्रसादि-

---

**85 b.** पात्रसाच्च ] $\mathbf{V}D^{M}V^{M}B_1^{M}B_2^{M}B_3^{M}B_5^{M}B_7^{M}$Mall.Ar.Nā.Jin.; विप्रसाच्च $B_4^{M}$Hem.

---

**85** $a^7$–$b^2$ $T^{M}$

---

**85.5** विभाषा साति कार्त्स्न्ये *Aṣṭādhyāyī* 5.4.52.

---

**84.1** भार्गवो राघवं ] *conj.*; ऋषिर्भार्गवस्तं राघवं $G_1UPB^1L_2$; ऋषिर्भार्गवस्तं श्रीराघवं J **84.1** सनातनं ] *conj.*; पुरातनं $G_1$; पुराणं सनातनं U; पुरातनं सनातनं $PB^1L_2J$ **84.2** न न जाने, जान ] P; जाने न जाने $G_1B^1L_2J$; जातं न जाने U **84.2** दिव्यं तेजो ] *conj.*; वैष्णवं दिव्यं तेजो $G_1UPB^1J$; धाम वैष्णवं तेजो दिव्यं $L_2$ **84.3** जानानेनापि ] $PB^1L_2J$; जानामि नापि $G_1$; ज्ञानेनापि U **84.3** रोषितो ऽसि ] *conj.* (cf. Jin.); कोपितो ऽसि $UPB^1L_2J$; कोपितो स्मि $G_1$ **84.3** कोपं ] UP; कोपि $G_1B^1L_2$; कोपो J **85.1** स्तुत्य ] *conj.*; श्लाघ्यः स्तुत्य $G_1UB^1L_2J$; कृतः श्लाघ्यः स्तुत्य P **85.1** एव कृतः ] *conj.*; एवाहितः कृतः $G_1UPB^1J$; एव हितः कृतः $L_2$ **85.1** सर्वोत्कृष्टः ] *conj.*; परमेष्ठी सर्वोत्कृष्टः $G_1UPB^1L_2$; परमेष्टी सर्वोत्कृष्टः J **85.2** क्षत्रियान् दग्धान् ] *conj.*; पितृद्विषः क्षत्रियान्भस्मसाद्दग्धा $G_1B^{1ac}$; पितृद्विषः क्षत्रियान् भस्मसाद्दग्धान् $UPB^{1pc}J$; +पि+तृद्विषः क्षत्रियान्भस्मस्मसाद्दग्धान् $L_2$ **85.2** वीर्यवत्त्वोक्तिः। समुद्रसहितां भुवं पात्राधीनां कृतवत इति ] *om.* U(eyeskip) **85.3** पात्राधीनां ] $PB^{1pc}$; पात्रादीनां $G_1B^{1ac}L_2J$ **85.3** दातृत्वकथनम् ] $G_1B^1L_2J$; दतृत्वकथनम् U; धातृत्वकथनं P **85.4** रामस्योत्कर्षप्रतिपादनाच्चा° ] $G_1UPB^1L_2$; श्रीरामस्योत्कर्षप्रतिपादनाश्चा° J **85.4** क्षत्रियानुन्मूल्य ] P; क्षत्रियानुकूल्ये $G_1U$; क्षत्रियानुकूले $B^1L_2$; क्षन्ना(?)यानुकूले J **85.5** भार्गवेण कश्यपाय भूः ] P; तेन कश्यपाय भूयः $G_1J$; तेन काश्यपाय भूयः U; तेन कश्यपाय भूः $B^1$; तेन कश्यपाय भू $L_2$ **85.5** साति कार्त्स्न्ये ] $G_1P$; कार्त्स्न्ये साति U; सातिः कार्त्स्न्ये $B^1$; सातिः का--- $L_2$; सातिः कार्त्स्ये J

ति तु ‘तदधीनवचने’ इति॥ ८५॥

तद्गतिं गतिमतां वरेप्सितां
पुण्यतीर्थगमनाय रक्ष मे।
पीडयिष्यति न मां खिलीकृता
स्वर्गसङ्गतिरभोगलोलुभम्॥ ८६॥

पुरुषाणामुत्तम तस्माच्चरणगमनं मम पवित्रतीर्थभ्रमणाय ≪पालया≫भिप्रेतम्, यतो गतिविकलस्य मे निजस्थानमहेन्द्रपर्वतगमनमेव दुर्घटम्। स्वर्गसङ्गमो नाशितो न मां व्यथयिष्यति, यतो ऽहं जितेन्द्रियत्वाद्विषयानभिलाषी। तस्मात्सुकृतार्जितांल्लोकान् मम जहि॥ ८६॥

प्रत्यपद्यत तथेति राघवः
प्राङ्मुखश्च विससर्ज सायकम्।

---

**86 a.** तद्गतिं गतिमतां ] $G_1UPB^1JB_4^MB_7^M$Ar.Nā.; तद्गतिं --- मतिमतां $L_2$; उद्गतिं मतिमतां $D^M$; तद्गतिं मतिमतां $V^MB_1^MB_2^MB_3^MB_5^{Mpc}$Hem.Mall.Jin.; तद्गतिं ×तिमतां $B_5^{Mac}$ **86 c.** मां ] $G_1UB^1L_2JT^MD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.Jin.; मा PAr.(?)Nā. **86 d.** °सङ्गतिरभोगलोलुभम् ] $G_1UPJB_2^MB_3^MB_4^MB_5^MB_7^M$; °सङ्गतिरभोगलोलुभाम् $B^1$; °सङ्गतिरभोग---लभम् $L_2$; °सङ्गतिरभोगलोलुपम् $D^MV^MB_1^M$Jin.; °पद्धतिरभोगलोलुभम् Hem. Ar.Nā.; °पद्धतिरभोगलोलुपम् Mall.

---

**86** $a^{11}$–$d^2$ $T^M$

---

**85.6** तदधीनवचने *Aṣṭādhyāyī* 5.4.54.

---

**85.6** तदधीनवचने इति ] $UPB^1L_2J$; तधीतवचने इति $G_1$ **86.1** पुरुषाणामुत्तम ] P; हे गतिमतां वर पुरुषाणामुत्तम $G_1B^1$; हे मतिमतिवर पुरुषश्रेष्ठ U; हे मतिमतां वर पुरुषाणामुत्तम $L_2$; हे गतिमतां वर पुरुषाणामुत्तम श्रीराम J **86.1** तस्माच्चरणगमनं ] *conj.*; तत्तस्माद्गतिं चरणगमनं $G_1UPB^1J$; ---स्माद्गतिं चरणगमनं $L_2$ **86.1** मम ] $G_1PB^1L_2J$; मे U **86.1** पवित्र° ] $G_1UPB^1J$; पवित्री° $L_2$ **86.1** पालयाभिप्रेतम् ] *conj.*; रक्षाभिप्रेतम् $PB^1L_2$; रक्ष अभिप्रीतां $G_1UJ$ **86.2** गतिविकलस्य ] $PB^1L_2$; गतिविकस्य $G_1J$; गतिविकारस्य U **86.2** निजस्थान° ] $G_1PL_2J$; निजस्थानं $UB^1$ **86.3** स्वर्गसङ्गमो नाशितो न मां ] $G_1UJ$; स्वर्गसङ्गमस्तु नाशितो ऽपि मां न $PB^1$; सुर्गसङ्गमस्तु राशितो पि मां न $L_2$ **86.3** व्यथयिष्यति ] $G_1PB^1J$; व्यथयति U; व्ययिष्यति $L_2$ **86.3** विषयानभिलाषी ] *conj.*; अभोगलोलुभा न विषयाभिलाषी $G_1J$; अभोगलोलुभः न विषयाभिलाषी U; अभोगलोलुभः विषयानभिलाषी $PB^1L_2$ **86.4** सुकृतार्जितांल्लोकान् ] $PB^1L_2$; सुकृतैर्जितांल्लोकान् $G_1J$; सुकृतैर्लोकान् U

भार्गवस्य सुकृतो ऽपि सो ऽभवत्
स्वर्गमार्गपरिघो दुरत्ययः॥ ८७॥

दाशरथिः ‘एवं करिष्ये’ इति मुनिवचनमङ्गीचकार, पूर्वाभिमुखः पूर्वस्यां दिशि शरमक्षिपच्च। स च शरो जामदग्न्यस्य पुण्यकरणपात्रस्यापि स्वर्गलोकद्वारार्गलो दुर्निवार आसीत्, अद्यापि प्रवेशनिरोधात्। शक्रलोकस्य पौरस्त्यत्वात्सायकस्य प्राङ्मुखीभूय क्षेपः॥ ८७॥

राघवो ऽथ चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत्।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव शोभते॥ ८८॥

अनन्तरं दाशरथिर्मुनेर्भार्गवस्य क्षम्यतामिति ब्रुवन् पादयोरपतत्। यस्माद्बलवतां बलेनाभिभूतेषु रिपुषु पेशलतैव शोभते॥ ८८॥

साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे॥ ८९॥

भार्गवो लक्ष्मणसहितं तदग्रजं राघवमित्थं वदन्नन्तर्दधे। किमूचिवानित्याह

---

**88 a.** ऽथ ] **V**$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M$Hem.Jin.; ऽपि $B_5^{Mac}$Mall.Ar.(?)Nā. ($B_5^{Mac}$ uncertain) **88 d.** शोभते ] $PB^1L_2JT^MD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Jin.; शोभिते $G_1$; कीर्तये Hem.Mall.Ar.(?)Nā. **89 .** ] Swapped with 90 in $T^MB_2^MB_5^M$**C**. **89 c.** वचः ] $G_1B^1L_2V^MB_1^MB_2^MB_4^MB_5^M$Mall.Ar.(?)Nā.; ततः $UPJD^MB_3^MB_7^M$Hem. (Jin. uncertain)

---

**87** $c^7$–$d^{11}$ $T^M$ **88** $a^1$, $d^6$–$d^{11}$ $T^M$ **88** U accidentally repeats *pāda* b in place of d. **89** $a^4$–$b^{11}$ $T^M$

---

**87.1** दाशरथिः ] *conj.*; राघव $G_1UPB^1L_2$; श्रीराघव J **87.1** पूर्वाभिमुखः ] $G_1UPB^1L_2$; प्राङ्मुखः पूर्वाभिमुखः J **87.2** स च शरो ] $G_1PB^1L_2$; स दाशरथिशरो U; स च सायको J **87.2** पुण्यकरणपात्रस्यापि ] *conj.*; पुण्यकृतो ऽपि $G_1B^1L_2J$; पुण्यकृत्यो ऽपि U; च पुण्यकृतो ऽपि पुण्यकरणपात्रस्यापि P **87.3** दुर्निवार आसीत् ] *conj.*; दुरत्ययो दुन्निवार आसीत् $G_1B^1$; दुरत्ययो दुर्निवार आसीत् $PL_2J$; दुरत्ययो दुर्निवारितः U **87.4** प्राङ्मुखी° ] $PB^{1ac}L_2$; पराङ्मुखी° $G_1UB^{1pc}J$ **87.4** क्षेपः ] $UPB^1L_2$; क्षीपः $G_1J$ **88.1** अनन्तरं ] *conj.*; अथानन्तरं $G_1UPB^1L_2$; अथांतरं J **88.1** क्षम्यतामिति ] $UPB^1L_2J$; क्षमितामिति $G_1$ **88.1** पादयोरपतत् ] *conj.*; चरणौ समस्पृशत् पादयोरपतत् **V** **88.2** बलेनाभिभूतेषु ] U; बलेन निर्जितेष्वभिभूतेषु $G_1J$; बलेन निर्जितेषु $PB^1$; बले बलेन निर्जितेषु $L_2$ **88.2** पेशलतैव ] *conj.*; प्रणतिः पेशलतैव $G_1PB^1J$; प्रणतिः U; प्रणमितः पंसलतव $L_2$ **88.2** शोभते ] $UPB^1L_2J$; शोभिते $G_1$ **89.1** भार्गवो ] *conj.*; ऋषिर्भार्गवो $G_1UPB^1J$; ऋषिभार्गवो $L_2$ **89.1** तदग्रजं ] $G_1^{pc}UB^1L_2$; तदजं $G_1^{pc}$; तदग्रजं श्री° J

यस्मान्मां क्षमयसि तस्मादहं व्रजामि। तव च राक्षसवधं चिकीर्षतो विघ्नो माभूदिति॥ ८९॥

कुत एवमुक्तवानित्याह

राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यतः।
नन्वनिन्दितफलो मम त्वया निग्रहो ऽप्ययमनुग्रहीकृतः॥ ९०॥

यस्माज्जननीकुलागतं क्षत्तृजातं राजसभावं क्रोधलक्षणं तिरस्कृत्य पितृक्रमोचितं शममेव त्वयाहं प्रापितः। माता ह्यस्य रेणुका क्षत्रिया। पिता तु जमदग्निर्ब्राह्मणः। शमप्राप्तिश्च तत आरभ्य निर्वैरत्वात्। तस्मात्पराजयो ऽप्यसौ स्तुत्यफलः प्रसादरूप एव मम त्वया विहितः। रजसो विकारो राजसः। अथवा रजसा चरतीति राजसः॥ ९०॥

तस्मिन्गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम्।
तस्याभवत्क्षणशुचः परितोषलाभः

---

**90 b.** यतः ] $G_1PB^1L_2JB^M_1B^M_3B^M_4B^M_5B^M_7$Jin.; यदा $UD^MB^M_2$Hem.Mall.Ar.Nā. **91 c.** तस्याभवत्क्षणशुचः ] $G_1UL_2JT^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Hem.Mall.Ar.(?)Nā.; तस्याप्यभूत्क्षणशुचः P; तस्याभवत्क्षणशुभः $B^1$; तस्याभवत्क्षणशुच $D^M$; तस्याभवद्गतशुचः Jin.

---

**89** क्षमयसि ] ---सि $L_2$ **90 .** $V^M$ skips this verse. $a^1$–$b^2$ $T^M$ **91** $b^{11}$–$c^8$ $T^M$

---

**89.2** व्रजामि ] *conj.*; साधयामि व्रजामि $G_1UPB^1J$; साधयामि $L_2$ **89.2** तव च ] $G_1PB^1L_2J$; तव U **89.2** राक्षसवधं चिकीर्षतो ] *conj.*; देवकार्यं राक्षसवधमुप(द $G_1J$)पादयिष्यतश्चिकीर्षतो $G_1UPB^1J$; देवकार्यं राक्षस---पपादयिष्यतश्चिकीर्षतो $L_2$ **89.4** कुत एवमुक्तवानित्याह ] $G_1UB^1J$; कुतएवमाह इत्याह P; कुत---माहेत्याह $L_2$ **90.1** यस्माज्जननीकुलागतं क्षत्तृजातं ] *conj.*; यस्मान्मा(त्मा $G_1$)तृकं जननीकुलागतं $G_1UB^1L_2J$; यस्मान्मातृकं जननीकुलागतं क्षत्तृजातं P **90.1** °भावं ] $G_1PB^1L_2$; °भाव° UJ **90.1** °लक्षणं ] $G_1UB^1J$; °लक्ष्मणं $L_2$ **90.2** पितृक्रमोचितं ] $G_1UB^1L_2J$; पितृकुलोचितं P **90.3** जमदग्निर्ब्राह्मणः ] P; जामदग्निर्ब्राह्मणः $G_1B^1L_2$; जामदग्निब्राह्मणः U; जामदग्निः ब्रह्मणः J **90.3** शमप्राप्तिश्च ] $G_1UPL_2J$; शमं प्राप्तिश्च $B^1$ **90.3** तत आरभ्य ] $G_1UPB^1J$; तत्र आरभ्यः $L_2$ **90.3** निर्वाइरत्वात् ] $G_1PB^1L_2J$; निर्वैरात् U **90.3** तस्मात्पराजयो ] *conj.*; तस्मान्निग्रहः पराजयो **V** **90.4** प्रसादरूप ] *conj.*; अनुग्रहीकृतः प्रसादरूप **V** **90.4** विहितः ] P; कृतः $G_1UB^1J$; क्षतः $L_2$ **90.4** रजसो ] $UPB^1L_2J$; राजसो $G_1$ **90.5** अथवा ] $G_1PB^1L_2J$; अथ U **90.5** चरतीति राजसः ] $G_1PB^1L_2J$; चरतीति राजसः॥ ९०॥ युगलकं U

कक्षाग्निलङ्घिततरोरिव वृष्टिसेकः॥ ९१॥

भार्गवे महेन्द्राद्रिं याते सति दशरथः प्राप्तजयं तनयमालिङ्ग्य स्नेहवशाद्भूयो जातमबुद्ध, मृत्युमुखनिर्याणात्। अतश्च पूर्वं मुहूर्तमात्रमुद्विग्नस्य सतः पश्चाद्धर्षप्राप्तिस्तृणानलाक्रान्तस्य वृक्षस्यासारपातनिभो ऽभवत्। वसन्ततिलकम्॥ ९१॥

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः।
पुरमविशदयोध्यां मैथिलीदर्शनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम्॥ ९२॥

अनन्तरं रचितपरार्ध्यपटकुटीके ऽध्वनि पञ्च वा षड् वा निशा अतिवाह्य शर्वनिभो भूपतिरयोध्यां पुरीं प्राविक्षत्। सीताविलोकिनीनां ≪वनितानां नय-

---

**91 d.** कक्षा° ] $G_1PB_1^MB_2^MB_3^MB_5^MB_7^M$Hem.Mall.Ar.(?)Nā.Jin.; कक्ष्या° $UB^1L_2V^MB_4^M$; वक्ष्या° $D^M$; काला° J • वृष्टिसेकः ] P; वृष्टिपातः $G_1UB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$𝕮 **92 a.** °पकार्ये ] $G_1UPL_2D^MV^MB_1^MB_3^MB_5^MB_7^M$Hem.Mall.Jin.; °पकारे $B^1B_2^MB_4^M$; °पकार्षे J; °पकर्ये Ar.(?)Nā. **92 c.** पुरम् ] Σ; पुनर् P • °दर्शनीनां ] $G_1B^1L_2JD^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.Jin.; °दार्शनीना U; °दर्शिनीनां PAr.Nā.

---

**92** $b^{14}$–$c^3$ $T^M$

---

**91.1** भार्गवे ] *conj.*; तस्मिन्भार्गवे **V** **91.1** याते ] $G_1UJ$; गते $PB^1L_2$ **91.1** तनयमालिङ्ग्य ] *conj.*; रामं तनयमालिङ्ग्य $G_1PB^1L_2$; रामं तनयं आलिङ्ग्य U; श्रीरामं तनयमालिंग्य J **91.2** मृत्यु° ] $G_1UB^1L_2J$; भार्गवमृत्यु° P **91.3** पश्चाद्धर्षप्राप्तिस् ] *conj.*; पश्चात् परितोषलाभः हर्षप्राप्तिः $G_1UB^{1pc}J$; पश्चात् परितोषलाभः $PB^{1ac}L_2$ **91.3** तृणानलाक्रान्तस्य ] *conj.*; कक्ष्यानलाक्रान्तस्य $G_1UB^1$; कक्षानलाक्रान्तस्य PJ; कक्ष्यानलाक्षान्तस्य $L_2$ **91.4** वसन्ततिलकम् ] $G_1UPJ$; वसन्ततिलकं वृत्तम् $B^1L_2$ **92.1** अनन्तरं ] *conj.*; अथानन्तरं **V** **92.1** रचितपरार्ध्यपटकुटीके ] *conj.* (cf. Jin.); क्लृप्तरम्योपकार्ये रचितपरापरा(परापर $G_1$; परस्परा U)र्ध्यपटकुटीके $G_1^{pc}UJ$; क्लृप्तरम्योपकार्ये ×कतिचिदवनिपाल× रचितपरापरर्ध्यपटकुटीके $G_1$; क्लृप्तरम्योपकारे रचितपरार्ध्यपुटकुटीके P; क्लृप्तरम्योपकारे रचितपरापरार्ध्यपटकुटीके $B^1$; क्लृप्तरम्योपकारे रचितपरपराम्यपटकुटीके $L_2$ **92.2** पुरीं ] UP; पुरं पुरीं $G_1L_2J$; पुरं पुरी $B^1$ **92.2** सीताविलोकिनीनां वनितानां ] *conj.*; कीदृशीं मैथिली सेता तद्विलोकिनीनामङ्गनाम् $G_1$; कीदृशीं मैथिली सीता तद्विलोकिनीनामङ्गनानां $UPB^1$; कीदृशीं मै---तां तद्विलोकिनीनां अङ्गनानां ×अङ्गनाना× $L_2$; कीदृशीं मैथिलीं सीतां तद्विलोकनानामंऽगनानां J

नैः≫ ≪ईन्दीवरितवातायनाम्,≫ अक्ष्णामुत्पलनिभत्वात्। मालिनीवृत्तमिति भद्रम्॥ ९२॥

इति रघुवंशे महाकाव्ये सटीके एकादशः सर्गः॥

---

**92** मालिनी° ] --- $L_2$

---

**92.3** नयनैः ] *conj.*; लोचनैः **V** **92.3** इन्दीवरितवातायनाम् ] *conj.* (cf. Jin.); कुवलयिता इन्दीवरसहिताः (ता U) कृता गवाक्षा वातायनानि यस्यास्तां $G_1$UPJ; कुवलयतगवाक्षां कुवलयिता इन्दीवरसहिताः कृता गवाक्षा वातायनानि यस्यास्ताम् $B^1$; ---यितगवाक्षां कुवलयिता इन्दीवरसहिताः कृता---तायनानि यस्यास्ताम् $L_2$ **92.4** °वृत्तमिति भद्रम् ] $G_1PB^1L_2$; °वृत्तम् U; °वृत्तमिति भद्रमों J

# द्वादशः सर्गः॥

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान्।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि॥ १॥

दशरथो ऽभ्यर्णविनाशो ऽभवत्, यतो ऽवस्थावसानं प्राप्तः, अत एवोपभुक्तो न तु भोक्ष्यमाणः शब्दस्पर्शरसरूपगन्धेष्वभिष्वङ्गो येन सः, दीपशिखेव प्रभाते। प्रत्यूषे हि प्रदीपो निर्विष्ट≪विषय≫स्नेहः पीतपात्रतैलो भवति, अत एव दशान्तं वर्तिप्रान्तमुपैति, अत एवासन्नशान्तिश्च भवति। सर्गे ऽत्र वृत्तमनुष्टुप्॥ १॥

तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।

---

**1 a.** निर्विष्ट° ] Σ; निर्विघ्न° U

---

**1.1** दशरथो ] *conj.*; स दशरथः $G_1UPB^1L_2J$ **1.1** ऽभ्यर्णविनाशो ऽभवत् ] *conj.*; आसन्ननिर्वाणः अभ्यर्णविशानः प्रभातदीप इवासीत् $G_1UJ$; निकटो विनाशो मरणं यस्य सस्तथोक्तो ऽभवत् P; आसन्ननिर्वाणः अभ्यर्णविनाशः प्रभातदीप इवासीत् $B^1L_2$ **1.1** ऽवस्थावसानं प्राप्तः ] *conj.*; दशान्त दशमीं दशामुपेयिवान् प्राप्तः $G_1L_2J$; दशान्तां दशमीमवस्थांमुपेयिवान् प्राप्तः U; दशान्तं दशम्यावस्थावसानमुपेयिवान् प्राप्तः P; दशान्तं दशमीं दशामुपेयिवान् प्राप्तः $B^1$ **1.2** अत एवोपभुक्तो न तु भोक्ष्यमाणः ] *conj.*; अत एव निर्विष्ट उपभुक्तो न तु भोक्ष्यमाणः $G_1UB^1L_2J$; अत एव निर्विष्ट उपभुक्तः अनन्तभोक्ष्यमाणः P **1.2** शब्दस्पर्शरसरूपगन्धेष्व् ] *conj.*; विषयेषु शब्दादिषु स्नेहो $G_1UB^1L_2J$; विषयेषु शब्दस्पर्शरसरूपगन्धेषु स्नेहो P **1.2** सः, दीपशिखेव ] P; *om.* $G_1UB^1L_2J$ **1.3** प्रभाते ] P; *om.* $G_1UB^1L_2J$ **1.3** प्रत्यूषे हि ] $G_1UB^1L_2J$; प्रत्यूषे P **1.3** निर्विष्टविषयस्नेहः ] *conj.*; निर्विष्टस्नेहः $G_1UPB^1L_2J$ **1.3** पीतपात्रतैलो ] P; पीततैलो $G_1UB^1J$; प्रीततैलो $L_2$ **1.4** दशान्तं वर्तिप्रान्तमुपैति ] *conj.*; दशान्तिप्रान्तमुपैति $G_1UB^1L_2J$; दशान्तं वर्तिप्रान्तं गतश्च P **1.4** °शान्तिश्च भवति ] P; °शान्तिश्च $G_1UB^1L_2J$ **1.4** सर्गे ऽत्र ] $UPB^1L_2J$; सर्गेत्रि $G_1$ **1.5** वृत्तमनुष्टुप् ] $PB^1J$; वृत्तमानुष्टुप् $G_1$; वृत्तमानुष्ठुप् $UL_2$

© CSABA DEZSŐ, DOMINIC GOODALL AND HARUNAGA ISAACSON, 2025 | DOI:10.1163/9789004721746_007
This is an open access chapter distributed under the terms of the CC BY-NC-ND 4.0 license.

कैकेयीशङ्कयेवाह पलितच्छद्मना जरा॥ २॥

तं दशरथं केशशौक्ल्यव्याजेन «विस्रंसा»—शुक्ललोमनिर्भरश्रोत्रविवरत्वात्—रामो ऽधुना यौवराज्ये ऽभिषिच्यतामिति कैकेयीश्रवणभयेनेव श्रोत्रे ऽवदत्। वर्षीयांसमात्मानमवलोक्य राजा रामं राजानमचिकीर्षदिति वाक्यार्थः। केशशौक्ल्यं जरायाः कार्यम्॥ २॥

सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः।
प्रत्येकं ह्लादयां चक्रे कुल्येवोद्यानपादपान्॥ ३॥

रामस्य राज्याभ्युदयवार्ताखिलान् पौरान् सुखितांश्चकार, जलसरणिरुपवनतरूनिव, यतो गुणनिधित्वात्पौरप्रियस्य॥ ३॥

तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया।
दूषयामास कैकेयी शोकोष्णैः पार्थिवास्रुभिः॥ ४॥

---

**2 .** The editor of Hem. prints the *pāda*s in the order adcb. **3 d.** कुल्येवो° ] UPJ$V^{M}$ $B_1^{M}B_2^{M}B_3^{M}B_4^{M}B_5^{M}B_7^{M}$**C**; तुल्येवो° $G_1B^1$; कुल्येवि° $L_2$; कुल्येव्यो° $D^{M}$ **4 b.** कल्पितं क्रूरनिश्चया ] Σ; कल्पितक्रूरनिश्चया Hem. **4 d.** शोकोष्णैः पार्थिवास्रुभिः ] U$B^1L_2$J$V^{M}$ $B_1^{Mac}B_3^{M}B_4^{M}B_5^{M}B_7^{M}$; शोकोष्णैः पार्थिवाश्रुभिः $G_1$Hem.Mall.Ar.Nā.; शोकोष्णैर्वाष्पबिन्दुभिः P$D^{M}B_1^{Mpc}B_2^{M}B_5^{Mvl}$; शोकोष्णैर्नयनाश्रुभिः Jin. (?)

---

**2.1** केशशौक्ल्यव्याजेन ] UP$B^1$J; केशवशौक्ल्यव्याजेन $G_1$; केशशौक्ल्यर्व्याजेन $L_2$ **2.1** विस्रंसा ] *conj.*; जरा $G_1$UP$B^1L_2$J **2.2** शुक्ललोम···ऽभिषिच्यतामिति ] *om.* U **2.2** शुक्ललोम° ] $G_1$P$B^1$J; शुक्ललोमलोम° $L_2$ **2.2** °विवरत्वात्—रामो ] $G_1B^1L_2$; °निर्भरत्वात् रामो P; °विवरत्वात् श्रीरामो J **2.2** कैकेयी° ] $G_1$UP$B^1$J; काकीयी° $L_2$ **2.2** °भयेनेव ] *conj.*; °शङ्कयेव $G_1$U$B^1L_2$J; °शङ्काभयेनेव P **2.3** श्रोत्रे ऽवदत् ] P; श्रोत्रवदत् $G_1B^{1ac}L_2$J; श्रोत्रमवदत् U$B^{1pc}$ **2.3** वर्षीया° ] $G_1$UP$B^1L_2$; वंषीया° J **2.3** रामं ] $G_1$UP$B^1L_2$; श्रीरामं J **2.4** °ति वाक्यार्थः ] $G_1$P$B^1L_2$J; °त्यर्थः U **2.4** °शौक्ल्यं ] UP$B^1$J; °शौक्ल्य $G_1$; °शौक्यं $L_2$ **3.1** रामस्य राज्याभ्युदयवार्ता ] *conj.*; रामस्याभ्युदयश्रुतिः राजाभ्युदयवार्ता $G_1$; रामस्याभ्युदयश्रुतिः राज्याभ्युदयवार्ता U; सा रामस्याभ्युदयश्रुतिः राज्याभ्युदयवार्ता P$B^{1pc}$; स+ा+रामस्याभ्युदयश्रुतिः राज्याभ्युदयवार्ता $B^1$; सारमस्याभ्युदयश्रुतिः राजाभ्युदयवार्ता $L_2$; श्रीरामस्याभ्युदयश्रुतिः राज्याभ्युदयवार्त्त J **3.1** अखिलान् ] $G_1$UP$B^1$J; अलि ान् $L_2^{ac}$; अलान् $L_2^{pc}$ **3.1** पौरान् ] $G_1$P$B^1L_2$J; पौरां U **3.1** सुखितांश्चकार ] *conj.*; ह्लादयां चक्रे सुखितांश्चकार UP$B^1L_2$; ह्लादयां चक्रे सुखितां चकार $G_1$J **3.1** जलसरणिर् ] *conj.*; तुल्या जलसरणिः $G_1B^{1ac}$; कुल्या जलसरणिः UP$B^{1pc}$J; कुजव्लसरणिः $L_2$

ततो यथावद्रामस्य रचितामभिषेकसामग्रीं कठिनग्रहा कैकेयी दुःखतप्तैर्दशरथवाष्पैरदूषयत्। शोकजलेन हि मङ्गलवार्यप्यपवित्रीभवति॥ ४॥

एतदेव वितानयितुमाह—

सा किलाश्वासिता भर्त्रा चण्डी तत्संश्रुतौ वरौ।
उद्ववर्हेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ॥ ५॥

कैकेयी क्रूरा राज्ञानुनीता सती तेनादौ देवासुरे युद्धे ऽङ्गीकृतौ वरौ द्वावुदीरयामास। प्रावृषि शक्राभिवृष्टा क्षितिर्यथा घर्मक्लान्त्या विवरस्थौ सर्पौ विवृणोतीति वरयोर्वैषम्यकथनम्। सा हि रामाभिषेके प्रस्तुते मन्थरोत्प्रेषिता क्रोधागारे विरहिणीवेशमाधाय भूमौ शयाना कामसायकविद्धेन राज्ञा रोषागमतत्त्वमविज्ञाय 'ब्रूहि किं ते क्रियताम्' इत्याश्वास्यमाना पूर्वसंश्रुतं वरद्वयमवृणुत॥ ५॥

तयोश्चतुर्दशैकेन रामप्रव्राजनं समाः।

---

**5 ab.** भर्त्रा चण्डी ] Ś; चण्डी भर्त्रा Hem.Mall.Ar.Nā. (Jin. uncertain) **5 c.** उद्ववर्हेन्द्रसिक्ता भूर् ] $G_1PB^1D^MV^MB_1^MB_5^MB_7^M$; उद्ववर्हेन्द्रभूसिक्ता U; उद्ववववहेन्द्रसिक्ता भूर् $L_2$(unmetrical); उद्ववहेंद्रसिक्ता भूर् J; उद्वाहेन्द्रसिक्ता भूर् $B_2^{Mac}$; उद्ववाहेन्द्रसिक्ता भूर् $B_2^{Mpc}$; उद्ववहेन्द्रसिक्ता भूर् $B_3^M$; उद्ववहद्हीन्द्रसिक्ता भूर् $B_4^M$; उद्ववामेन्द्रसिक्ता भूर् Ͼ **6 b.** रामप्रव्राजनं ] $G_1UPB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; रामप्रवजनं $L_2$; रामं प्राव्राजयत् Hem.Mall.Jin.; रामं प्रावासयत् Ar.Nā.

---

**4.1** यथावद्रामस्य ] $G_1UPB^1L_2$; यथावत् श्रीरामस्य J **4.1** रचितामभिषेकसामग्रीं ] *conj.*; कल्पितमभिषेकसम्भारं $G_1UPB^1J$; कल्पितमभिषेकं सम्भारं $L_2$ **4.1** कठिनग्रहा ] *conj.*; क्रूरनिश्चया कठिनग्रहा $UPB^{1pc}$; क्रूरनिश्चया कठिनाग्रहा $G_1B^{1ac}J$; क्रूरनिश्चया कठि˘ग्रहा $L_2$ **4.1** दुःखतप्तैर् ] *conj.*; शोकोष्णैः दुस्ततप्तैः $G_1$; शोकोष्णैः दुःखतप्तैः $UPB^1L_2$; शोकोष्णैः दुस्ततप्तैः J **4.2** दशरथवाष्पैर् ] *conj.*; पार्थिवास्रुभिर्दशरथवाष्पैः $G_1UPB^1L_2J$ **4.2** अदूषयत् ] *conj.*; दूषयामासादूषयत् $G_1UPB^1L_2J$ **4.2** शोकजलेन हि ] $B^1$; शोकजेन हि $G_1UJ$; शोकजलेन P; शोकजेलेन ×शरथ× हि $L_2$ **4.2** मङ्गलवार्यप्य् ] $G_1UB^1L_2J$; मङ्गवार्यपि P **5.1** कैकेयी ] *conj.*; सा कैकेयी $G_1UPB^1J$; सा कैकीयी $L_2$ **5.1** क्रूरा ] *conj.*; चण्डचित्तत्वाच्चण्डी क्रूरा Σ **5.1** राज्ञानुनीता ] *conj.*; भर्त्रा राज्ञा आश्वासितानुनीता **V** **5.2** द्वावुदीरयामास ] *conj.*; द्वावुद्ववर्ह द्वावुज्जगारोदीरयामास $G_1UB^1$; द्वावुज्जगार उद्दीरयामास P; द्वावुद्ववह द्वौ उज्जगारोदीरयामास $L_2J$ **5.2** शक्राभिवृष्टा ] *conj.*; इन्द्रसिक्ता शक्राभिवृष्टा **V** **5.2** क्षितिर् ] *conj.*; भूः $G_1U$; भूः क्षितिः $PB^1$; भूः कितिर् $L_2$; भिः J **5.2** विवरस्थौ सर्पौ ] *conj.*; बिलमग्नौ विवरस्थौ उरगौ सर्पौ **V** **5.3** वरयोर्वै° ] $UPB^1L_2J$; वरयो वै° $G_1$ **5.3** रामाभिषेके ] $G_1UPB^1L_2$; श्रीरामाभिषेके J **5.4** मन्थरोत्प्रेषिता ] $UPB^1L_2J$; सकुरोत्प्रेषिता $G_1$ **5.4** °वेशम् ] $G_1UPJ$; °वैशम् $B^1$; °वंशम् $L_2$ **5.4** शयाना ] $UPB^1L_2$; शयना $G_1J$ **5.5** पूर्व° ] $G_1UPL_2J$; पूर्वं $B^1$

द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम्॥ ६॥

तयोर्वरयोर्मध्यादेकेन वरेण रामस्य दण्डकारण्ये निष्कासनं चतुर्दश वर्षाणि यावच्चकमे। द्वितीयेन वरेण भरतस्य मातुलगेहस्थस्य राज्यलक्ष्मीं चतुर्दश वर्षाणि। मृतभर्तृकात्वमात्रफलाम्, सपद्येव पत्युर्मरणाद्, भरतेन राज्यस्याकरणाच्च॥ ६॥

पित्रा दत्तां रुदन्रामः प्राङ्महीं प्रत्यपद्यत।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितो ऽग्रहीत्॥ ७॥

रामस्तु प्रथमं ≪दशरथेन≫ वितीर्णां महीं वाष्पायमाणो ऽङ्गीचकार। ‘कथं किल पितरि जीवति ध्रियमाणे ऽहं प्रभुः’ इति। ततः कैकेयीवचनात् ‘वनं गच्छ’ इति तस्य पितुराज्ञां तुष्टः सन्नन्वग्रहीत्। ‘सत्यप्रतिज्ञः पिता सम्पन्नः’ इति॥ ७॥

दधतो मङ्गलक्षौमे चीरे च परिगृह्णतः।
ददृशुर्दुःखितास्तस्य मुखरागं समं जनाः॥ ८॥

---

**8 b.** चीरे च परिगृह्णतः ] $PB^1L_2B_2^MB_4^MB_7^M$; चेरे च परिगृह्णतः $G_1UJD^MB_3^M$; चीरे च प्रतिगृह्णतः $V^MB_1^MB_5^M$; वसानस्य च वल्कले ℭ **8 c.** ददृशुर्दुःखितास्तस्य ] $UPB^1L_2JV^MB_1^M B_2^MB_3^MB_4^MB_5^MB_7^M$; ददृशुर्दुःखितस्तस्य $G_1$; ददृशुस्तस्य दुःखार्ता $D^M$; ददृशुर्विस्मितास्तस्य ℭ

---

**6.1** रामस्य ] $G_1UB^1L_2$; श्रीरामस्य J **6.1** निष्कासनं ] $UPB^1L_2J$; निष्कामनं $G_1$ **6.2** यावच्चकमे ] *conj.*; तावत् रामप्रव्राजनमैच्छत् चकमे $G_1UPB^1L_2$; तावत् श्रीरामप्रव्राजनमैच्छत् चकमे J **6.2** भरतस्य ] *conj.*; सुतस्य भरतस्य **V** **6.2** °लक्ष्मीं ] $PB^1L_2$; लक्ष्मीः $G_1J$; °लक्ष्मीश् U **6.3** वर्षाणि ] *em.*; समावर्षाणि $G_1$; समाः वर्षाणि $UPB^1L_2J$ **6.3** मृतभर्तृकात्वमात्रफलाम् ] *conj.*; कीदृशीं (केदृशीं U) वैधव्यैकफलां मृतभर्तृकात्वमात्रफलाम् $G_1UB^1J$; कीदृशीं वैधव्यैकफलां मृतभर्तृकात्वफलां P; कीदृशीं वैधव्यैकफलां मृतभ---त्वफलां मात्र $L_2$ **6.4** राजस्याकरणाच्च ] $G_1UJ$; च राज्यस्याकरणात् P; राजस्याकरणात् $B^1$; च रा---करणात् $L_2$ **7.1** रामस्तु ] $G_1UPB^1L_2$; श्रीरामस्तु J **7.1** प्रथमं ] *conj.*; प्राक्प्रथमं **V** **7.1** दशरथेन ] *conj.* (cf. Jin.); पित्रा **V** **7.1** वितीर्णां ] *conj.*; दत्तां वितीर्णां $G_1UJ$; दत्तां $PB^1L_2$ **7.1** वाष्पायमाणो ] *conj.*; रुदन्वाष्पायमानः **V** **7.1** ऽङ्गीचकार ] *conj.*; प्रत्यपद्यताङ्गीचकार **V** **7.2** ध्रियमाणे ] J; म्रियमाणे $G_1PL_2$; श्रियमाणे U; प्रियमाणे $B^1$ **7.3** कैकेयीवचनात् वनं ] *conj.*; कैकेयीवचनाद्वनाय वनं $G_1PB^1J$; कैकेयीवचनाद्वचनाद्वनाय वनं U; कैकीयीवचनाद्वनाय वनं $L_2$ **7.3** तुष्टः सन्न् ] *conj.*; मुदितस्तुष्टः सन् $G_1UB^1L_2J$; मुदितस्सन्तुष्टस्सन् P **7.3** अन्वग्रहीत् ] U; अग्रहीत् $PB^1$; अनुग्रहीत् $G_1J$; अगहीत् $L_2$ **7.3** सत्यप्रतिज्ञः पिता ] $G_1UPB^1J$; सद्यज्ञपिः तस् $L_2$ **7.4** सम्पन्नः ] $G_1UB^1L_2J$; जात P

प्रथमं यौवराज्याय मङ्गलांशुके बिभ्रतः पश्चाद्वनाय वल्कले च परिदधतो रामस्य दुःखिता जना वक्त्रकान्तिमविकृतां तुल्यामैक्षन्त, न हृष्टस्योद्विग्नस्य वा। पौरा एव सञ्जातशोकाः, न त्वसौ॥ ८॥

स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन्।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः॥ ९॥

रामो दण्डकारण्यं ≪प्राविशत्≫, एकस्मिन्नेकस्मिन्सतां मनश्च। ते हि तमेव ध्यायन्तो दुःखिता अभवन्नित्यर्थः। प्रतिज्ञातादर्थात्पितरमभ्रंशयन्॥ ९॥

राजापि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम्।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत॥ १०॥

दशरथो ऽपि देहस्य न्यासमात्रेण ≪प्रायश्चित्तम्≫ अज्ञासीत्, रामस्य विरहेणान्तः पीडितः सन्। प्राणानमुञ्चदित्यर्थः। द्विजतनयवधजं शापमनुस्मृत्य।

---

**8.1 यौवराज्याय** ] $\mathrm{PB^1}$; यौवनराज्याय $\mathrm{G_1J}$; यौवरज्याय U; यौवराय $\mathrm{L_2}$ **8.1 मङ्गलांशुके** ] *conj.*; मङ्गलक्षौमे मङ्गलांशुके $\mathrm{UPB^1L_2J}$; मङ्गलक्षौमे मङ्गलांशुकं $\mathrm{G_1}$ **8.1 बिभ्रतः** ] *conj.*; दधतो बिभ्रतः $\mathrm{G_1UB^1J}$; दधतः P; दधतो बिभृतः $\mathrm{L_2}$ **8.1 पश्चाद्वनाय** ] $\mathrm{G_1UB^1L_2J}$; पश्चाद्वनाय वनवासाय P **8.1 वल्कले** ] P; चेरवल्कले $\mathrm{G_1J}$; चेरे वल्के U; चीरवल्कले $\mathrm{B^1L_2}$ **8.1 परिदधतो** ] *conj.*; परिगृह्णतः परिदधतः $\mathrm{G_1UB^1L_2J}$ **8.2 रामस्य** ] *conj.*; तस्य रामस्य $\mathrm{G_1UPB^1L_2}$; तस्य श्रीरामस्य J **8.2 जना** ] $\mathrm{G_1UB^1L_2J}$; जनाः पौराः P **8.2 वक्त्रकान्तिम्** ] *conj.*; मुखरागं $\mathrm{G_1UB^1L_2J}$; मुखरागं वक्त्रकान्तिं P **8.2 अविकृतां तुल्यामैक्षन्त, न हृष्टस्योद्विग्नस्य वा** ] *conj.*; सममविकृतं ददृशुः $\mathrm{G_1UB^1L_2J}$; सममविकृतां तुल्यामैक्षन्त, न हृष्टस्योद्विग्नस्य वा P **8.3 पौरा एव सञ्जातशोकाः** ] $\mathrm{PB^1L_2}$; पौराः सञ्जातशोका एव $\mathrm{G_1U}$; पौराः संजातशोका पू(?)व J **9.1 रामो** ] *conj.*; स रामो $\mathrm{G_1UB^1L_2}$; सः रामः P; स श्रीरामो J **9.1 प्राविशत्** ] *conj.* (cf. Jin.); विवेश प्रत्येकम् **V** **9.1 मनश्च। ते** ] $\mathrm{G_1PB^1L_2J}$; मनश्चेति U **9.2 अभवन्नित्यर्थः** ] $\mathrm{UPB^1L_2J}$; अभिभवन्नित्यर्थः $\mathrm{G_1}$ **9.2 प्रतिज्ञाता°** ] *conj.*; सत्यात्प्रतिज्ञाता° $\mathrm{G_1PB^1}$; सत्यात्प्रत्यज्ञाता° $\mathrm{UL_2J}$ **9.2 °दर्थात्** ] $\mathrm{UPB^{3pc}L_2}$; °दर्था $\mathrm{G_1B^{1ac}J}$ **9.2 °भ्रंशयन्** ] *conj.*; °लोपयन् अभ्रंशयन् $\mathrm{G_1UPB^1L_2}$; °लोपयन् विवेश दंडकारण्यं प्रत्येकं च अभ्रंशयन् J **10.1 दशरथो ऽपि** ] *conj.*; राजा दशरथो ऽपि Σ **10.1 देहस्य** ] *conj.*; शरीरस्य देहस्य $\mathrm{G_1UB^1J}$; शरीरस्य $\mathrm{PL_2}$ **10.1 न्यासमात्रेण** ] *conj.*; त्यागमात्रेण $\mathrm{G_1PB^1}$; त्यागमात्रेण न्यासमात्रेण $\mathrm{UL_2J}$ **10.1 प्रायश्चित्तमज्ञासीत्** ] *conj.* (cf. Jin.); °शुद्धिलाभममन्यताज्ञासीत् $\mathrm{G_1UPB^1L_2J}$ **10.1 रामस्य** ] *conj.*; तस्य रामस्य $\mathrm{G_1UPB^1L_2}$; तस्य श्रीरामस्य J **10.2 विरहेणान्तः** ] P; वियोगेन विरहेणान्तः $\mathrm{G_1UB^1}$; वियोगेन विरहेणान्त $\mathrm{L_2}$; वियोगेन विरहेणांतः J **10.2 °मुञ्चदित्यर्थः** ] $\mathrm{G_1UPB^{3pc}J}$; °मुचदित्यर्थः $\mathrm{B^{1ac}}$; °मचदित्यर्थः $\mathrm{L_2}$ **10.2 द्विजतनयवधजं शापमनुस्मृत्य** ] *conj.*; *om.* $\mathrm{G_1B^1J}$; स्वकर्मजं द्विजतनयवध(भ $\mathrm{L_2}$)जं शापं स्मृत्वानुस्मृत्य $\mathrm{UPL_2}$

एवं ह्युक्तम्

दिष्टान्तमाप्स्यति भवानिति।

शुद्धिरत्र ब्राह्मणवधस्येति॥ १०॥

**विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरम्।**
**रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ॥ ११॥**

तद्राज्यं छिद्रगवेषणदक्षाणां शत्रूणां भोज्यत्वं प्रार्थ्यतामयासीत्। असन्निहिताश्चत्वारो राजपुत्रा यस्य। तथा मृतः स्वर्गीभूतो राजा दशरथो यस्य। एवं च रक्षकाभावाच्छत्रूणामवकाशः॥ ११॥

**अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्।**
**मौलैरानाययामासुर्भरतं स्तम्भितास्रुभिः॥ १२॥**

अनन्तरमस्वामिका जनपदा मातुलगेहस्थं भरतमानाययन्। अरुदद्भिः स्वराज्ये भवैः प्रबन्धागतैः सचिवैः। मा कदाचिद्वृथा वृत्तं विज्ञायैषो ऽपि प्रव्रजि-

---

**12 b.** °बन्धु° ] Σ; °वर्ग° $V^M$

---

**10.4** दिष्टान्तमाप्स्यति भवान् *Raghuvaṃśa* 9:85a.

---

**10.4** भवानिति ] $G_1B^1L_2J$; भवानपि पुत्रशोकादिति U; भवानपि पुत्रशोकादन्ते वयस्यहमिवेति P **10.5** ब्राह्मणवधस्येति ] $L_2$; ब्रह्मणस्य वधस्येत् $G_1$; ब्राह्मणस्य वधस्येति $UB^1J$; सुतविवासेन ब्राह्मणवधस्येति P **11.1** °दक्षाणां ] $UPB^1L_2J$; °दक्षिणां $G_1$ **11.1** शत्रूणां ] *conj.*; द्विषां शत्रूणामामिषतां Σ **11.1** भोज्यत्वं प्रार्थ्यताम् ] $G_1PB^1L_2J$; भोज्यतां $U^{ac}$; भोज्यतां प्रार्थ्यतां $U^{pc}$ **11.1** अयासीत् ] *conj.*; ययावयासीत् $G_1UB^1L_2J$; ययौ P **11.2** असन्निहिताश् ] *conj.*; विप्रोषिता असन्निहिताः $G_1UPB^1J$; विप्रोषिता असत्रिहिताः $L_2$ **11.2** चत्वारो राजपुत्रा ] P; कुमारा $G_1UB^1L_2J$ **11.2** मृतः स्वर्गीभूतो ] *conj.*; अस्तमितो मृत $G_1UB^1J$; अस्तमितो मृतः स्वर्गीभूतः P; अस्तमितमितो मृत $L_2$ **11.2** राजा दशरथो ] *conj.*; ईश्वरो राजा दशरथो Σ **12.1** अनन्तरमस्वामिका ] *conj.*; अथानन्तरमनाथा अस्वामिकाः $G_1UB^1L_2$; अथानन्तरं अनाथा अस्वामिकाः स्वाम्यमात्यादिकाः P; अथ दशरथवधादनंतरं अनाथाः स्वामिकाः J **12.1** जनपदा ] *conj.*; प्रकृतयो जनपदाः Σ **12.1** मातुलगेहस्थं ] $G_1UJ$; मातृबन्धुनिवासिनं मातुलगेहस्थं $PB^1$; मातृबन्धुनिवासिनं मातुलगेहस्तं $L_2$ **12.1** भरतमानाययन् ] *conj.*; भरतमानययामासुः अनाययन् $G_1$; भरतमानाययामासुः आनाययन् $UPB^1J$; भरत⏑नाययामसुः आनाययन् $L_2$ **12.1** अरुदद्भिः ] *conj.*; स्तम्भितास्रुभिः अरुदद्भिः मौलैः $G_1PL_2J$; तमितास्रुभिः अरुदद्भिः मौलैः U; स्तम्भितास्रुभिः अरुदद्भिः मौलेः $B^1$ **12.2** स्वराज्ये भवैः ] P; *om.* $G_1UB^1L_2J$ **12.2** प्रबन्धागतैः ] P; क्रमागतैः $G_1UB^1L_2J$ **12.2** मा कदाचिद्वृथा वृत्तं ] $PB^1L_2J$; कदाचिद्वृथा गतं U; सा कदाचिद्वृथा वृत्तं $G_1$

ष्यतीति व्यपदेशान्तरेणानयनं सूचितम्॥ १२॥

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः।
मातुर्न केवलं स्वस्याः श्रियो ऽप्यासीत्पराङ्मुखः॥ १३॥

ततो भरतो गृहमासाद्य निजमातृकृतं पितुर्मरणं ≪आकर्ण्य≫ कैकेयीं निर्भर्त्स्य, न ≪स्वकीयाया जनन्या≫ एकस्याः सकाशाद्विमुखो ऽभूत्, यावल्लक्ष्म्या अपि। वसिष्ठाद्यभिचोदितो ऽपि न वै राज्यं चकारेत्यर्थः॥ १३॥

ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः।
तस्य पश्यन्ससौमित्रेरुदस्रुर्वसतिद्रुमान्॥ १४॥

न केवलं राज्यश्रीपराङ्मुखो ऽभूत्। और्ध्वदैहिकं कृत्वा सैन्यसहितो मातृभ्रातृचमूसहितो रामं प्रार्थयितुम् ≪अनुजगाम≫। ऋषिभिर्दर्शितान्सलक्ष्मणस्य रामस्यावसथवृक्षान् ≪अवलोकयन्≫ सवाष्पः॥ १४॥

चित्रकूटाचलस्थं च कथितस्वर्गतिर्गुरोः।

---

**14 .** ] Placed after 16 in $G_1UPB^1L_2JB^M_3B^M_4B^M_7$ **15 a. °कूटाचलस्थं च** ] $G_1UPB^1L_2JV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$; °कूटचलस्थं च $D^M$; °कूटवनस्थं च Hem.Mall.Ar.(?)Nā. Jin. **15 b. कथितस्वर्गतिर्गुरोः** ] $G_1BV^MB^M_1B^M_2B^M_3B^M_4B^M_7$Mall.Ar.Nā.Jin.; कथितः स्वर्गतिः पितुः U; कथितस्वर्गतिः पितुः P; कथितसुर्गतिर्गुरोः $L_2$; कथितं स्वर्गतिर्गुरोः J; कथितास्वर्गतिर्गुरोः $B^M_5$; कथितः स्वर्गति गुरोः $D^M$

---

**12.3 प्रव्रजिष्यतीति** ] $G_1PB^1L_2J$; प्रभ्राजिष्यतीति U **12.3 व्यपदेशा°** ] $G_1PB^1L_2J$; व्युपदेशा° U **13.1 गृहमासाद्य** ] $G_1UPB^1L^{pc}_2J$; गृहमागत्य $L^{ac}_2$ **13.1 पितुर्मरणं** ] $G_1UPB^1J$; पितुर्मारणं $L_2$ **13.1 आकर्ण्य** ] *conj.* (cf. Jin.); श्रुत्वा **V** **13.2 कैकेयीं निर्भर्त्स्य, न** ] $G_1UB^1J$; कैकेयी निर्भर्त्स्यमानः P; कैकेयं निर्भर्त्स्य $L_2$ **13.2 स्वकीयाया जनन्या एकस्याः** ] *conj.* (cf. Jin.); केवलं स्वस्या मातुरेकस्याः $G_1UPB^1J$; केवलं स्वस्या मातरेकस्या $L_2$ **13.3 वसिष्ठाद्यभिचोदितो** ] $G_1UPB^{1ac}L_2$; वसिष्ठाद्यैरभिचोदितो $B^{3pc}$; वसिष्टादिभिचोदितो J **13.3 न वै** ] $G_1UPB^{1ac}L_2J$; नैव $B^{3pc}$ **14.1 और्ध्वदैहिकं** ] $G_1PL_2J$; और्ध्वदौहिकं U; और्ध्वदैहिकादिकं $B^1$ **14.2 मातृभ्रातृ°** ] $UPB^1L_2J$; मातृभातृ° $G_1$ **14.2 रामं प्रार्थयितुमनुजगाम** ] *conj.* (cf. Jin.); राममन्वगात् $G_1UB^1$; रामं प्रार्थयितुमन्वगात् P; भरतो रामनुगात् $L_2$; श्रीराममन्वगात् J **14.2 °दर्शितान्स°** ] $G_1UPB^1J$; °दर्शिन्स° $L_2$ **14.3 राम°** ] *conj.*; तस्य राम° $G_1UPB^1L_2$; तस्य श्रीराम° J **14.3 आवसथवृक्षान्** ] *conj.*; वसतिद्रुमानावसथवृक्षान् $G_1UB^1$; वसतिद्रुमान्नवसथवृक्षान् P; वसतिद्रुमामावसथवृक्षा $L_2$; वसतिद्रुमानवसथवृक्षान् J **14.3 अवलोकयन्** ] *conj.* (cf. Jin.); पश्यन् **V**

लक्ष्म्या निमन्त्रयां चक्रे तमनुच्छिष्टसम्पदा॥ १५ ॥

ततश्चित्रकूटाद्रिस्थं तमग्रजं रामं भरतो राज्ञो विनाशमाख्याय श्रियावृणीत। प्रसीदागम्य राज्यं गृह्यतामिति। कीदृश्या श्रिया। स्वयमभुक्तसमृद्ध्या, अनुपभोग्यत्वात्॥ १५ ॥

कस्मादकार्यशतैरपि प्रार्थनीयं राज्यमनङ्गीकृत्य तमर्थितवानित्याह—

स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः॥ १६ ॥

यस्माद्भरतः स्वं परिवेत्तारं पापिनमज्ञासीत्, क्षितेरात्मीयसम्पादनात्, ज्येष्ठे रामे ऽगृहीतराज्यलक्ष्मीकलत्रे सति। यदुक्तम्

ये ज्येष्ठेष्वकलत्रेषु कुर्वते दारसङ्ग्रहम्।
ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः॥ इति।

---

**15 c.** निमन्त्रयां चक्रे ] $\Sigma$; निमन्त्रयामास Ar. **16 .** ] Placed after 13 in $G_1UPB^1L_2JB_3^M B_4^M B_7^M$

---

**16.4** ये ज्येष्ठेषु कलत्रेषु ··· पूर्वजः Source unknown. *Manusmṛti* 3:171 is similar: दाराग्निहोत्रसंयोगं कुरुते यो ऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः।

---

**15.1** °द्रिस्थं ] $UPB^1L_2$; °द्रिं $G_1J$ **15.1** रामं ] $G_1UPB^1L_2$; श्रीरामं J **15.1** भरतो ] $G_1UPB^1J$; भरतै $L_2$ **15.1** श्रियावृणीत ] *conj.*; श्रिया न्यमन्त्रयत $G_1UB^1L_2J$; श्रिया न्यमन्त्रयत अवृणीत P **15.2** प्रसीदागम्य ] $G_1UPJ$; प्रसीदागम्यं $B^{1pc}$; प्रसीदागम्यां $B^{1ac}$ $L_2$ **15.2** गृह्यतामिति ] $G_1B^1L_2J$; गृहीतामिति U; क्रियतां इति जनकस्याख्यातमरणः P **15.2** स्वयमभुक्तसमृद्ध्या ] *conj.*; अनुच्छिष्टसम्पदा स्वयमभुक्तसमृद्ध्या $G_1PB^1L_2J$; अनुच्छिष्टसम्पदा स्वयमभुक्तसमृद्धया U **15.3** अनुपभोग्यत्वात् ] *em.*; अनुपभोगत्वात् **V** **15.4** कस्माद्··· °त्याह ] $G_1UB^{3pc}J$; *om.* $PB^{1ac}L_2$ **15.4** राज्यमनङ्गीकृत्य ] $G_1B^{3pc}J$; राज्यमङ्गीकृत्य U **15.4** तमर्थितवानित्याह ] $G_1B^{3pc}J$; तमर्थिवानित्याह U **16.1** यस्माद्भरतः ] *conj.*; हि यस्माद्भरतः $UPB^1J$; हि यस्माद्भारतः $G_1$; हि --- रतः $L_2$ **16.1** स्वं परिवेत्तारं ] *conj.*; स्वमात्मानं मेने परिवेत्तारं $G_1B^1$; स्वमात्मानं परिवेत्तारं $UPL_2$; स्वमात्मानं परिवेत्तारमात्मानं J **16.1** °ज्ञासीत्।] $G_1UPB^1J$; °ज्नासी $L_2$ **16.1** क्षितेरात्मीय° ] *conj.*; क्षितेः स्वीकरणादात्मीय° $G_1UPB^1J$; क्षि --- करणादात्मीय° $L_2$ **16.1** ज्येष्ठे ] *conj.*; प्रथमजे ज्येष्ठे $\Sigma$ **16.2** रामे ] $G_1UPB^1$; --- $L_2$; श्रीरामे J **16.2** ऽगृहीतराज्यलक्ष्मीकलत्रे सति ] *conj.*; अकृतश्रीपरिग्रहे (गृहे $G_1$) अगृहीतराज्यलक्ष्मीकलत्रे सति $\Sigma$ **16.3** ज्येष्ठेष्वकलत्रेषु ] $B^{1ac}$; ज्येष्ठेषु कलत्रेषु $UPB^{1pc}L_2G_1J$; **16.3** दारसङ्ग्रहम् ] $UPB^1$ $L_2J$; दारसङ्गृहम् $G_1$ **16.4** ज्ञेयास्ते ] $UB^1PL_2$; ज्ञेयस्ते $G_1J$ **16.4** परिवित्तिस्तु ] $UB^1J$; पतिर्वित्तिस्तु $G_1$; परिवेत्तिस्तु $PL_2$

परिवित्तिः परिवेत्ता यया च परिविद्यते।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः॥ इति।

परिवेत्ताचारबाह्यो विद्वद्भिर्गर्हितः सदा। इति। कथं कुलाभिमानी भरतो भूत्वा परिवेत्तृत्वमङ्गीकरोतु। श्रीरपि हि लक्ष्मीस्वामिनां भार्या भवति॥ १६॥

**तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः।**
**ययाचे पादुके पश्चात्कर्तुं राज्याधिदैवते॥ १७॥**

मृतस्यापि जनकस्याज्ञायाः सकाशाच्चालयितुमसाध्यं राममनन्तरं पादुके अवृणीत, राज्यस्याधिदैवते विधातुम्। नाकवत इतीदानीमाज्ञान्तरासम्भवमाह॥ १७॥

**स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम्।**
**नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्॥ १८॥**

---

**17 d.** °दैवते ] $G_1UB^1L_2^{pc}JD^MV^MB_2^MB_3^MB_4^MB_5^MB_7^M$Jin.; °दैवती $L_2^{ac}$; °देवते $PB_1^M$Hem. Mall.Ar.(?)Nā.

---

**16.6** परिवित्तिः परिवेत्ता ··· दातृयाजकपञ्चमाः *Manusmṛti* 3:172.

**16.7** परिवेत्ताचारबाह्यो विद्वद्भिर्गर्हितः सदा Source unknown; also quoted by Hem. here, from which we have restored the last word.

---

**16.5** परिवित्तिः ] $G_1B^1L_2$; परिवेत्तिः UPJ **16.5** यया ] $UPB^1L_2J$; यथा $G_1$ **16.6** यान्ति दातृयाजकपञ्चमाः ] $G_1B^1J$; यान्ति दातृयाजकपञ्चमः U; यान्ति दातृयाचकपञ्चमाः P; यगन्ति दातृयाजनपञ्चमा $L_2$ **16.7** °बाह्यो ] P; °बाह्ये $G_1UB^1L_2J$ **16.7** विद्वद्भिर्गर्हितः ] $G_1UPB^1L_2^{pc}$; *om.* $L_2^{ac}$; विद्वद्भिर्गर्हिता J **16.7** सदा ] *conj.*; *om.* **V** **16.8** इति। कथं कुलाभिमानी भरतो भूत्वा परिवेत्तृत्वमङ्गी° ] $G_1UPB^1J$; त्तुमत्वङ्गी° $L_2^{ac}$; +इति कथं कुलाभिनी भरतो भूत्वा परिवे+त्तुमत्वङ्गी° $L_2$ **16.8** °करोतु ] $G_1PB^1L_2J$; °करोति U **16.8** लक्ष्मी° ] $G_1PB^{1ac}L_2J$; लक्ष्मीः $UB^{1pc}$ **16.8** °स्वामिनां ] $G_1UB^1L_2$; पतीनां P; स्वामिनो J **17.1** मृतस्यापि ] $G_1UB^1L_2J$; मृतकस्यापि P **17.1** जनकस्याज्ञायाः ] $G_1UB^1J$; जनकस्याज्ञातः आज्ञायाः P; ज---स्याज्ञायास् $L_2$ **17.1** सकाशाच्चालयितुमसाध्यं ] *conj.*; सकाशादपाक्रष्टुं चालयितुमशक्यमसाध्यं $G_1UPB^1J$; सकाशादपाक्रष्टुं चालयितुं अश---ध्यं $L_2$ **17.1** राममनन्तरं ] *conj.*; तं रामं पश्चादनन्तरं $G_1UPB^1L_2$; तं श्रीरामं पश्चादनन्तरं J **17.2** अवृणीत ] *conj.*; ययाचे $G_1UB^1L_2J$; ययाचे अवृणीत P **17.2** राज्यस्याधिदैवते ] $G_1UPB^1J$; राज्य---वके $L_2$ **17.2** विधातुम् ] *conj.*; कर्तुम् $G_1UB^1L_2J$; कर्तुं विधातुं P **17.3** °माज्ञान्तरासम्भवम् ] $PB^1$; °माज्ञान्तरसम्भवम् $G_1$; °माज्ञान्तरं सम्भावयन्न् U; °माज्ञान्तरास--- $L_2$; °मज्ञांतरसंभवम् J

ततो भरतो रामेण पादुके दत्त्वा विसर्जितो ऽयोध्यां न प्राविक्षत्, केवलं नन्दिग्राममध्यास्य रामस्य राज्यं निक्षेपमिव ररक्ष॥ १८॥

दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत्॥ १९॥

ततो भरतो मातृकृतस्य किल्बिषस्य राज्याभिलाषवैमुख्येन प्रायश्चित्तमिवाचरत्। मुनिवेशो ह्यसौ भूत्वा राज्यमकरोदिति भावः। रामे †दृढभक्तिः†॥ १९॥

रामो ऽपि सह वैदेह्या वने वन्येन वर्तयन्।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा॥ २०॥

इत्थमवस्थे भरते रामो ऽपि सीतालक्ष्मणसहितः फलमूलादिना शरीरं पोषयन् यौवने ऽपि पूर्वेषां वृद्धानां व्रतमाचरत्। वृतु वृधु भासार्थ इत्यस्य चौरादिकस्य

---

**19 d.** °वाकरोत्] $UPD^MV^M$𝕮; °वाचरत् $G_1B^1L_2JB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$

---

**20.2** वृतु वृधु भासार्थः *Dhātupāṭha* 10.241–242.

---

**18.1** भरतो रामेण] *conj.*; स भरतो भ्रात्रा $G_1UPB^1L_2$; स भरतो भ्रात्रा श्रीरामेण J **18.1** विसर्जितो ऽयोध्यां] *conj.*; विसर्जितो पुरीमयोध्यां $G_1L_2J$; विसर्जितः पुरीमयोध्यां नगरीं U; विसर्जितः पुरीमयोध्यां P; विसर्जित+ः+पुरीमयोध्यां $B^1$ **18.1** न प्राविक्षत्] *conj.*; नैवाविशत्। न प्राविक्षत् $G_1PB^1L_2J$; नैवाविशत् न प्रविशत् U **18.2** °ग्राममध्यास्य] $B^{1ac}L_2$; °ग्रामं मध्यस्य $G_1^{ac}$; °ग्राममधस्य $G_1^{pc}B^{1pc}$; °ग्राममध्यस्य UJ; °ग्राममासाध्यमस्य P **18.2** रामस्य] $G_1UPB^1L_2$; श्रीरामस्य J **18.2** निक्षेपमिव ररक्ष] *conj.*; न्यासं निक्षेपमिवाभुनक् ररक्षे $G_1B^1$; न्यासं निक्षेपमिवाभुनक् ररक्ष $UL_2J$; न्यासं निक्षपं इवाभुनक् ररक्ष P **19.1** ततो] $G_1UPJ$; अतो $B^1L_2$ **19.1** किल्बिषस्य] *conj.*; पापस्य $G_1UB^1L_2J$; पापस्य किल्बिषस्य P **19.1** राज्याभिलाष°] $G_1PB^{1ac}L_2J$; राज्याभिषेक° $UB^{3pc}$ **19.2** मुनिवेशो] $G_1UPJ$; मुनिवेश्यो $B^1L_2$ **19.2** भावः] $PB^1L_2$; भार्गव° $G_1J$; *om.* U **19.2** रामे] $PB^{1ac}$; ज्येष्ठे रामे $UB^{3pc}$; रामो +न+ $G_1$; °रामो न J **19.2** दृढभक्तिः] *conj.*; दृढभक्तिः राज्याभिलाषविमुखश्च **V** **20.1** इत्थमवस्थे] P; इत्थमवस्थिते $G_1UB^1J$; इत्थसर्वस्थिते $L_2$ **20.1** रामो] $G_1UPB^1L_2$; श्रीरामो J **20.1** फलमूलादिना] *conj.*; वन्येन फलमूलादिना $G_1UB^1L_2J$; वन्येन फलादिना P **20.1** शरीरं] *conj.*; वर्तयन् शरीरं Σ **20.1** पोषयन्] $G_1UPB^1J$; पूषयन् $L_2$ **20.2** पूर्वेषां] *conj.*; इक्ष्वाकूणां पूर्वेषां $G_1UB^1$; यक्ष्वाकूणां पूर्वेषां $L_2J$ **20.2** वृद्धानां व्रतमाचरत्] $B^1L_2$; वृद्धावृत्तमचरत् $G_1J$; वृद्धव्रतमाचरत् U; वृद्धानां व्रतमाचरन् P **20.2** वृतु वृधु] $G_1PB^1$; वृतु वृद्ध U; वृत वृधु $L_2$; वृत्त वृधु J

3 वर्तयन्निति रूपम्। स्वभावाच्च वृत्तिशब्दः शरीरयात्रायां विद्यते। मदसिक्तमुखो मृगाधिपः करिभिर्वर्तयतीति॥ २०॥

**प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम्।**
**कदाचिदङ्के सीतायाः शिश्ये किञ्चिदिव श्रमात्॥ २१॥**

अथ कदाचिद्रामः सीताया उत्सङ्गे शिरो निवेश्य निदद्रौ। तपोमाहात्म्येन बद्धा छाया यस्य वृक्षस्य तमाश्रितः, मनाक् खेदादिव॥ २१॥

**ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः।**
**प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन्॥ २२॥**

ततस्तस्मिन्सुप्त इन्द्रात्मजः पक्षी काकः सीतायाः पयोधरौ करजैरलिखत्। किलेत्यागमे। अत्र चापलं कारणम्। उत्प्रेक्ष्यते भर्तृकृतेषु नखदशनपदादिष्वक्ष-

---

**21 a.** °स्तम्भित° ] Σ; °स्तिमित° Ar.Nā. **22 b.** विददार ] Σ; विरराद Ar.Nā. **22** मृगमांसं ततः सीतां रक्षन्तीमातपे शठः। पक्षतुण्डनखाघातैर्बबाधे वायसो बलात्॥ $D^M$ and $B_4^M$ give this alternative verse in Vallabha's commentary after verse 22; $V^M$ does so in the margin; $B_5^M$ gives it after verse 23, introducing it by अस्य श्लोकद्वयस्य पाठान्तरम्।

---

**20.4** मदसिक्तमुखो मृगाधिपः करिभिर्वर्तयति *Kirātārjunīya* 2:18ab.

---

**20.3** स्वभावाच्च ] $G_1$PB; स्वभावाश्च U; स्वभावश्च $L_2$; सुभावश्च J **20.3** विद्यते ] P; वर्तते यथा $G_1UB^1L_2J$ **21.1** कदाचिद्रामः ] $G_1UPB^1L_2$; कदाचित् श्रीरामा J **21.1** सीताया उत्सङ्गे ] *conj.*; सीताया अङ्के उत्सङ्गे $G_1UPB^1J$; सी---अङ्के उत्सङ्गे $L_2$ **21.1** निदद्रौ ] *conj.*; शिश्ये निदद्रौ Σ **21.1** तपोमाहात्म्येन ] UP; तपोमहात्म्येन $G_1B^1J$; तपोमहा--- $L_2$ **21.2** बद्धा ] *conj.*; स्तम्भिता बद्धा $UB^{1pc}$; स्तम्भिता बद्ध $G_1B^{1ac}$; स्तम्भिताः बद्धाः P; ---म्भिता बद्ध $L_2$; स्तम्भिता बुद्ध J **21.2** तमाश्रितः ] $B^{1ac}L_2$; तरुमाश्रितः $G_1J$; तं तरुमाश्रितः $UB^{3pc}$; तमाश्रित्यः P **21.2** मनाक् ] *conj.*; किञ्चित् मनाक् $G_1UPB^1J$; किञ्चि---नाक् $L_2$ **21.2** खेदादिव ] *conj.*; श्रमात्खेदादिव $G_1PB^1L_2J$; श्रमात्खेदात् U **22.1** इन्द्रात्मजः पक्षी ] *conj.*; ऐन्द्रिरिन्द्रात्मजो द्विजः पक्षी $G_1UB^1L_2J$; ऐन्द्रिः इन्द्रात्मजः पक्षी P **22.1** सीतायाः ] *conj.*; तस्याः सीतायाः Σ **22.1** पयोधरौ ] *conj.*; स्तनौ पयोधरौ $G_1UPB^1J$; तनौ पयोधरौ $L_2$ **22.1** करजैरलिखत् ] नखैः करजैर्विददारालिखत् $G_1UB^1J$; नखैर्विददारालिखत् P; नखैः करजैर्विददार लिखत् $L_2$ **22.2** अत्र चापलं ] $G_1PB^1L_2J$; चापलमत्र U **22.2** भर्तृकृतेषु ] *conj.*; भर्तृकृते भोगचिह्ने $G_1$; भर्तृकृतेषूपभोगचिह्नेषु UPJ; भर्तृकृतेषु भोगचिह्ने $B^{1ac}$; भर्तृकृतेषु भोगचिह्नेषु$B^{1pc}$; भर्तृकृतेष्वपभोगचिह्ने $L_2$ **22.2** नखदशनपदादिष्व्° ] $PB^1L_2J$; नखदशनपादादिषु $G_1$; नखदशनपदादि° U

मामामर्षं कुर्वन्निव। भार्याया हि नखपदादिदर्शनादक्षमया विदारणं भवति।

दोषैकग्राहिहृदयः पुरोभाग्यभिधीयते।

ऐन्द्रित्वं काकस्यागमादवगन्तव्यम्। क्वचिदेतच्छ्लोकद्वयस्थाने ऽयमेकः श्लोकः

मृगमांसं ततः सीतां रक्षन्तीमातपे शठः।
पक्षतुण्डनखाघातैर्बबाधे वायसो बलात्॥ इति।

एतदेव च युक्तमागमानुसरणात्। आर्षे हि शरनिहतहरिणपिशितमातपे शोषयन्ती सीता वार्यमाणेन लम्पटेन वायसेन पश्यति पत्यावुपद्रुतेति वर्णितम्, न तु तरुतलशयिते।

उत्प्रेक्षाप्ययुक्ता, उपभोगचिह्नासम्भवात्। न हि वने वसन्त्यास्तस्या नखपदादिसम्भवः, शृङ्गारित्वाभावात्॥ २२॥

**तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः।**
**भ्रान्तश्च मुमुचे तस्मादेकनेत्रव्ययेन सः॥ २३॥**

---

**23 a.** तस्मिन्नास्थदिषीका° ] $UL_2JD^MV^MB^M_1B^M_2B^M_5B^M_7$**C**; तस्मिन्नास्थादिषीका° $G_1B^1B^M_3$; तस्मिन्नास्थदिषूकास्त्रं P; तस्मिन्नास्यदिषीका° $B^M_4$ **23 b.** °वबोधितः ] ŚHem.Mall.; °विबोधितः Ar.(?)Nā.Jin. **23 c.** भ्रान्तश्च ] ŚHem.Mall.; भ्रान्तः सन् $Ar.^{vl}$Nā.Jin.; आत्मानं Ar.

---

**22.4** दोषैकग्राहिहृदयः पुरोभाग्यभिधीयते। Source unknown.

---

**22.3** अक्षमाम्··· नखपदादि° ] *om.* U(eyeskip) **22.3** अक्षमाममर्षं कुर्वन्निव ] *conj.*; पौरोभाग्यममर्षमाचरन्निव $G_1B^1L_2J$; पौरोभाग्यमक्षमाममर्षमाचरन्निव कुर्वन् P **22.3** भार्याया ] $G_1L_2J$; भार्या $PB^1$ **22.3** विदारणं ] $PB^1L_2J$; विचभणं $G_1$; विचारणं U **22.4** दोषैकग्राहि° ] $PB^1L_2$; दोषकग्राह्य° $G_1UJ$ **22.4** पुरोभाग्यभिधीयते ] P; पौरोभाग्यभिधीयते $G_1J$; पौरोभाग्योभिधीयते U; पुरोभागीति कथ्यते $B^1L_2$ **22.5** °च्छ्लोकद्वयस्थाने ] $PB^1L_2$; °च्छोकद्वयस्थाने $G_1UJ$ **22.5** ऽयमेकः ] $G_1L_2J$; यमेक एव U; ऽस्य P; अयमेक +एव+ $B^1$ **22.5** श्लोकः ] *conj.*; श्लोकः पाठः $G_1UB^1J$; श्लोकस्य पाठः P; श्लोपाठः $L_2$ **22.7** पक्षतुण्ड° ] $G_1PB^{1ac}L_2J$; पक्षितुण्ड° $U^{pc}B^{1pc}$; पक्षितुण्डि° $U^{ac}$ **22.7** °घातैर्बबाधे ] $G_1PB^1J$; °खातैर्बबाधे U; °घातैर्बबाधो $L_2$ **22.8** °सरणात् ] $G_1$; °चरणात् U; °सारात् P; °शरणात् $B^1L_2$; °स्मरणात् J **22.8** आर्षे हि ] $PB^1L_2$; आर्षेति $G_1UJ$ **22.8** शरनिहत° ] $B^1L_2$; शरनिहित° $G_1UPJ$ **22.9** वार्यमाणेन ] $G_1UPB^1J$; ----- $L_2$ **22.9** लम्पटेन ] $G_1PL_2$; लुम्पटेन $UB^1J$ **22.9** वायसेन ] $G_1UB^1L_2J$; वायस्येन P **22.9** पश्यति ] $G_1PB^1L_2J$; पश्यति पश्यति U **22.10** तरुतलशयिते ] $PB^1L_2$; तरुशायिते $G_1UJ$ **22.11** उत्प्रेक्षाप्ययुक्ता ] UP; उत्प्रेक्षाप्ययुक्तः $G_1J$; उत्प्रेक्षाप्ययुक्ताः $B^1L_2$ **22.11** °चिह्नासम्भवात् ] $G_1UPL_2$; °चिह्नासम्भावा $B^1$; °चिह्नसंभवात् J **22.12** नखपदादिसम्भवः ] $G_1PB^1L_2J$; नखदशनक्षतादिसम्भवः U **22.12** °त्वाभावात् ] $G_1PB^1L_2J$; °त्वासम्भवात् U

ततो रामः सीतया विनिद्रीकृतः काके ऽभिमन्त्रितं तृणमक्षिपत्। सो ऽपि पक्षी तद्भयात्परिभ्रान्तो ऽपि त्राणाभावात् पुनरागम्य रामवचनादेकनयनत्यागेन तस्मादस्त्रान्मुमुचे मुक्तः। मुमुच इति कर्मकर्तरि। तस्य हि पलायमानस्य देवासुरोरगैरपि रक्षा कर्तुं न शकिता। ततो ऽसौ भूय आगत्य राममेव शरणं गतः। तत एकनेत्रत्यागेनास्त्रं सम्मानयेति रामेणाभिहितो ऽसावेकनेत्रमत्यजदित्यागमः॥ २३॥

रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ॥ २४॥

रामः पुनश्चित्रकूटाद्रिभूमिं तत्याज। भरतस्यागमनं भूयः परिशङ्क्य निकटस्थानत्वात्। उत्कमृगां, तद्विरहात्॥ २४॥

प्रययावातिथेयेषु वसन्नृषिकुलेषु सः।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः॥ २५॥

---

**23.1** रामः सीतया ] *conj.*; रामो रामाया सीताया $G_1B^1$; रामो रामया सीतया UP; रामो रामायास्सीताया $L_2$; श्रीरामो रामायाः सीतायाः J **23.1** विनिद्रीकृतः ] *conj.*; अवबोधितो विनिद्रीकृतः $G_1UPB^1J$; अवबोतो विनिद्रीकृतः $L_2$ **23.1** काके ] *conj.*; तस्मिन्काके $G_1UPB^1L_2$; तस्मिन्काके इन्द्रसुते J **23.1** ऽभिमन्त्रितं ] *conj.*; इषीकास्त्रमभिमन्त्रितं $G_1UB^1J$; इषूकास्त्रं अभिमन्त्रितं P; ---षीकास्त्रं अभिमन्त्रितं $L_2$ **23.1** तृणमक्षिपत् ] *conj.*; तृणमास्थदाक्षिपत् $G_1B^1$; तृणमास्थदक्षिपत् $UPL_2J$ **23.1** सो ऽपि ] $UPB^1L_2J$; सापि $G_1$ **23.2** त्राणाभावात् ] $G_1PB^{1ac}$; तृणभावात् U; तृणाभावात् $B^{1pc}$; त्रणाभावात् $L_2$; तृणाभवात् J **23.3** रामवचनादेक° ] $G_1UPB^1$; रामवच--- $L_2$; श्रीरामवचनादेक° J **23.3** °नयनत्यागेन ] P; °नेत्रत्यागेन $G_1UB^1L_2J$ **23.3** मुमुच इति ] $PB^1$; मुमुचेति $G_1J$; मुचेरिति U; मुमचे इ--- $L_2$ **23.4** पलायमानस्य देवासुरोरगैरपि ] $UPB^1J$; पालायमानस्य देवास्वरोगैरपि $G_1$; पलायमानस्य देवासुरोरगैर--- $L_2$ **23.4** रक्षा कर्तुं न शकिता ] $G_1UB^1J$; रक्षां कर्तुं न शकितः P; ---कर्तु न शकिता $L_2$ **23.4** भूय आगत्य ] $UPB^1L_2J$; भूयरागत्य $G_1$ **23.4** राममेव ] $G_1UPB^1L_2$; श्रीराममेव J **23.5** तत एक° ] *conj.*; ततस्तेनैक° **V** **23.5** रामेणाभिहितो ] P; रामेणाभिहिते $G_1UB^1L_2$; श्रीरामेणाभिहिते J **23.6** °मत्यजदि° ] $UPB^1$; °मत्याजदि° $G_1L_2J$ **24.1** रामः ] $G_1UPB^1L_2$; श्रीरामः J **24.1** °भूमिं ] $G_1UPB^1L_2$; °भूमीं J **24.1** तत्याज ] *conj.*; जहौ तत्याज कुतः $G_1UPB^1J$; दहौ तत्याज कुतः $L_2$ **24.1** °गमनं ] $G_1UB^{1pc}J$; °गम+नं+ $B^1$; °गमं $L_2$ **24.2** निकटस्थानत्वात् ] $UPB^1J$; निकटस्थानस्थानत्वात् $G_1$; निकटस्थाननत्वात् $L_2$ **24.2** उत्कमृगां ] *conj.*; उत्सुकसारङ्गामुत्कमृगां $G_1PB^1J$; उत्सुकसारङ्गामुत्कटमृगां U; उत्सकसारङ्गामुत्कमृगां $L_2$

रामो ऽवाचीमाशामगमत्। अतिथिपरिचर्याचतुरेष्वत्रिसुतीक्ष्णशरभङ्गादितपोवनेषु वसन्। तेषु विश्रम्येत्यर्थः। प्रावृषेण्येषु पुष्यादिषु नक्षत्रेषु यथा वसन् सूर्यो दक्षिणायने दक्षिणां दिशं याति॥ २५॥

बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी॥ २६॥

वैदेहसुता राममनुगच्छन्ती रेजे। उत्प्रेक्ष्यते—कैकेयीनिरुद्धापि लक्ष्मीरिव गुणानुरागिणी॥ २६॥

अनसूयाविसृष्टेन पुण्यगन्धेन काननम्।
सा चकाराङ्गरागेण पुष्पोल्ललितषट्पदम्॥ २७॥

सीतात्रिभार्यया तुष्टया पूजार्थं दत्तेन शाश्वतिकेन दिव्येनानुलेपनेन मनोज्ञसौरभेण कुसुमेभ्य उच्चलिता भ्रमरा यस्य तादृशं वनमकरोत्। यत उत्कृष्टगन्धा-

---

**27 a.** अनसूयाविसृष्टेन ] $G_1UPL_2JD^MV^MB_1^MB_2^MB_3^MB_5^MB_7^M$ Jin.; अनसूयानिसृष्टेन $B^1B_4^M$; अनुसूयातिसृष्टेन Hem.Mall.Ar.Nā. **27 d.** पुष्पोल्ललित° ] $G_1UB^1L_2JB_3^MB_5^MB_7^M$; पुष्पोल्लसित° $V^MP$; पुण्यं ष्पोल्ललित° $D^M$; पुष्पोच्चलित° $B_1^MB_2^MB_4^M$**C**; पुष्पो ललित° $B_7^M$

---

**25.1** रामो ] $G_1UPB^1L_2$; श्रीरामः J **25.1** ऽवाचीमाशामगमत् ] *conj.*; दक्षिणां दिशमवाचीं ककुभां प्रययावगमत् $G_1UJ$; दक्षिणां दिशमवाचीमाशां प्रययावगमत् $PB^1$; दक्षिणां दिशमवाचीमाशां प्रययौ $L_2$ **25.1** अतिथिपरिचर्या° ] *conj.*; आतिथेयेष्वतिथिपरिचरण° $G_1UJ$; आतिथीयेष्वतिथिपरिचर्या° P; आतिथेयेष्वतिथिपरिचर्या° $B^1L_2$ **25.2** विश्रम्येत्यर्थः ] $G_1PB^1L_2J$; विश्रान्नित्यर्थः $U^{ac}$; विश्रमन्नित्यर्थः $U^{pc}$ **25.2** प्रावृषेण्येषु ] *conj.*; वार्षिकेषु प्रावृषेण्येषु Σ **25.2** यथा वसन् ] $G_1^{pc}UB^1L_2J$; यथा वसन् तेषु विश्रम्येत्यर्थः $G_1^{ac}$ **25.3** दक्षिणायने ] $G_1UPB^1$; दक्षिणायनेन $L_2$; दक्षिणायेन J **26.1** वैदेहसुता ] *conj.*; वैदेही सुतरां $G_1U$; वैदेही सीता $PB^1L_2$; सीता सुतरां J **26.1** रामम् ] $G_1U$; तं रामम् $PB^1L_2$; श्रीरामम् J **26.1** रेजे ] *conj.*; बभौ रेजे $G_1UB^1J$; बभौ P; बोभौ रेजे $L_2$ **26.1** °निरुद्धापि ] $PB^1L_2$; °निषिद्धापि $G_1UJ$ **26.2** गुणानुरागिणी ] $UB^1J$; गुणानुरागिनी $G_1PL_2$ **27.1** सीता ] *conj.*; सा सीता $G_1UPB^1J$; ---सीता $L_2$ **27.1** °त्रिभार्यया ] *conj.*; अनसूययात्रिभार्यया Σ **27.1** पूजार्थं ] $G_1PB^1L_2J$; पूजार्थ U **27.1** दत्तेन ] *conj.*; निसृष्टेन न दत्तेन $G_1$; निसृष्टेन दत्तेन $UB^1J$; विसृष्टेन दत्तेन P; निसृ--- $L_2$ **27.1** दिव्येनानुलेपनेन ] *conj.*; दिव्येनाङ्गरागेनानुलेपनेन $G_1J$; दिव्येनाङ्गरागेणानुलेपनेन $UPB^1$; दिव्येनाङ्गरागेणानुलेपने $L_2$ **27.2** मनोज्ञसौरभेण ] P; न मनोज्ञसौरभेन $G_1J$; मनोज्ञसौरभ्येन U; अमनोज्ञसौरभेन $B^1$; मनोज्ञ--- $L_2$ **27.2** कुसुमेभ्य उच्चलिता ] *conj.*; पुष्पेभ्य उल्ललिता उच्चलिताः $G_1UB^1L_2J$; पुष्पेभ्य उल्लसिताश्चलिताः P **27.2** भ्रमरा ] *conj.*; षट्पदा भ्रमरा $G_1UB^1L_2J$; षट्पदाः P **27.2** यस्य तादृशं ] $G_1UPB^1J$; ---शं $L_2$ **27.2** वनमकरोत् ] *conj.*; चकार $G_1UB^1J$; कार P

कृष्टत्वादलयो वनकुसुमानि त्यक्त्वा तदभिमुखमायान्ति स्म॥ २७॥

सन्ध्याभ्रकपिशस्तत्र विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः॥ २८॥

अथ तेषां व्रजतां विराधो नाम राक्षसः रामस्य पन्थानमाच्छाद्य तस्थौ। सन्ध्यामेघवत्पिशङ्गः। शशिनो राहुरिव॥ २८॥

स जहार तयोर्मध्ये मैथिलीं लोकशोषणः।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे॥ २९॥

स विराधो रामलक्ष्मणयोर्मध्ये स्थितां सीतामहार्षीत्। जगत्क्षपकः। यथा श्रावणभाद्रपदयोर्मध्ये लोकशोषणो वर्षप्रतिबन्धो वृष्टिं हरति। यदा ह्यनावृष्टिर्भवति तदा नभोनभस्ययोरेव॥ २९॥

तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम्।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः॥ ३०॥

रामलक्ष्मणौ तं हत्वा भूमौ निखाय निहितवन्तौ। अशुद्धेन गन्धेनेमां वनभु-

---

**27.3** °दलयो ] UP$B^1L_2$J; °दालयो $G_1$ **27.3** वनकुसुमानि ] P$B^1$; नवकुसुमानि $G_1$UJ; ---मानि $L_2$ **27.3** °यान्ति ] $G_1$UP$B^1L_2$; °याति J **28.1** रामस्य ] $G_1$UP$B^1L_2$; श्रीरामस्य J **28.1** पन्थानमाच्छाद्य ] *conj.*; मार्गं पन्थानमावृत्याच्छाद्य Σ **28.1** तस्थौ ] $G_1$U$B^1L_2$J; अतिष्ठत् तस्थौ P **28.2** सन्ध्यामेघवत्पिशङ्गः ] *conj.*; कीदृशः। सन्ध्याभ्रवत्कपिशः पिङ्गलः $G_1$UJ; कीदृशः। सन्ध्याभ्रकपिशः सन्धाभ्रवत्कपिशः P; कीदृशः। सन्ध्याभ्रवत्कपिशः पिशङ्गः $B^1$; कीदृशः। सन्ध्याभ्रवत्कपिशः पिनङ्गः $L_2$ **28.2** शशिनो राहुरिव ] *conj.*; इन्दोः शशिनः ग्रहो राहुरिव $G_1$U$B^1L_2$J; शशिनः ग्रहो राहुरिव P **29.1** स विराधो ] P; स विराधो तयोम $G_1$; स विराधस्तयोः U; स विराधः तयो $B^{1pc}$; स विराधो तयो $B^{1ac}$; स विराधः तयो $L_2$; स विराधो नाम राक्षसः तयोः श्री° J **29.1** °र्मध्ये ] J; °रन्ते $G_1$; °र्मध्ये अन्तरे P$B^1L_2$ **29.1** सीतामहार्षीत् ] *conj.*; सीतां जहाराहार्षीत् $G_1$UP$B^1L_2$; मैथिलीं सीतां जहार अहार्षीत् J **29.1** जगत्क्षपकः ] *conj.*; कीदृशः। लोकशोषणः जगत्क्षपकः Σ **29.2** श्रावणभाद्रपदयो° ] *conj.*; नभोनभस्ययोः श्रावणभाद्रपदयो° Σ **29.2** वर्षप्रतिबन्धो ] *conj.*; ऽवग्रहो वर्षप्रतिबन्धो $G_1$UP$B^1$J; ऽवग्रहो वर्षप्रतिबद्धो $L_2$ **29.3** यदा ह्यनावृष्टिर्भवति ] P$B^1L_2$; *om.* $G_1$UJ **29.3** °नभस्ययोरेव ] P$B^{1pc}L_2$; °नभस्ययोरिव $G_1$U$B^{1ac}$J **30.1** रामलक्ष्मणौ ] *conj.*; काकुत्स्थौ रामलक्ष्मणौ $B^{3pc}L_2$; काकुस्थौ रामलक्ष्मणौ $G_1B^{1ac}$; काकुत्सौ रामलक्ष्मणौ U; काकुस्थौ श्रीरामलक्ष्मणौ PJ **30.1** हत्वा ] *conj.*; विनिष्पिष्य हत्वा Σ **30.1** भूमौ ] *conj.*; वसुधायां भूमौ Σ **30.1** निखाय निहितवन्तौ ] *conj.*; निचख्नतुः तं निखाय निहितवन्तौ $G_1$P$B^1L_2$J; निचख्नतुः तं निखाय निहतवन्तौ U **30.1** अशुद्धेन ] *conj.*; कुत इत्याह। अशुचिना अशुद्धेन Σ

वमचिरेणैवापवित्रीकरिष्यतीत्यतो हेतोः। चशब्दादार्षोक्तकारणेनापि। आगमे हि मृतानां रक्षसां भुवि कलेवरनिधानं जातिधर्म इति विराधार्थनयैव भुवि तौ तं निचख्नतुरिति वर्णितम्। अन्यथा तु चशब्दस्यावाचकतैव स्यात्। पुरा दूषयतीति यावत्पुरानिपातयोर्लट्॥ ३०॥

पञ्चवट्यामथो रामः शासनात्कुम्भजन्मनः।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव॥ ३१॥

अनन्तरमगस्त्यस्याज्ञया पञ्चवट्यां तत्संज्ञके वन उवास। तदाज्ञयैवात्यक्ता मर्यादा येन सः। यथा तस्यैवादेशाद्विन्ध्याख्यशैलो ऽत्यक्तस्थितित्वात्स्वरूपे ऽस्थात्। स हि मेरुमत्सरादात्मानमुत्क्षिप्य भानोः पन्थानमावृण्वन् पुनरागमनं यावन्मम मार्गं ददस्वेत्यगस्त्येन प्रकृत्यवस्थायां स्थापितः॥ ३१।

रावणावरजा तत्र राघवं मदनातुरा।

---

**31 a. पञ्चवट्यामथो** ] $G_1UPB^1JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Ar.(?)Nā.; प---मथो $L_2$; पञ्चवट्यां ततो Hem.Mall.Jin. **32 b. राघवं मदनातुरा** ] $G_1UPB^1D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; राघवं मचनातुरा $L_2$; श्रीरामं मदनार्तरा J

---

**30.5** यावत्पुरानिपातयोर्लट् *Aṣṭādhyāyī* 3.3.4.

---

**30.2 वनभुवम्** ] $G_1UB^1J$; वनभूमिम् $PL_2$ **30.2 °णैवापवित्रीकरिष्यती°** ] *conj.*; °णैव दूषयत्यपवित्रीकरिष्यती° Σ **30.3 रक्षसां** ] $UB^1L_2$; राक्षसां $G_1J$; राक्षसानां P **30.3 भुवि कलेवरनिधानं** ] P; कलेवरनिधानं भूमावेव $G_1UB^1$; कलेवरनिधनभूमावेव $L_2$; कर्णेवरनिधानं भूमावेव J **30.3 विराधार्थनयैव** ] $G_1UPB^{3pc}J$; विराधार्थनैव $B^{1ac}$; विराधात्। नैव $L_2$ **30.4 भुवि तौ तं** ] $G_1UPJ$; भुवि $B^1$; तौ तं भुवि $L_2$ **30.4 चशब्दस्यावाचकतैव** ] $PB^1L_2$; चशब्दस्य वाचकतैव $G_1J$; °शब्दस्य वाचकतैव U **30.5 पुरा दूषयतीति** ] $G_1UPB^1J$; परा दूष--- $L_2$ **30.5 °निपातयोर्लट्** ] $PB^{3pc}$; °णिपातयोर्लुट् $G_1J$; °शब्दयोर्निपातयोर्लुट् U; °णिपातयोर्लट् $B^{1ac}$; °निपातयोर्लट्॥ ३०॥ दण्डकारण्ये $L_2$ **31.1 अनन्तरमगस्त्यस्याज्ञया** ] *conj.*; कुम्भजन्मनरगस्त्यस्य शासनादाज्ञया $G_1$; अनन्तरं कुम्भजन्मनो गस्त्यस्य शासनादाज्ञया U; ततः कुम्भजन्मनो गस्त्यस्य शासनादाज्ञया $PB^1$; ततः कुम्भज---शासनादाज्ञया $L_2$; अथ विराधादिवधादनंतरं कुंभजन्मनो ऽगस्त्यस्य शासनादाज्ञया J **31.1 उवास** ] *conj.*; तस्थावुवास $G_1PB^1J$; तस्थावासत U; तस्थौ--- $L_2$ **31.1 तदाज्ञयैवात्यक्ता** ] $UB^{1ac}J$; अगस्त्यस्याज्ञायाः अत्यक्ता P; तदाज्ञयैव त्यक्ता $B^{1pc}$; तदाज्ञयैवात्यत्क्ता $L_2$; तदाज्ञैवात्यक्ता $G_1$ **31.2 ऽत्यक्तस्थितित्वात्** ] $G_1PB^{1ac}L_2J$; अत्यक्तस्थिततत्वात् U; अत्युक्तस्थिततत्वात् $B^{3pc}$ **31.3 मेरुमत्सरादात्मानमुत्क्षिप्य** ] P; मेरुवर्त्मरात्मानमुत्क्षिप्य $G_1$; मेरुवत्परात्मानमुत्क्षिप्य U; मेरुवर्त्मनात्मानमुत्षिप्य $B^{1pc}$; मेरुवत्स??त्म्नमुत्क्षिप्य $B^{1ac}$; मेरुवत्सरादात्मानमुत्क्षिप्य $L_2$; मेरुवत्सारात् सानुमुत्क्षिप्य J **31.4 यावन्मम** ] $PB^1L_2J$; यावत्मम $G_1$; यान्मम U **31.4 ददस्वेत्य्** ] $G_1UB^1L_2J$; ददस्वेत्युत्क्का P

अभिपेदे निदाघार्ता व्यालीव मलयद्रुमम्॥ ३२॥

तत्र पञ्चवट्यां रावणस्यानुजा शूर्पनखा नाम राक्षसी कामेन व्यथिता सती राघवमाययौ। कामरूपत्वाद्रम्यं रूपं विधाय। घर्मव्यथिता नागी चन्दनतरुमिव॥ ३२॥

सा सीतासन्निधावेव तं वव्रे कथितान्वया।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः॥ ३३॥

शूर्पनखा रामं सीतासमक्षमेवाचकमत, न तु रहसि। आख्यातस्वकुला। यस्मात् परां कोटिं प्राप्त उल्बणः कामो नारीणामकालज्ञो भवति। कामातुराणां तासामवसरानवसरविवेको न जायत इति भावः॥ ३३॥

कलत्रवानहं बाले यवीयांसं भजस्व मे।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम्॥ ३४॥

---

**32 c.** अभिपेदे ] **V**$D^{M}V^{M}B_1^{M}B_2^{M}B_3^{M}B_5^{M}B_7^{M}$Mall.Ar.(?)Nā.Jin.; अपिपेदे $B_4^{M}$; आजगाम Hem. **33 b.** कथितान्वया ] Σ; मदनातुरा P **34 b.** यवीयांसं ] UP$B^{3pc}D^{M}B_1^{M}B_2^{M}B_3^{M}B_4^{M}B_5^{M}B_7^{M}$Ar.Nā.; यवीयासं $V^{M}$; यवेयांसं $G_1B^{1ac}L_2$J; कनीयांसं Hem.Mall.Jin.

---

**32.1** तत्र ] P$B^1L_2$; ततः $G_1$UJ **32.1** कामेन ] *conj.*; मदनेन कामेन Σ **32.1** व्यथिता सती ] *conj.*; आतुरा व्यथिता सती $G_1$UP$B^1L_2$; आर्तरा व्यथिता सीताJ **32.2** राघवमाययौ ] $G_1$UP$B^1L_2$; श्रीराघवमाययौ J **32.2** कामरूपत्वा° ] $G_1$U$B^1L_2$J; कामातुरत्वा° P **32.2** नागी ] $G_1$UP$B^1L_2$; व्याली नागी J **32.3** °तरुमिव ] $G_1B^1L_2$J; °द्रुममिव UP **33.1** शूर्पनखा ] *conj.*; सा शूर्पनखा Σ **33.1** रामं ] *conj.*; तं रामं $G_1$UP$B^1L_2$; तां श्रीरामं J **33.1** सीतासमक्षम् ] *conj.*; सीतासन्निधौ सीतासमक्षम् $G_1$U$B^1L_2$J; सीतासन्निधा सीतासमक्षम् P **33.1** °वाचकमत ] *conj.*; °व वव्रे अचकमत Σ **33.1** आख्यातस्वकुला ] *conj.*; कीदृशी कथिता आख्याता सुकुला $G_1$; कीदृशी कथितान्वया आख्यातवंशा स्वकु U; कीदृशी कथितान्वया आख्यातस्वकुला P$B^1$; कीदृशी कथितान्वया आख्यातसुकुला $L_2$; कीदृशी कथिता आख्याता स्वकुला J **33.2** यस्मात् ] *conj.*; हि यस्मात् Σ **33.2** परां कोटिं प्राप्त ] *conj.*; अत्यारूढः परां कोटिं प्राप्तः $G_1$UP$B^1$; अत्यारूढः परां कोटिमाप्तः $L_2$; अत्यारूढः परां कोटिं प्राप्ता J **33.2** उल्बणः ] UP$B^1$; उल्बनो $G_1$; उलणो $L_2$; उल्वनो J **33.2** कामो ] *conj.*; मनोभवः कामः Σ **33.2** भवति ] *conj.*; भवति कालं न जानातीत्यर्थः $G_1$UP$B^1$J; भवति काले न जानातीर्थः $L_2$ **33.3** कामातुराणां तासाम् ] P; कामातुराणाम् $G_1B^1L_2$; कामार्तराणाम् J **33.3** °वसरविवेको ] $G_1$P$B^1L_2$J; °वसरौ U

कामुकीं कामुकमीप्सतीं राम इत्यन्वशिषत्। हे तरुणि सदारो ऽस्मि। मम कनिष्ठं लक्ष्मणं त्वं भजस्व। यतो ऽसन्निहितभार्यम्। सदाचारत्वादहमन्यां नारीं न कामये। अतिशयेन युवा यवीयान् स्थूलदूरादित्वात् साधितः। वृषमिच्छति वृषस्यति। अश्वक्षीरवृषलवणानां क्यचि मैथुनेच्छायामसुगागमः॥ ३४॥

ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाक्॥ ३५॥

सा शूर्पनखा रामं पुनरगात्। आदौ रामाभियानाल्लक्ष्मणेन प्रत्याख्याता। “आदौ मत्सकाशं नागमस्त्वम्” इति। इति गतागतवशात् पारावारगामिनी

---

**35 c.** °श्रया ] $G_1UPB^1L_2D^MV^MB_1^{Mpc}B_2^MB_3^MB_4^{Mpc}B_7^M$Hem.Mall.; °श्रयो $G_1^{ac}JB_1^{Mac}B_4^{Mac}B_5^M$; °श्रिता Ar.(?)Nā.Jin.

---

**34.3** स्थूलदूरादित्वात्··· Cf. *Aṣṭādhyāyī* 6.4.156.

**34.4** अश्वक्षीरवृषलवणाणां क्वचि Cf. *Aṣṭādhyāyī* 7.1.51: अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि

**34.4** मैथुनेच्छायाम् Cf. the first *vārttika* on *Aṣṭādhyāyī* 7.1.51: अश्ववृषयोर्मैथुनेच्छायाम्

---

**34.1** कामुकीं कामुकमीप्सतीं ] *conj.*; वृषस्यन्तीं कामुकीं कामुकमीप्सतीं $G_1UPB^1J$; वृषस्यन्तीं कामु ⏑ ⏑ ⏑न्तीं $L_2$ **34.1** राम ] $G_1UPB^1L_2$; श्रीराम J **34.1** इत्यन्वशिषत् ] *conj.*; इति शशाशान्वशिषत् Σ **34.1** तरुणि ] *conj.*; बाले तरुणि Σ **34.1** सदारो ऽस्मि ] *conj.*; अहं कलत्रवान्सदारो ऽस्मि $G_1UPB^1J$; अ⏑ ⏑ ⏑ ⏑वान्सदारोस्मि $L_2$ **34.1** मम ] *conj.*; मे $G_1UPB^1L_2$; मे मम J **34.2** कनिष्ठं ] *conj.*; यवीयांसं कनिष्ठं $G_1UPB^1$; यवेयांसं कनिष्ठं $L_2$; यवीयांसं कनिष्टं J **34.2** °हमन्यां नारीं ] $G_1UPJ$; °हमन्यां $B^1$; °हं सत्यां नारीं $L_2$ **34.3** न कामये ] $G_1UPB^{3pc}J$; नामये $B^{1ac}$; ---ये $L_2$ **34.3** स्थूल° ] $UPB^1L_2J$; स्थल° $G_1$ **34.3** साधितः ] $G_1PB^1J$; सादितः U; --- $L_2$ **34.4** वृषमिच्छति वृषस्यति ] $G_1UB^1L_2J$; वृषमिच्छतीति वृषस्यति P **34.4** अश्वक्षीरवृषलवणानां क्यचि ] *conj.*; अवुक्षीरवृषलक्षणाना क्यपि $G_1$; अध्वक्षीरवृषवृक्षक्षणानां क्यपि U; अध्वक्षीरवृषलवणानां क्यपि P; अध्वक्षीरवृषलवणानां क्वापि $B^{3pc}$; अध्वक्षीरवृषलवणानं कुपि $B^{1ac}$; अथक्षीवृषलवणानां क्यपि $L_2$; अध्वक्षीरवृषलक्षणानां क्यपि J **34.4** °यामसुगागमः ] *conj.*; °यां सुगागमः $B^1$; °यां सुरागमः $G_1UL_2J$; °यां नुरागमः P **35.2** सा शूर्पनखा रामं पुनरगात्। आदौ रामाभियानाल्लक्ष्मणेन प्रत्याख्याता। आदौ मत्सकाशं नागमस्त्वमिति ] $G_1$; शा शूर्पनखा पुरा राममगा (?) आदौ रामाभियानात् लक्ष्मणेन प्रताख्याता आदौ मत्सकाशं नागमः त्वम् U; आदौ ज्येष्ठस्याभिगमनादिति पूर्वं मत्सकाशं त्वं नागतेति तेन सौमित्रिणाप्यनभिनन्दिता प्रत्याख्याता (प्रत्यगाख्याता $L_2$) पुनः राममगात् $PB^{1ac}$; before this $B^{3pc}$ adds सा शूर्पनखा रामाश्रया भूयो गात् रामं पुनरगात्; सा शूर्पनखा श्रीरामं पुनरगात् आदौ रामाभियानात् लक्ष्मणेन प्रयाख्याता आदौ मत्सकाशां नागमस्त्वमिति J **35.2** इति गतागत° ] $PB^1L_2$; इत्यसकृद्गतागत° $G_1U$; इत्यसत्कृतागत° J **35.2** पारावार° ] $G_1UPB^1L_2$; परावार° J

सरिदिव॥ ३५ ॥

संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः॥ ३६ ॥

सीताहसितं शूर्पनखां क्रोधं प्रापयत्, अचुक्षुभदित्यर्थः। क्षणमात्रं सौम्याम्। पवनाभावनिश्चलाम्, अत एव क्षणसौम्याम्, अब्धेर्मर्यादां चन्द्रोदय इव। स्तिमिताया अपि तस्या वेलाशब्दवाच्यत्वं भविष्यदवस्थापेक्षया॥ ३६ ॥

फलमस्यावहासस्य सद्यः प्राप्स्यसि पश्य माम्।
मृगीपरिभवो व्याघ्र्या मृत्यवे हि त्वया कृतः॥ ३७ ॥

इत्युक्त्वा मैथिलीं भर्तुरङ्गानि विशतीं भयात्।
रूपं शूर्पनखा नाम्नः सदृशं प्रत्यपद्यत॥ ३८ ॥

---

**36 c.** °स्तिमितां ] Σ; °स्तम्भितां Hem. **36 d.** इवोदधेः ] $P^{pc}B^1L_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^M$𝕮; इवाम्बुधेः $G_1UJB_7^M$; इवार्णवः $P^{ac}$ **37 a.** फलमस्यावहासस्य ] $UPB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; फलमस्यावहासास्य $G_1$; फलमस्योपहासस्य 𝕮 **37 c.** मृगीपरिभवो व्याघ्र्या ] $\mathbf{V}V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; मृगीपरिभवो व्याघ्र्याम् $D^M$Hem.Ar.Nā.; मृग्याः परिभवो व्याघ्र्यां Mall.; मृग्या परिभवो व्याघ्र्यां $Ar.^{vl}$; मृगीपराभवो व्याघ्र्याम् Jin. **37 d.** मृत्यवे हि त्वया कृतः ] **Ś**$Ar.^{vl}$Jin.; अवेहीति कृतं त्वया Hem.; अवेहीति कृतस्त्वया (?) $Hem.^{vl}$; इत्यवेहि त्वया कृतम् Mall.; इत्यवेहि त्वया कृतः Ar.(?)Nā.(?) **38 b.** अङ्गानि विशतीं ] $G_1PB^1L_2D^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Ar.Nā.; अङ्गानि विशती U; अङ्के निविशतीं JJin.; अङ्कं प्रविशतीं Hem.; अङ्कं निविशतीं $Hem.^{vl}Ar.^{vl}Nā.^{vl}$; अङ्कं निर्विशतीं Mall. **38 c.** शूर्पनखा नाम्नः ] $PB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$; शूर्पनखा नम्नस् $G_1$; शूर्पनखा नाम्ना U; शूर्पणखा नाम्ना Hem.; शूर्पणखा नाम्नः Mall.Ar.Nā.Jin.

---

**35.3** सरिदिव ] *conj.*; नदी सरिदिव Σ **36.1** सीताहसितं ] *conj.*; मैथिलीहासः सीताहसितं Σ **36.1** शूर्पनखां ] $G_1UB^1J$; तां शूर्पनखां $PL_2$ **36.1** क्रोधं ] *conj.*; संरम्भं क्षोभं $G_1UB^1L_2J$; संरम्भं क्रोधं P **36.1** प्रापयत्, अचुक्षुभदित्यर्थः ] *conj.*; निनाय प्रापयेत् $G_1$; निनाय प्रापयत् $UB^1L_2J$; निनाय प्रापयदचुक्षुभदित्यर्थः P **36.1** क्षणमात्रं ] $G_1UJ$; कीदृशीं क्षणमात्रं $PB^1L_2$ **36.2** पवनाभावनिश्चलाम् ] *conj.*; निवातस्तिमितां पवनाभावनिश्चलाम् $G_1^{pc}UPB^1L_2J$; निवातस्तिमितां पवनाभावनिश्चितालाम् $G_1^{ac}$ **36.2** अत एव क्षण° ] $UPL_2$; अत एव लक्षण° $G_1B^1J$ **36.2** °सौम्याम्, अब्धेर्मर्यादां ] *conj.*; °सौम्यामुदधेरब्धे वेलां मर्यादां $G_1J$; °सौम्यामुदधेरब्धेर्वेलां मर्यादां $UB^1$; °सोम्यां उदधेरब्धेः वेलां मर्यादां $PL_2$ **36.2** चन्द्रोदय इव ] $G_1UB^1L_2J$; चन्द्रोदय इव क्षुब्धतां P **36.3** स्तिमिताया ] $PB^1L_2$; स्तिमिता $G_1UJ$ **36.3** °वाच्यत्वं ] $G_1UPB^1J$; °वाचित्वं $L_2$

अस्योपहासस्य सद्य एव फलमाप्स्यसि। मां पश्य त्वम्। यस्मात् हरिण्या यः परिभवः कार्यः स शार्दूलाङ्गनायास्त्वयात्मविनाशाय विहितः। यदि वा मृगीकर्तृकः परिभवस्त्वया सिंह्या मृत्यवे कृतः। मृगीवत्त्वयाहं व्याघ्रीव मृत्यवे परिभूतेति भावः। †भयाद्भर्तुरङ्गानि विशतीं† सीतामित्युक्त्वा नाम्नः सदृशं शूर्पाकारनखमित्यादिकं रूपं भीषणं राक्षसीरूपं प्रपेदे। युग्मम्॥

लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम्॥ ३९॥

विप्रकृष्टस्थो लक्ष्मणस्तां शूर्पनखां पूर्वं कोकिलावन्मधुरभाषिणीं पश्चात्सृगालीपरुषवाचमाकर्ण्य विकृतेति क्रुद्धां तामज्ञासीत्। न ह्यकुपिते वचनं वैकृतमु-

---

**39 c.** °वादिनीम् ] Σ; °भाषिणीम् Mall. **39 c.** °स्वनां ] $UPB^1L_2JD^MV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.; °सुनां $G_1$; °स्वरां Ar.(?)Nā.Jin. **39 d.** विकृतेति ताम् ] $G_1PB^1L_2JV^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; चेति विक्रियाम् U; विकृति ताम् $D^M$

---

**38.1** मां पश्य त्वम् ] $PB^1L_2$; त्वं मां पश्य $G_1UJ$ **38.1** यस्मात् ] *conj.*; हि यस्मात् Σ **38.2** हरिण्या यः परिभवः कार्यः स शार्दूलाङ्गनायास्त्वयात्मविनाशाय विहितः, यदि वा ] *em.*; *om.* $G_1UB^1L_2J$; हरिण्याः यः परिभवः का× ?× +र्यः+ सः शार्दूलाङ्गनायाः त्वया आत्मविनाशाय विहितः यदि वा P **38.3** मृगीकर्तृकः परिभवस्त्वया सिंह्याः मृत्यवे कृतः मृगीवत् ] मृगीव U(eyeskip) **38.3** सिंह्या ] *conj.*; व्याघ्र्याः सिंह्याः $PB^1L_2$; व्याघ्र्यः सिंह्याः $G_1J$ **38.4** भावः ] $G_1PB^1L_2$; भावः मृगीकर्तृकः परिभवः त्वया व्याघ्र्याः सिंह्याः कृतः मृत्यवे U **38.4** भयाद्भर्तुरङ्गानि ] $G_1B^1$; भयात्तु भर्तुरङ्गानि U; भया भर्त्तुरङ्गानि P; भयात्तुरङ्गानि $L_2$; भयात् भर्तुः श्रीरामस्यांगानि J **38.4** विशतीं ] $G_1PB^1$; विशती U; ---तीं $L_2$; विशंतीं J **38.4** सीतामित्युक्त्वा ] P; मिथिलीं सीतामित्युक्त्वा $G_1$; मैथिलीं सीतामित्युक्त्वा $UB^1L_2$; मैथिलीं सेतामित्युक्त्वा J **38.4** नाम्नः ] $G_1PB^1L_2$; नाम्ना UJ **38.5** शूर्पाकारनखम् ] $PB^1$; शूर्पनखाकारनखम् $G_1J$; शूर्पनखाकारम् U; शूर्पाक---मित्यादिकं $L_2$ **38.5** प्रपेदे ] *conj.*; प्रतिपद्यत प्रपेदे $G_1B^1J$; प्रत्यपद्यत प्रपेदे UP; प्रतिपद्य--- $L_2$ **38.5** युग्मम् ] *conj.*; न मुखात्संज्ञायामिति वचनात्स्वाङ्गादिति जस्प्रत्ययस्य निषेधः। पूर्वपदात्संज्ञायामिति णत्वाभावः॥ युग्मम् $G_1$; नखमुखात्संज्ञायामिति वचनात्स्वाङ्गादिति ङीष्प्रययस्य प्रतिषेधः नकारस्य णत्वाभावः U; न मुखात्संज्ञायामिति वचनात्स्वाङ्गादिति ङीष्प्रत्ययस्य निषेधः पूर्वपदात्संज्ञायामिति णत्वाभावः॥ युग्मम् श्रेयसे ऽस्माकम्॥ P; नखमुखात् (नमुखात् $B^{1ac}$) संज्ञायामिति वचनात्स्वाङ्गादिति ङीष्प्रत्ययस्य निषेधः पूर्वपदात्संज्ञायामिति णत्वाभावः॥ युग्मम् $B^1$; न मुखात् संज्ञायामिति ङीष्प्रययस्य U; ङीष्--- निषेधः। पूर्वपदात्संज्ञायामिति णत्वाभाव --- $L_2$; न मुखात्संज्ञायामिति वचनात्स्वाङ्गादिति ङीप्रत्ययस्य निषेधः। पूर्वपदात्संज्ञायामिति वचनात् स्वांगादिति णत्वाभावः॥ युगलकम् J **39.1** पूर्वं ] *conj.*; प्रथमं पूर्वं $G_1UP^{pc}B^1L_2J$; प्रथमं $P^{ac}$ **39.1** कोकिलावन्मधुर° ] $UB^1L_2J$; कोकिलावान्मधुर° $G_1$; कोकिलवन्मधुर° P **39.2** °सृगालीपरुष° ] $G_1UB^1L_2$; °सृगालीवत्परशु° P; °सृगालीपुरुष° J

त्पद्यते। विकृतेति, इतिशब्देन प्रातिपदिकमात्रावस्थापनाद्द्वितीयाभावो यथा क्रमादमुं नारद इत्यबोधि स इत्यादौ॥ ३९॥

पर्णशालामथ क्षिप्रं विधृतासिः प्रविश्य सः।
वैरूप्यपुनरुक्तेन भीषणां तामयोजयत्॥ ४०॥

अनन्तरं लक्ष्मण आशूटजं खङ्गहस्तः प्रविश्य ततः खङ्गमाकृष्य भयङ्करां तां द्विगुणेन वैरूप्येण संगमयति स्म। छिन्नकर्णनासिकत्वात्पुनरुक्तम्, आदावेव तस्या भयानकत्वात्। वैरूप्यपुनरुक्तेनेति कर्मधारयः। अन्तर्भावितभावार्थेन वा षष्ठीतत्पुरुषः॥ ४०॥

सा वक्रनखधारिण्या वेणुकर्कशपर्वया।
अङ्कुशाकारयाङ्गुल्या तानतर्जयदम्बरात्॥ ४१॥

---

**40 b.** विधृतासिः ] $G_1$UP$B^1$J$D^M V^M B_1^M B_2^M B_3^M B_5^{Mpc} B_7^M$Hem.Ar.Nā.; विदतासिः $L_2$; विवृता $B_4^{Mac}$; विवृतासि $B_4^{Mpc}$; विश्यतासिः $B_5^{Mac}$; विवृतासिः Mall.; विकृष्टासिः $Ar.^{vl}$ **40 c.** वैरूप्यपुनरुक्तेन ] $P^{pc} B_2^M B_4^M Hem.^{vl} Ar.^{vl}$; वैरूप्यपौनरुक्त्येन $G_1$U$B^1 L_2$J$D^M V^M B_1^M B_3^{Mpc} B_5^M B_7^M$Hem.Mall.$Ar.^{vl}$Nā.Jin.; वैरूप्यप्यं पुनरुक्तेन $P^{ac}$; वैरूप्यं पौनरुक्त्येन $B_3^{Mac}$ Ar. **41 d.** तानतर्जयदम्बरात् ] UP$B^1$J$D^M V^M B_1^M B_2^M B_3^M B_4^M B_5^M B_7^M Ar.^{vl}$; तानतर्जयदम्भरात् $G_1 L_2$; तानतर्जयदम्बरे Hem.; तावतर्जयदम्बरे Mall.Jin.; तानतर्जयताम्बरे Ar.Nā.

---

**39.4** क्रमादमुं नारद इत्यबोधि स *Śiśupālavadha* 1:3d. Also quoted by Vallabha ad *Kumārasambhava* 5:27.

---

**39.3** न ह्यकुपिते… °त्पद्यते ] *om.* $B^{1ac} L_2$ **39.3** वैकृतमुत्पद्यते ] $B^{3pc}$; वैकृतमुत्पाद्यते $G_1$UJ; वैरूप्यं वचनवैकृत्यं उत्पद्यते P **39.3** इतिशब्देन ] *conj.*; शब्देन Σ **39.3** प्रातिपदिकमात्रा° ] $G_1$U$B^1$J; प्रतिपादकमात्रा° P; प्रातिपादिकमात्रम° $L_2$ **39.3** °द्वितीया° ] UP$B^1 L_2$J; °त्स्वितीया° $G_1$ **40.1** अनन्तरं ] *conj.*; अथानन्तरं Σ **40.1** लक्ष्मण ] *conj.*; स लक्ष्मणः Σ **40.1** आशूटजं ] *conj.*; क्षिप्रमाशु पर्णशालामुटजं $G_1$UP$B^1 L_2$; क्षिप्रमाशु पर्णशाखामुटजं J **40.1** खङ्गहस्तः ] *conj.*; विधृतासिः खङ्गहस्तः $G_1$U$B^1 L_2$J; विधृतासिः P **40.1** खङ्गमाकृष्य ] U$B^1 L_2$; खङ्गमाकृश्य $G_1$J; उत्कृष्टखङ्गः ततः खङ्गमाकृष्य P **40.1** भयङ्करां तां ] $G_1$U$B^1$J; भीषणां भयङ्करां P$L_2$ **40.2** द्विगुणेन ] *conj.*; वैरूप्यपौनरुक्त्येन द्विगुणेन $G_1$U$B^1 L_2$; वैरूप्यरुनरुक्तेन द्विगुणेन P; वैरूप्यपौनरुक्त्येन द्विगुणे J **40.2** वैरूप्येण संगमयति स्म ] *conj.*; वैरूप्येनायोजयत् $G_1$U$B^1$J; वैरूप्येणायोजयत् संगयति स्म P; वैरूपेणायोजयत् $L_2$ **40.3** °पुनरुक्तेनेति ] *conj.*; °पौनरुक्त्येनेति $L_2$; °पौनरुक्त्येति UP$B^{1pc}$J; °पौनरुक्तेति $G_1$; °पौनरुक्त्येतेति $B^{1ac}$ **40.3** अन्तर्भावितभावार्थेन ] *conj.*; अन्तर्भावितधात्वर्थेन $G_1$UP$B^1$J; अन्तर्भावित्वर्थेन $L_2$

राक्षस्याकाशादाकाशमारुह्याङ्गुल्या तांस्त्रीनप्यतर्जयत्। क्वाधुना यास्यथेति। कुटिलकररुहधारिण्या। वंशवत्परुषसन्धिबन्धया। भर्त्सनवशात् सृणिवद्वक्रया च॥ ४१॥

प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधा।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्॥ ४२॥

तथाविधा लूनाङ्गी शीघ्रं जनस्थानं तदाख्यं वनमासाद्य खरदूषणत्रिशिरोभ्यो रामेणोपक्रान्तं नूतनं रक्षसां तिरस्कारमकथयत्। उपक्रम्यत इत्युपक्रमः। ततः षष्ठीसमासः। रामात्प्रवृत्त उपक्रम आरम्भो यस्येति वा॥ ४२॥

मुखावयवलूनां तां नैरृता यत्पुरो दधुः।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम्॥ ४३॥

---

**42 b.** तथाविधा ] $\mathrm{G_1UPB^1L_2JD^MB_1^MB_3^MB_4^{Mac}B_5^MB_7^M}$Jin.; तथैव सा $\mathrm{JV^MB_2^M}$; तथाविधम् $\mathrm{B_4^{Mpc}}$Hem.Mall.Ar.(?)Nā. **43 c.** °यायिनां ] $\mathrm{G_1UPB^1L_2V^MB_1^MB_2^MB_3^MB_4^MB_5^MB_7^M}$ Hem.Mall.Ar.(?)Nā.; °यायिनो J; °यायनां $\mathrm{D^M}$; °यायिनीं Jin.

---

**42.2** उपक्रम्यत इत्युपक्रमः ] *Kāśikā* ad *Aṣṭādhyāyī* 2.4.21.

---

**41.1** राक्षस्य् ] *conj.*; सा राक्षसी $\mathrm{G_1UPB^1L_2}$; सा राक्षसी शूर्पनखा J **41.1** आकाशाद् ] *conj.*; अम्बरादाकाशात् $\mathrm{G_1UPB^1J}$ **41.1** तांस्त्रीनप्यतर्जयत् ] $\mathrm{G_1UB^1L_2}$; तांस्त्रीनतर्जयत् P; तांस्त्रीन् सीताश्रीरामलक्ष्मणान्नपि अतर्जयत् J **41.1** क्वाधुना ] $\mathrm{UPB^1J}$; क्वाध्वना $\mathrm{G_1}$; क्वधुना $\mathrm{L_2}$ **41.1** यास्यथेति ] $\mathrm{G_1UPB^1L_2J^{ac}}$; यास्याथेति $\mathrm{J^{pc}}$ **41.2** कुटिलकररुहधारिण्या ] *conj.*; कीदृश्या कुटिलकररुहधारिण्या $\mathrm{G_1B^1J}$; कीदृश्या कुटिलनखधारिण्या U; कीदृश्या कुटिलानि करजानि बिभर्ति या तया P; कीदृश्या अङ्गुल्या कुटिलकररुहधारिण्या $\mathrm{L_2}$ **41.2** वंशवत्परुषसन्धिबन्धया ] *conj.*; वेणुवद्वंशवत्कर्कशानि परुषाणि (पुरुषाणि U; पारुषाणि J) पर्वाणि सन्धिबन्धा यस्याः Σ **41.2** भर्त्सनव° ] $\mathrm{G_1PB^1J}$; भर्त्सनखव° U; भर्त्सनवे° $\mathrm{L_2}$ **41.2** सृणिवद्वक्रया ] *conj.*; अङ्कुशाकारया सृणिवद्वक्रा $\mathrm{G_1J}$; अङ्कुशाकारया सृणिवद्वक्रया $\mathrm{UPB^1}$; अङ्कुशाकारया सृणिवद्वक्र--- $\mathrm{L_2}$ **42.1** तथाविधा लूनाङ्गी ] $\mathrm{G_1UPB^1J}$; तथावि---ङ्गी $\mathrm{L_2}$ **42.1** शीघ्रं ] *conj.*; आशु शीघ्रं Σ **42.1** जनस्थानं ] $\mathrm{UPB^1L_2}$; जनपदस्थानं $\mathrm{G_1J}$ **42.1** वनम् ] $\mathrm{PB^1L_2}$; *om.* $\mathrm{G_1UJ}$ **42.1** आसाद्य ] *conj.*; प्राप्यासाद्य खरादिभ्यः $\mathrm{G_1UPB^1J}$; प्राप्या---रादिभ्यः $\mathrm{L_2}$ **42.1** °शिरोभ्यो ] $\mathrm{G_1PB^1}$; °शरेभ्यः $\mathrm{UL_2J}$ **42.2** रामेणोपक्रान्तं ] $\mathrm{G_1UP}$; रामोपक्रमं रामेणोपक्रान्तं $\mathrm{B^1L_2}$; श्रीरामेणोपक्रांतं J **42.2** नूतनं ] *conj.*; नवं नूतनं $\mathrm{UPB^1}$; नवं नूतन $\mathrm{G_1J}$; वनं नूतनं $\mathrm{L_2}$ **42.2** तिरस्कारमकथयत् ] *conj.*; परिभवं तिरस्कारमाचख्यौ अकथयत् $\mathrm{G_1UPB^1L_2}$; परिभवं तिरस्कारमाचख्यौ अथयत् J **42.2** उपक्रम्यत ] $\mathrm{G_1UPB^1J}$; उपक्राम्यते $\mathrm{L_2}$ **42.3** रामात् ] $\mathrm{G_1UP^{pc}B^1L_2}$; मात् $\mathrm{P^{ac}}$; श्रीरामात् J **42.3** उपक्रम ] $\mathrm{UPB^1L_2J}$; उउपक्रम $\mathrm{G_1}$

छिन्नकर्णनासां शूर्पनखां मार्गदर्शनार्थं राक्षसा यदग्रे कृतवन्तो राममभिषेणयतां रक्षसां तदेव तस्या अग्रेकरणमेवामङ्गलमभूत्। यियासोर्हि पुरतश्छिन्ननासिकावस्थापनमप्रशस्तम्॥ ४३॥

उदायुधानापततस्तान्दृप्तान्वीक्ष्य राघवः।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे॥ ४४॥

उद्यतप्रहरणान्सदर्पान्राक्षसानागच्छतो वीक्ष्य रामो जयसम्भावनां धनुषि स्थापयामास, सीतां च लक्ष्मणे रक्षार्थम्। विजयसाधनं धनुरादाय तदाशंसां प्रत्यैच्छदित्यर्थः॥ ४४॥

एको दाशरथिः कामं यातुधानाः सहस्रशः।
ते तु यावन्त एवासंस्तावद्धा ददृशे स तैः॥ ४५॥

---

**44 b.** दृप्तान्वीक्ष्य ] $G_1UPB^1L_2JD^MB^M_1B^M_2B^M_4B^M_7$Hem.; दृस्तान्वीक्ष्य $B^M_3$; दृप्तान्प्रेक्ष्य $V^MB^M_5$Mall.Ar.(?)Nā.; दुष्टान्प्रेक्ष्य Jin. **45 c.** एवासंस्तावद्धा ] $G^{pc}_1UPB^1L_2JD^MV^MB^M_1B^M_2B^M_3B^M_4B^M_5B^M_7$Ar.(?)Nā.; एवांसंस्तावद्धा $G^{ac}_1$; एवाजौ तावद्धा Hem.; एवाजौ तावांश्च Mall.; एवासंस्तावांश्च Jin.

---

**43.1** छिन्नकर्ण° ] U; छिन्नकर्णा° $G_1J$; मुखावयवलूनां छिन्नकर्णा° $PB^1$; मुखावयवलूनां छिन्नकर्ण° $L_2$ **43.1** शूर्पनखां ] *conj.*; तां $G_1UPB^1L_2$; तां शूर्पनखां J **43.1** यदग्रे कृतवन्तो ] *conj.*; यत्पुरो दधुः अग्रे चक्रुः $G_1UJ$; यत्पुरो दधुः अग्रे कृतवन्तः $PB^1$; यत्पुरो दधुः अग्रे तवन्तः $L_2$ **43.1** राममभिषेणयतां ] $G^{pc}_1$; रामाभियायिनां तेषां तदेवाभूदमङ्गलं राममभिषेणयतां $G^{ac}_1$; रामाभियायिनां रामभिषेणयतां U; रामाभियायिनां राममभिषेणयतां $PB^1L_2$; रामाभियायिनां श्रीराममभिषेणयतां J **43.2** रक्षसां ] *conj.*; तेषां रक्षसां $UB^1L_2$; तेषां राक्षसां $G_1J$; तेषां राक्षसानां P **43.2** तदेव तस्या अग्रेकरणम् ] $B^1L_2$; तदेव तस्याग्रेकरणम् $G_1UJ$; तदेवैतस्याः अग्रेकरणम् P **43.2** °मङ्गलमभूत् ] $G_1UPB^1L_2$; °सङ्गमभूत् J **43.3** पुरतश्छिन्न° ] $G_1UPB^1L_2$; पुरतच्छिन्न° J **43.3** °वस्थापनमप्रशस्तम् ] *conj.*; °वस्थानमप्रशस्तम् $UPB^1L_2$; °वस्थानप्रशस्तम् $G_1J$ **44.1** उद्यत° *conj.*; उद्धत° $G_1U$; उदायुधानुद्यत° $PB^1L_2$; उदायुधानुद्धत° J **44.1** सदर्पान् ] $PB^1J$; सदक्षान् $G_1$; सदृप्तान् U; सचर्पान् $L_2$ **44.1** राक्षसान् ] $G_1UB^{3pc}J$; *om.* $B^{1ac}L_2$ **44.1** आगच्छतो ] *em.*; आगच्छन्तः $G_1UJ$; आपततः आगच्छतः P; आपततो भ्यायातान् $B^1$; आपततो द्यायातान् $L_2$ **44.1** वीक्ष्य ] $B^1L_2$; तान्वीक्ष्य $G_1UJ$; *om.* P **44.1** रामो ] $G_1UB^1L_2$; रामः आलोक्य P; श्रीरामो J **44.1** जयसम्भावनां ] *conj.*; जयाशां $G_1UB^1L_2J$; जयाशाम् जयसम्भावनां P **44.1** धनुषि ] P; चापे $G_1UB^1J$; चापो $L_2$ **44.2** स्थापयामास ] *conj.*; निदधे स्थापयामास Σ **44.2** रक्षार्थम् ] $G_1B^1L_2J$; रक्षण्यं (?) U; न रक्षार्थं तां तस्मिन् निक्षिप्य P **44.2** धनुरादाय ] $G_1UB^1L_2$; धनुराधाय PJ **44.2** तदाशंसां ] $G_1UPB^1J$; तशाशंशां $L_2$ **44.3** प्रत्यैच्छ° ] $G^{pc}_1UPB^1L_2J$; प्रत्यैच्छे° $G^{pc}_1$

निश्चितं राम एक एवासीत्। राक्षसाः सहस्राण्यभूवन्। ते पुनर्यत्परिमाणा एवासंस्तैस्तावत्सङ्ख्यो राम आलुलोके। एकेनैकेन रक्षसा भयात्सहस्रसङ्ख्यो रामो दृष्ट इति वाक्यार्थः॥ ४५॥

**असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्।**
**न चक्षमे शुभाचारो ऽसद्दूषणमिवात्मनः॥ ४६॥**

दुर्जनेन रक्षोलोकेन दूषणाख्यं राक्षसं रणाय विसृष्टं न सेहे। तं दृष्ट्वा चुकोपेत्यर्थः। साधुर्यथा अविद्यमानमेवात्मनि प्रयुक्तं दूषणं मिथ्याभिशंसनं न क्षमते॥ ४६॥

**तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः।**
**क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः॥ ४७॥**

रामो दूषणं खरत्रिशिरसौ तन्नामानौ च द्वौ राक्षसौ बाणैः प्रत्यैच्छत्। ते

---

**46 cd.** शुभाचारो ऽसद्दूषणम् ] $G_1UB^1JB_2^MB_4^MB_7^M$; शुभाचारः सन् दूषणम् $PV^M$Hem.Ar.$^{vl}$; शुभाचारो स--- $L_2$; शुभाचारोः संदूषणम् $D^M$; शुभाचारोस् सन् दूषणम् $B_3^M$; शुभाचारो स दूषणम् $B_5^M$; शुभाचारः स दूषणम् Hem.$^{vl}$Mall.Jin. (Ar.Nā. uncertain) **47 cd.** °त्रिशिरसौ ] $B^1L_2D^MV^MB_3^MB_4^MB_5^M$𝕮; त्रिशरसौ $G_1UPJB_2^MB_7^M$

---

**46** $B_1^M$ breaks off after काकुत्स्थः.

---

**45.1** निश्चितं ] *conj.*; कामं निश्चितं Σ **45.1** राम एक ] $UPB^1L_2$; राम $G_1$; श्रीराम एक J **45.1** राक्षसाः ] U; यातुधाना राक्षसाः $G_1PB^1L_2J$ **45.1** सहस्राण्यभूवन् ] *conj.*; सहस्रशः सहस्राणि अभूवन् Σ **45.1** ते ] $G_1UPL_2J$; तं $B^1$ **45.1** पुनर्यत्परिमाणा ] *conj.*; पुनर्यावन्त $G_1UJ$; पुनः यावन्तः यावत् +यत्+परिणामाः P; पुनर्यावन्तो यत्परिमाणा $B^1L_2$ **45.2** एवासंस्तैस्तावत्सङ्ख्यो ] $B^1$; एवासंस्तावत्सङ्ख्यो $G_1U$; आसन् तैस्तावत्सङ्ख्यो $PL_2$; एवासंस्तावत्संख्यः J **45.2** राम आलुलोके ] *conj.*; रामो ददृशे आलुलोके $G_1UPB^1L_2$; श्रीरामो ददृशे आलुलोके J **45.2** एकेनैकेन ] $G_1UPB^1J$; एकेनैके $L_2$ **45.2** रामो ] $G_1UPB^1L_2$; श्रीरामो J **46.1** दुर्जनेन ] P; असज्जनेन दुर्जनेन $G_1UB^1L_2J$ **46.1** दूषणाख्यं ] *conj.*; पुरः प्रयुक्तं दूषणं दूषणाख्यं $G_1UPB^1J$; ---युक्तं $L_2$ **46.1** न सेहे ] *conj.*; न चक्षमे न सेहे $G_1UPB^1J$; न---न सेहे $L_2$ **46.1** तं ] $PB^1$; *om.* $G_1UJ$; त $L_2$ **46.2** चुकोपे° ] $G_1PB^1J$; चुकेपे° U; चकोपे° $L_2$ **46.2** साधुर्यथा अविद्यमानमे° ] *conj.*; शुभाचरतीति शुभाचारः साधुर्यथा असदविद्यमानमे° $G_1J$; शुभमाचरतीति शुभाचारः साधुर्यथा असदविद्यमानमे° $PB^1L_2$; शुभमाचरतीति शुभाचारः साधुर्यथा असदविद्यः मानमे° U **46.2** प्रयुक्तं ] $UPB^1L_2J$; युक्तं $G_1$ **46.2** दूषणं ] $G_1UB^1L_2J$; दूषणं दोषं P **47.1** रामो दूषणं ] *conj.*; स रामस्तं दूषणं $G_1UPB^1L_2$; स श्रीरामः तं दूषणं J **47.1** खरत्रिशिरसौ ] $B^{3pc}L_2$; खरत्रिशरसौ $G_1^{pc}UPJ$; खरत्रिशरसौ च $G_1^{ac}$; खरत्रिरसौ $B^{1ac}$ **47.1** बाणैः ] P; शरैर्बाणैः $G_1UB^1L_2J$ **47.1** प्रत्यैच्छत् ] *conj.*; प्रतिजग्राह प्रत्यैच्छत् Σ

तु रामस्य शराः क्रमेण निर्गता अपि तस्य कार्मुकाद्युगपदिव प्रसस्रुरिति लाघवोक्तिः॥ ४७॥

तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः।
आयुर्देहातिगैः पीतं रुधिरं च पतत्त्रिभिः॥ ४८॥

तेषां त्रयाणां रक्षोनाथानां खरादीनां तीक्ष्णैर्बाणैः कायं विभिद्य जीवितं ग्रस्तम्। रक्तं पुनः कङ्कगृध्रादिभिः पक्षिभिः। आदाविव विशुद्धिर्येषां। तीक्ष्णत्वाच्छीघ्रत्वाच्च प्रविश्यैव निष्क्रान्तैः। अरुधिरारुणैरित्यर्थः। पूर्वभागानुरूप्येण वा विशुद्धिर्येषां तैरशोणितोपलिप्तैरित्यर्थः। यदि वा विशुद्धिर्गतिस्पष्टता॥ ४८॥

तस्मिन्रामशरोत्कृत्ते बले महति रक्षसाम्।
उच्छ्रितं ददृशे ऽन्यत्र कबन्धेभ्यो न किञ्चन॥ ४९॥

तस्मिन्रक्षसां बृहति सैन्ये रामशरैर्लूने कबन्धान्वर्जयित्वा परं न किञ्चिदुन्नतं

**48 d.** च ] G$_1$UB$^3$JD$^M$V$^M$B$_2^M$B$_3^M$B$_5^M$B$_7^M$Jin.; तु PB$_4^M$Hem.Mall.Ar.(?)Nā. **49 c.** उच्छ्रितं ददृशे ऽन्यत्र ] G$_1$UB$^3$JD$^M$V$^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$Hem.Ar.Nā.Jin.; उच्छ्रितं ददृशे तत्र B$_2^M$; उद्धतं ददृशे न्यत्र P; उत्थितं ददृशे ऽन्यच्च Mall.

**47** After क्रमनिर्गता the scribe of L$_2$ has left the rest of the folio blank, as well as the top of the next, and its text resumes in 12:54d.

**47.2** ते तु रामस्य शराः ] P; ते शराः पुनः G$_1$UB$^1$L$_2$J **47.2** क्रमेण निर्गता अपि ] *conj.*; क्रमशः क्रमनिर्गतापि G$_1$J; क्रमशः क्रमनिर्गता अपि UB$^1$; क्रमशः क्रमेण निर्गता अपि P; क्रमशः क्रमनिर्गता ⊔ L$_2$ **47.2** कार्मुकाद्युगपदिव प्रसस्रुरिति ] *conj.*; चापात्सममिवोद्ययुः G$_1$; चापात्कार्मुकात्समं युगपदिवोद्ययुः प्रसस्रुरिति UB$^1$J; चापात्समं युगपदिवोद्ययुः प्रसस्रुरिति P **48.1** तीक्ष्णैर्बाणैः कायं विभिद्य ] *conj.*; शितैस्तीक्ष्णैर्बाणैर्देहातिगैः कायं विभिद्य G$_1$UB$^1$J; शितैस्तीक्ष्णैः बाणैः देहातिगैः देहं विभिद्य P **48.1** जीवितं ग्रस्तम् ] *conj.*; आयुर्जीवितं पीतं ग्रस्तम् G$_1$UPB$^1$J **48.2** पुनः ] G$_1$UPB$^3$; पपुः J **48.2** कङ्कगृध्रादिभिः ] *em.*; पतत्त्रिभिः कङ्कगृद्धादिभिः G$_1$; पतत्त्रिभिः कङ्कगृद्धादिभिः UPB$^3$; कंकगृद्धादिभिः J **48.2** आदाविव विशुद्धिर्येषां तैरशोणितलिप्तैरित्यर्थः ] *conj.*; यथापूर्वविशुद्धिभिः। आदावेव विशुद्धिर्येषां तैरशोणितलिप्तैरित्यर्थः ] G$_1$UB$^1$J; यथापूर्वविशुद्धिभिः यथापूर्वमादाविव विशुद्धिर्येषां तैस् P **48.3** अरुधिरा° ] G$_1$PJ; आरुधिरा° UB$^3$ **48.4** पूर्वभागानुरूप्येण वा विशुद्धिर्येषां तैरशोणितोपलिप्तैरित्यर्थः ] P; *om.* G$_1$UB$^1$J **48.4** यदि वा ] G$_1$PB$^1$J; यद्वा U **48.4** विशुद्धिर्गतिस्पष्टता ] G$_1$UPJ; विशुद्धा गतिः स्पष्टता B$^3$ **49.1** बृहति सैन्ये ] *conj.*; महति बृहति बले सैन्ये G$_1$UB$^3$J; महति बले सैन्ये P **49.1** रामशरैर्लूने ] *conj.*; रामशरैरुत्कृत्ते लूने G$_1$P; रामशरैः कृत्ते लूने UB$^3$; श्रीरामशरैरुत्कृत्ते लूने J **49.1** कबन्धान्वर्जयित्वा ] *conj.*; कबन्धेभ्यो ऽन्यत्र कबन्धान्वर्जयित्वा G$_1$UPB$^3$J **49.1** परं ] G$_1$PJ; परां UB$^3$

दृष्टं जनेन॥ ४९॥

सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम्।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी॥ ५०॥

सा राक्षसानां सेना शरनिकरक्षेपिणं रामं योधयित्वा तेन सह युद्ध्वेत्यर्थः। अजागरणाय गृध्राणां छायायां निदद्रौ, ममारेत्यर्थः। गृध्राणां छाया गृध्रच्छायम्। विभाषा सेनासुराच्छायाशालानिशानामिति नपुंसकत्वे छायाशब्दस्य ह्रस्वः॥ ५०॥

राघवास्त्राग्निदग्धानां रावणं प्रति रक्षसाम्।
तेषां शूर्पनखैवैका दुष्प्रवृत्तिहराभवत्॥ ५१॥

तेषां रक्षसां रामस्य शरानलेन भस्मीकृतानां रावणाय दुष्टां वार्तां हरतीति

---

**51 a.** °स्त्राग्निदग्धानां ] $G_1UPB^3JV^MB_2^MB_3^MB_4^MB_5^MB_7^M$; °स्त्रेषुदग्धानां Vall.[vl]; °स्त्रानिदग्धानां $D^M$; °स्त्रविशीर्णानां Hem.Ar.(?)Nā.; °स्त्रविदीर्णानां Mall.Jin. **51 c.** °नखैवैका ] $G_1PB^3JD^MV^MB_2^MB_3^MB_5^MB_7^M$℄; °नखा नाम U; °नखेवैका $B_4^M$

---

**50.3** विभाषा सेनासुराच्छायाशालानिशानाम् ] *Aṣṭādhyāyī* 2.4.25.

---

**49.2** °न्नतं दृष्टं ] *conj.*; °च्छ्रितमुन्नतंमुत्थितं दृष्ट्वं $G_1$; °च्छ्रितमुन्नतमुत्थितं दृष्टं UJ; °च्छ्रितं उन्नतं उत्थितं ददृशे दृष्टं P; °च्छ्रितमुन्नतमुत्थितं दृष्टि $B^3$ **49.2** जनेन ] $G_1$UPJ; जननेन $B^3$ **50.1** राक्षसानां ] *conj.*; सुरद्विषां राक्षसानां $G_1UPB^3J$ **50.1** सेना ] $UB^3$; वरूथिनी सेना $G_1$PJ **50.1** शरनिकरक्षेपिणं ] *conj.*; बाणवर्षिणं (र्णीं $G_1^{ac}$) शरनिकरक्षेपिणम् $G_1$P; बाणवर्षणं शरनिकरक्षेपणं U; बाणवर्षिणं शरनिकरक्षेपणं $B^3$; बाणवर्षणं शरनिकरक्षेपिणं J **50.1** रामं ] $G_1UPB^3$; श्रीरामं J **50.1** युद्ध्वेत्यर्थः ] $G_1$PJ; युद्ध्येत्यर्थः $UB^3$ **50.2** अजागरणाय ] *conj.*; पुनरप्रबोधाय मरणाय $G_1UB^3J$; पुनरप्रबोधाय मरणायेत्यर्थः P **50.2** गृध्राणां ] *conj.*; गृद्धछाये गृद्धानां $G_1$; गृद्ध्रच्छाये गृद्ध्राणां $UPB^3J$ **50.2** छायायां निदद्रौ ममारेत्यर्थः। गृध्राणां ] *om.* P(eyeskip) **50.2** निदद्रौ ] *conj.*; सुष्वाप निदद्रौ $G_1UB^3J$ **50.2** गृध्राणां ] *em.*; गृद्धानां $G_1$; गृद्ध्राणां $UB^3J$ **50.3** गृध्रच्छायम् ] UP; गृद्धच्छाया $G_1$; गृद्ध्रच्छाया $B^3$; गृद्ध्रच्छायां J **50.3** सेनासुराच्छायाशालानिशानामिति ] $UB^3$; सेनासुरशालेति $G_1$P; च्छाया सेनासुरशालेति J **50.3** नपुंसकत्वे ] $G_1PB^3J$; नपुंसकत्वं U **51.1** रक्षसां ] $UPB^3$; राक्षसां $G_1$J **51.1** रामस्य शरानलेन ] *conj.*; राघवस्यास्त्राग्निना शरानलेन $UB^3$; राघवस्य रामस्यास्त्राग्निना शरानलेन P; रावणस्यास्त्राग्निना शरानलेन $G_1$J **51.1** भस्मीकृतानां ] *conj.*; दग्धानां भस्मीकृतानां $G_1UPB^3J$ **51.1** रावणाय ] *conj.*; रावणं प्रति रावणाय $G_1UPB^3J$ **51.1** दुष्टां वार्तां ] U; दुष्प्रत्तिं दुष्टां वार्तां $G_1$J; दुष्प्रवृत्तिं दुष्टां प्रवृत्तिं वार्तां P; दुष्प्रवृत्तिं दुष्टां वार्तां $B^3$

दुर्वार्ताकथयित्री एकैव शूर्पनखाभवत्, न त्वन्यः को ऽपि, एकस्या अस्या अवशिष्टत्वात्। अस्त्रमेवाग्निरस्त्राग्निः। अस्त्रेष्विति पाठे अस्त्रप्रयुक्ता इषव इति शाकपार्थिवादित्वात्समासः॥ ५१॥

निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्धसु॥ ५२॥

भगिन्या वैरूप्यकरणाद्बान्धवानां मारणाच्च रावणो दशस्वपि शिरःसु रामेण चरणं निक्षिप्तमबोधि। महापरिभवं तमजीगणदित्यर्थः॥ ५२॥

रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः॥ ५३॥

किं बहुना? रावणः परिभवमसहमानो विचित्रवर्णमृगरूपेण मारीचेन रामलक्ष्मणौ विप्रलभ्य सीतामहार्षीत्। जटायुषो युद्धश्रमेण क्षणं विलम्बितः कृतान्तराय इत्यर्थः। स हि तत्र जटायुषं सीतां प्रत्याहर्तुं युध्यमानमवधीत्।

---

**51.2 दुर्वार्ताकथयित्री** ] $G_1UB^3J$; दुर्वार्तां कथयती P **51.2 °भवत्** ] $UPB^3$; °भवन् $G_1J$ **51.3 एकस्या अस्या अवशिष्टत्वात्** ] P; एकस्याप्यनवशिष्टत्वात् $G_1UB^3J$ **51.3 अस्त्रमेवाग्निरस्त्राग्निः** ] P; अस्त्राणामग्निरस्त्राग्निः $G_1UB^3J$ **51.4 अस्त्रप्रयुक्ता इषव इति** ] P; अस्त्रप्रयुक्त एवैष वर्षति $UB^3$; अस्त्रप्रयुक्त इष वर्षति $G_1J$ **52.1 भगिन्या वैरूप्यकरणाद्** ] *conj.*; सुसुर्भगिन्या नि(न्नि° $G_1$, र्नि° J)ग्रहाद्वैरूप्यकरणात् $G_1UB^3J$; स्वसुः भगिन्याः निग्रहाद्वैरूप्यकरणात् P **52.1 बान्धवानां** ] *conj.*; आप्तानां बान्धवानां $G_1UPB^3J$ **52.1 मारणाच्च** ] *conj.*; वधाच्च मरणाच्च $G_1UPB^3$; वधाश्च मरणाच्च J **52.1 रावणो** ] *conj.*; धनुदानुजो रावणः $G_1$; धनुधनदानुजः रावणः परिभवमसहमानः विचित्र U; धनदानुजो रावणः $PB^3$; धनुदानजो रावणः J **52.1 दशस्वपि** ] $G_1UPJ$; दशसु $B^3$ **52.1 शिरःसु** ] *conj.*; मूर्धसु शिरस्सु $G_1UPB^3J$ **52.2 रामेण चरणं** ] *conj.*; रामेण पदं चरणं $G_1P$; रामेण पदं $UB^3$; ⊔ J **52.2 निक्षिप्तमबोधि** ] *conj.*; निहितं कृतं मेने अबोधि $G_1PJ$; निहितं मेने कृतमबोधि U; निहितं मेने निक्षिप्तं अबोधि $B^3$ **52.2 °परिभवं** ] $G_1UB^3J$; °पराभवं P **53.1 बहुना** ] $G_1UPB^3$; बहुनोक्तेन J **53.1 रावणः** ] *conj.*; स रावणः $G_1UPB^3J$ **53.1 परिभवमसहमानो** ] $G_1UB^3$; रामपरिभवमसहमानो P; परिभवमसहमानौ J **53.1 मारीचेन** ] *conj.*; राक्षसा मरीचेन $G_1$; रक्षसा मारीचेन $UPB^3$; राक्षसा मारीचेन J **53.2 रामलक्ष्मणौ** ] *conj.*; राघवौ रामलक्ष्मणौ $G_1UPB^3$; राघवौ श्रीरामलक्ष्मणौ J **53.2 विप्रलभ्य** ] *conj.*; वञ्चयित्वा विप्रलभ्य $G_1PJ$; वञ्चयित्वा विप्रलम्भ्य U; वञ्चयित्वा विप्रलम्ब्य $B^3$ **53.2 सीतामहार्षीत्** ] *conj.*; सीतां जहाराहार्षीत् $G_1UPJ$; सीतां जहाराहार्षीदित्यर्थः $B^3$ **53.2 जटायुषो युद्धश्रमेण** ] *conj.*; पक्षीन्द्रस्य जटायुषः प्रयासेन युद्धश्रमेण $G_1UB^3J$; पक्षीन्द्रस्य जटायुषः प्रयासेन विशुद्धश्रमेण P **53.2 विलम्बितः** ] *conj.*; विघ्नितो विलम्बितः $G_1UPB^3J$ **53.3 प्रत्याहर्तुं** ] $B^3J$; प्रत्याहन्तुं $G_1$

एतच्च सर्वमागमाद्बोद्धव्यम्॥ ५३॥

**तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम्।**
**प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः॥ ५४॥**

राघवौ मारीचं हत्वाश्रमं निवर्तमानौ सीतां हृतामन्विष्यन्तौ जटायुषं छिन्नपक्षं दृष्टवन्तौ। गलस्थैरसुभिर्दशरथस्नेहस्याविद्यमानर्णम्, दशरथस्नेहादृणरहितं वा। स हि तस्य परं मित्रमासीत्॥ ५४॥

**स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम्।**
**आत्मनस्तु महत्कर्म व्रणैरावेद्य संस्थितः॥ ५५॥**

जटायू रावणेन नीतां सीतां रामलक्ष्मणाभ्यां वाचाकथयत्। आत्मनो युद्धलक्षणमपदानं प्रहारैरुत्का मृतः।
प्रमीतमुपसम्पन्नं संस्थितं च विपश्चितः।

---

**55 c.** आत्मनस्तु ] ŚHem.Jin.; आत्मनः सु° Mall.Ar.Nā. **55 d.** व्रणै° ] Σ; प्राणै° $Ar^{vl}$

---

**54** The testimony of $L_2$ resumes here in 12:54d.

---

**55.3** प्रमीतमुपसम्पन्नं ··· स्यादौर्ध्वदैहिकम् Source unknown.

---

**54.1** राघवौ ] *conj.*; तौ राघवौ $G_1UPB^3L_2$; तौ श्रीरामलक्ष्मणौ J **54.1** हत्वाश्रमं नि° ] P; हत्वाश्रमान्नि° $G_1UB^3L_2J$ **54.1** हृतामन्विष्यन्तौ ] $G_1B^3L_2J$; हृतां दृष्टवन्तौ अन्वेषन्तौ U; हृतामन्विषन्तौ P **54.1** जटायुषं ] *conj.*; गृद्ध्रं जटायुषं Σ **54.2** छिन्नपक्षं दृष्टवन्तौ ] *conj.*; लूनपक्षं जिनपक्षमपश्यतां दृष्टवन्तौ $G_1$; लूनपक्षं छिन्नपक्षमपश्यतां दृष्टवन्तौ (न्तः $B^{3pc}$) $UB^3L_2J$; लूनपक्षं छिन्नाङ्ग⏑⏑ अपश्यतां दृष्टवन्तौ P **54.2** गलस्थैरसुभिर्दश° ] *conj.*; कण्ठवर्तिभिः प्राणैरसुभिर्दश° $G_1UB^3L_2J$; कण्ठवर्तिभिः गलस्थैः प्राणैरसुभिः दश° P **54.3** स्नेहस्याविद्यमानर्णम्, दशरथस्नेहात्दृणरहितं वा ] P; °स्नेहादनृणमृणरहितम् $G_1UB^3L_2J$ **54.3** तस्य ] $G_1PB^3L_2J$; *om.* U **55.1** जटायू ] *conj.*; स जटायुः Σ **55.1** नीतां ] *conj.*; हृतां नीतां Σ **55.1** सीतां ] P; मैथिलीं सीतां $G_1UB^3J$; सीतां मैथिलीं $L_2$ **55.1** रामलक्षणाभ्यां ] *conj.*; ताभ्यां $G_1$; ताभ्यां रामलक्षणाभ्यां $UPB^3L_2$; ताभ्यां श्रीरामलक्ष्मणाभ्यां J **55.1** वाचाकथयत् ] *conj.*; वचसाचष्टाकथयत् $G_1UB^3$; वचसा ऽवाचष्ट अकथयत् P; वचसा वाचा आचष्टाकथयत् $L_2$; वचसाऽचष्ट कथयत् J **55.2** °लक्षणमपदानं ] *conj.*; °लक्षणं महत्कर्म अपदानं $G_1PJ$; °लक्षणं महत्कर्म अपादानं $UB^3L_2$ **55.2** प्रहारैरुत्का ] *conj.*; व्रणैः प्रहारैरावेद्योत्का Σ **55.2** मृतः ] *conj.*; संस्थितो मृतः Σ **55.3** प्रमीत° ] $G_1PB^3L_2J$; प्रसीत° U **55.3** संस्थितं च ] $G_1U^{pc}PL_2J$; संस्थतं च $U^{ac}$; संस्थितश्च $B^3$

मृतमाहुस्तदर्थं च दानं स्यादौर्ध्वदैहिकम्॥ ५५॥

**तयोस्तस्मिन्नवीभूतपितृव्यापत्तिदुःखयोः।**
**पितरीवाग्निसंस्कारानन्तरा ववृते क्रिया॥ ५६॥**

राघवयोर्जटायुषि वह्निदाहात्पश्चाज्जलदानादिकं कर्म प्रवृत्तं जनके यथा। नवसम्पन्नजनकमरणशोकयोः॥ ५६॥

**वधनिर्धौतशापस्य कबन्धस्योपदेशतः।**
**मुमूर्छ सख्यं रामस्य समानव्यसने हरौ॥ ५७॥**

ततो रामस्य सुग्रीवे मैत्री ववृधे, यतस्तुल्यदुःखे। तस्यापि हृता भार्या, सोऽपि राज्यात्परिच्युतः, उन्मत्तः। तत्तेन कथमज्ञायीत्याह। मारणापनीतशाप-

---

**56 b.** °दुःखयोः ] $PL_2JD^MB_3^MB_4^MB_7^M$Jin.; °द्वःखयोः $G_1$; °शोकयोः $UB^3V^MB_2^MB_5^M$ Hem.Mall.Ar.Nā. **56 cd.** °स्कारानन्तरा ववृते क्रिया ] $\mathbf{V}D^MV^MB_2^MB_3^MB_5^MB_7^M$; °स्कारानन्तरं ववृते क्रियाः $B_4^M$; °स्कारात्पुनराववृते क्रिया Hem.Ar.Nā.; °स्कारात्परा ववृतिरे क्रियाः Mall.Jin. **57 a.** °निर्धौत° ] **Ś**Hem.; °निर्धूत° Mall.Ar.Nā.Jin.

---

**55.4** तदर्थं ] $G_1UPB^3L_2$; तदथं J **55.4** °दैहिकम् ] $G_1UPB^3L_2$; °दैहिकमित्युक्तम् J **56.1** राघवयोर्जटायुषि ] *conj.*; तयो राघवयोस्तस्मिञ्जटायुषि $G_1UPB^3L_2$; तयोः श्रीराघवयोः तस्मिज्जटायुषि J **56.1** वह्निदाहात्पश्चाज् ] *conj.*; अग्निसंस्कारानन्तरा वह्निदाहात्पश्चात्क्रिया $G_1PL_2J$; अग्निसंस्कारानन्तरा वह्निदाहात्पश्चाज् U; अग्निसंस्कारानन्तरा वह्निदाहस्य पश्चात्क्रिया $B^3$ **56.1** प्रवृत्तं ] *conj.*; ववृते प्रवृत्तम् Σ **56.1** जनके यथा ] *conj.*; पितरि यथा $G_1UPL_2J$; पितरि इव जनके यथा $B^3$ **56.2** नवसम्पन्न° ] *conj.*; नवीभूतं नवं सम्पन्नं $G_1UPB^{3ac}L_2J$; नवीभूतपितृव्यापत्तिशोकयोः नवीभूतं नवं सम्पन्नं $B^{3pc}$ **56.2** °जनकमरणशोकयोः ] $G_1$; जनकमरणशोको ययोः U; पितृव्यापत्तिदुःखं जनकमरणशोको ययोः P; जनकमरणेन शोको ययोस्तयोः $B^3$; पितृव्य---तिदुःखजनकमरणशोको ययोः $L_2$; जननसरणशोको ययोः J **57.1** ततो रामस्य ] $G_1UPB^3L_2$; ततः श्रीरामस्य J **57.1** सुग्रीवे ] *conj.*; हरौ सुग्रीवे Σ **57.1** मैत्री ] *conj.*; सौख्यं मीत्रीं $G_1$; सख्यं मैत्री UP $L_2$; सख्यं मैत्रीं $B^3$; सौख्यं मैत्री J **57.1** ववृधे ] *conj.*; मुमूर्छ ववृधे $UPL_2J$; मुमुर्छ ववृधे $G_1B^3$ **57.1** यतस्तुल्यदुःखे ] *conj.*; यतः समानव्यसने तुल्यदुःखे Σ **57.2** राज्यात्परिच्युतः ] $G_1PL_2J$; राज्याच्च्युतः U; राज्याच्च परिच्युतः $B^3$ **57.2** उन्मत्तः ] $G_1UPB^{3pc}L_2J$; *om.* $B^{3ac}$ **57.2** तत्तेन ] $G_1J$; तत्केन $UB^3$; तेन $PL_2$

स्य कबन्धस्य वाक्यात्। मुनिशप्तो हि श्रीतनयो दनुः कबन्धतामागतस्ताभ्यां बाहुच्छेदेन हतः स्वं रूपमाप्य प्रत्युपकाराय तयोः सहायमृष्यमूकवासिनं सुग्रीवमकथयत्॥ ५७॥

स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्॥ ५८॥

ततो विहितसख्यो रामो वालिनं मारयित्वा तदीये राज्ये चिरादभिलषिते सुग्रीवं कृतवान्। धातोरस्त्यादिकस्य स्थाने यथा विद्वानादेशं भ्वादिकं संनिवेशयति। वीर्यवान्॥ ५८॥

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः॥ ५९॥

ततो भर्त्रा सुग्रीवेण नियुक्ता वानराश्चतुर्दिक्कं सीतां गवेषयितुं बभ्रमुः। वि-

---

**58 d.** संन्यवेशयत् ] $G_1UPB^3L_2V^MB_2^MB_3^MB_4^MB_5^MB_7^M$**C**; च न्यवेशयत् J; स न्यवेशयत् $D^M$ **59 c.** ॰रार्तस्य ] $UPB^3L_2JV^MB_2^MB_3^MB_4^MB_5^MB_7^M$Hem.Mall.; ॰रान्तस्य $G_1D^M$; ॰रुत्कस्य Ar.Nā.Jin.

---

**57.3** मारणापनीतशापस्य कबन्धस्य वाक्यात् ] *conj.*; वधनिर्धौतशापस्य मारणेनापनी(ने $G_1^{pc}$J)तः शापः यस्य वधनिर्धौतशापस्य कबन्धेभ्योपदेशात् $G_1$J; वधनिर्धौतशापस्य मारणेनापि नीतः शापो यस्य कदम्बसोपदेशात् U; वधनिर्धौतशापस्य वधेन शापान्मोचितस्य कबन्धस्योपदेशात् वाक्यात् P; वधनिर्धौतशापस्य मारणेनापनीतः शापः यस्य तस्य कबन्धस्योपदेशतः कबन्धस्य वाक्यात् $B^3$; वधनिर्धौतशापस्य वधेन शापान्मोचितस्य कबन्धस्यो(कबन्धो $L_2$)पदेशात् $B^{3pc}L_2$ **57.3** मुनिशप्तो ] $G_1UPB^3J$; मुनिशस्तो $L_2$ **57.3** दनुः ] $G_1UB^3L_2J$; धनुः P **57.3** कबन्धताम् ] $G_1UPJ$; कबन्धत्वम् $B^3$; कम्बन्धताम् $L_2$ **57.4** स्वं रूपमाप्य ] $B^3$; स्वं रूपमपि $G_1$; स्वं रूपमस्य U; स्वरूपमाप्य $PL_2$; स्वरूपमपि J **57.4** प्रत्युपकाराय ] $UPB^3L_2J$; प्रत्युपकारय $G_1$ **57.4** सहायमृष्य॰ ] $G_1B^3L_2J$; सहायमृषि॰ UP **58.1** ततो ] $G_1UL_2J$; ततः स $PB^3$ **58.1** विहितसख्यो रामो ] $G_1PB^3L_2$; विहतसख्यो रामो U; विहितसख्यः(ख्यो $J^{ac}$) श्रीरामो J **58.1** मारयित्वा ] *conj.*; हत्वा $G_1UPL_2J$; हत्वा मारयित्वा $B^3$ **58.1** तदीये ] $B^{3ac}$; तत्पदे तदीये $G_1UPB^{3pc}J$; तत्पदे तदीय॰ $L_2$ **58.2** चिरादभिलषिते ] $UB^3$; चिराभिलषिते $G_1P$; चिराभिलाषिते $L_2J$ **58.2** कृतवान् ] *conj.*; सन्न्यवेशयत्कृतवान् $G_1B^3J$; संन्न्यकृतवान् U; सन्न्यवेशयत् $PL_2$ **58.2** धातोरस्त्यादिकस्य ] $UPL_2$; धातोरस्थ्यादिक॰ $G_1B^{3ac}J$; धातोरस्त्यादिक॰ $B^{3pc}$ **58.2** भ्वादिकं ] $B^{3ac}$; भू इत्यादिकं $G_1B^{3pc}J$; भूरित्यादिकं $UPL_2$ **58.3** वीर्यवान् ] *conj.*; वीरो वीर्यवान् Σ **59.1** भर्त्रा ] $G_1UPB^3L_2$; भर्ता J **59.1** सुग्रीवेण ] $UB^3$; सुग्रीवेन $G_1UPL_2$ **59.1** नियुक्ता ] *conj.*; चोदिता नियुक्ताः $G_1UJ$; चोदिताः $PB^3L_2$ **59.1** वानराश्चतुर्दिक्कं ] *conj.*; कपयः वानराः इतस्ततश्चतुर्दिक्कं Σ **59.1** सीतां गवेषयितुं ] *conj.*; वैदेहीं सीतामन्वेष्टुं गवेषयितुं Σ **59.1** बभ्रमुः ] *conj.*; चेरुर्बभ्रमुः Σ

रहार्तस्य रामस्य चित्ताभिलाषा इव। अपि सीतां लप्स्यामहे। शत्रुमुन्मूल्य तामानेष्याम इत्येवंरूपा मनोरथाः सर्वतश्चेरुः॥ ५९॥

प्रवृत्तावुपलब्धायां तस्याः सम्पातिदर्शनात्।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः॥ ६०॥

सम्पातिर्नाम गृद्धराजो जटायुषो ऽग्रजः, तस्यावलोकनात्तन्मुखात्सीतावार्तायां प्राप्तायां तद्दर्शनार्थं हनुमानुदधिमुदतरत्, संसारं निरहङ्कारो योगीव। अहं मम इत्याद्यभिमानत्यागान्मोक्षावाप्तिः। वानरैर्हि सीतामलभमानैर्विन्ध्याद्रिगुहायां जटायुषः कथां कुर्वद्भिः सम्पातिरालुलोके। तेन च जातपरिचयेन पारेसमुद्रं रावणवसतिस्तेषामाचचक्षे। ततो वायुसुतः शतयोजनविस्तीर्णमब्धिमुत्तीर्ण इत्यागमः॥ ६०॥

---

**60 d.** संसारमिव निर्ममः ] UPB$^3$L$_2$V$^M$B$_2^M$B$_3^M$B$_4^M$B$_5^M$B$_7^M$℄; संसारमिव निर्मलः G$_1$D$^M$; संसार इव निर्मलः J

---

